3 1761 07995435 0

Digitized by the Internet Archive
in 2010 with funding from
University of Toronto

http://www.archive.org/details/prtaparudrayaobh00vidy

LIBRARY
OCT 27 1909
UNIVERSITY OF TORONTO
PK
2916
V5
1909a
V:2

अथ दोषप्रकरणम् ।

अथ काव्यजीवित[1]भूतरसनिरूपणानन्तरं तदुपस्कारहेतूनां[2] [3]गुणानां सम्यग्विवेकाय दोषा निरूप्यन्ते ।

तत्र दोषसामान्यलक्षणम् ।

दोषः काव्यापकर्षस्य हेतुः शब्दार्थगोचरः ।

शब्दार्थमयत्वात् काव्यस्य तदपकर्षहेतु[4]नामपि दोषाणां शब्दगतत्वे नार्थगतत्वेन च द्वैविध्यम् । शब्दगतानामपि पदवाक्यगतत्वेन च द्वैविध्यम् । तत्र [5]पदगतदोषाः [6]कथ्यन्ते ।

अप्रयुक्तमपुष्टार्थमसमर्थं निरर्थकम् ।
नेयार्थं च्युतसंस्कारं संदिग्धं चाप्रयोजकम् ॥
क्लिष्टं गूढार्थकं ग्राम्यमन्यार्थं चाप्रतीतिकम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत् तथा ॥
अश्लीलं परुषं चेति दोषाः सप्तदश स्मृताः ।

एषां स्वरूपं निरूप्यते ।

यदप्रयुक्तं कविभिरप्रयुक्तं तदुच्यते ।
प्रकृतानुपयुक्तार्थमपुष्टार्थं तदुच्यते ॥

रसनिरूपणानन्तरं तदुपस्कारहेतुभूतगुणालंकारनिरूपणे प्रसक्तेऽपि तदुल्लङ्घ्य मध्ये दोषनिरूपणं संगमयन् प्रतिजानीते । अथेति । गुणानामित्यलंकाराणामप्युपलक्षणम् । सम्यगिति । अन्यथा विवेकमात्रस्य प्ररूढत्वाभावा[7]दिति भावः । [8]तत्र दोषसामान्यलक्षणमाह । दोष इति । रसापकर्षद्वारा काव्यापकर्षहेतुर्दोष इत्यर्थः । अत एवोक्तं काव्यप्रकाशे । 'मुख्यार्थनिहतिर्दोषः'—इत्यादिना । शब्दार्थगोचर इत्येतद्विभागपरम् ।

अत्र रसादिप्रतीतेर्विभावाद्यर्थमूलत्वाद् विभावादेश्च वाक्याधीनत्वात् वाक्यानां च [9]पदार्थलब्धत्वात् प्रथमभावितया तेषां तद् दोषनिरूपणं प्रतिजानीते । तत्र पदगतदोषा इति ।

यथोद्देशमेतेषां लक्षणमाह । यदप्रयुक्तमित्यादिना । अभिधानादावाम्नात-

---

१ M. omits भूत. २ °भूतानाम् M₄. ३ P drops गुणानाम्. ४ °हेतूनां दोषाणामपि M.; P. drops दोषाणाम्. ५ पदगता दोषाः M. ६ चिन्त्यन्ते M. ७ °दित्यर्थः m. ८ अत्र m. ९ पदारब्धत्वात् m.

योगमात्रप्रयुक्तं यदसमर्थं तदुच्यते ।
पादपूरणमात्रं[1] यत्तन्निरर्थकमुच्यते ॥
स्वसंकेतप्रसिद्धार्थं[2] नेयार्थं परिकीर्त्त्यते[3] ।
शब्दशास्त्रविरुद्धं यच्च्युतसंस्कारमुच्यते ॥
संदिग्धं तन्मतं यत्[4] स्यात् संदिग्धार्थप्रतीतिकृत् ।
तदप्रयोजकं यत् स्यादविशेषविधायकम् ॥
क्लिष्टं तदर्थावगतिर्दूरदूरायतो भवेत् ।
अप्रयुक्तमप्रसिद्धार्थं गूढार्थं परिकीर्त्त्यते ॥
पामरव्यवहारैकप्रसिद्धं[5] ग्राम्यमुच्यते ।
यद्रूढिप्रच्युतं[6] नाम तदन्यार्थमुदाहृतम् ॥
शास्त्रमात्रप्रसिद्धं[7] यदप्रतीतिकमुच्यते ।
अविमृष्टविधेयांशं गुणीभूतविधेयकम् ॥
विपरीतार्थधीर्यस्माद्विरुद्धमतिकृन्मतम् ।
अश्लीलं यदमाङ्गल्यजुगुप्साव्रीडधीकरम्[9] ॥

मपि कविभिरनादृतमप्रयुक्तमित्यर्थः । योगमात्रप्रसिद्धं शास्त्रमात्र[10]प्रसिद्धमित्यर्थः । मात्रशब्देन वाचकशक्तिविरहः प्रतिपाद्यते । स्वसंकेतप्रसिद्धार्थमिति । संकेतमात्राधीनार्थमित्यर्थः । [11]च्युतः संस्कारो व्याकरणकृतो यस्मात् तत् च्युतसंस्कारम् । विशेषविधायकं न भवतीत्यविशेषविधायकम् । दूरदूरा अतिदूरा व्यवहितेत्यर्थः । अप्रयुक्तमिति । यदुभयार्थं सं[12]देप्रसिद्धार्थे प्रयुक्तं तद्गूढार्थमित्यर्थः । एतदेव निहतार्थमिति केचित् । रूढेः प्रसिद्धेः प्रच्युतं रूढिप्रच्युतम् । अन्यार्थमवाचकमित्यपरे । अविमृष्टः प्राधान्येनानिर्दिष्टो विधेयांशो यत्र तदविमृष्टविधेयांशम् । तदेवाह । गुणीभूतविधेयकमिति ।

१ °मात्रार्थं तन्निरर्थक° P. २ °प्रक्लृप्त्यर्थम् P. ३ °मिष्यते R., M. ४ यस्मात् संदिग्धा° R. ५ पामरेष्वपि यत् प्रायः प्रसिद्धं R.; पामरेषु प्रसिद्धं यत् तद्ग्राम्यमनुमन्यते M. ६ °प्रस्थितम् R. ७ °प्रयुक्तम् M.; °प्रतीतं यदप्रती° T'. ८ यदप्रतीतं तदुच्यते R; यदप्रतीतमुदाहृतम् M. ९ यदमङ्गल्यं R.; तदमङ्गल्यजु° M. १० p. drops मात्र. ११ च्युतो यस्मात् m. १२ न प्रसिद्धार्थे m.

परुषं नाम तद्यत् स्याद्विहितं परुषाक्षरैः ।

अत्र वन्यवृत्तीनां[1] शत्रुस्त्रीणां वचनेषु दोषा उदाह्रियन्ते ।

अप्रयुक्तं यथा ।

विमुखा दैवताः सर्वे[2] ते नो दुश्च्यवनादयः ।
अरण्यगृहमेधिन्यो यैर्वयं हन्त कल्पिताः ॥ १ ॥

अत्र दैवता[3] इति पुल्लिङ्गप्रयोगः दुश्च्यवन इति चेन्द्रपरत्वेन कविभिर्न प्रयुक्तम्[4] ।

अपुष्टार्थं यथा ।

व्यर्थाष्टार्धार्धबाहूनाममीषामीदृशां[5] दशाम् ।
कथं[6] सहामहे धिग्धिक् कठिनं हन्त जीवितम्[7] ॥ २ ॥

यथायोगमुदाहरति । विमुखा इति । दैवता इति । 'वृन्दारका दैवतानि पुंसि वा देवता' इत्यमरः । दुःसहः च्यवनो मुनिरस्येति दुश्च्यवनः इन्द्रः । गृहेण पत्न्या गृहैर्वा मेधन्ते संगच्छन्त इति गृहमेधिनः गृहस्थाः तत्पत्न्यो गृहमेधिन्यः । 'गृहं पत्न्यां गृहेऽपि च' इति हलायुधः । 'मेधृ संगमे चे'त्यस्माद्धातोर्णिनिप्रत्ययः । अत्र दैवतदुश्च्यवनशब्दयोर्यथाक्रमं लिङ्गानुशासनशब्दानुशासनाज्ञातयोरपि कवीनामनादराद् दुष्टत्वमित्याह । अत्रेति । एकैकोदाहरणविवक्षायां पददोषद्वयमेतत् । समुदायविवक्षायां तु वाक्यदोषोऽयम् । विरोधिनो दुश्च्यवनादिदैवता इत्युक्ते समासदोषः । अप्रयुक्तादीनां त्रैविध्यस्यापि काव्यप्रकाशकारादिभिरङ्गीकृतत्वादिति द्रष्टव्यम् । एवमुत्तरत्रापि यथासंभवमूहनीयम् ।

व्यर्थेति । अष्टार्धार्धं द्वयं तद्विशिष्टा बाहवस्तथोक्ता इति मध्यमपदलोपी[9] समासः । जीवितमिति धिक्शब्दयोगे द्वितीया । तस्य 'नित्यवीप्सयोः' इत्या-

---

१ वनवृत्तीनाम् P., M. २ सर्वेऽतस्ते R. ३ दैवतशब्दपुल्लिङ्गप्रयोगः R. ४ प्रयुक्तः R., M. ५ °मीदृशीं R. ६ सहिष्यध्वे कथं M. ७ जीवनम् M. ८ m. has before this 'दारेष्वपि गृहः जाया च गृहिणी गृहाः' इति विश्वामरहलायुधाः । ९ मध्यपद° m.

अत्र व्यर्थबाहुद्वयानामिति विवक्षितेऽष्टार्धार्धबाहूनामित्यनुपयुक्तम्। एतदेवाविमृष्टविधेयांशस्योदाहरणम्। बाहुद्वयस्य वैयर्थ्ये विधेये तस्योपसर्जनत्वं प्रतीयते।

असमर्थं यथा।

विहाय वसुधामेनां चतुरम्बुधरावृताम्।
क्व नु गन्तव्यमस्माकं मरणेऽप्यसुखा स्थितिः॥ ३॥

अत्र जलनिधिपरत्वेनाम्बुधरपदमसमर्थम्।

अनर्थकनेयार्थच्युतसंस्कारसंदिग्धानि यथा।

विहाय च गृहांस्तान् वै व्यत्यस्तनवर्त्तयः।
कदा भविष्यते वासः कटकेषु महीभृताम्॥ ४॥

अत्र वै इति निरर्थकम्। व्यत्यस्तनवशब्देन वनप्रतीतिः स्वसंकेतमात्रायत्तेति नेयार्थकम्। भविष्यते इति भवतेरात्मनेपदित्वं शब्दशास्त्र-

---

भीक्ष्ण्ये द्विर्भावः। प्रकृतानुपयुक्ततां दर्शयति। अत्रेति। उदाहरणलाघवमाह। एतदेवेति। व्यर्थबाहुद्वयानामितीदमेवेत्यर्थः। अत्र दुर्दशाप्रस्तावे बाहूद्देशेन विधेयस्य वैयर्थ्यस्यान्यपदार्थप्रधानबहुव्रीहिवर्त्तिपदार्थत्वेन गुणीभावादविमृष्टविधेयांशाख्यो दोष इत्यर्थः।

विहायेति। अत्राम्बुधरशब्दस्य समुद्रे शाक्तप्रसिद्धिरेव न तु वाचकशक्तिः। अतोऽसमर्थत्वमित्याह। अत्रेति।

लाघवार्थमनर्थकादिचतुष्टयमेकेन श्लोकेनोदाहरति। विहाय चेति। अत्र वैशब्दद्योत्यस्य कस्यचिदप्यर्थस्यान्वयाभावात् पादपूरणमात्रप्रयोजकत्वेन निरर्थको वैशब्द इत्याह। अत्र वै इतीति। अत्र वाक्यसम्बंधैकलिपकत्वादायादेशाभावः। यमकेषु निरर्थकं न दोष इत्युक्तं हेमचन्द्रेण। व्यत्यस्तनवेत्यत्र वर्णव्यत्यासेन वनप्रतीतिर्लक्षणयेति वक्तव्यम्। तस्यां च कुशलादिवन्न रूढिर्निमित्तम्। नापि गङ्गायां घोष इत्यादिवत् प्रयोजनं किं तु स्वसंकेतमात्रमतस्तत्राशक्येयं लक्षणोपेक्षणीया।

'निरूढा लक्षणाः काश्चित् सामर्थ्यादभिधानवत्।
क्रियन्ते साम्प्रतं काश्चित् काश्चिन्नैव त्वशक्तितः॥'

इत्याचार्यैस्तस्या निषिद्धत्वात्। अतो नेयार्थमेतदित्याशयेनाह। व्यत्यस्तनवशब्देन वनप्रतीतिः स्वसंकेतमात्रायत्तेति। प्राप्त्यर्थस्यैव भवतेरात्मनेपदित्वं न सत्तार्थस्येति वैयाकरणाः। अतोऽस्य च्युतसंस्कारत्वमित्याह। भविष्यत इति।

---

१ °विधेयांशस्याप्युदाहरणम् T'., M. २ °मस्माभिररण्ये M. ३ जलधिपर° T'. ४ नेयार्थक° T'

विरुद्धमिति च्युतसंस्कृतिः। महीभृतां कटकेषु वास इत्यनेन राज्ञां सैन्येषु वास उत पर्वतानां नितम्बेष्विति संदेहात् संदिग्धम्।

अप्रयोजकक्लिष्टे यथा।

हन्त वर्त्तामहे वज्रघट्टनात् प्राक् चलात्मसु।
नभस्वदशनारातिध्वजाग्रजविरोधिषु ॥ ५ ॥

अत्र नभस्वदशनाः सर्पास्तेषामरातिर्गरुडः स एव ध्वजो यस्येति विष्णुस्तस्याग्रज इन्द्रस्तस्य विरोधिषु पर्वतेष्वित्यर्थप्रतीतेरतिदूरत्वात् क्लिष्टम्। पर्वतेषु वर्त्तनं दुःखावहमिति प्रकृते वज्रघट्टनात् प्राक् चलात्मस्विति पर्वतविशेषणस्यानुपयुक्तत्वादप्रयोजकम्।

गूढार्थग्राम्यान्यार्थानि यथा।

शोणिताब्जदृशः कामं क्षामगल्लकटिस्थलाः।
विदग्धहृदयाः शोकवह्निना राजकन्यकाः ॥ ६ ॥

अत्र शोणितशब्दस्य रुधिरे प्रसिद्धस्य पाटलवर्णपरत्वेन प्रयोगाद् गूढार्थम्। गल्लकटिशब्दौ कपोलजघनपरत्वेन ग्राम्यप्रयुक्तौ। विदग्धहृदया इति विशेषणं दग्धहृदयस्यावाचकत्वादन्यार्थम्

संदिग्धमभिनीय दर्शयति। महीभृतामिति। अत्र भृञः पालनधारणार्थत्वानुशासनम्। 'कटकं वलयं सानौ राजधानीनितम्बयोः' इत्यभिधानं च संदेहबीजमिति भावः।

हन्तेति। व्युत्क्रमेण लक्षणं योजयति। अत्रेत्यादिना।

शोणितेति। ग्राम्यप्रयुक्तौ पामरव्यवहारमात्रप्रसिद्धावित्यर्थः। विपूर्वस्य दग्धशब्दस्य निपुणार्थत्वाद्दाहं प्रत्यवाचकत्वादन्यार्थमित्याह। विदग्धेति।

---

१ च्युतसंस्कारः T. २ नगरेषु T'. ३ P. has अत्र पर्वतेषु वर्त्तनं ....प्रयोजकम्। नभस्वदशनाः...................क्लिष्टम् for अत्र नभस्वदशनाः..................क्लिष्टम्। पर्वतेषु वर्त्तनं.........°दप्रयोजकम्. ४ ध्वजे P., ध्वजेषु M. ५ पर्वतेष्वित्यतिदूरत्वात् P. ६ गूढार्थः M. ७ °श्यामगल्ल° P. ८ °कटी° M. ९ °हृदयस्य वाचकत्वा° P., M.

अप्रतीतिकं यथा ।

मनूपदेशाः क्व गताः कुलाचार्यैरुदीरिताः ।

अत्र मनुशब्दो मन्त्रपरत्वेन मन्त्रशास्त्रप्रसिद्ध इत्यप्रतीतिकम् ।

विरुद्धमतिकृद्यथा ।

अम्बिकारमणस्याङ्घ्रिसेवा व्यर्था[1] भवेत्[2] कथम् ।
राज्ञामकार्यमित्राणां विनाशं समुपेयुषाम् ॥ ७ ॥

अत्राम्बिकारमणशब्दान्मातृसंभोगकारिणः[3] प्रतीतिः । अकार्यमित्रशब्दादकार्येषु मित्राणीति प्रतीतिः । वियोगदुःख[4]परतया प्रयुक्ताद्विनाशशब्दान्नाशप्रतीतिरि[5]ति विरुद्धमतिकृत् ।

अमङ्गलव्रीडाजुगुप्साप्रतीतिकरं त्रिविधमश्लीलं यथा ।

अभिप्रेतपदावासः कदा नः संभविष्यति ।
नीचं साधनमेतेषां परोत्सर्गैकजीविनाम् ॥ ८ ॥

अत्रा[6]भिप्रेतपदावासशब्दात् प्रेतलोकपदा[7]वासप्रतीतेरमङ्गलत्वम्[8] । नीचं साधनमि[9]त्यनेन तुच्छमेहनप्रतीतेर्व्रीडाकरत्वम् । परोत्सर्गैकजीविनामित्यत्रोत्सर्गशब्दादधोवायु[10]प्रतीतेर्जुगुप्साकरत्वम् ।

अप्रतीतिकमुदाहरति । मनूपदेशा इति । यथा लोकमात्रप्रसिद्धं ग्राम्यं तथा शास्त्रमात्रप्रसिद्धमप्रतीतिकमित्यर्थः । कुलाचार्यैरित्यनेन संप्रदायशुद्धिः सूच्यते ।

अम्बिकारमणस्येति । विनाशं वियोगदुःखमित्यर्थः । लक्ष्ये लक्षणं योजयति । अत्रेत्यादिना । कार्यं विना मित्राणि निरुपाधिकबन्धव इति विवक्षितेऽकार्येष्वनुचितकर्मसु मित्राणीति विरुद्धमतिकृदित्याह । अकार्येति ।

अभिप्रेतेति । अभिप्रेतपदमिष्टस्थानम् । एतेषां स्वभर्तॄणाम् । नीचसाधनमल्पसैन्यम् । सहायसंपत्तिर्नास्तीत्यर्थः । 'साधनं निर्वृतौ मदे सैन्ये सिद्धौषधे गतौ' इति विश्वः । परोत्सर्गः परकर्तृकत्यागः । 'उत्सर्गो वर्जने त्यागे' इति विश्वः । त्रिविधमश्लीलं योजयति । अभिप्रेतेत्यादिना ।

---

१ व्यर्थाभवत् कथम् M. २ कथं भवेत् P., M. ३ °कारिप्रतीतिः M. ४ M. drops दुःख. ५ प्रयुक्तविनाशमिति शब्दा° P., प्रसिद्धादिनाश° M. ६ R. drops अत्र. ७ R. and M. drop पद. ८ °रमङ्गलाङ्गत्वम् M. ९ साधनं नीचामि° M. १० °मित्यनेनाधोवायु° R.

परुषं यथा ।

कुतः कान्तारवृत्तीनां कार्त्तार्थ्यार्थित्वमस्ति नः ।

अत्र कार्त्तार्थ्यार्थित्वमिति परुषवर्णारब्धत्वम् ।

अथ वाक्यदोषाः ।

शब्दहीनं क्रमभ्रष्टं विसंधि पुनरुक्तिमत् ।
व्याकीर्णं वाक्यसंकीर्णमपूर्णं वाक्यगर्भितम् ।
द्वे भिन्नलिङ्गवचने द्वे च न्यूनाधिकोपमे ।
भग्नच्छन्दो यतिभ्रष्टमशरीरमरीतिकम् ॥
विसर्गलुप्तमस्थानसमासं वाच्यवर्जितम् ।
समाप्तपुनरात्तं च तथा संबन्धवर्जितम् ॥
पतत्प्रकर्षमधिकपदं भग्नक्रमभङ्गवत् ।
चतुर्विंशतिरुच्यन्ते दोषा वाक्यसमाश्रिताः ॥

एषां स्वरूपमुदाहरणं च ।

शब्दशास्त्रहतं वाक्यं शब्दहीनं प्रकीर्त्यते ।

यथा शत्रुवाक्येषु

न संशृणुमहे हन्त हितमाप्तैर्निमन्त्रितम् ।
येन काकतिभूभर्तुः सेवां हित्वा हता वयम् ॥ ९ ॥

कुतःइति । कार्त्तार्थ्यार्थित्वं धन्यताभिलाषित्वम् । परुषैः करुणरसाननुगुणत्वेन श्रुतिकटुभिर्वर्णैः सरेफद्वितीयसंयोगादिभिरारब्धमित्यर्थः ।

पददोषानन्तरं वाक्यदोषानुद्देशपूर्वकं लक्षणोदाहरणाभ्यां दर्शयति । अथे॰त्यादिना ।

नेति । आप्तैर्निमन्त्रितमुपदिष्टं हितं न संशृणुमहे न समश्रौष्मेति वर्तमानसामीप्ये वर्तमानप्रत्ययेन हिताश्रवणराज्यभ्रंशयोरविरामः सूच्यते । ननु च्युतसंस्कारस्यैव शब्दहीनमिति संज्ञान्तरं न पुनः पृथग्दोषः । वाक्यगतत्वेन पार्थक्यस्य काव्यप्रकाशकारेण पदद्वये युगपदसाधुत्वासंभवेन परिहृतत्वादिति चेत् सत्यम् । यद्यप्येकपदमेवासाधु तथापि तदसाधुत्वं पदान्तरसमन्वयसापेक्षमिति वाक्यदोष एवायं न पददोषः किं तु कदा भविष्यते वास इत्यत्रापि पदान्तर-

---

१ °मीदृशाम् P. २ प्रकीर्तितम् R.

अत्र हितं न संशृणुमहे इति पद[1]द्वयप्रयोगे दोषाविष्कारद्वाक्यमेव दुष्टमिति न पददोषशङ्का । संपूर्वस्य शृणोते[2]रात्मनेपदत्वे कर्मणोऽनुपादाननियमात् ।

अथ क्रमभ्रष्टम् ।

क्रमभ्रष्टं भ[3]वेदार्थः शा[4]ब्दो वा यत्र न[5] क्रमः ।

यथा ।

> प्रभवे काकतीन्द्राय तुरगान् क[6]रिणो यथा ।
> उपायनम[7]कुर्वाणा वयं दैवेन वञ्चिताः ॥ १० ॥

अत्र करिणो यद्वा तुरगानिति वक्तव्ये व्युत्क्रमेणोक्तम् । तुरगापेक्षया करिणा[8]मुत्कृष्टत्वात् । [9]अथवा करिण [10]इत्यर्थक्रमभङ्गः ।

संनिधानादेव दोषत्वावगमाद्वाक्यदोषत्वमेव केवलं भविष्यतेशब्दस्य लटः शत्रादेशे चतुर्थ्येकवचने सत्यसाधुत्वासंभवादिति चेत् सत्यम् । वाक्यस्यैवात्र प्रयोगयोग्यत्वादावश्यकपदान्तरसंनिधाने यत्र वाक्यमात्रनिर्वाहस्तत्र पददोषः । यत्र पदान्तरविशेषसहकृतस्यैवासाधुत्वं यथा प्रकृते तत्र वाक्यदोषः । अन्यथा पददोषस्यैवाभावप्रसङ्गादिति तदेतत् सर्वं मनसि निधायाह । अत्र हितमित्यादि । आत्मनेपदित्व इति 'समो गम्यृच्छि—' इत्यादिनेति शेषः । कर्मणोऽनुपादाननियमादिति । अकर्मकाधिकारादिति शेषः । न च कर्माकाङ्क्षस्य शृणोतेः कथमकर्मकत्वमिति वाच्यम् । अविवक्षितकर्मकस्यैवात्राकर्मकत्वात् । तदुक्तम् ।

> 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
> प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' इति ।

क्रमभ्रष्टमिति । तत्रार्थक्रमभ्रष्टमुदाहरति । प्रभव इति । लक्ष्ये लक्षणं योजयति । अत्रेति । दुर्लभत्वात् करिणां सुलभत्वाच्च तु[11]रगाणामिति । ननु यथाग्निहोत्रं जुहोति यवागूं पचतीत्यत्र पाठक्रमानुपपत्त्यावर्थक्रमो यथा स्वीकृतस्तद्वदत्रापि यथायोगमन्वयोऽङ्गीक्रियतामिति चेत् सत्यम् । अपौरुषेये वेदवाक्ये यथा तथा वास्तु पुंवाक्ये तु श्रवणानन्तरमेव प्रयोक्तुस्तारतम्यानभिज्ञत्वप्रतीतेरन्वयविलम्बासहिष्णुत्वात् दुष्टत्वमेवेत्यनवद्यम् ।

---

१ पदत्रये P. २ शृणुधातोरात्मनेपदित्वे P. ३ भवेदर्थः P., T′. ४ शब्दो वा P., T′. ५ व्युत्क्रमः P. ६ कारिणोऽथवा M., P. ७ °मकुर्वन्तो M. ८ °मुच्चैः कृष्टत्वात् R. ९ T′. drops अथवा. १० इत्यत्र क्रमभङ्गः M. ११ तुरङ्गाणामिति M.

शब्दक्रमभङ्गो यथा ।

का नाम गणनास्मासु काकतीयस्य भूपतेः ।
यशःप्रतापयोर्मग्नौ सूर्याचन्द्रमसावपि ॥ ११ ॥

अत्र यशःप्रतापयोश्चन्द्रसूर्यौ मग्नाविति शब्दक्रमे उचिते तथा नोक्तम् । यशःप्रतापयोः सूर्याचन्द्रमसौ मग्नाविति समुदायद्वयान्वये यथायोगमर्थान्वये सिद्धे नार्थक्रमविरोधः अपि तु शब्दप्रयोग एव क्रमभङ्गः ।

शाब्दं क्रमभङ्गमुदाहरति । का नामेति । सूर्याचन्द्रमसाविति 'देवताद्वन्द्वे च' इत्यानङादेशः । तत्र लोकवेदयोरिति प्रसिद्धसाहचर्याणामेव देवतावाचिनां द्वन्द्वस्य विवक्षितत्वाच्च चन्द्रसूर्यावित्यत्रानङादेशः । व्युत्क्रममित्यत्रसमुचितक्रमानुक्तिमभिनीय दर्शयति । अत्रेति । आद्यभेदसाङ्कर्यं परिहरति । यश इति । यशःप्रतापयोरित्येकः समुदायः । सूर्याचन्द्रमसावित्यपरः । तदेतत् समुदायद्वयमुद्भूतावयवभेदम् । अन्यथा द्विवचनानुपपत्तेः । तस्यान्वये सतीति शेषः । यथायोग्यमर्थान्वये नार्थक्रमविरोध इति । अभिधानक्रमेणाभिधेयक्रमौचित्येऽपि कविसमयसिद्धोपमानोपमेयभावानुसारेण वर्तिपदार्थानां कीर्तिप्रभृतीनां व्युत्क्रमेणापि संबन्धेऽनन्तरोदाहरणवत् बाधकाभावात् नार्थक्रमभङ्ग इत्यर्थः । कुत्र तर्हि क्रमभङ्ग इत्याकाङ्क्षायामाह । अपि तु शब्दप्रयोग एवेति । यथासंख्यन्यायोल्लङ्घनादिति भावः । ननु द्वन्द्वसमासे वर्तिपदानि प्रत्येकं स्वसहचरितपदार्थान्तराण्यपि युगपदभिदधतीति वार्त्तिककारमतम् । तदुक्तम् । 'युगपदधिकरणवचने द्वन्द्वः' इति । तन्मते यशःशब्देनापि युगपद्यशःप्रतापावभिधीयेते प्रतापशब्देनापि । एवं सूर्याचन्द्रमसावित्यत्रापि द्रष्टव्यम् । तथा च मिथोऽन्वये शाब्दोऽपि क्रमभङ्गो न संभवतीति चेन्नैष दोषः । सर्वदा केवलपदानामेकैकार्थवाचकत्वाद्वृत्तिपदानामपि मतभेदेन तथाभावात् प्रायेण सर्वेषामप्येवमेव व्युत्पत्तिः । अत्राप्यलौकिकानेकार्थवाचकत्वनिबन्धनमक्रमं बाधित्वा क्रमस्यैव जागरूकत्वात् । यदाह पदमञ्जरीकारः । 'पाप्माधमेत्यादौ युगपदधिकरणवचनतायां द्वन्द्वेऽपि क्रमस्य प्रतीतेः स एव नियामकः' इति ।

---

१ काकतीयक्षमापतेः M. २ सूयचन्द्रं° P. ३ शब्दक्रमेणोचिते M. ४ सूर्यचन्द्र° P.
५ °मर्थाश्रये R. ६ सिद्धे शब्दे नार्थ° T'.; सिद्धोऽर्थक्रमविरोधः M. ७ शब्दक्रमभङ्ग एव P.
८ शब्दक्रमभङ्ग° ψ. ९ अत्र m.

अथ विसन्धि ।

विसंहितो विरूपो वा यस्य संधिर्विसंधि तत् ॥

यथा ।

शौर्याणि ईदृशान्यासन् पृथ्वैश्वर्यं क्व वा गतम् ॥

अत्र शौर्याणि ईदृशानीति विसन्धि । पृथ्वैश्वर्यमिति [1]संधिवैरूप्यम् ।

अथ पुनरुक्तिमत् ।

शब्दार्थपौन[2]रुक्त्ये तु तद्वाक्यं पुनरुक्तिमत् ।

यथा ।

जीर्णकाननसंकीर्णे विन्ध्ये काननवृत्तयः ॥

अत्र काननसंकीर्णे काननवृत्तय इति [3]पुनरुक्तिमत् ।

अथ व्याकीर्णम् ।

व्याकीर्णं तद्विभक्तीनां व्याकीर्णे [4]चे मिथोन्वये ।

यथा ।

[5]सुखार्थिनो महीपाला वर्त्तध्वं काकतीशितुः ।
आज्ञामुरसि बिभ्राणाः शिरसि क्रोडमुद्रिकाम् ॥

अत्र क्रोडमुद्रिकामुरसि शिरस्याज्ञां बिभ्राणा इति [6]संबन्धः ।

विसंहित इति । विगता संहिता वर्णानां परस्परसंनिकर्षो यत्र विसंहितः विश्लिष्ट इत्यर्थः । विरूपः कर्णकठोर इत्यर्थः । शौर्याणि ईदृशानि इत्यत्र सवर्णदीर्घाभावाद् विश्लेषः । न चात्र व्याकरणविरोधः वाक्यसंधेर्वैकल्पिकत्वात् । तदुक्तम् ।

‘ संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥’ इति ।

पुनरुक्तमाह । शब्दार्थपौनरुक्त्ये इति । शब्दमात्रपौनरुक्त्ये त्वलंकारत्वमर्थमात्रपौनरुक्त्ये दोषत्वं वक्ष्यति ।

व्याकीर्णमिति । विभक्तीनां विभक्त्यन्तानां पदानामित्यर्थः । संकीर्णपदमेकवाक्ये व्याकीर्णमित्यर्थः । सुखार्थिन इति । क्रोडमुद्रिकां काकतीयध्वजवराहमुद्राम् । दास्यरूपत्वात् तद्धारणस्येति भावः । तदुक्तम् ।

---

१ वैरूप्यम् M. २ पौनरुक्ते P., R. ३ पुनरुक्तम् R., M.; पुनरुक्तिः M_1 ४ तु R.
५ यथासुखं मही° P. ६ इति न संबन्धः P.

अथ वाक्यसंकीर्णम् ।

वाक्यान्तरपदैः कीर्णं वाक्यसंकीर्णमुच्यते ।

यथा ।

मानेन महतास्माभिर्वने वक्रेन तिष्ठताम् ।
विन्ध्यस्य जीवितं तन्नो जातमद्य तृणं कृतम् ॥ १३ ॥

अत्र महता मानेन यत्तृणं वक्रेन कृतं तदद्य विन्ध्यस्य वने तिष्ठता नो जीवितं जातमिति वाक्यद्वयपदानामन्योन्यसंकीर्णता ।

अथापूर्णम् ।

अपूर्णं तद्भवेद्यत्र न संपूर्णो क्रियान्वयः ।

यथा ।

शैलेष्वस्माकमावासो वन्यैः सोच्छ्वासिता वयम् ।
मृगैर्बन्धुमतश्चास्मान् पश्यन् धाता प्रमोदताम् ॥ १४ ॥

अत्र शैलवासान् वन्यवृत्तीन् मृगबान्धवान् पश्यन्निति विवक्षितसंबन्धो न संपूर्णः ।

'पद्यमङ्गुलिविच्छेद उरोविन्यस्तमक्षरम् ।
तन्नामकरणं चेति दास्यमेतच्चतुष्टयम् ॥' इति ।

मानेनेति । अत्र वाक्यद्वयपदानां मिथः संकीर्णत्वाद्वाक्यसंकीर्णमित्याह । अत्रेति ।

शैलेष्विति । वन्यैः कन्दमूलफलादिभिः । सोच्छ्वसिताः सप्राणाः । अत्र बन्धुमतश्चेति चशब्देनास्मदर्थविशेषणतया शैलवासवन्यवृत्ती समुच्चीयेते । तत्र दर्शनक्रियाया अस्मदर्थद्वारा बन्धुमत इत्यनेनैव संबन्धो न शैलवासवन्यवृत्तिभ्यामिति क्रियान्वयापरिपूरणादपूर्णमित्याशयेनाह । अत्रेति ।

---

१ मानेनास्माभिर्यन्तृणम् M. २ संपूर्णो न P. ३ वन्यैश्चाश्वासिता वयम् M. ४ शैलवनवृत्तीन् P. ५ विवक्षितः R. ६ °संबन्धोऽपूर्णः M. ७ मानसेति m. ८ °वृत्तिः समुच्चीयते m.

अथ वाक्यगर्भितम्।

तद्वाक्यगर्भितं यस्य मध्ये वाक्यान्तरं भवेत्।

यथा।

ज्ञात्वान्ध्रपुरीन्द्रस्य क्रोधाग्निमतिदुःसहम्।
यद्वा न लङ्घ्यते दैवं तस्मिन्निपतिता वयम्॥ १५॥

अत्रातिदुःसहं क्रोधाग्निं ज्ञात्वापि तस्मिन्निपतिता वयमिति वाक्यमध्ये यद्वा न लङ्घ्यते दैवमिति वाक्यान्तरमनुप्रविष्टमिति वाक्यगर्भितत्वम्।

अथ भिन्नलिङ्गवचने।

यत्रोपमा भवेद्भिन्नवचना भिन्नलिङ्गका।
तद्भिन्नवचनं भिन्नलिङ्गं चाहुर्मनीषिणः॥

द्वयोरुदाहरणं यथा।

समुद्रा इव गम्भीरं मनो यादवभूभुजः।
गिरिणेवान्ध्रनृपतिध्वजिन्या कलुषीकृतम्॥ १६॥

अत्र समुद्रा इव गम्भीरमिति भिन्नवचनम्। गिरिणेव ध्वजिन्येति भिन्नलिङ्गकम्।

तदिति। वाक्येन वाक्यान्तरेण गर्भितं संजातगर्भं वाक्यं वाक्यगर्भितमित्यर्थः। उदाहरणं स्पष्टम्। नन्वत्र वाक्यार्थस्यापि वाक्यान्तरगर्भितत्वेनोभयदोषत्वसंभवेऽपि वाक्यार्थप्रतीतावन्तरङ्गत्वेन प्राधान्याद्वाक्यदोषप्रायपाठ इत्यनुसंधेयम्। एवमन्यत्रापि यथासंभवमूह्यम्।

भिन्नलिङ्गभिन्नवचनयोर्लक्षणोदाहरणे दर्शयति।

यत्रेत्यादिना। समुद्रा इव गम्भीरं मन इत्यत्रोपमानोपमेययोर्भिन्नलिङ्गत्वेऽपि मुखं चन्द्र इवेतिवत् सहृदयानामुद्वेगाभावाद् भिन्नवचनस्यैवेदमुदाहरणम्। अत एवोक्तं दण्ड्याचार्येण।

'न भिन्नलिङ्गवचने न च न्यूनाधिके तथा।
उपमादूषणायालं यत्रोद्वेगो न धीमताम्॥' इति।

तदेतन्मनसि निधायाह। अत्र समुद्रा इव गम्भीरमिति भिन्नवचनमिति।

---

१ अत्र T'. २ °ध्यन्ध्रनरेन्द्रस्य R., M. ३ तस्मिन् वयं निपतिता R. ४ वाक्यगर्भत्वम् P.; वाक्यगर्भितम् M. ५ लिङ्गभिन्नता M. ६ M. drops यथा. ७ °नृपतेर्ध्वजिन्या M., °नाथस्य ध्वजिन्या M_4. ९ °दाहरणम् m. १० दण्डिना m.

अथाधिकन्यूनोपमे ।

यत्रोपमानमधिकं न्यूनं वा स्याद्विशेषणैः ।
तत्राधिकोपमं पूर्वं न्यूनोपममतः परम् ॥

[2]यथाक्रममुदाहरणम् ।

क्षामक्षाममुखाः कान्ताः कानने [3]मालवेशितुः ।
ग्रीष्मे नद्य इव म्लानपद्मोत्पलबिसाविलाः ॥ १७ ॥

अत्र [4]क्षामक्षाममुखानां कान्तानामुपमानभूतासु नदीषु म्लानप[5]ङ्कत्व-मात्रं वक्तव्यम् । म्[6]लानोत्पलबिसाविला इ[7]त्यधिकम् ।

न्यूनोपमं यथा ।

हाराङ्गरागसुभगा नगरेषु [8]यथा वयम् ।
त[9]थैव निर्झराकीर्णा विभान्ति धरणीभृतः ॥ १८ ॥

अत्र हारस्थाने निर्झरा उक्ताः । अङ्गरागस्थाने किमपि नोक्तमिति [10]न्यूनोपमम् ।

अथ भग्नच्छन्दोयतिभ्रष्टे ।

छन्दोभग्नं वचो यत्र तद्भग्नच्छन्द उच्यते ।
यत्र स्थाने यतिभ्रंशस्तद्यतिभ्रष्टमुच्यते ॥

यत्रेति । अत्रोपमाशब्दः करणव्युत्पत्त्योप[11]मानवाची । तेनाधिकविशेषणोप-मानमधिकोपमं न्यूनविशेषणोपमानं न्यूनोपमम् । तेन साधारणधर्माधिक्येऽधि-कोपमं तन्न्यूनत्वे न्यूनोपममिति फलितम् । उभयोदाहरणं सुगमम् ।

छन्दोभग्नमिति । भग्नं छन्दो वृत्तं यस्मिन् तच्छन्दोभग्नम् । यतिर्विच्छेद इति च्छान्दसाः । भ्रष्टा यतिर्यत्र तद्यतिभ्रष्टम् । उभयत्र 'वाहिताग्न्यादिषु'

---

१ अत्रा° B. २ द्वयोर्यथाक्रम° T'. ३ मागधेशितुः P. ४ क्षाममुखानाम् R. ५ °पद्ममात्रम् R. ६ म्लानपद्मोत्पल° P. ७ इति न वक्तव्यम् M. ८ वयं यथा R. ९ सर्वतो निर्झरा° R. १० न्यूनोपमत्वम् M. ११ °त्त्योपमानोपमेयवाची p.

यथा ।

विन्ध्यारण्यवृत्तकुटुम्बरक्षणस्य
किं भद्रं भवति जनस्य मादृशस्य ॥

अत्र विन्ध्यारण्येति [1]तृतीयवर्णे यतिभङ्गः । [2]पादान्तवर्णस्य गुरुत्वाभावाच्छन्दोभङ्गः ।

अथाशरीरम् ।

क्रियापदेन रहितमशरीरं प्रकीर्त्यते ।

यथा ।

हन्त निष्करुणो धाता क्रीडितो मणिकुट्टिमे ।
कानने कण्टकाकीर्णे स्थितान् पाण्डवशि[3]शूनमून् ॥ १९ ॥

अत्र क्रियापदं न [4]विहितम् । एतदेवा[5]नन्वयाख्यं दूषणम् ।

इति परनिपातः । विन्ध्यारण्येति तृतीयवर्णे यतिभङ्ग इति । प्रहर्षिणीवृत्ते तृतीयदशमवर्णयोर्विच्छेदो विहितः । तदुक्तं वृत्तरत्नाकरे ।

‘म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।’ इति ।

तत्र तृतीयवर्णे तदभावाद्यतिभ्रंशं पादान्तवर्णस्य गुरुत्वाभावाच्छन्दोभङ्गश्च । ननु क्वचिदवसानेऽपि लघ्वन्त्यमिति वचनेन पादान्त्यलघोर्विकल्पेन गुरुत्वविधानादत्रापि गुरुत्वाङ्गीकारे न च्छन्दोभङ्ग इति चेत् सत्यम् । यत्रेन्द्रवज्रोपेन्द्रवज्रादौ पादान्तवर्णस्य लाक्षणिकगुरुत्वेऽपि [6]श्राव्यभङ्गाभावस्तत्र मा भूच्छन्दोभङ्गः । प्रहर्षिणीवैतालीयवसन्ततिलकादौ तु वैपरीत्यादस्त्येव दोष इति प्राचीनाः ।

क्रियापदेनेति । हन्तेत्यनुकम्पायाम् । पाण्डवशिशूनिति दर्शनक्रियापेक्षाया कर्मणि द्वितीया । अत्र दर्शनक्रियानुपादानात् । आख्यातं साव्ययकारकविशेषणं वाक्यमिति वाक्यलक्षणाभावेन वाक्यत्वस्यैवाभावादशरीरं नाम दोष इत्याशयेनाह । अत्रेति । क्रियापदराहित्येनान्वयाभावादानन्वय इत्यस्यैव नामान्तरं मतान्तरेणेत्याह । एतदेवेति ।

---

१ P. drops तृतीयवर्णे. २ पदान्त्यवर्णस्य M. ३ °शिशूनपि P. ४ निहितम् R.; लिखितम् M. ५ °नन्वयाख्यदूषणम् R. ६ श्रव्यत्व° m.

अथारीतिकम्[1]।

रसाननुगुणा रीतिर्यत्रारीति तदुच्यते ।

अखर्वगर्वदुर्वारदोर्गलनिर्गलाः ।
हा बन्धुवर्गाः सर्वेऽपि कृतान्तातिथयः कृताः ॥ २० ॥

अत्र करुणे[2]ऽनु[3]चितो वर्णाडम्बरः ।

अथ विसर्गलुप्तम्[4] ।

ओत्वलोपौ विसर्गस्यासकृल्लुप्तविसर्गकम् ।

यत्र विसर्गो बहुधौत्वं लोपं वा प्राप्नोति तद्विसर्गलुप्तम् ।

यथा ।

व्यर्थो मनोरथो यातो[5] जातो वासो ध्रुवो मरौ ।
म्लाना दीना[6] हता जीर्णा वनान्तेष्वीदृशा वयम् ॥ २१ ॥

अथास्थानसमासम् ।

अपदस्थसमासं तत् समासो यत्र नोचितः ।

यथा ।

कुतो वैगुण्यमस्मासु ब्रह्मणः परुषात्मनः ।
इत्युदग्रतरभ्राम्यद्भ्रुकुटीकुटिलाननाः ॥ २२ ॥

अरीतिकमिति । विरुद्धरीतिकमित्यर्थः । अखर्वेति । अत्र वर्णपारुष्यदीर्घसमासादिनिबन्धनाया गौडरीतेः करुणानुचिताया निबन्धनादरीतिकं नाम दोष इत्याशयेनाह । अत्रेति ।

विसर्गलुप्तमिति । लुप्तविसर्गमित्यर्थः । ओत्वमिति । म्लाना इत्यादौ परम्परया विसर्जनीयस्थानिकस्य यकारस्य 'लोपो व्योर्वलि' इति लोपविधानात् लुप्तविसर्गत्वम् । व्यर्थो मनोरथ इत्यादौ यद्यपि विसर्जनीयस्य रुत्वादिसंधिकार्यवशाद् गुणे सत्योत्वमेव न लोपः । तथापि विसर्गादर्शनाल्लुप्तविसर्गव्यवहार इति द्रष्टव्यम् । यदाहुराचार्याः । 'अदर्शनं लोपः' इति ।

अपदस्थसमासमिति । अस्थानसमासमित्यर्थः । कुत इति । परुषात्मनः कठिनहृदयस्य वेधसे क्रुध्यतामिति 'क्रुधद्रुह—' इत्यादिना संप्रदानत्वाच्चतुर्थी ।

---

१ यत्रारीतिकमुच्यते R. २ कारुण्ये M₁. ३ °नुचितं वर्णाडम्बरं विहितम् P. ४ °विसर्गकः M. ५ जातो यतो वासो धृतो मरौ P. ६ दीर्णा M.

अत्र वेधसे क्रुध्यतां नृपाणामुक्तौ न समासः। किं तु कविवचने समास इत्यपदस्थसमासः।

अथ वाच्यवर्जितम्।

नोक्तं स्याद्यत्र वक्तव्यं तदाहुर्वाच्यवर्जितम्।

यथा।

दुर्दशां प्रतिपन्नानामस्माकं जीवितं मतम्॥

अत्र दुर्दशां प्रतिपन्नानामपीत्यपिशब्दो वक्तव्यो नोक्तः।

अथ समाप्तपुनरात्तकं पतत्प्रकर्षं च।

समाप्य पुनरादाने समाप्तपुनरात्तकम्।
पतत्प्रकर्षं तत्प्राहुः प्रकर्षो यत्र विश्लथः॥

द्वयोरुदाहरणम्।

धावन्मृगेषु संभ्राम्यत्करिषूद्यत्तरक्षुषु।
विन्ध्यारण्येषु तिष्ठामः क्षुभ्यन्मल्लुकपङ्क्तिषु॥ २३॥

अत्र विन्ध्यारण्येषु तिष्ठामः इति समाप्य क्षुभ्यन्मल्लुकपङ्क्तिष्विति पुनरादानात् समाप्तपुनरात्तकम्। तथा भ्राम्यत्करिषूद्यत्तरक्षुषु धावन्मृगेष्विति वक्तव्ये न तथोक्तमिति पतत्प्रकर्षता।

न समास इति। क्रोधव्यञ्जक इति शेषः। किं त्विति। कवेः समासव्यङ्ग्यस्य क्रोधस्याभावादिति भावः।

दुर्दशामिति। अत्र जीवितस्य हेयत्वं विवक्षितं तच्च दुर्दशां प्रतिपन्नानामपीत्यपिशब्दप्रयोग एव लभ्यते नान्यथा। अतस्तदभावाद्वाच्यवर्जिताख्योऽयं दोष इत्याह। अत्रेति।

समाप्येति। समाप्तस्य वाक्यस्य विशेषणद्वारा पुनरुपादाने समाप्तपुनरात्तम्। तदत्र योजयति। अत्रेति। पतत्प्रकर्षमपि योजयति। अथेति। तरक्षवो मृगादनाः। तदपेक्षया करिणां प्रकृष्टत्वात् पूर्वमुपादानम्। मृगाणां पुनरपकृष्टत्वात् पश्चादेवोचितं तथापि मृगाणामादावुपादाने प्रकर्षभ्रंशात् पतत्प्रकर्षमिति भावः।

---

१ मदाणे M. २ °शब्दे वक्तव्ये नोक्तः R.; °शब्दो नोक्तः P. ३ °रात्तकपतत्प्रकर्षे R.; °रात्तकम्। P., M. ४ °रुदाहरणं यथा P. ५ °भल्लूक° M. ६ पुनरादाने M.

अथ संबन्धवर्जितम् ।

संबन्धवर्जितं तत् स्याद्यत्रेष्टेनान्वयो हतः ।

यथा ।

भद्रासनानि दृषदः छत्राणि च महीरुहः ।
दुर्दशाराज्यमूर्धाभिषिक्ताः पुनरहो वयम् ॥ २४ ॥

अत्र राज्ये भद्रासनानि दृषद इत्यादिसंबन्धो नोक्तः ।

अथाधिकपदम् ।

यत्राधिकपदोक्तिः स्यात् तत्राधिकपदं मतम् ।

यथा ।

विमुक्ता वल्लभैरेता वनान्ते गुर्जरस्त्रियः ।
सुधांशुमण्डलाकाररूपक्रमविपाण्डुराः ॥ २५ ॥

अत्र सुधांशुमण्डलाकार इत्येतावता परिपूर्णे मण्डलाकारविपाण्डुरत्वे रूपक्रम इत्यधिकम् ।

अथ भग्नप्रक्रमम् ।

प्रक्रान्तनियमत्यागे भग्नप्रक्रममिष्यते ।

यथा ।

गुहागृहाणि शबरा बान्धवा विन्ध्यभूः पुरी ।
सरितो दीर्घिकाः क्ष्माक्रीडाः काननानि नः ॥ २६ ॥

संबन्धेति । संबन्धेनेष्टयोगेन वर्जितं संबन्धवर्जितम् । एतदेव केचिदभवन्मतयोगमाहुः । भद्रासनानीति । अत्र दुर्दशाराज्यशब्दः समासे गुणीभूत इति न तदर्थो भद्रासनादिभिः संबध्यत इत्याह । अत्र राज्य इति ।

विमुक्ता इति । अत्राधिकमंशं विविनक्ति । अत्रेति । 'व्याधैः सहोषितं विन्ध्ये हन्त वल्कलधारिभिः' इत्यत्रास्माभिरिति पदस्य न्यूनत्वान्न्यूनपदं नाम दोषो द्रष्टव्यः ।

बहुवचनप्रक्रमभङ्गमुदाहरति । गुहा इति ।

---

१ गूर्जर° T'. २ विपाण्डराः M. ३ सुधांशुपाण्डुरा M.; सुधांशुपाडुरा R. ४ परिपूर्णमण्डला° M. ५ मण्डलाकाररूपकम R. ६ इत्यधिकः M. ७ भ ग्नक्रम R. ८ भग्नक्रममिष्यते P. ९ काननीकृताः M.

अत्र बहुवचनतया[1] प्रथमं[2] प्रक्रम्य[3] विन्ध्यभूः पुरीत्येकवचनं[4] प्रक्रमभ्रष्टम्[5] ।

अथार्थदोषाः ।

> अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम् ।
> भिन्नं[6] चैवातिमात्रं च परुषं विरसं तथा ॥
>
> हीनाधिकोपमे स्यातामसदृक्षोपमं तथा ।
> अप्रसिद्धोपमं हेतुशून्यं च निरलंकृति ॥
>
> अश्लीलं च विरुद्धं च तथा सहचरच्युतम् ।
> एवमष्टादश प्रोक्ता दोषा अर्थसमाश्रयाः[7] ॥

एषां स्वरूपमुदाहरणं च ।

> समुदायार्थशून्यं चापार्थं तत्[8] परिकीर्त्यते ।

यथा ।

> कुतः शुष्यदपो नद्यः का वार्त्ता चोलमण्डले ।
> फणाः सहस्रं शेषस्य भारः कति कुलाचलाः ॥ २७ ॥

अत्र न कश्चिद्वाक्यार्थः प्रतीयते ।

अथार्थदोषाणामुद्देशपूर्वकं लक्षणोदाहरणे दर्शयति । अथेत्यादिना ।

समुदायार्थशून्यं वाक्यार्थशून्यम् । कुत इति । शुष्यदपाः शुष्यज्जलाः । 'ऋक्पुर्—' इत्यादिना समासान्तप्रत्ययः । अत्र दशदाडिमादिवाक्यवदर्थशून्यत्वादपार्थत्वम् ।

---

१ बहुवचनान्तपरतया T′. २ प्रथमम् is dropped in R. and M. ३ प्रक्रमे P. ४ °वचनोक्तेः T′. ५ क्रमभ्रष्टम् R. ६ M. and M₂ have छिन्नं. ७ °समाश्रिताः T′. ८ यत्तदपार्थं प्रकीर्त्यते R.; यदपार्थं परिकीर्त्यते M.

यत् प्रयोजनशून्यं स्यात्तद् व्यर्थं परिकीर्त्यते ।

यथा ।

निर्मलं कुलमुद्वेलं शौर्यं यः प्रथितं यशः ।
किमित्यन्ध्रपतेः पादपीठं पाण्ड्यैर्न सेव्यते ॥ २८ ॥

अत्र निर्मलं कुलमित्यादिप्रशंसा सेवा कर्त्तव्येत्युपदेशो नोपयुज्यते ।

अथैकार्थम् ।

उक्ताभिन्नार्थकं यत् स्यादेकार्थं तन्निगद्यते ।

यथा ।

विशीर्णं शतधा चेतो मूर्च्छितान् वीक्ष्य बालकान् ।
शिशून् निश्चेतनान् दृष्ट्वा खण्डितं शतशो मनः ॥ २९ ॥

अत्र पूर्वोत्तरार्धयोरभिन्नार्थत्वम् ।

अथ ससंशयम् ।

वाक्यार्थसंशयो यत्र तत् ससंशयमिष्यते ।

यथा ।

करिकुम्भौ स्तनावद्य जयेतां क्षामतां गतौ ।
लता वपुःश्रियः स्त्रीणां हसन्तु म्लानतां गताः ॥ ३० ॥

अत्र करिकुम्भयोः स्तनयोर्लतानां वपुःश्रियां च कर्तृकर्मत्वसंशयः ।

अथापक्रमम् ।

यत्र पूर्वापरीभावविहतिस्तदपक्रमम् ।

निर्मलमिति । अत्र राजसेवाविधावैश्वर्यादिलोभवद् कुलादिप्रशंसया निष्प्रयोजकत्वाद् व्यर्थमेतदित्याह । अत्रेति ।

उक्ताभिन्नार्थमिति । पुनरुक्तार्थमित्यर्थः ।

करिकुम्भाविति । अनर्घराघवे 'विजयेतां रामलक्ष्मणौ कुम्भकर्णमेघनादौ' इत्यत्र वैरिवाक्ये कर्तृकर्मसंदेहेऽपि न दोषः । नायकाभ्युदयसूचकतया तत्रैव कविसंरम्भविश्रान्तेः ।

---

१ स्याद् व्यर्थं तत् P. २ पाण्ड्यो न सेवते M. ३ °देकार्थं च निगद्यते M. ४ विचेतनान् T'. ५ लवशो R., M. ६ संशयः R. ७ संशयवदिष्यते T'., M. ८ जायेताम् M. ९ हसन्ति M. १० लतावपुःश्रियाम् M. ११ °कर्मत्वे M. १२ °भावाभाववत् स्यादपक्रमम् P.

यथा ।

> हन्त व्यादाय वक्त्राणि निद्रान्त्यन्तर्वणं स्त्रियः ।
> तृणैस्तत्पतितैरस्मान् शिक्षयन्त्यस्तथाक्रमम् ॥ ३१ ॥

अत्र निद्रोत्तरकालीनमुख[1]व्यादानस्य पूर्वकालत्वमुक्तमित्यपक्रमत्वम्[2] ।

अथ भिन्नम्[3] ।

संबन्धवर्जितं यत् स्यात् तद्भिन्नं[4] परिकीर्त्यते ।

यथा ।

> नूनं भालेषु लाटानां न धात्रा[5] लिखिता लिपिः ।
> यदस्माकं कुटुम्बानि [6]विषीदन्ति मरुस्थले[7] ॥ ३२ ॥

अत्र मरुस्थलनिवासविषादस्य [8]भालगतलिप्यभावस्य[9] च न संबन्धः ।

अथातिमात्रम् ।

यत् सर्वलोकातीतं तदतिमात्रं [10]प्रकीर्त्यते ।

हन्तेति विषादे । व्यादाय विवृत्य । वनेष्वन्तर्वणम् । विभक्त्यर्थेऽव्ययीभावः । 'प्रनिरन्तः—' इत्यादिना णत्वम् । तत्पतितैर्वक्त्रपतितैः । शिक्षयन्त्यस्तथाक्रममिति । तृणं ग्रसित्वा भवन्तोऽपि जीवन्त्वित्यस्मानुपदिशन्त्य इवेत्यर्थः । अत्र निद्राव्याजव्यादानयोर्लोके प्रसिद्धं पौर्वापर्यं विहतमितीदमपक्रममित्याह । अत्रेति । पूर्वकालत्वमुक्तमिति । 'समानकर्तृकयोः पूर्वकाले' इति विहितेन क्त्वाप्रत्ययेनेति शेषः । ननु वक्त्रं व्यादाय स्वपितीत्यत्र व्यादानस्य पूर्वकालत्वाभावात् क्त्वाप्रत्ययानुपपत्तिरिति [11]बोधयित्वानन्तरभाविस्वप्नापेक्षया पूर्वकालत्वसंभवान्नानुपपत्तिरिति परिहृतं महाभाष्ये । तथैव व्याख्यातं कैयटेन । यद्यपि स्वापारम्भाणां व्यादानात् पूर्वकालता तथापि तद्व्यादानानन्तरभाविस्वप्नक्रियापेक्षं व्यादानस्य पूर्वकालत्वमस्तीति । अतः कथमत्र पौर्वापर्यविहतिरिति चेत् सत्यम् । व्यादानात् पूर्वकालीनस्वप्नक्रियापेक्षया पौर्वापर्यविघातादस्त्येवापक्रमदोषोऽत्रेति हृदयम् ।

भिन्नलक्षणं संबन्धवर्जितं दर्शयति । अत्र मरुस्थलेति । प्रतीयमानस्तु हेतुहेतुमद्भावो न वास्तव इति भावः ।

---

१ °कालभाविनो मुख° R., M. २ °त्यपक्रमम् R. ३ खिन्नम् M., M_4. ४ तत्खिन्नम् M., M_4. ५ विधात्रा लिखिता M. ६ निषीदन्ति M. ७ मरुस्थले वासविषादस्य P. ८ भालस्थलगत° P., T'. ९ °लिपिभावस्य M. १० प्रकीर्तितम् M. ११ बोधयित्वा° m.

यथा ।

मा भूदेकार्णवं विश्वमिति संकोचिताश्रुभिः ।
अरण्ये हूणनारीभिरसंख्या निम्नगाः कृताः ॥ ३३ ॥

अत्राश्रुभिर्जगदेकार्णवमित्यत्युक्तिः ।

अथ परुषम् ।

अतिक्रूरार्थसहितं परुषं परिकीर्त्यते ।

यथा ।

दावानलेन्धनं सद्यः क्रियन्तामर्भका इमे ।

अत्र फलानि याचमानान् शिशूनुद्दिश्यातिपरुषोक्तिः ।

अथ विरसम् ।

अप्रस्तुतरसं यत् तद्विरसं परिकीर्त्यते ।

यथा ।

चन्द्राननाः कटाक्षैर्नः पश्यतामृतवर्षिभिः ।
शोचित्वालमिति क्लिष्टाः किराते॑श्चोलसुभ्रुवः ॥ ३४ ॥

अत्र पुरुषवियोगखिन्नानां स्त्रीणां वनचरैः संभोगप्रार्थनं विरसम् ।

अथ हीनोपमम् ।

हीनं यत्रोपमानं स्यात् तद्धि हीनोपमं मतम् ।

मा भूदिति । एकार्णवभियाश्रुसंकोचेऽपि असंख्या नद्यः प्रवृत्ता इत्यतिमात्रलौकिकार्थप्रतिपादनादत्युक्तिरेवायं दोषो नातिशयोक्तिरलंकार इति भावः ।

परुषमुदाहरति । दावानलेति । इमे फलानि याचमाना इत्यर्थः ।

चन्द्राननाः इति । शोचित्वालं न शोचितव्यमित्यर्थः । 'अलंखल्वोः—' इत्यादिना क्त्वाप्रत्यय इत्युक्त्वा क्लिष्टा क्लिशिताः । क्लिश्नातेः 'उदितो वा' इति विकल्पात् 'यस्य विभाषा' इति निषेधः । 'क्लिशः क्त्वानिष्ठयोः' इति विकल्पादिडभावः । संभोगप्रार्थनं विरसमिति । अनौचित्यप्रवृत्तत्वादिति भावः । तदुक्तं ध्वन्याचार्यैः ।

'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम् ।' इति ।

हीनमिति । जात्या प्रमाणेन वेति शेषः । एवमधिकमित्यत्रापि द्रष्टव्यम् ।

---

१ परुषः M. २ °विप्रयोगखिन्नानाम्. ३ R. drops स्त्रीणाम्. ४ संग° P. ५ हीनोपमा M., R.

यथा ।

> शुनकैरिव सारङ्गा भवद्भिर्निहता द्विषः ।
> क्व गतं पौरुषं तद्वः काननैकनिवासिनाम् ॥ ३५ ॥

अत्र शुनकैरिव भवद्भिरिति न्यूनोपमम् ।

अथाधिकोपमम् ।

> यत्रोपमानमधिकं तद् भवेदधिकोपमम् ।

यथा ।

> अमी पारेसरस्तीरं बका निश्चलमूर्तयः ।
> महर्षय इवास्माभिरद्य सोपद्रवाः कृताः ॥ ३६ ॥

अत्र बका महर्षय इवेत्यधिकोपमम् ।

अथातुल्योपमम् ।

> यदतुल्योपमानं तद् भवेदसदृशोपमम् ।

यथा ।

> एष विन्ध्याचलः सान्द्रकुशोत्पलितनिर्झरः ।
> भालेक्षणस्फुरद्वह्निशिखाटोप इवेश्वरः ॥ ३७ ॥

अत्र कुशोत्पलितनिर्झरस्य विन्ध्याचलस्य भालेक्षणस्फुरद्वह्नेरीश्वरस्य च मिथो न सादृश्यम् ।

अत एव पूर्वोक्ताभ्यां न्यूनाधिकोपमाभ्यामनयोर्भेदः । जातिहीनमुदाहरति । शकुनैरिति । प्रमाणहीनोदाहरणं तु स्फुलिङ्ग इव भानुमानित्यादौ द्रष्टव्यम् ।

जात्यधिकमुदाहरति । अमी इति । पारे सरस्तीरस्य पारेसरस्तीरम् । 'पारे-मध्ये षष्ठ्या वा' इत्यव्ययीभावः । प्रमाणाधिकोदाहरणं तु पातालमिव नाभिस्त इत्यादौ द्रष्टव्यम् । अत्र सर्वत्र साधर्म्येण चमत्काराय विवक्षितार्थस्य शकुनादिभिः प्रतिपत्तिपरिक्षोभणेन कदर्थीकरणादनौचित्येन दोषत्वमिति भावः । अत एवोक्तं काव्यप्रकाशे । 'उपमानस्य जातिप्रमाणकृतं न्यूनत्वमधिकत्वं वा तादृश्यनुचितार्थत्वं दोषः' इति ।

---

१ भवद्भिर्विहता T'. २ °त्यधिकोपमा R., M. ३ °सदृशोपमम् T'. ४ B. omits यथा. ५ विन्ध्यस्य B. ६ भालेक्षणोज्ज्वलः R. ७ न्यूनाधिकाभ्यामनयोर्भेदः m.

[1]अथाप्रसिद्धोपमम्।

अप्रसिद्धोपमानं यदप्रसिद्धोपमं [2]मतम्।

यथा।

बाष्पाम्बुक्लि[3]न्ननेत्राणि मुखान्यत्र मृगीदृशाम्।
हिमदूषितपत्राणि कुमुदानीव निर्मुदाम्॥ ४८॥

अत्र मुखानां कुमुदान्युपमानतया [4]कविलोके न प्रसिद्धानि।

अथ हेतुशून्यम्।

हे[5]तुशून्यार्थकथनं हेतुशून्यं [6]प्रकीर्त्यते।

यथा।

मुधानुधावनं जातं मार्गेऽस्मिन् [7]मौक्तिकाङ्किते।
अन्वेष्टुमन्यतो यामि पदवीयं न सुभ्रुवः॥ ४९॥

[8]अत्र सुभ्रुवः [9]पदवीयं न भवतीत्यत्र हेतुर्नोक्तः।

यदिति। न ह्यत्र विन्ध्यविरूपाक्षयोस्तद्धर्मयोश्च वह्निनिर्झरयोः सादृश्यप्रसिद्धिरस्ति। न च धर्मिणोर्धर्मद्वारा सादृश्यं धर्मयोश्च धर्मिद्वारेति वाच्यम्। इतरेतराश्रयत्वप्रसङ्गात्। यथाह। 'बभामि काव्यशशिनं विततार्थरश्मिम्' इत्यत्र वामनः। 'तदेवमितरेतराश्रयदोषो दुरुत्तरः' इति। तदेतत् सर्वं मनसि निधायाह। अत्र कुञ्ज इति।

हेतोर्विनेति। हेतुना विनेत्यर्थः। 'पृथग्विना—' इत्यादिना पञ्चमी। मौक्तिकाङ्कित इति। कण्ठीरवाकृष्टकरिकुम्भादिगलितमौक्तिकाङ्कित इत्यर्थः। मुधानुधावनमिति प्रियालंकारमौक्तिकाङ्कित इति भ्रान्त्येति भावः। पदवीयं न भवतीति। गच्छेति शेषः। हेतुर्नोक्त इति। 'अभ्युन्नता पुरस्तादवगाढा जघनगौरवात् पश्चात्' इत्याद्युपलक्षणपदपङ्क्त्यभावादिरूपो हेतुर्नोक्त इत्यर्थः।

---

१ अप्रसिद्धोपमानं यथा R. २ स्मृतम् T′. ३ °क्लिन्न° T′. ४ M. omits कविलोके. ५ हेतोर्विनार्थकथनम् M.; हेतुं विनार्थकथनम् M_1. ६ प्रचक्षितम् T′; प्रचक्षते M. ७ मौक्तिकान्तिके P., B. ८ अत्र पदवीयं न सुभ्रुव इत्यत्र P. ९ पदवी न भवती° M.

अथ निरलंकारः।

अलंकारेण रहितं निरलंकारमुच्यते[1][2]।

यथा।

आघ्राय सुरभैर्योनिमुन्मुखैर्दीर्घमेहनैः।
महोक्षैर्लम्बमानाण्डैर्विष्वक्व्याकुलितं वनम्॥ ४०॥

अत्र न कश्चिदलंकारः। श्लाघ्यविशेषणाभावात् न स्वभावोक्तिः।

अथाश्लीलम्।

अश्लीलार्थस्य कथनमश्लीलं परिकीर्त्यते।

अस्यापि पूर्वमेवोदाहरणम्[3]।

अथ विरुद्धम्।

विरुद्धं देशकालादिविरुद्धं बहुधोच्यते।

यथा।

दिश्युत्तरस्यां नेदीयान्नुदेलो लवणार्णवः[4]।
मरुदेशेऽपि गङ्गा नः पिपासां शमयिष्यति[5]॥ ४१॥

अत्र दिश्युत्तरस्यां[6] लवणार्णव इति दिग्विरोधः। मरौ गङ्गेति देशविरोधः।

आघ्रायेति। महोक्षैः पुङ्गवैः। 'अचतुर—' इत्यादिना निपातनात् साधुः। विच्छित्तिविशेषाभावादिति भावः। वर्ण्यमानवस्तुस्वभावस्तु ग्राम्यधर्मतया सहृदयश्लाघानधिरोहात्र स्वभावोक्तिबीजम्। तदुक्तं चक्रवर्तिना।

'स्वभावोक्तिर्धुधोप्रेयवस्तुस्वाभाव्यवर्णनम्।' इति। तदेतदाह। श्लाघ्यविशेषणाभावान्न स्वभावोक्तिरिति।

अश्लीलार्थस्येति। अश्लीलार्थस्यामङ्गलजुगुप्साव्रीडाबुद्धिजनकस्येत्यर्थः। तत्र व्रीडाबुद्धिजनकस्य पूर्वमेवोदाहरणमित्याह। अस्यापीति। अत्र पर्यायैरप्यस्यार्थस्य सुवचत्वात् पदविनिमयासहिष्णोः पददोषादश्लीलादस्य भेदः। इतरभेदद्वयस्योदाहरणं स्वयमूहनीयम्।

विरुद्धमिति। देशकालादीत्यादिशब्देन विद्यास्वभावादयो गृह्यन्ते। नेदीयानन्तिकतमः। अन्यथोत्तरदेशेऽपि लक्षयोजनव्यवहिते लवणोदस्य संभवेन विरोधाभावादिति भावः। शामयिष्यतीति। चुरादिणिच्युपधावृद्धिः। शमयि-

---

१ निरलंकृतिः P., M. २ निरलंकारमिष्यते R.; निरलंकृतिरुच्यते P. ३ °वोदाहरणं प्रदर्शितम् T'. ४ लवणाम्बुधिः R. ५ शामयिष्यति T'. ६ उत्तरस्यां दिशि R., M.

अरण्यमहिषोदग्रविषाणोदरजन्मनाम् ।
महत्यर्घेऽपि मुक्तानां स्त्रियो गुंजाविभूषणाः[1] ॥ ४२ ॥

अत्र महिषविषाणेभ्यो मुक्तानां जन्मेति लोकविरोधः । एवं विरोधान्तरमप्युदाहार्यम् ।

अथ सहचरभ्रंष्टम्[2] ।

मतं सहचरभ्रष्टमतुल्यानां[3] निबन्धने ।

यथा

शान्त्या श्रुतं ह्रिया नारी मन्मथेन रतोत्सवः ।
श्रुतेन धिषणा वन्यवृत्त्या जीवन्ति शात्रवाः ॥ ४३ ॥

ष्यतीति पाठे चन्द्रमते मितात् ह्रस्वः । मरुदेश इति देशविशेषः । अरण्येति । अर्घे मूल्ये महत्यपि मुक्तामयानि विभूषणानि यासां ता मुक्ताविभूषणाः । गुञ्जाविभूषणा इति पाठान्तरम् । अत्र

'करीक्षुजीमूतवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषां तु शुक्त्युद्भवमेव भूरि ॥'

इति वचनाद् गजादीनामेव मुक्ताकरत्वं प्रसिद्धं नान्येषाम् । तस्मान्महिषविषाणानां मुक्ताकरत्वं लोकविरुद्धमित्याह । अत्रेति । विरुद्धान्तरं विद्याविरुद्धादिकम् । यथा ।

'सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥'

अत्र रात्रौ स्नानं धर्मशास्त्रविरुद्धम् । एवमन्यदप्युदाहार्यम् ।

शान्त्येति । श्रुतधिषणाभ्यां शान्तिश्रुतालङ्कृतत्वेन सर्वेषामत्यन्तोपादेयतया

---

१ मुक्ताविभूषणाः R., M. २ °भ्रष्टः M. ३ °मतुल्यार्थनिबन्धने M.

अत्र श्रुतधिषणाभ्यां नारीरतोत्सवयोरपकृष्टत्वात् सहचरभ्रष्टम्। एव दोषान्तराणि यथा संभवमूह्यानि। रसभावादीनां स्वशब्दवाच्यता दुष्टैव॥

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे दोषप्रकरणं समाप्तम्।

सर्वोत्कृष्टाभ्यामित्यर्थः। नारीरतोत्सवयोर्लज्जामन्मथसमवेतयोः कतिपयोपादेयतयापकृष्टत्वादित्यर्थः। वन्यवृत्त्या जीवन्ति शात्रवा इत्येतत्तु सर्वापकृष्टत्वात् सर्वेभ्यः सहचरेभ्यो भ्रष्टमिति द्रष्टव्यम्। रसेति। भावाः संचारिभावाः। आदिग्रहणात् स्थायिभावा गृह्यन्ते तेषां स्वशब्दवाच्यता रसशृङ्गारादिसामान्यशब्दाभिधेयता दुष्टैवेति। रसप्रतीतेर्विभावादिप्रयोगान्वयव्यतिरेकानुविधानाद्रसादिशब्दप्रयोगेऽपि तदप्रतीतेश्च नित्यव्यङ्ग्यस्य रसादेर्वाच्यत्वं दुष्टमेवेति भावः। तदुक्तं काव्यप्रकाशे रसदोषप्रकरणे।

‘व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।’

इति।

अत्रावाङ्मनसगोचरस्यापि ब्रह्मानन्दस्योपाधिवशाद् यथातथादिपदवाच्यत्व न दोषः। एवं ब्रह्मानन्दसब्रह्मचारिणो रसस्यापि विभावाद्यनुसंधानानन्तरभाविनश्चर्व्यमाणस्य वाच्यत्वानुपपत्तावपि सहकारिवैकल्येऽपि परोक्षतया प्रतीयमानस्य रसस्य शृङ्गारादिशब्दवाच्यत्वे न कोऽपि दोष इति द्रष्टव्यम्।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने रत्नापणाख्याने दोषनिरूपणं नाम पञ्चमं प्रकरणम्॥

---

१ दोषान्तरम् M_4. २ °मुदाहार्याणि M.; °मुदाहार्यम् M_4. ३ रसभावानाम् M_4. ४ R. has इति दोषप्रकरणम् and M. दोषप्रकरणं समाप्तम् before this. ५ T′ drops श्री. ६ कतिपयोपादानतया° m. ७ यदातदादिपद° m.

अथ गुणा निरूप्यन्ते ।

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वं तथा कान्तिरुदात्तता ॥
ओजः सुशब्दता प्रेयानौर्जित्यमथ विस्तरः ।
समाधिः सौक्ष्म्यगाम्भीर्ये[1] संक्षेपो भाविकं तथा ॥
संमितत्वं तथा प्रौढी रीतिरुक्तिर्गतिस्तथा[2] ॥[3]

एषां[4] मध्ये केषांचिद् दोष[5]परिहारकत्वेन गुणत्वम् । केषांचित् स्वत एवोत्कर्षहेतुत्वाद् गुणत्वम् । तत्र ये स्वत एव चारुत्वातिशय[6]हेतवस्ते परमुत्कृष्टाः । दुष्टत्व[7]परिहारहेतूनां गुणत्वं न सर्व[8]संमतम् । ये तु दोषा[9]भावतया गुणत्वमिच्छन्ति तेषामेव सौकुमार्यादयो गुणत्वेन संमताः ।

श्रुतिकटुरूप[10]दोषनिराकरणाय सौकुमार्यं [11]संमतम् । ग्राम्यदोषनिराकरणाय कान्तिः स्वीकृता । अपुष्टार्थनिरा[12]करणायार्थव्य[13]क्तिर्मता । न्यूनाधिकपदनिरा[14]करणाय संमितत्वं मतम् । अनु[15]चितार्थनिरा[16]करणार्थमुदात्तता स्वीकृता । विसंधि[17]निराकरणार्थ[18]मौर्जित्यं मतम् । पतत्प्रकर्षनिराकरणाय रीतिरिष्टा । क्लिष्टपरिहाराय प्रसादो मतः । अश्लीलपरि-

---

इत्थं यथासंभवं दोषान् निरूप्य तत्प्रतिभटभूतगुणनिरूपणं प्रतिजानीते । अथेति । तत्र गुणास्त्रय इति भामहादयः । दशेति वामनादयः । चतुर्विंशतिरिति भोज[19]राजः । तत्र भोज[20]राजमतेनोद्देशमाह । श्लेष इत्यादि ।

एषां मध्ये केषांचिद्दोषपरिहारकत्वेन गुणत्वमिति । तथापि केषांचिन्मते उत्कर्षहेतुत्वात् काव्योत्कर्षहेतुत्वादिति भावः ।

को दोषः केन गुणेन परिह्रियते इत्याकाङ्क्षायामाह । श्रुतिकटुरूपेत्यादिना ।

---

१ °गाम्भीर्यम् R. २ °स्तथा गतिः ॥ M_1. ३ After this line M. has चतुर्विंशतिरेते स्युर्गुणाः काव्यप्रकाशकाः ॥ ४ एतेषाम् R., M. ५ °परिहारद्वारेण M. ६ अतिशयचारुत्वं° M_2.; चारुत्वादिहेतव° R. ७ दुष्टपरिहार° T′. ८ सर्वैः संमतम् R., M. ९ दोषाभावतयापि R.; दोषाभावस्यापि M. १० P. and R. drop रूप. ११ मतम् M. १२ निवर्हणायार्थम° M_1. १३ °व्यक्तिः संमता M. १४ °निरासाय M_1. १५ अनौचित्यहत्यै M_1. १६ °निराकरणायो° R. १७ च्युतसंस्कारपरिहारार्थं सौशब्द्यमिष्टम् is found before this in P. १८ °निराकरणायौ° R., M.; °लोपायौ° M.; °निवृत्त्यर्थं° P. १९ भोजः m. २० भोजमतेना° m.

ह्लादार्थमुक्तिः स्वीकृता । च्युतसंस्कृति[1]परिहारार्थं सौशब्द्यमिष्टम् । प्रक्रमभङ्गनि[2]राकरणाय समता मता । प[3]रुषदोषनिवृत्त्यर्थं प्रे[4]यान् मतः । एवं यथासंभवं केषांचिद्दोषपरिहारकत्वेन[5] गुणत्वम् ।

एषां गुणानां स्वरूपमुदाहरणं च ।

मिथः संश्लिष्टपदता[6] श्लेष इत्यभिधीयते ।

बहूनां पदानामेकपदवदवभासमानत्वं[7] श्लिष्टत्वम्[8] ।

यथा ।

श्रीमत्काकतिवीररुद्रमखिलक्ष्मापालमौलिस्फुरन्-
माणिक्यद्युतिरञ्जिताङ्घ्रिमखिलप्रख्यातशौर्योदयम् ।
विश्वत्राणविनिद्रमक्षय[9]गुणज्योत्स्नावितानावृत-
व्योमागारमनल्पवैभवममुं स्तोतुं[10] वयं नेश्महे ॥ १ ॥

अत्र पाठसमये पदानामेकवत्[11] प्रतिभासमानत्वात् श्लेषः ।

अथ प्रसादः ।

प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते ।

यथा ।

प्रतापरुद्रदेवोऽयं भाति लक्ष्मीपतिः स्वयम् ।
येनास्य लोचने फुल्लपुण्डरीकमनोहरे[12] ॥ २ ॥

अत्र झटित्यर्थसमर्पक[13]पदत्वात् प्रसादः ।

एषां गुणानामिति । संघटनाश्रयत्वे सति चारुताहेतवो गुणा इति वक्ष्यमाणसामान्यलक्षणानामिति भावः । मिथ इति । संश्लिष्टानि मसृणानि पदानि यस्य तस्य भावस्तत्ता । निष्कर्षमाह । बहूनामिति । तदुक्तं वामनेन ।

'यत्रैकपदवद् भान्ति पदानि सुबहून्यपि ।
अनालक्षितसन्धीनि स श्लेषः परमो गुणः ॥' इति ।

उदाहरति । श्रीमदिति । अक्षयगुणज्योत्स्नेति । लौकिकचन्द्रिकाव्यतिरेकः । वितानमुल्लोचः ।

प्रसादमुदाहरति । प्रतापेति । झटित्यर्थसमर्पकपदत्वादिति । व्यवहितार्थप्रत्यायकक्लि[14]ष्टविपर्ययोक्तिः ।

---

१ °संस्कार° P. २ °निवृत्त्यर्थं° R., M. ३ परुषनिराकरणार्थं R.; परुषदोषनिराकरणाय M. ४ प्रेयो मतः M. ५ °परिहारत्वेन R., M. ६ सुश्लिष्टपदता M. ७ °पदत्वेन भासमानत्वम् P.; °पदत्वेनावभासमानत्वम् R. ८ संश्लिष्टत्वम् P. ९ °मन्वयगुण° M. १० सोढुम् M. ११ °मेकवदवभासमानत्वात् T'.; °मेकवत् प्रतिभासमानात्मा M. १२ °मनोरमे R. १३ °समर्पणात् P.; °समर्पणपदत्वात् M. १४ °क्लिष्ट° m.

अथ समता ।

अवैषम्येण भणनं समता सा निगद्यते ।

यथा ।

यदान्यतरुमञ्जरीसुरभयः श्रवःपारणं
गुणा विदधते सतां जगति वीररुद्रप्रभोः ।
सुधामधुरिमाधरीकरणचातुरीचुञ्चवो
वियच्चरतरङ्गिणीविहरदूर्मिमर्मस्पृशः ॥ ३ ॥

अत्र पादचतुष्टयेऽपि तुल्यभणनात् समत्वम् ।

अथ माधुर्यम् ।

या पृथक्पदता वाक्ये तन्माधुर्यं प्रकीर्त्यते ।

यथा ।

यशःश्रियः काकतिनृपतेर्दिशां
नितम्बबिम्बेषु दुकूलरीतयः ।
उरोजयोर्मौक्तिकहारविभ्रमाः
शिरस्सु जातीकुसुमस्रगुज्ज्वलाः ॥ ४ ॥

अत्र वाक्ये पाठसमयेऽपि पृथक्पदत्वप्रतीतेर्माधुर्यम् ।

अथ सुकुमारत्वम् ।

सुकुमाराक्षरप्रायं सौकुमार्यं प्रतीयते ।

सुकुमारत्वं नाम सानुस्वारकोमलवर्णत्वम् ।

यदान्यतरवः कल्पवृक्षाः । तन्मञ्जर्य इव सुरभयो मनोहराः । श्रवःपारणं श्रोत्रसन्तर्पणम् । सुधामधुरिमाधरीकरणचातुरीचुञ्चवः अमृतमाधुर्यन्यक्करणचातुर्यवित्ताः । वियच्चरतरङ्गिणीविहरदूर्मिमर्मस्पृशः मन्दाकिनीकल्लोलकल्पा इत्यर्थः । पादचतुष्टयेऽपि तुल्यभणनादिति । अनेन प्रक्रमभङ्गः परिहृतः ।

यशःश्रिय इति । दिशामित्यनेन स्त्रीप्रतीतेस्तासामधोमध्योर्ध्वदेशेषु नितम्बस्तनशिरोऽध्यवसायो युज्यते । उरोजयोरिति । ‘स्तनादीनां द्वित्वविशिष्टा जातिःप्रायेण’ इति वामनवचनात् द्विवचनोपपत्तिः । अत्र माधुर्ये पृथक्पदत्वं दीर्घसमासाभाव इति वामनः ।

सुकुमारेति । सौकुमार्यमपरुषत्वमित्यर्थः ।

---

१ °चञ्चवो R. २ तुल्यबद्धणनात् M. ३ सुकुमारता T. ४ सौकुमार्यं तदुच्यते R.; सौकुमार्यमुदीर्यते M. ५ °वर्णबन्धत्वम् P., R. ६ कल्पद्रुमाः m. ७ °चञ्चवः p.

यथा।

> अमन्दानन्दनिष्यन्दसुन्दरीवदनेन्दुभिः[1]।
> नगरे काकतीन्द्रस्य दिवाप्याभाति चन्द्रिका ॥ ५ ॥

अथार्थव्यक्तिः।

यत्तु संपूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम्।

यथा।

> भाग्यं मध्यमलोकनिघ्नमधुना येनास्य संरक्षिता
> जातः खेलति वीररुद्रनृपतिर्निःसीमशौर्योदयः।
> यद्वा त्रीण्यपि विष्टपानि दधते धन्यत्वमंशो हरे-
> र्यत्[2] साक्षादवतीर्य काकतिकुले स्वैरं समुज्जृम्भते ॥ ६ ॥

अत्रार्थप्रतिपादने[3] वाक्यस्य निराकाङ्क्षतया परिपूर्णत्वादर्थव्यक्तिः।

अथ[4] कान्तिः।

अत्युज्ज्वलत्वं बन्धस्य काव्ये कान्तिरितीष्यते।

अर्थव्यक्तिरिति। तद्धेतौ तस्योपचारः। तदुक्तम्। 'यत्रार्थव्यक्तिहेतुत्वं सोऽर्थव्यक्तिः स्मृतो गुणः।' इति। भाग्यमिति। मध्यमलोकनिघ्नं मध्यलोकाधीनम्। यद्वा त्रिविक्रमावतारस्य काकतिविभोः किमनेन संकोचेनेत्याह। यद्वेति। निराकाङ्क्षतया परिपूर्णत्वादित्यनेन क्रियापदराहित्यात् साकाङ्क्षत्वेभापरिपूर्णनामशरीरादीनां दोषाणां प्रत्युदाहरणत्वं दर्शितम्। न चापुष्टार्थनिराकरणायार्थव्यक्तिरिति पूर्वोक्तविरोधः परिपोषाभावलक्षणयोगेन तेषामप्यपुष्टार्थत्वात् प्रकृतानुपयुक्तार्थत्वलक्षणापुष्टार्थस्य तु निराकाङ्क्षत्वेन परिपूर्णस्य प्रकृतवैपरीत्याभावान्नास्ति प्रत्युदाहरणत्वमिति द्रष्टव्यम्[5]।

अत्युज्ज्वलत्वमिति। यदभावे चिरन्तनचित्रच्छायेव प्रबन्धच्छाया भवति तदौज्ज्वल्यं सैव कान्तिरित्यर्थः। तदुक्तम्।

> 'औज्ज्वल्यं कान्तिरित्याहुर्गुणं गुणविपश्चितः।
> पुराणचित्रस्थानीयं तेन वन्ध्यं कवेर्वचः॥' इति।

---

१ °वदनांशुभिः R. २ यत्र T'. ३ M. drops अत्र. ४ R. has the treatment of औदार्य before that of कान्ति. ५ भावः m.

यथा ।

जेतुः काकतिवीररुद्रनृपतेर्जैत्रप्रयाणोत्थिते
क्षोणीरेणुभरे नभस्यतिभृशं भूविभ्रमं बिभ्रति ।
जाता मर्त्यनदी विशंकटतटी दीर्घा वियद्दीर्घिका
गाढं गूढतमा च गौतमनदी पातालगङ्गायते ॥ ७ ॥

अथौदार्यम् ।

विकटाक्षरबन्धत्वमार्यैरौदार्यमिष्यते ।

यथा ।

जग्ध्वा भूयांसि मांसान्यहमहमिकया बद्धगार्ध्यान् सपीत्या-
मसस्योच्चैस्तरास्थ्युत्कपणमवकटत्काररौद्राग्रदंष्ट्रान् ।
संविभ्राणाः क्षपाटान् द्विपगलितवसानिर्झरान्तर्नदीष्णान्
कुर्वन्त्यायोधनोर्व्यो भयमवनिभृतामन्ध्रसैन्येन सृष्टाः ॥ ८ ॥

जेतुरिति काव्यप्रकरणे व्याख्यातम् ।

औदार्यं नाम विकटाक्षरबन्धत्वं तच्च नर्तनबुद्ध्युत्पादकपदविन्यासः । तदुक्तम् ।

'विकटत्वं च बन्धस्य कथयन्ति ह्युदारताम् ।
वैचित्र्यं न प्रपद्यन्ते यया शून्याः पदक्रमाः ॥
पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः ॥' इति ।

जग्ध्वेति । अन्योन्यं प्रति श्रेष्ठोऽहमित्यभिमानोऽहमहमिका । अहमिति विभक्तिप्रतिरूपकमव्ययं निपातितम् । तस्य वीप्सायां द्विरुक्तिः । संज्ञायां कन्प्रत्ययः । पृषोदरादिरिति सुभूतिचन्द्रः । गर्ध एव गार्ध्यम् । चातुर्वर्ण्यादित्वादौपम्यादिवत् स्वार्थे ष्यञ्प्रत्ययः । तद्बद्धं यैस्तान् बद्धगार्ध्यान् । समाना पीतिः सपीतिः । 'सहपानं सपीतिः स्त्री तुल्यपानम्' इत्यमरः । 'समानस्य च्छन्दसि—' इत्यादिना समानशब्दस्य सभावः । छान्दसत्वेऽपि बाणादिप्रयोगमहिम्ना लोकेऽपि न विरोध इत्याह दैवंशटीकासर्वस्वकारः । 'समानस्य च्छन्दसि—' इत्यत्र समानस्येति योगविभागसामर्थ्यात् भाषायामपि सपक्षादिप्रयोगसिद्धि-

---

१ दातुः M_2. २ नभस्पृशि भृश° R. ३ °तटा P. ४ °मौदार्यं चेष्यते बुधैः R., M_2. ५ समित्या P. ६ पलादान् P.; फलादान् M. ७ °कलित° B. ८ °सैन्येशसृष्टाः T'. ९ वस्तुतः m. १० दशमिका° m.

अथौदात्तता ।

श्लाघ्यैर्विशेषणैर्योगो यस्तु सा स्यादुदात्तता ।

यथा ।

बृंहमाणगजाकीर्णा ह्रेषमाणहयाकुला ।
संक्रीडत्स्यन्दना क्ष्वेडभटा[1] रुद्रविभोश्चमूः ॥ ९ ॥

अथौजः ।

ओजः समासभूयस्त्वम् ।

यथा ।

उद्दामद्विरदौघदानलहरीसौरभ्यलोभभ्रमद्-
भृङ्गश्रेणिनिबद्धझंकृति[2]कलावाचालितप्राङ्गणाः ।
निःसीमप्रथमानभूमविभवारम्भाः प्रियंभावुका
मोदन्ते भुवि वीररुद्रनृपतेर्विद्वद्गृहश्रेणयः ॥ १० ॥

रित्याह वृत्तिकारः । पदमञ्जरीकारस्तु 'योगविभागाङ्गीकारे तस्य नित्यत्वात् समानजातीयशब्दप्रयोगो न स्यात् । अस्ति च प्रयोगः । तस्मात् सपक्षादिशब्देषु सदृशार्थस्य सहशब्दस्य पक्षादिभिरस्वपदविग्रहे बहुव्रीहौ सहशब्दस्य 'वोपसर्जनस्य' इति सभावः । भाष्यवार्त्तिकयोश्च[3] योगविभागो नोपन्यस्तः' इत्यवोचत् । यदत्र युक्तं तद् ग्राह्यम् । अस्थ्युत्कषणमस्थिसंघर्षः । कटत्कारोऽनुकरणशब्दः । क्षपास्वटन्तीति क्षपाटाः नक्तंचराः भूतवेतालादयः । नद्यां स्नान्तीति नदीष्णाः कुशलाः । 'सुपि—' इति योगविभागात् कप्रत्ययः । 'निनदीभ्यां स्नातेः कौशले' इति षत्वम् ।

श्लाघ्यैरिति । श्लाघ्यैरुचितैः बृंहणादीनां गजानामेवोचितत्वादिति भावः । वैपरीत्येऽनौचित्यमनेन परिहृतमित्यनुसंधेयम् । बृंहमाणेति चानशान्तोऽयं न शानजन्तः । बृंहेः परस्मैपदित्वात् । क्ष्वेडभटेति पचाद्यजन्तपाठो न क्ष्वेडद्भटेति शत्रन्तपाठः । तस्मात्मनेपदित्वादित्यादिप्रपञ्चेन व्याख्यातं नाटकप्रकरणे द्वितीयेऽङ्के । अनुचितार्थपरिहारकोऽयं गुणः ।

उद्दामेति । वाचालानि कृतानि वाचालितानि शब्दायमानानीत्यर्थः । भूमविभवो महिमातिशयः । प्रिया भवन्तीति [4]प्रियंभावुकाः । 'कर्तरि भुवः खिष्णुच्खुकञौ' इति खुकञ्प्रत्ययः । अत्र वीररुद्रविदुषां गजान्तलक्ष्मीमाहात्म्यं च प्रतिपाद्यते ।

---

१ °क्ष्वेडद्भटा M. २ °झाङ्कृति° R. ३ °वृत्तिकारस्योश्च m. ४ प्रियभावुकाः p.

अथ सुशब्दता ।

सुपां तिङां च व्युत्पत्तिः सौशब्द्यं परिकीर्त्यते ।

यथा ।

आशामण्डलकूलमुद्वहकथैरभ्रंकषैर्वैभवै
रक्षन् सुप्रजसः प्रजास्त्रिभुवनक्षेमंकरप्रक्रियः ।
दुष्टानां भुवि निग्रहन्तुमतुलैराढ्यंभविष्णुर्गुणै-
र्भूम्ना संचरतेऽद्य काकतिकुले रुद्रावतारो हरिः ॥ ११ ॥

अथ प्रेयः ।

प्रेयः प्रियतराख्यानं चाटूक्त्या यद्विधीयते ।

यथा ।

सुपां तिङां चेति । सुबन्ततिङन्तविशेषाणामित्यर्थः । कूलमुद्वहन्तीति कूलमुद्वहाः कथा यैस्तैर्दिगन्तप्रसिद्धैरित्यर्थः । 'उदि कूले रुजिवहोः' इति खश्प्रत्ययः । अभ्रं कषन्तीत्यभ्रंकषाः । तैरुत्कृष्टैरित्यर्थः । 'सर्वकूलाभ्रकरीषेषु कषः' इति खश्प्रत्ययः । वैभवैरैश्वर्यैः । शोभना प्रजा यासां ताः सुप्रजसः । 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्प्रत्ययः । प्रजा रक्षन्निति शतृप्रत्ययः । रक्षणेन हेतुनेत्यर्थः । अत एव त्रिभुवनक्षेमंकरप्रक्रियो विश्वजनीनव्यापार इत्यर्थः । 'क्षेमप्रियमद्रे णच्' इति खच्प्रत्ययः । गुणैः शौर्यादिभिः । आढ्यो भवतीत्याढ्यंभविष्णुः । 'कर्तरि भुवः' इति खिष्णुच्प्रत्ययः । दुष्टानां निग्रहन्तुम् । 'जासिनिप्रहण—' इत्यादिना कर्मणि षष्ठी । भूम्ना माहिम्ना संचरते । 'समस्तृतीयायुक्तात्' इत्यात्मनेपदम् । इत्थमत्र सौशब्द्यं नाम गुणः । तत्र च्युतसंस्कारपरिहारार्थत्ववचनमयुक्तम् । अनभिहितगुणभावेनापशब्दाभावमात्रेण तत्परिहारसंभवात् । अत्र तु सकलसचेतश्चेतश्चमत्कारकारिविशिष्टपदप्रयोगेण चारुताहेतुत्वसंभवादस्यैव स्वतन्त्रं गुणत्वमिति ।

प्रेय इति । चाटूक्तौ प्रियोक्तौ । दाक्षिण्यं सरलत्वम् । दक्षता क्षिप्रकारिता । धौरेयता धुरन्धरत्वम् । 'धुरो यड्ढकौ' इति ढक्प्रत्ययः । निष्ठुरोक्तिलक्षणपरुषप्रातिपक्ष्यं प्रेयस इत्युक्तम् ।

---

१ °मिहमुद्रत° P.; °कूलमुद्रज° M. २ निग्रहीतुमतुलै° P. ३ चाटूक्तो P., R., M.

दाक्षिण्यं त्वयि दक्षता त्वयि दया त्वय्युन्नतत्वं त्वयि
प्रागल्भ्यं त्वयि पौरुषं त्वयि कला संपत्त्वयि श्रीस्त्वयि ।
औदार्यं त्वयि धी[1]रता त्वयि जगद्धौरेयता च त्वयि
श्रीमत्काकतिनाथ पालय भुवं वैरिञ्चकल्पान् श[2]तम् ॥ १२ ॥

अथौर्जित्यम् ।

[3]और्जित्यं गाढबन्धत्वम् ।

यथा ।

[4]क्षोणीरक्षणदक्षिणाः क्षतजगत्क्षोभा दु[5]रीक्ष्यक्रमाः
क्षुद्रक्षत्रियपक्षशिक्षणविधौ प्रोत्क्षिप्तकौक्षेयकाः ।
उद्दामोद्यमनस्य रुद्रनृपतेर्दोर्दण्डयोश्चण्डयो-
र्गर्जद्दुर्जनगर्वपर्वतभिदा दम्भोलयः केलयः ॥ १३ ॥

[6]अथ समाधिः ।

समाधिरन्यध[7]र्माणां यदन्यत्राधिरो[8]हणम् ।

यथा ।

पृच्छन्ती दुग्धसिन्धुं कुशलमनुसरन्त्यादराच्छं[9]कराद्रिं
चाटूक्त्या मानयन्ती मुहुरमरनदीं चन्द्रमग्रे हसन्ती ।
वैधात्रीं यानहंसावलिमनुकम्पया स्वागतं व्याहरन्ती
लोकेषु त्रिष्वमीषु प्रभवति महती वीररुद्रस्य कीर्त्तिः ॥ १४ ॥

और्जित्यमिति । गाढबन्धत्वमिति विसन्धिवैलक्षण्येनेति भावः । क्षोणीरक्षणेत्यादि श्लोको व्याख्यातः काव्यप्रकरणे शब्दचित्रे ।

पृच्छन्तीति । अत्र कुशलप्रश्नादेश्चेतनधर्मस्याचेतनायां कीर्त्तावधिरोपणात् समाधिः ।

---

१ धीरता P. २ ध्रुवम् R. ३ गाढबन्धत्वमौर्जित्यम् M. ४ गर्जद्दुर्जरगर्वपर्वतभिदस्त्वद्बाहुविस्फूर्त्तयः इत्यादि M. ५ दुरीक्ष° R.; °दुरीक्ष T.; °दुरीक्ष्य° T′. ६ In M. and R. समाधि is treated after विस्तर. ७ °धर्मस्य T′. ८ °रोपणम् T′. ९ °च्छाङ्कराद्रिं B.

अथ विस्तरः।

समर्थनमपञ्चोक्तिरुक्तस्यार्थस्य विस्तरः ।

यथा ।

लोकेषु त्रिषु काकतीश्वरगुणान् स्तोतुं मुहुर्वीक्षितुं
श्रोतुं चाभिनन्दितुं च फणिनामेकः क्षमो नायकः ।
यद्वक्त्राणि सहस्रमस्य कृतिनो यद् द्वे सहस्रे दृशा-
स्ता एव श्रुतयः फणा दशशतान्यत्यद्भुतान्दोलने ॥ १५ ॥

अथ संमितत्वम् ।

यावदर्थपदत्वं तु संमितत्वमुदाहृतम् ।

यथा ।

काकतीयनरेन्द्रस्य यैशश्चन्दनचर्चनम् ।
दिगङ्गना वितन्वन्ति घतंसीकृततद्गुणाः ॥ १६ ॥

समर्थनेति । विस्तर इति समर्थनप्रपञ्चनस्य शब्दात्मकत्वेन 'प्रथने वावशब्दे' इति घञः प्रतिषेधे 'ऋदोरप्' इत्यप् प्रत्ययः । 'स तु शब्दस्य विस्तरः' इत्यमरः । लोकेष्विति । अभिनन्दितुमनुमोदितुम् । स्तोत्रादिषु फणिपतिसामर्थ्यं समर्थ्यते । यदिति । यस्मात् कारणादित्यर्थः । अत एवेदं न काव्यलिङ्गम् । हेतुवाचकविभक्त्यादेरश्रवण एव तस्योत्थानादिति ।

यावदिति । यावन्तोऽर्था यावदर्थमिति तद्धितान्तेन विग्रहः । तदुक्तं हरदत्तेन ।

'यावदित्यव्ययं चास्ति तद्धितान्तश्च विद्यते ।
अतो नित्यसमासेऽपि तद्धितान्तेन विग्रहः ॥' इति ।

'यावदवधारणे' इत्यव्ययीभावः । यावदर्थं पदानि यस्य तस्य भावस्तत्त्वम् । अभिधेयापेक्षया यत्रैकमपि पदं न न्यूनं नाप्यधिकं तत्संमितमित्यर्थः । काकतीयेति । गतमेतत् ।

---

१ ये द्वे P. २ °शतान्यत्तत्कृतान्दोलने M. ३ In R., M_2 and T'. the order of the Guṇas after विस्तर is—सौम्य, गाम्भीर्य, संक्षेप, भाविक, संमितत्व, प्रौढि, रीति, उक्ति and गति. ४ कीर्तिचन्दन° M. ५ °र्पितम् M., °र्पिकाम् M_2

अथ गाम्भीर्यम् ।

ध्वनिमत्ता तु गाम्भीर्यम् ।

यथा ।

विषं कौक्षेयके गङ्गा कीर्त्तौ दिग्वसनं रिपौ ।
इन्दुर्मुखे च रुद्रस्य काकतीयस्य दृश्यते ॥ १७ ॥

अत्र शंकरस्य कण्ठे विषं मौलौ गङ्गा कटितटे दिग्वस्त्रं शिरसि चन्द्र इति ध्वन्यते ।

अथ संक्षेपः ।

संक्षिप्तार्थाभिधानं यत् संक्षेपः परिकीर्त्त्यते ।

यथा ।

वंशोऽस्ति काकतीयानां तत्रासन् बहवो नृपाः ।
तेषां भाग्यविवर्त्तोऽयं वीररुद्रो नरेश्वरः ॥ १८ ॥

अत्रातिविस्तारकथनयोग्यार्थस्य संक्षेपोक्तेः संक्षेपः ।

अथ सौक्ष्म्यम् ।

अन्तः संजल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यते ।

यथा ।

अध्यधःपरिसंश्लिष्टाः ष्ठाकृञ्भूधातवः सदा ।
वर्त्तन्ते काकतीयेन्द्रे कर्त्तर्यन्यत्र कर्मणि ॥ १९ ॥

ध्वनिमत्त्वमुदाहरणे योजयति । अत्र शङ्करस्येति । वंश इति । भाग्यविवर्त्तो भाग्यपरिपाकः ।

अन्तरिति । समीचीनो जल्पः संजल्पः विवक्षितार्थः सोऽन्तःकृतो गर्भितो यत्र तद्रूपत्वमन्तःसंजल्परूपत्वं सौक्ष्म्यमित्यर्थः । अध्यधःपरिशब्दैः संश्लिष्टाः संबद्धाः अधिष्ठानुष्ठाद्यादिशब्दा इत्यर्थः । ष्ठा गतिनिवृत्तौ । डुकृञ् करणे । भू सत्तायामित्येते धातवो ‘भूवादयो धातवः’ इत्युक्तलक्षणाः शब्दविशेषाः ष्ठाकृञ्भूधातवः काकतीयेन्द्रे सदा कर्त्तरि वर्त्तन्ते । कर्तृवाचिन एव तिबादिप्रत्ययान् दधतीत्यर्थः । अन्यत्र कर्मणि कर्मवाचिनो यगादिप्रत्ययान् दधतीत्यर्थः । एतच्च

---

१ कटी P. २ राज्ञां विवर्त्तोऽयम् M_3, M_4 ३ वीररुद्रनरेश्वरः R., M_3, M_4. ४ संक्षेपेणोक्तिः M_3, M_4. ५ सोऽन्तःकृ° P. ६ °क्लिष्टा ष्ठा° P. ७ कृ for कृञ् P.; कृञि M_3.

अत्राधितिष्ठत्यधःकरोति परिभवतीत्यन्तःसंजल्परूपत्वात् सौक्ष्म्यं भवति ।

अथ प्रौढिः ।

प्रौढिरुक्तेः परीपाकः ।

यथा ।

वीप्सा पद्मभवस्य चन्द्रमुकुटस्यावृत्तिराम्रेडितं
दैत्यारेः प्रतिबिम्बनं सुरगिरेरिन्दोः समुत्तेजना ।
कर्णादेः पुनरुद्भवः सुरतरोः सर्वस्वमाविष्क्रिया
स्वर्धेनोरिति तर्कयन्ति कवयः श्रीवीररुद्रप्रभुम् ॥ २० ॥

अथोक्तिः ।

विदग्धभणितिर्या स्यादुक्तिं तां कवयो विदुः ।

यथा ।

[1]दिट्ठा कमलासत्ती रण्णो तुह सुहंअचित्तचरिअस्स ।
भासन्तो वि तुमं तं कुवलअलच्छि पसाहेसि ॥ २१ ॥

न केवला प्रकृतिः प्रयोक्तव्येति नियमेन केवलधातोः प्रयोगाभावात् ' लः कर्मणि च भावे चाकर्मकेभ्यः ' इति प्रत्ययानामेव कर्तृकर्माभिमर्शनदर्शनाच्चेति द्रष्टव्यम् । फलितमाह । अत्राधितिष्ठतीत्यादि ।

प्रौढिरिति । परीपाको वैचित्रीविशेषः । वीप्सेति । वीप्सा द्विर्भावः । निमित्तनैमित्तकयोरभेदोपचारात् । आम्रेडितं 'द्विस्त्रिरुक्तम् । प्रतिबिम्बनं प्रतिबिम्बः । समुत्तेजना शाणोल्लीढत्वम् । सर्वत्र द्वितीयब्रह्मादिरूपत्वमित्यर्थः । अत्र वीररुद्रे विरिञ्चिवीप्साद्यारोपलक्षणवैचित्रीवशात् प्रौढिः ।

दिट्ठेति । कमलासक्तिरेकत्र कमलायामन्यत्र कमलेष्वासक्तिः । कुवलयलक्ष्मीं भूमण्डललक्ष्मीमन्यत्रोत्पलसंपदम् । राज्ञश्चन्द्रस्यापि कमलासक्तिः भास्वतः सूर्यस्यापि कुवलयप्रसाधनमित्येवंरूपायां विदग्धभणितावश्लीलं परिह्रियते ।

छाया ।

1 दृष्टा कमलासक्ती राज्ञस्तव सुभगचित्तचरितस्य ।
भास्वानपि त्वं तां कुवलयलक्ष्मीं प्रसाधयसि ॥

१ सोज्ज्वल° P. २ समुत्तेजनम् P., T'., R.; समुत्तेजनात् M₈. ३ श्रीकाकतीन्द्रप्रभुम् T ४ विट्ठि M₈. ५ सुभअ M₈. ६ भासन्तो वि M₈. ७ कर्तृकर्माभिधानाच्चेति m. ८ द्विरुक्त m. ९ समुत्तेजनम् p.

अथ रीतिः ।

[1]यथोपक्रमनिर्वाहो रीतिरित्यभिधीयते ।

षड् गुणान् सेवते राजा षड् रिपूनवमन्यते ।
षड् दर्शनान्युपादत्ते षड् बलानि च वीक्षते ॥ २२ ॥

अथ भाविकम् ।

भावतो वाक्यवृ[2]त्तिर्या भाविकं तदुदाहृतम् ।

यथा ।

स्वामिंस्तात कुलोत्तंस वीररुद्र जगत्प्रभो ।
पुत्रिणां धुरमेषोऽहं पुत्रेणारोपितस्त्वया ॥ २३ ॥

अत्र प्रेमरूपभाववशात् स्वामिंस्तातेति वा[3]क्यवृत्तिः ।

अथ गतिः ।

गतिर्नाम सुरम्यत्वं स्वरारोहावरोहयोः ।

यथा ।

प्रकाश्ये त्रैलोक्ये सततमतुलैः काकतिविभो-
र्महोभिर्निःसीमैर्दिनकरकराटोपपटुभिः ।

षड् गुणान् सन्ध्यादीन् । ‘ सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः । षड्गुणाः’ इत्यमरः । षड् रिपून् कामक्रोधादीन् । षड् दर्शनानि पाणिनीयप्रभृतीन्युक्तानि । षड् बलानि मौलादीनि । तदुक्तं मौलेश्वरेण ।

‘ मौलं भृत्यं तथा मैत्रं श्रैणमाटविकं बलम् ।
आमित्रमपरं षष्ठं सप्तमं नोपलभ्यते ॥’ इति ।

अत्र पादचतुष्टयेऽप्यादौ षड्गुणोपादानाद्यथोपक्रमनिर्वाहेण पतत्प्रकर्षपरिहारिणी रीतिर्द्रष्टव्या ।

भावत इति । भावः प्रेमास्त्रास्तीति भाविकम् । स्वामिन्निति पुत्रं प्रति जनकस्योक्तिः । भाविकं योजयति । अत्र प्रेमेति ।

गतिरिति । स्वराणामारोहो दीर्घाक्षरप्रायत्वम् । अवरोहो वै[4]परीत्यम् । प्रकाश्य इति । निःसीमैरिति सूर्यादितेजोव्यतिरेकोक्तिः । वीररुद्रतेजसि विश्वव्या-

---

१ यथाक्रमेण T′. २ °वृत्तिः स्याद् भाविकम् M_2. ३ वाक्यप्रवृत्तिः R. ४ वैरूप्यम् m.

तमः कृत्स्नं शोकज्वलदनलरोचिः[1]परिचयं
दधत्स्वप्युद्वेलत्य[2]रिनृपमन[3]:स्वेव सततम् ॥ २४ ॥

अत्र पूर्वार्धे दीर्घाक्षरप्रायत्वात् स्वरस्यारोहः । [4]एतेषां गुणानामर्थगतत्वमपि[5] केचिदिच्छन्ति । प्राचामाचार्याणां मतेन संघटनाश्रयत्वमेव[6] गुणानाम् । तदुक्तमलंकारसर्वस्वे । 'संघटनाधर्मत्वेन शब्दार्थधर्मत्वेन च गुणालंकाराणां[7] व्यवस्थानम्' इति । अनयैव भङ्ग्या गुणालंकाराणां सुनिरूपः[8] स्वरूपभेदः[9] । अन्यथा स्वरूपभेदस्य दुर्निरूपत्वात् । काव्यशोभाकरत्वमेव गुणालंकारस्वरूपम्[10] । तदुक्तं रुद्रभट्टेन ।

पिनि तमसो वैरिहृदयान्येवावकाश इत्याह । तम इति । तत्राग्निसंनिधानेऽपि तमसो न बाध इत्याह । शोकेति । दधत्स्वपीत्यपिशब्दो विरोधसूचकः । दुःखिता मुह्यन्तीति परिहारः । उद्वेलति विजृम्भते । अत्र पूर्वार्ध इत्यनेनोत्तरार्धे ह्रस्वाक्षरप्रायत्वादवरोह इति द्रष्टव्यम् ।

एतेषां गुणानां मतभेदेनार्थगतत्वलक्षणं विशेषमाह । एतेषामिति । तदुक्तं वामनेन । 'एत एवौजः[11]प्रसादप्रभृतयोऽर्थगुणाः' इति । स्वमतमाह । प्राचामिति । संघटनाश्रयत्वमेवेति । बहूनां पदानामेकपदवदव[12]भासमानत्वादिलक्षणे श्लेषादावर्थगतत्वस्य दुर्घटत्वादिति भावः । अलंकारसर्वस्व इति । उद्भटादिमतानु[13]वादत्वेनेति भावः । अनयैव भङ्ग्येति । संघटनाशब्दार्थरूपाश्रयभेदेनैवेत्यर्थः । अन्यथेति । आश्रयभेदाभाव इत्यर्थः । ननु कथमेतदुपपद्यते 'काव्यशोभायाः कर्तारो धर्मा गुणाः । तदतिशयहेतवस्त्वलंकाराः' इति वामनेन स्वरूपभेदस्योक्तत्वादिति चेत् नैतत् साधीयः । विकल्पासहत्वात् । इदं हि तद्दर्शनरहस्यम् । रीतिरात्मा काव्यस्य । रीतिश्च गुणविशिष्टपदरचना । सा वैदर्भ्यादिभेदेन त्रिविधा । तत्र सर्वगुणविशिष्टा वैदर्भी । कतिपयगुणविशिष्टे गौडीयापाञ्चाल्याविति । तत्र सर्वगुणानां [14]मिलित्वा काव्यशोभाहेतुत्वे गौडपाञ्चालरीत्योरव्याप्तिः । कतिपयानां काव्यशोभाहेतुत्वे

---

१ परिचयान् M_2. २ °त्यरनृप° P. ३ °मनस्येव M_1, M_4. ४ T'. has उत्तरार्धे अवरोहः and M_2. has उत्तरार्धे ह्रस्वाक्षरतया स्वरस्यावरोहः. ५ M_2. omits अपि. ६ °मपि R., T'. ७ °काराणामवस्थानम् P., R. ८ निरूपितः T'.; सुनिरूपितस्व° M_2. ९ स्वरूपे भेदः M_4. १० स्वरूपमुक्तं रुद्रदेवेन R., M_2. ११ प्रसादादयो m. १२ °पदवदाभास° P. १३ °नुवादत्वेने° m. १४ मिलितत्वात् m.

'यो हेतुः काव्यशोभायाः सोऽलंकारः प्रकीर्त्यते ।
गुणोऽपि तादृशो ज्ञेयो दोषः स्यात्तद्विपर्ययः ॥'

अतो गुणानां संघटनाश्रयत्वमेव युक्तम् ।

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे गुणप्रकरणं समाप्तम् ।

अत्राद्य प्रज्वलत्यग्निरुच्चैः
प्राज्यः प्रोद्यन्नुल्लसत्येष धूमः ।

इत्यादौ पर्वतोऽग्निमानित्यादिशुष्कशास्त्रानुकूल्येन काव्यत्वरहितेऽप्योजःश्लेषादिसंभवेनातिव्याप्तिः स्यात् । तस्मान्नास्ति गुणानां तन्मते काव्यशोभाकरत्वम् । न च तन्मूलमलंकाराणां तदतिशयहेतुत्वमिति । स्वमतेऽभिमतसंमतिं च दर्शयति । यो हेतुरिति । उपसंहरति । अत इति । स्वरूपभेदाभावादित्यर्थः । संघटनाश्रयत्वमेव युक्तमिति । भेदकत्वेनेति भावः । एतच्चोद्भटादिमतमवलम्ब्य श्लेषादीनां माधुर्यादावनन्तर्भावमङ्गीकृत्योक्तम् । वस्तुतस्तु भामहादिमतेनान्तर्भावे श्लेषादिगुणानां रसधर्मत्वम् । अलंकाराणां तु शब्दार्थधर्मत्वमिति विद्यत एव स्वरूपभेद इति रहस्यम् । अत एव स्वयमेवोक्तवान् काव्यप्रकरणे ।

हारादिवदलंकारास्तेऽनुप्रासोपमादयः ।
श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः ॥

आत्मोत्कर्षावहा इति ।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लि-
नाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्या-
नुजेन कुमारस्वामिसोमपीथिना विरचिते प्रताप-
रुद्रीयव्याख्याने रत्नापणाख्याने गुणनिरूपणं
नाम षष्ठं प्रकरणम् ॥

---

१ R. and M. have इति गुणप्रकरणम् before this. २ T′. drops श्री.
३ माधुर्यादावन्तर्भावत्वाङ्गीकारेणोक्तम् । m.

अलंकारस्वरूपनिरूपणम् ।

अथ गुणनिरूपणानन्तरमलंकारा निरूप्यन्ते । अलंक्रियतेऽनेनेति चारुत्वहेतुरलंकारः । तथा चोक्तं काव्यप्रकाशे ।

परिशेषादलंकारनिरूपणं प्रतिजानीते । अथेति ।

अत्रैतेऽलंकाराश्छेकानुप्रासवृत्त्यनुप्रासौ ।
यमकं पुनरुक्तवदाभासो लाटोपलालितः प्रासः ॥ १ ॥
चित्रमथो उपमानन्वयोपमेयोपमास्मरणम् ।
रूपकपरिणामौ द्वौ संदेहभ्रान्त्यपह्नवोल्लेखाः ॥ २ ॥
उत्प्रेक्षातिशयोक्ती तथा सहोक्तिर्विनोक्तिश्च ।
उक्तीः समालवक्रस्वभावकव्याजपूर्विका विद्यात् ॥ ३ ॥
मीलनसमानतदतद्गुणाविरोधो विरोधश्च ।
अधिको विभावनाथो विशेषपूर्वोक्त्यसंगती स्याताम् ॥ ४ ॥
विचित्रान्योन्यविषमाः समोऽथो तुल्ययोगिता ।
दीपकं प्रतिवस्तूपमा दृष्टान्तो निदर्शना ॥ ५ ॥
व्यतिरेकः श्लेषपरिकराक्षेपा मृषास्तुतिः ।
अप्रस्तुतप्रशंसा च पर्यायोक्तं प्रतीपकम् ॥ ६ ॥
अनुमानं काव्यलिङ्गं न्यासोऽर्थान्तरपूर्वकः ।
यथासंख्यार्थापत्ती परिसंख्योत्तरं तथा ॥ ७ ॥
वार्थचार्थौ द्वौ समाधिर्भाविकं प्रत्यनीककम् ।
व्याघातपर्यायसूक्ष्मा उदात्तः परिवृत्तिका ॥ ८ ॥
हेतुमालैकावली च मालादीपकसारकौ ।
संसृष्टिसंकरौ चेति पञ्चसप्ततिरीरिताः ॥ ९ ॥
रसवत् प्रेय ऊर्जस्वी समाहितमथोदयः ।
भावस्य संधिः शाबल्यं द्व्यशीतिरिति मे मताः ॥ १० ॥

एतेषामलंकारशब्दव्युत्पत्त्या तत्सामान्यलक्षणलाभं मत्वाह । अलंक्रियतेऽनेनेति । अनियमेन रस इति शेषः । 'अकर्तरि च कारके संज्ञायाम्' इति करणे घञ्प्रत्ययः । एतेनैतेषां गुणानामिव रसोपकारासंभवात् तेभ्यो वैलक्षण्यं

---

१ M. has अथालंकारं निरूप्यते. २ तत्रोक्तम् R. ३ सामान्यतद्गुणा° m.

'उपस्कुर्वन्ति[1] तं सन्तं[2] येऽङ्गद्वारेण संश्रिताः[3] ।
हारादिवदलंकारास्तेऽनुप्रासोपमादयः ॥' इति ।

यथा करचरणाद्यवयवगतैर्वलयनूपुरादिभिस्तदलंकारतया प्रसिद्धैरवयव्येवालंक्रियते तथा[4] शब्दार्थावयवगतैरनुप्रासोपमादिभिस्तत्तद[5]लंकारतया प्रसिद्धैरवयवीभूतं काव्यमुपस्क्रियते ।

आश्रयाश्रयिभावेना[6]लंकार्यालंकारभावो लोकवत्[7] काव्येऽपि[8] संमतः । चारुत्वहेतुत्वेऽपि गुणानामलंकाराणां चाश्रयभेदाद्भेदव्यपदेशः[9] । संघटनाश्रया गुणाः शब्दार्थाश्रयास्त्वलंकाराः ।

तत्र[10] प्रथमं शब्दार्थोभयगतत्वेन त्रैविध्यमलंकाराणाम् । अर्थालंकाराणां[11] चातुर्विध्यम् । केचित् प्रतीयमानवस्तवः । केचित् प्रतीयमानौपम्याः । केचित् प्रतीयमानरसभावादयः । केचिदस्फुटप्रतीयमाना इति ।

सूच्यते । अविशेषार्थे वृद्धसंवादमाह । उपस्कुर्वन्तीति[12] । येऽङ्गद्वारेण शब्दार्थयोरुत्कर्षाधानद्वारेण तमङ्गिनं रसं सन्तं विद्यमानमुपस्कुर्वन्तीत्यनेन रसाभावे चित्रकाव्ये शब्दार्थवैचित्र्यमात्रपर्यवसायित्वमलंकाराणामिति सूच्यते । तेऽलंकाराः कण्ठादीनामुत्कर्षाधानद्वारेण हारादय इव संयोगवृत्त्या वर्तन्त इत्यर्थः । न केवलमेव सति रसेऽनुप्रासोपमादिभिः स्वाश्रयभूताः शब्दार्था एवोपस्क्रियन्ते किं तु तदवयवीभूतं काव्यमपीत्येतल्लौकिकदृष्टान्तेनाह । यथेति । आश्रयाश्रयिभावेनेति । संयोगमूलेनेति शेषः । लोके मूलभूतः संयोगो मुख्यः । अत्र ध्वनित्वसाधर्म्यादौपचारिक इति भेदः । अथालंकारविभागं करिष्यमाणस्तदुपयोगितयोद्भटादिमतेनोक्तमेव गुणालंकारभेदमनुवदति । चारुत्वहेतुत्वेऽपीति ।

इत्थमलंकारस्वरूपं निरूप्य तद्विभागमाह । तत्र प्रथममिति । शब्दालंकारा अनुप्रासादयः । अर्थालंकारा उपमादयः । उभयालंकारा लाटानुप्रासोपमसंसृष्ट्यादयः । एतेषां तुल्येऽपि काव्यशोभाहेतुत्वे शब्दार्थोभयालंकारव्यवस्थायामाश्रयाश्रयिभाव एव प्रमाणमित्यलंकारसर्वस्वकारः । अन्वयव्यतिरेकाविति काव्यप्रकाशकारः । रसभावादिर्व्यज्यत इति । गुणीभूतव्यङ्ग्यत्वेन प्रतीयत इत्यर्थः ।

---

१ उपकुर्वन्ति R., M. २ सन्ततम् P.; सततम् R. ३ जातुचित् P. ४ तथैव R., M. ५ °स्तदलंकारतया R., M. ६ आश्रयाश्रयिभेदेना° P. ७ लोके सत् T′. ८ R. and M. drop अपि. ९ भेदव्यवहारः R.; भेदाद् व्यपदेशः M. १० T′ has अलंकारविभागः as heading before तत्र. ११ अर्थालंकारस्य R.; अर्थालंकारवर्गस्य T′. १२ उपकुर्वन्तीति m.

समासोक्तिपर्यायोक्त्याक्षेपव्याजस्तुत्युपमेयोपमानन्वयातिशयोक्तिपरिकराप्रस्तुतप्रशंसानुक्तनिमित्तविशेषोक्तिषु प्रतीयमानं वस्तु काव्योपस्कारतामुपयाति ।

रूपकपरिणामसंदेहभ्रान्तिमदुल्लेखापह्नवोत्प्रेक्षास्मरणतुल्ययोगितादीपकप्रतिवस्तूपमादृष्टान्तसहोक्तिव्यतिरेकनिदर्शनाश्लेषेष्वौपम्यं गम्यते ।

रसवत्प्रेयऊर्जस्विसमाहितभावोदयभावसंधिभावशबलतासु रसभावादिर्व्यज्यते ।

उपमाविनोक्त्यर्थान्तरन्यासविरोधविभावनोक्तगुणविशेषोक्तिविषमसमचित्राधिकान्योन्यकारणमालैकावलीव्याघातमालादीपककाव्यलिङ्गानुमानसारयथासंख्यार्थापत्तिपर्यायपरिवृत्तिपरिसंख्याविकल्पसमुच्चयसमाधिप्रत्यनीकप्रतीपविशेषमीलनसामान्यासंगतितद्गुणातद्गुणव्याजोक्तिवक्रोक्तिस्वभावोक्तिभाविकोदात्तेषु सहृदयहृदयाह्लादि स्फुटं प्रतीयमानं नास्ति ।

अत्रेत्थमलंकारकक्ष्याविभागः ।

साधर्म्यं त्रिविधम् । भेदप्रधानमभेदप्रधानं भेदाभेदप्रधानं चेति । उपमानोपमेययोः स्वतो भिन्नत्वाच्छाब्दमेतन्न वास्तवम् ।

रूपकपरिणामसंदेहभ्रान्तिमदुल्लेखापह्नवानामभेदप्रधानसाधर्म्यनिबन्धनत्वम् ।

दीपकतुल्ययोगितादृष्टान्तनिदर्शनाप्रतिवस्तूपमासहोक्तिप्रतीपव्यतिरेकाः भेदप्रधानसाधर्म्यनिबन्धनाः ।

चतुर्धा विभक्तेष्वलंकारेष्ववान्तरविभागं प्रतिज्ञापूर्वकमाह । अत्रेति । इत्थं वक्ष्यमाणप्रकारेण । कक्ष्याविभागः साधर्म्यविरोधादिमूलत्वेनालंकाराणां वर्गशो विभाग इत्यर्थः । एतदभेदप्रधानत्वं शाब्दमारोपितं न वास्तवं न स्वाभाविकम् ।

---

१ काव्योपस्करणमुपयाति R.; काव्योपस्कारमुपैति M. २ °मायाति T'. ३ भावसंधि is dropped in R. and M. ४ रसभावादि व्यज्यते R., M. ५ °गुणनिमित्तविशेषोक्ति° P. ६ °समविषम° P. ७ °विचित्र° R., M. ८ °निमीलन° T'. ९ °संदेहपरिणाम° R. १० °निदर्शनादृष्टान्त° R., M.

उपमानन्वयोपमेयोपमास्मरणानां भेदाभेदसाधारणसाधर्म्यमूलता।

उत्प्रेक्षातिशयोक्ती अध्यवसायमूले।

विभावनाविशेषोक्तिविषम[1]विचित्रा[2]संगत्यन्योन्यव्याघाततद्गुणभाविक-विशेषाणां विरोधमूलता।

यथासंख्यपरिसंख्यार्थापत्तिविकल्पसमुच्चयानां वाक्यन्यायमूलता।

परिवृत्तिप्रत्यनीकतद्गुणसमाधिसमस्वभावोक्त्युदात्तविनोक्तयो लौक[3]-व्यवहारमूलाः।

काव्यलिङ्गानुमानार्थान्तरन्यासानां[4] तर्कन्यायमूलता।

कारणमालैकावलीमालादीपकसाराः शृङ्खलावैचित्र्यमूलाः[5]।

व्याजोक्तिवक्रोक्तिमीलनान्यपह्नवमूलानि[6]।

समासोक्तिपरिकरौ विशेषणवैचित्र्यमूलौ।

अथालंकाराणां परस्परवैलक्षण्यं[7] निरूप्यते[8]।

आरोपगर्भत्वेऽप्यारोप्यमाणस्य प्रकृतोपयोगानुपयोगाभ्यां परिणाम-रूपकयोर्भेदः।

आरोपविषयस्यारोप्यमाणरूपसंभवासंभवाभ्यामुल्लेखरूपकयोर्भेदः।

आरोपविषयस्य संदेहभ्रान्त्यपह्नवैः संदेहभ्रान्तिमदपह्नवानां[9] परस्परं[10] भेदः।

साधर्म्यमूलत्वेऽपि तुल्ययोगितादीपकनिदर्शनाव्यतिरेकदृष्टान्तेभ्यः साधर्म्यस्य[11] वाच्यत्वादुपमानन्वयोपमेयोपमा भिद्यन्ते।

साधर्म्यस्य वाच्यत्वगम्यत्वाभ्यामुपमेयोपमाप्रतिवस्तूपमयोर्भेदः।

वस्तुप्रतिवस्तुबिम्बप्रतिबिम्बभावाभ्यां प्रतिवस्तूपमादृष्टान्तयोर्भेदः।

अथालंकाराणामत्यन्तविवेकार्थं मिथो वैधर्म्यमाह। अथा[12]लंकाराणां परस्प-रवैलक्षण्यं निरूप्यत इत्यादिना। शिष्टमन्यदुदाहरणप्रस्ताव एव स्पष्टीभविष्य-तीति नेह विविच्यते।

---

१ M. drops विषम. २ °विचित्रा° R., M. ३ T'. drops लोक. ४ °न्यासा तर्क-न्यायमूलाः R., M. ५ शृङ्खलान्यायमूलाः M. ६ °मीलनानि निह्नवमूलानि M. ७ °वैरूप्यं P. ८ R. drops निरूप्यते. ९ °दपह्नुतीनाम् M. १० परस्परमेदः R., M. ११ साधारणधर्मस्य M., R. १२ अत्रा° t.

[1]प्रस्तुताप्रस्तुतानां व्यस्तसमस्तत्वाभ्यां तुल्ययोगितादीपकयोर्भेदः ।

उपमानस्य प्रसिद्धत्वाप्रसिद्धत्वाभ्यामुपमोत्प्रेक्षयोर्भेदः ।

अर्थसाम्यशब्दसाम्याभ्यामुपमाश्लेषयोर्भेदः ।

[2]उपमानोपमेययोर्भेदाभेदाभ्यामुपमानन्वययोर्भेदः ।

उपमानोपमेयभावस्य पर्याययौगपद्याभ्यामुपमेयोपमोपमयोर्भेदः ।

अप्रस्तुतस्य वाच्यत्वगम्यत्वाभ्यामप्रस्तुतप्रशंसासमासोक्त्योर्भेदः ।

वाच्यव्यङ्ग्ययोः [3]प्रस्तुतत्वे पर्यायोक्तिः । वाच्यस्याप्रस्तुतत्वेऽप्रस्तुतप्रशंसा ।

व्याप्तिपक्षधर्मताद्यभावात् काव्यलिङ्गस्यानुमानाद्भेदः ।

साधारणगुणयोगाद् भेदानुपलब्धौ सामान्यम् । [4]उत्कृष्टगुणयोगान्न्यूनगुणतिरोधाने [5]मीलनम् ।

[6]अन्यव्य[7]वच्छेदे तात्पर्याभावा[8]दुदात्तालंकारस्य परिसंख्यातो भेदः ।

काकतालीयतया कार्यसाधने कारणान्तरोपनिपाते समाधिः ।

अहमहमिकया कार्यसाधने बहूनां कारणानामुद्यमे [9]द्वितीयः समुच्चयः ।

निह्नवस्य वाच्यत्वगम्यत्वाभ्यामपह्नवव्याजस्तुत्योर्भेदः ।

अन्येषां भेदः स्पष्ट एव । यद्यपि व्याजोक्ति[10]वक्रोक्तिमीलनसामान्येषु कथंचित् सादृश्यमस्ति तथाप्यविवक्षितत्वान्न सादृश्यमूलेषु गणना ।

शब्दालंकारा निरूप्यन्ते ।

अथालंकारस्वरूपविभागानन्तरं शब्दार्थयोर्मध्ये शब्दस्यार्थे [11]प्रत्यन्तरंगत्वात् प्रथमं शब्दालंकारा निरूप्यन्ते ।

इत्थमलंकाराणां पीठिकां विधाय शब्दालंकारनिरूपणं प्रस्तौति । अथेति । तत्प्राथम्ये हेतुमाह । शब्दस्येति । अत्र शब्दप्रतीतिपूर्वकत्वादर्थप्रतीतेः शब्दस्य प्रतीतावन्तरङ्गत्वं तेन तस्य प्राधान्यात् प्राथम्यमिति भावः । प्रथमं तावच्छब्दा-

---

१ प्रस्तुताप्रस्तुतव्यस्तत्वसमस्तत्वाभ्याम् R. २ उपमानोपमेयोस्तु M., उपमानोपमेययोश्च R. ३ उभयोः प्रस्तुतत्वे R., M. ४ Before this R. has उत्कृष्टगुणयोगाद् भेदानुपलब्धौ समम्. ५ निमीलनम् R.; मेलनम् P. ६ अन्यत्र व्यवच्छेदे R. ७ व्यवच्छेद° M. ८ °तद्गुणालंकारस्य M. ९ द्वितीयसमुच्चयः R. १० B. and M. drop वक्रोक्ति. ११ प्रतीत्यन्तरङ्गत्वात् R.; प्रतीत्यन्तरङ्गगम्यात् M.

छेकानुप्रासः ।

भवेदव्यवधानेन द्वयोर्व्यञ्जनयुग्मयोः ।
आवृत्तिर्यत्र स बुधैश्छेकानुप्रास इष्यते ॥

यत्राव्यवहितयोर्व्यञ्जनयुग्मयोर्द्वयोः पौनरुक्त्यं तत्र छेकानुप्रासः ।

यथा

महीमहीनविभवे धत्ते क्षेमंकरे करे ।
राजन्यजन्यविजयी राजा राजगुणोदयः ॥ १ ॥

वृत्त्यनुप्रासः ।

एकद्विप्रभृतीनां तु व्यञ्जनानां यथा भवेत् ।
पुनरुक्तिरसौ नाम वृत्त्यनुप्रास इष्यते ॥

यथा ।

धीमयगतत्वेन त्रिविधं पौनरुक्त्यम् । तत्राद्ये केवलस्वरपौनरुक्त्यस्य चारुताहेतुत्वाभावाद् व्यञ्जनमात्रपौनरुक्त्यम् । स्वरव्यञ्जनसमुदायपौनरुक्त्यं च चारुताहेतुः । तत्राद्यमपि संख्यानियमे छेकानुप्रासः । वैपरीत्ये वृत्त्यनुप्रास इति सर्वस्वकारः । तदनुसारेण छेकानुप्रासं लक्षयति । भवेदिति । रसाद्यनुगतः प्रकृष्टो न्यासोऽनुप्रासः । तदुक्तम् ।

'प्रकृष्टो वर्णविन्यासो रसाद्यनुगतो हि यः ।
सोऽनुप्रासः स च छेकवृत्त्युपाधिगतो द्विधा ॥' इति ।

गूढचराः पक्षिविशेषादयश्छेका इति केचित् । विदग्धा इति सर्वस्वकारादयः । तदुपलक्षितोऽनुप्रासः छेकानुप्रासः । द्वयोरित्यत्र वीप्सा द्रष्टव्या । तेन यत्र द्वयोर्द्वयोर्व्यञ्जनयुग्मयोरव्यवधानेनावृत्तिः स छेकानुप्रास इत्यर्थः । उदाहरति । महीमिति । महीनविभवे पर्याप्तसत्त्व इत्यर्थः । करे बाहौ । राजन्याः क्षत्रियाः । 'राजश्वशुराद्यत्' इति यत्प्रत्ययः । जन्यं युद्धम् । अत्र पादचतुष्टयेऽपि व्यञ्जनयुग्मानामव्यवधानावृत्तेश्छेकानुप्रास इति द्रष्टव्यम् ।

संख्यानियमेन छेकानुप्रासमुक्त्वान्यथा वृत्त्यनुप्रासमाह । एकेति । प्रभृतिग्रहणात् त्रिचतुरादिसंग्रहः । अत्रैकस्य व्यञ्जनस्य सकृदावृत्तौ वैचित्र्याभावात्

---

१ °विशुद्धे° P. २-यदा R., P.

रे रे क्षुद्रमहीक्षितः क्षणमितः श्रीकाकतिक्ष्मापते-
 र्वीक्षध्वं ध्वजिनीं दुरीक्ष्यसुभटां प्रोक्षिप्तकौक्षेयकैः ।
यौत्स्यध्वे यदि लभ्यमक्षयपदं कान्तारपक्षो वृथा
 क्ष्माभृत्कुक्षिचरत्तरक्षुनिकरात्त्रात्मरक्षा कुतः ॥ २ ॥

यमकम्

यमकं पौनरुक्त्ये तु स्वरव्यञ्जनयुग्मयोः ।

छेकानुप्रासे वृत्त्यनुप्रासे च स्वरपौनरुक्त्यमानुषङ्गिकम् । यमके तु स्वरव्यञ्जनयोरावृत्तिः । तस्यादिमध्यान्तगतत्वेन बहवो भेदाः । अत्र दिङ्मात्रमुदाह्रियते ।

सामर्थ्यादसकृदावृत्तिर्लभ्यते । द्वयोस्तु सकृदेव । अन्यथा छेकानुप्रासः स्यात् । व्यवधाने त्वसकृदावृत्तावपि न विरोधः । आदीनां तु सकृदसकृद्वा व्यवधानेनाव्यवधानेन वावृत्तिर्द्रष्टव्या । वृत्तिशब्देन वैदर्भ्यादयो विवक्षिताः । तदुपलक्षितानुप्रासो वृत्त्यनुप्रासः । उदाहरति । रे रे इति । यौत्स्यध्वे हनिष्यध्वे यदि । युध संप्रहारे इत्यस्माद्धातोः कर्मणि लृट् । लभ्यमक्षयपदमिति ।

 ‘ द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ ।
 परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥’

इति स्मरणादिति भावः । कान्तारपक्षोऽरण्यनिवासपक्षः । तरक्षुनिकरात् मृगादनयूथात् दुर्मरणकारणादरण्यनिवासाच्छुभोदर्कं युद्धमरणमेव श्रेय इति भावः । अत्रासकृत्क्षकारावृत्त्या वृत्त्यनुप्रासः । एवमन्येऽपि भेदाः सूर्यशतकादौ द्रष्टव्याः ।

व्यञ्जनमात्रपौनरुक्त्याश्रयमलंकारद्वयमुक्त्वा स्वरव्यञ्जनपौनरुक्त्याश्रयमलंकारमाह । यमकमिति । ननु महीमहीनाविभव इत्यादौ छेकानुप्रासे ‘युधिष्ठिरं द्वैतवने वनेचरः’ इत्यादावेकदा सादृश्यलक्षणे वृत्त्यनुप्रासे च स्वरपौनरुक्त्यसंभवात् कथं तत्र व्यञ्जनमात्रपौनरुक्त्यमित्याशङ्क्य परिहरति । छेकानुप्रास इति । प्रसङ्गादागतमानुषङ्गिकम् । अन्वाचयविशिष्टमभ्युच्चय इत्यर्थः । स्वरव्यञ्जनयुग्मयोरित्यत्र स्वरसहितव्यञ्जनेति मध्यमपदलोपी समासो विवक्षित इति व्याचष्टे । यमके त्विति । तत्र यम्यमानानां पादैकदेशानामादिमध्यमान्त-

---

१ महीभृतः M. २ दुरीक्ष° M. ३ योत्स्यध्वम् R. ४ ‘निकरस्तत्रा’ P. ५ P. and R. drop वृत्त्यनुप्रासे च. ६ स्वरव्यञ्जनसमुदाययो° M. ७ °निवासजातोदर्क t.

प्रतापः काकतीन्द्रस्य महामहिमतेजसः ।
श्रियं दधाति पंद्मेष्टमहामहिमतेजसः ॥ २ ॥

पुनरुक्तवदाभासः ।

यत्रार्थः प्रमुखे किंचिद् भासते पुनरुक्तवत् ।
पुनरुक्तवदाभासोऽलंकारः स सतां मतः ॥

यत्रार्थः पुनरुक्तवदाभासते अन्वयवेलायामन्यथा भवति स पुनरुक्तवदाभासोऽलंकारः । अर्थालंकारत्वेऽप्यस्य शब्दपौनरुक्त्याश्रितत्वाच्छब्दालंकारप्रस्तावे लक्षणं कृतम् ।

यथा ।

भातत्वेनानेकविधमित्याह । तस्येति । एतच्च श्लोकार्धपादयमकानामप्युपलक्षणम् । सर्वेऽप्येते भेदाश्चिरन्तनैरेव बहुधा प्रपञ्चिताः । गुरुत्वभीतत्वान्नेह प्रपञ्च्यन्ते । तत्रैकमुदाहरति । प्रताप इति । महान् महिमा आधिक्यं यस्य तेजसो महामहिमतेजसः काकतीन्द्रस्य प्रतापः । पद्मेष्टमहां पद्मप्रियोत्सवाम् । अहिमतेजसः तिग्मांशोः श्रियं दधाति । अत्र द्वितीयपादस्य चतुर्थे यमनात् संदष्टयमकं नाम यमकभेदः । तदुक्तमन्यत्र । अत्र यम्यमानयोरुभयोः सार्थकत्वं 'विहगाः कदम्बसुरभाविह गाः' इत्यत्रैकस्य सार्थकत्वमन्यस्यानर्थकत्वम् । 'कलयन्त्यनुक्षणमनेकलयम्' इत्यत्रोभयोरनर्थकत्वम् । एवं सर्वेष्वपि यमकेषु प्रकारत्रयं यथासंभवं द्रष्टव्यम् ।

शब्दपौनरुक्त्याश्रितानलंकारानभिधायार्थपौनरुक्त्यमूलमलंकारमाह । यत्रेति । यत्रालंकारेऽर्थः प्रमुखे प्रथमं पुनरुक्तवत् पुनरुक्तेन तुल्यमत एव किंचित् किमप्यनन्वितो भासते परमार्थतस्तु अन्यथा पर्यवस्यतीत्यर्थः । अर्थपौनरुक्त्यस्य प्ररूढदोषत्वात् तदेतन्निष्कृष्य व्याचष्टे । यत्रार्थ इत्यादिना । नन्वस्य शब्दालंकारप्रस्तावे का संगतिरत आह । अर्थेति । अर्थपौनरुक्त्यादेवार्थाश्रितत्वादर्थालंकारे सत्यपीत्यर्थः । शब्दपौनरुक्त्याश्रितत्वादिति । पर्यायशब्दाश्रितत्वादित्यर्थः । आम्रेडितशब्दवत् पर्यायशब्देष्वप्यर्थैकत्वसादृश्यादौपचारिकं शब्दपौ-

---

१ पद्मेष्टा° P. २ पुनरुक्तिवत् P. ३ °भासः सोऽलंकारः सतां मतः R. ४ P. drops अस्य. ५ काव्यगूढभूतत्वान्नेह वितन्यन्ते m., t. ६ °मितरस्या° t. ७ प्रमुखम् p.

जिष्णुरिन्द्रः क्षितिभुजां श्रीपतिः पुरुषोत्तमः ।
भास्वान् सूर्यस्फुरत्तेजाः काकतीन्द्रो विराजते ॥ ४ ॥

अथोभयपौनरुक्त्यालंकारः कथ्यते ।

लाटानुप्रासः ।

शब्दार्थयोः पौनरुक्त्यं यत्र तात्पर्यभेदवत् ।
स काव्यतात्पर्यविदां लाटानुप्रास इष्यते ॥

यत्र शब्दार्थयोस्तात्पर्यभेदमात्रं न स्वरूपभेदस्तत्र लाटानुप्रासः । यथा ।

गुणा गुणास्ते गण्यन्ते ये रुद्रनृपमाश्रिताः ।
नीतिर्नीतिरसौ तस्य लक्ष्मीर्लक्ष्मीश्च कथ्यते[2] ॥ ५ ॥

नरुक्त्यं द्रष्टव्यम् । उदाहरति । जिष्णुरिति । जयशीलो जिष्णुः । क्षितिभुजामिन्द्रो राजाग्रणीः । श्रीपतिः समुद्रः । पुरुषोत्तमः पुरुषश्रेष्ठः । भास्वान् दीप्तिमान् । सूर्य इव स्फुरत्तेजाः स्फुरत्प्रतापः । तत्र जिष्ण्वादीनामिन्द्रादिपर्यायप्रयोगेण प्रमुखे भासमानस्य पौनरुक्त्यस्योक्तप्रकारेणान्वयपर्यालोचनायामन्यथा पर्यवसानात् पुनरुक्तवदाभास इति भावः ।

केचित् पुनरेवमाहुः । 'भाति सदानत्यागः स्थिरतायाम्' इत्यत्र सत्पुरुषप्रणामेन प्रकाशते स्थैर्ये पर्वतभूत इत्यस्यार्थस्य दानत्यागशब्दपरिवृत्त्यसंभवाच्छब्दालंकारोऽयम् । 'तनुवपुः' इत्यत्र कृशाङ्ग इत्यर्थे तनुशब्दपरिवृत्तौ नायमलंकार इति शब्दाश्रयत्वं वपुःशब्दविपरिवृत्तौ नालंकारत्वहानिरित्यर्थाश्रयत्वम् । अत उभयालंकारोऽप्ययमिति । तदुक्तं काव्यप्रकाशे ।

'पुनरुक्तवदाभासो विभिन्नाकारशब्दगः ।
एकार्थतेव शब्दस्य तथा शब्दार्थयोरयम् ॥' इति ।

शब्दार्थयोरेकैकपौनरुक्त्यमूलानलंकारानभिधायोभयपौनरुक्त्यमूलमलंकारं प्रतिज्ञापूर्वकमाह । अथेत्यादिना । शब्दार्थयोः पौनरुक्त्यं प्रसक्तदोषः तद्व्यवच्छेदार्थं तात्पर्यभेदवदिति । अनेन यमकव्यावर्तकशब्दार्थयोः स्वरूपभेदाभावः फलित इति व्याचष्टे । यत्रेति । लाटजनोपलालितोऽनुप्रासो लाटानुप्रासः । न तु लाटदेशजन्यः कश्चनोपकारः काव्यस्य इति गोपालः । उदाहरति । गुणा

---

१ °विदा M. २ गीयते M., M_1 ३ °विपरीतवृत्तौ m. ४ °च्छब्दालंकारोऽयम् p. ५ °विपरीतवृत्तौ m.

चित्रालंकारः पद्मबन्धादिः ।

पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते [1] ।

आदिग्रहणाच्चक्रबन्धादयः ।

तत्राष्टदलपद्मबन्धो यथा ।

याता [2]यस्यासमग्रानतिमिह [3]कनकास्थानसक्तासनाया
यानासक्तासनस्था सुखयतु कमलाभ्यासतुष्टानमाया ।

इति । असौ वीररससंबन्धिनी । अत्र द्वितीयगुणादिशब्दानामुत्कर्षलक्षणतात्पर्यभेदः । 'अत्राब्जपत्रनयने नयने [4]निमील्य' इत्यादौ विभक्त्यादेरपौनरुक्त्येऽपि शब्दार्थपौनरुक्त्याल्लाटानुप्रासत्वम् । अत एवायं पदाश्रयः प्रातिपदिकाश्रयश्चेति द्वेधा लाटानुप्रास इति सर्वस्वकारः । उद्भटेनाप्युक्तम् ।

'स्वरूपार्थाविशेषेऽपि पुनरुक्तिः फलान्तरात् ।
शब्दानां [5]प्रकृतीनां वा लाटानुप्रास इष्यते ॥' इति ॥

ननु पुत्रेऽर्जुनोऽर्जुन इवेत्यत्रैकस्यैवोपमानोपमेयत्वलक्षणे अनन्वयालंकारेऽपि शब्दार्थपौनरुक्त्यसंभवाल्लाटानुप्रासत्वमेव किं नेष्यते । सत्यम् । यद्यप्यनन्वये पौनरुक्त्यमात्रं लक्षणं तथापि निर्देशप्रतिनिर्देशयोरैकरूप्याभावे पर्यायप्रक्रमभङ्गोपप्रसङ्गादानुषङ्गिकं शब्दपौनरुक्त्यम् । अत्र तूभयपौनरुक्त्यमप्यावश्यकमेवेति विषयभेदान्न कोऽपि विरोधः । तदुक्तम् ।

'अनन्वये च शब्दैक्यमौचित्यादानुषङ्गिकम् ।
अस्मिंस्तु लाटानुप्रासे साक्षादेव प्रयोजकम् ॥' इति ।

चित्रं लक्षयति । पद्मेति । न च श्रावणानां वर्णानां पद्माद्याकारहेतुत्वं न घटत इति वाच्यम् । वर्णशब्देन तत्प्रतिपादकानां लिप्यक्षराणामारोपात् तेषां श्रुत्यवर्णाभेदेन [6]लोकव्यवहारादेव शब्दालंकारत्वम् । पद्मादिबन्धेषु कर्णिकादिस्थानविशेषेषु वर्णानां पौनरुक्त्यात् पौनरुक्त्यमूलालंकारानन्तर्यं [7] च द्रष्टव्यम् । यातेति । कनकस्थाने सुवर्णमयसभामण्डपे सक्तं स्थितमासनं सिंहासनमयति प्राप्नोतीति कनकास्थानसक्तासनाया । अयतेः कर्मण्यण्प्रत्ययः । यानेषु तुरगादिष्वासक्ता-

---

१ चित्रमिष्यते R.   २ यस्या समग्रा M.   ३ कनकस्थान° P.   ४ निमीलितेत्यादौ t.
५ पदार्थानां वा t.   ६ लोके व्यवहारा° t.   ७ °कारानन्तरं च t.

या मानज्ञा सुसभ्या क्षितिपतितिलकं ज्ञातिरक्ता सगेया
याग सक्ता रतिज्ञा सुकृतिषु फलितग्रामसस्यायताया ॥ ६ ॥

अष्टदलपद्मबन्धोऽयम् ।



न्यासनानि पल्ययनादीनि तत्र तिष्ठतीति यानासक्तासनस्था । राज्योपकरणेषु लक्ष्मीरस्तीत्यागमः । अभ्यासेन परिचयेनोपासनयेत्यर्थः । सुखेन ज्ञायते इति सुज्ञाना । 'कृत्यलुटो बहुलम्' इति कर्मणि ल्युट् । माया स्वरूपवैचित्री यस्याः सा अभ्याससुज्ञानमाया । अनुपासकानां दुरवबोधस्वरूपेत्यर्थः । मानं पूजां जानातीति मानज्ञा । सभायां साधवः सभ्याः । 'सभाया यः' इति यप्रत्ययः । ते शोभना यस्याः सा सुसभ्या । सम्पन्नस्यैव सभ्याश्रयत्वादिति भावः । जानन्तीति ज्ञाः विवेकिनः । 'इगुपध—' इत्यादिना कप्रत्ययः । तत्रातिरिक्ता । गीयते इति गेयं गानं तेन सह वर्तत इति सगेया स्वनामाङ्कानेकगीतेत्यर्थः ।

१ °तिलक° P.

चक्रबन्धो यथा।

लक्ष्मीवीक्षितवैभवस्य जगतां नाथस्य भद्रश्रियो
दिक्ष्वारब्धनिजप्रतापजनितां भास्वद्धुरां यच्छतः।
नित्यं रुद्रजनाधिपस्य जयिनो भाति प्रकाशस्थिरा
राजत्पालनमोदितात्मनि भुजे योग्याश्रितत्वाद्धरा॥ ७॥

यागे सक्ता संबद्धा। सम्राज एव तत्राधिकारादिति भावः। रतिं स्वविषयाभिरतिं भक्तिं जानातीति रतिज्ञा। अत एव [1]सुकृतिविषये फलितैर्ग्रामलक्षैः कार्यैरायतो महान् भयः शुभावहो विधिर्यस्याः सा तथोक्ता। स्वभक्तानां ग्रामादिसंपादनेन प्रकटितस्वानुग्रहेत्यर्थः। एवंविधा या लक्ष्मीर्यस्य विभोरासमग्रामतिसंपूर्णामानतिं वश्यत्वं याता सा कमला लक्ष्मीस्तं क्षितिपतितिलकं वीररुद्रमिहैव लोके जन्मनि वा सुखयतु सुखवन्तं करोतु। अयमष्टदलपद्मबन्धः। उद्धारस्तु।

'कर्णिकादि लिखेद्वर्णान् क्रमाद्दिक्षु विदिक्षु च।
सकर्णिकां सप्तदिक्षु [2]विदिक्षु तु विकर्णिकान्॥
प्रवेशनिर्गमाभ्यां तु दिक्षु ते स्युश्चतुर्दश।
व्यवधानेन तानाद्ये दलेऽन्यत्र त्वनन्तरान्॥' इति।

चक्रबन्धमुदाहरति। लक्ष्मीति। कोशागारनियुक्तयेव लक्ष्म्या वीक्षितवैभवस्य विचारितैश्वर्यस्य। भद्रश्रियः कल्याणमूर्तेः रित्यर्थः। आरब्धः संवर्धितः। भास्वद्धुरां भास्करभावं निजप्रतापेन दिक्षु सूर्यकल्पं कुर्वत इत्यर्थः। राजत्पालनेन सम्यक्संरक्षणेन मोदितात्मनि सर्वैरनुमोदितस्वरूपे भुजे। अत एव योग्याश्रितत्वात् प्रकाशं व्यक्तत्वं स्थिरा निश्चितस्थैर्येत्यर्थः। धरा भूमिर्नित्यं भाति।
उद्धारस्तु

'वद्ध्यते षडरं चक्रं त्र्यरं तत्त्वाक्षरम्।
त्रयाणामपि पादानां दशमं कर्णिकाक्षरम्॥ १॥
आदितः स्युस्तुर्यारैस्त्रयः पादाश्चतुर्थगाः।
वर्णाः षष्ठान्त्यमारभ्य [3]संपतन्तेऽन्तिमाक्षरैः॥ २॥
मध्ये द्वौ द्वौ विसंवादौ षडरेषु क्रमाद् भवेत्।
चतुर्थैः सप्तमैर्वर्णैर्भजनं कविवर्णयोः॥ ३॥' इति।

---

१ सुकृतिषु विषये p., m. २ विदिताश्च विकर्थिकाः t.; विदिताश्च विकर्पिकाः m. ३ संपद्यन्ते t., m.

अत्र वैजनाथकृतिवीररुद्रयश इति प्रतीयते ।[1][2][3]

चक्रबन्धोऽयम् ।



नागबन्धो यथा ।

ओजस्ये रुद्रदेवे विभवति महिमत्याजितान्यप्रतापे
विद्यावर्येऽभिनेतर्युरुहरिचरितं विश्वविस्तारभाजि ।[4][5]

नागबन्धमुदाहरति । ओजस्य इति । ओजो बलं तत्र साधुरोजस्यः प्रबलः । यद्वाहर्वाचिनौजसशब्देनाहस्करो लक्ष्यते तेन ओजस्ये सूर्यसदृशे इत्यर्थः । 'ओजसोऽहनि यत्खौ' इति यत्प्रत्ययस्य छान्दसत्वेऽपि तुल्यभावतातिपदस्य भाषायां प्रयोगो द्रष्टव्यः । महिमत्याजितोऽन्येषां प्रतापो येन तस्मिन् तथोक्ते । विद्याभिर्वेदवेदाङ्गादिभिर्वर्ये श्रेष्ठे उर्वधिकं हरिचरितमभिनेतर्यनुकुर्वति विष्णुसदृश इत्यर्थः । 'न लोक—' इत्यादिना षष्ठीप्रतिषेधः । विश्वविस्तारं भरणीयत्वेन भजतीति विश्वविस्तारभाक् । तस्मिन् विभवति विभौ सति गलितगलितस्यातङ्को वैरिव्राताः शत्रुसंघा देहविद्धा रणे विद्धदेहाः सन्तो वन्यैर्जन्तुभिर्व्यालमृगैः सह क्षान्तिः शयः तद्वति । विविधे नानाविधदुःखभावन इत्यर्थः । अथा-

१ अत्र वै° R.; अत्र चक्रे वै° M. २ वैद्यनाथ° M. ३ °कृतिवीर° M. ४ जिष्णु° ६. ५ °विस्तर° P.

वैरिव्राता भजन्ते[1] घनमतिमलिन[2]ध्येयमाप्तयो द्रोहमिद्धा
वन्यैरध्वन्यवारि क्षि[3]तिमति विविधे ज[4]न्तुभिः स्थानभाजः ॥ ८ ॥

नागबन्धोऽयम् ।

धेनुवके धन्वनि मरुदेशे इत्यर्थः । 'आपःस्त्री भूम्नि वार्वारि' इत्यमरः । स्थानभाजः स्थितिं प्राप्ताः सन्तो वनं भजन्ते सेवन्ते । उद्धारस्तु ।

१ लभन्ते R. २ कपातिनो T'. ३ क्षितिमति P. ४ विविधैर्जन्तुभिरस्तान° P.

इति[1] श्री[2]विद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे शब्दालंकारप्रकरणं समाप्तम् ।

'रेखाभ्यां चतुरश्राणि चतुष्कोष्ठानि कल्पयेत् ।
रेखाद्वयान्तराले स्याद्यथाकोष्ठे गृहाष्टकम् ॥ १ ॥
विदिक्षु कुण्डलीकुर्यात् तद्रेखाग्रैर्यथाक्रमम् ।
दिग्रेखाग्राणि बाह्यानि योजयेत् दिक्त्रये मिथः ॥ २ ॥
एकत्र तु फणापुच्छमेलनं कल्पयेत् तथा ।
अ[3]न्तराण्यक्षरां कुर्यात् संदशाः स्यु[4]र्यथा मिथः ॥ ३ ॥
वर्णावृत्तिस्थलान्यत्र कोष्ठकोणानि षोडश ।
सन्दशानां चतुष्कं च कण्ठश्चेत्येकविंशतिः ॥ ४ ॥
आवृत्तिर्युग्मवर्णानां नेतरेषामिह क्वचित् ।
अर्केशानदशग्रन्थवर्णाः पादचतुष्कगाः ॥ ५ ॥
आवर्तैरग्नैर्ऋतादिकुण्डलेष्वप्र[5]दक्षिणम् ।
यथैवं स्यात् तथा वर्णान् फणातो विन्यसेत् क्रमात् ॥ ६ ॥
त्रिंशदष्टाविंशतिश्च षड्विंशतिरनुक्रमात् ।
वेष्टनत्रितये वर्णाः समाप्तिस्तु गलाक्षरे ॥ ७ ॥
एवमेतन्निधायान्तः संगृहीतं महात्मभिः ॥
विदिक्स्थले कु[6]ण्डलितं स्वमङ्गं
स्वेन त्रिरावेष्ट्य विभाज्य भङ्गम् ।
क्षिप्त्वा गले पुच्छमहेः स्थितस्य
पाठ्यः फणातः फणिबन्ध एषः ॥ ८ ॥' इति ॥

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्यानुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने रत्नापणाख्याने शब्दालंकारनिरूपणं नाम सप्तमं प्रकरणम् ॥

१ R. has before this इति शब्दालंकाराः and M. इति शब्दालंकारप्रकरणम्. २ t. drops श्री. ३ अन्तराण्यक्षरा कुर्यात् t.; अन्तराण्याक्षिण या कुर्यात् m. ४ °र्यथायथम् t. ५ °प्रदक्षिणैः t. ६ कुण्डलितस्वमङ्गम् p.

अथार्थालंकाराः ।

तत्र प्रथममनेकालंकारबीजभूतत्वादुपमा निरूप्यते ।

> स्वतः सिद्धेन भिन्नेन संमतेन च धर्मतः ।
> साम्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा ॥

यत्र स्वतः सिद्धेन स्वतो भिन्नेन सहृदयसंमतेनाप्रकृतेन सह प्रकृतस्य धर्मतः सादृश्यमेकदा वाच्यं चेद् भवति तत्रोपमा । स्वतः सिद्धेनेत्यनेनोत्प्रेक्षाव्यावृत्तिः । उत्प्रेक्षायामप्रसिद्धस्याप्युपमानत्वसंभवात्
[2]यथा

> कीर्त्तिः काकतिवीररुद्रनृपतेः सिंहासनाध्यासिनः
> प्राचां भूमिभुजां यशः पिदधती [3]कोटीन्दुतुल्यद्युतिः ।
> रक्षादक्षिणराजलाभजनिता मन्दप्रमोदोत्थिता
> त्रैलोक्याट्टहासप्रभेव ककुभां प्रान्तेषु विद्योतते ॥ १ ॥

[4]अत्र प्रभाशब्दो जातिवचनः त्रैलोक्याट्टहासप्रभायाः कविप्रौढोक्तिसिद्धत्वान्नोपमाशंकावकाशः ।

स्वतो भिन्नेनेत्यनेनानन्वयव्यावृत्तिः । अनन्वय एकस्यैवोपमानोपमेयत्वसंभवात् ।

तथा हि

शब्दालंकारनिरूपणानन्तरमवसरप्राप्तत्वादर्थालंकारनिरूपणं प्रतिजानीते । अथेति । प्रथममुपमानिरूपणे निमित्तमाह । तत्रेति । अत्रार्थलंकारेष्वित्यर्थः । अनेकालंकारबीजभूतत्वादिति । वाच्यौपम्यानामनन्वयादीनां गम्यौपम्यानां च रूपकादीनामन्येषां च सादृश्यमूलानां मीलनादीनां [5]निदानभूतत्वादित्यर्थः । लक्षयति । स्वत इति । धर्मतो गुणक्रिययोरन्यतरेणेत्यर्थः । साम्यमित्यनेन कार्यकारणादिकयोरसंभवात् साधर्म्यादन्यवर्ण्यशब्दयोरुपमानोपमेयार्थत्वं द्रष्टव्यम् । अत्रानुषङ्गाध्याहारादिभिः शिष्टमंशं पूरयन् व्याचष्टे । यत्रेति ।

---

१ P. drops it. २ Portions from यथा कीर्त्तिः° to °शंकावकाशः, from तथा हि to स्वयम्, from यथा to °त्युपमेवेयम्, from तथा हि to श्लेष एव, from तथा हि to नोपमा, from धर्मोऽर्थ इव to °त्युपमेयोपमा, and from तथा हि to °न्नोपमाशङ्का are omitted in P. and M. ३ राकेन्दुबिम्बद्युतिः M_2. ४ तत्र M_2. ५ निदानत्वात् t.

सन्तु लोके सुवर्णाद्रिरत्नाकरसुधाकराः ।
तथापि वीररुद्रोऽयं वीररुद्र इव स्वयम् ॥ २ ॥

संमतेनेत्यनेन न्यूनोपमादिव्यावृत्तिः[1] ।

यथा

उदन्वानिव गम्भीरः सुवर्णाद्रिरिवोन्नतः ।
दिग्गजेन्द्र इव क्षोणी[2]धौरेयः काकतीश्वरः ॥ ३ ॥

अत्र स[3]मुद्रसुवर्णाद्रिदिग्गजानामुपमानत्वं योग्यमित्युपमैवेयम् ।

धर्मत इत्यनेन श्ले[4]षालंकारवैलक्षण्यम् । श्ले[5]षे शब्दसाम्यमात्रमभ्युपगतं न गुणक्रियासाम्यम् ।

तथाहि

नीराजयन्त्यन्ध्रपुरीरमण्यः
प्रदीपजालैर्वरवीररुद्रम् ।
चन्द्रानना गोत्रपतिं रजन्य-
स्तारागणैर्मेरुमिव स्फुरद्भिः ॥ ४ ॥

अत्र प्रतापरुद्रं पुरस्त्रियो नीराजयन्ति मेरुं रजन्य इवेति नोपमा । गोत्रपतिमिति विशेषणार्थस्य सा[6]म्यासंभवात् । रा[7]जपक्षे गोत्रशब्देन कुलप्रतीतिः मेरुपक्षे गो[8]त्रशब्देन पर्वतप्रतीतिः । तथा चन्द्रानना इति

व्यावृत्त्यादिकं तु स्वयमेव व्यक्तीकरिष्यते ।

न्यूनोपमादीति । न्यूनविशेषणोपमानं न्यूनोपमम् । आदिग्रहणादधिकोपमादिसंग्रहः सहृदयसंमतिं दर्शयति । उदन्वानिति । 'उदन्वानुदधौ च' इति निपातनात् साधुः । धुरं वहतीति धौरेयो धुरन्धरः । 'धुरो यड्ढकौ' इति ढक्-प्रत्ययः । क्षौण्या धौरेय इति शिवभागवत् समासः ।

धर्मत इत्यनेन श्लेषालंकारवैलक्षण्यमिति । शब्दसाम्यमूलत्वात् तस्येति भावः । व्यावर्त्यं श्लेषमूलमुदाहरति । नीराजयन्तीति । एवंविधस्थले शब्द-साम्येऽप्युपमैवेति काव्यप्रकाशकारः । तदुक्तम् ।

---

१ न्यूनोपमाधिकोपमाव्यावृत्तिः M_2.; दुष्टोपमादिव्यावृत्तिः M. २ क्षोण्या M_3. ३ सुवर्णाद्रिसमुद्रदिगन्तगजानाम् R. ४ श्लेषव्यावृत्तिः P.; श्लेषालंकारवैषम्यम् p. ५ R. omits from श्लेषे to गुणक्रियासाम्यम्. ६ साम्याभावात् R., M_1. ७ गोत्रपक्षे राजशब्देन T'. ८ T'. drops गोत्रशब्देन. ९ शब्दसाम्यं नोपमाप्रयोजकमपि तूपमाप्रतिभोत्पत्तिहेतुः श्लेष एवायमेव इत्यवोचत् । विद्यानाथः सर्वस्वकारसिद्धान्तश्रद्धालुतया श्लेष एवायं नोपमेत्याह अत्रेत्यादिना । t.

स्त्रीपक्षे चन्द्र इव आननं यासामिति समासः। रात्रिपक्षे चन्द्र एवाननं यासामिति शब्दमात्रसाम्येन नोपमाप्राप्तिः। किं तु श्लेष एव।

अन्येन वर्ण्यस्य साम्यमित्यनेन प्रतीपालंकारो व्यावर्त्यते।

तथा हि

लोकोऽयमविशेषज्ञः किं कुर्मः कस्य कथ्यते।
यत् काकतिनरेन्द्रेण सुमेरुरुपमीयते ॥ ५ ॥

अत्राप्रकृतस्य मेरोः प्रकृतेन राज्ञा सादृश्यमिति प्रतीपालंकारो नोपमा।

एकदा साम्यमित्यनेन उपमेयोपमाव्यवच्छेदः। उपमेयोपमायामुपमानोपमेययोरनेकधा साम्यप्रतिपादनम्।

धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव श्रितः।
कामस्ताविव तौ काम इव रुद्रनरेश्वरे ॥ ६ ॥

अत्र धर्मोऽर्थ इव अर्थो धर्म इवेत्यनेकदा शब्दद्वयेन धर्मार्थकामानां सादृश्यं प्रतिपाद्यत इत्युपमेयोपमा।

वाच्यमित्यनेन प्रतीयमानौपम्यानां रूपकसंदेहभ्रान्तिमदुल्लेखापह्न-

---

'सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव।' इत्यादिशब्दमात्रसाम्येऽपि सा युक्तैवेति। अलंकारसर्वस्वकारः पुनरस्मिन्नेवोदाहरणे गुणक्रियासाम्यवच्छब्दसाम्यं नोपमाप्रयोजकमपि तूपमाप्रतिभोत्पत्तिहेतुः श्लेष एवावसेय इत्यवोचत्। विद्यानाथस्तु सर्वस्वकारश्रद्धालुतया श्लेष एवायं नोपमेत्याह अत्रेत्यादिना।

अन्येन वर्ण्यस्येति। उपमानोपमेयस्येत्यर्थ। लोकोऽयमिति। अत्रोपमानोपमेयभावस्य वैपरीत्यात् प्रतीपालंकार इत्याह। अत्रेति।

धर्म इति। अत्रैकदा साम्यस्य प्रथमार्धमेव प्रत्युदाहरणम्। तावतैवोपमेयोपमायाश्चरितार्थत्वात्। द्वितीयं पुनरभ्युच्चयः। तदेवाभिप्रेत्योक्तं धर्मार्थकामानामिति।

---

१ °साम्ये नोपमा° R. २ प्रतीपव्यावृत्तिः M. ३ M. adds प्रतीपे उपमेयस्योपमानत्वकल्पनात् सादृश्यं वर्ण्यते। ४ °व्यावृत्तिः P. ५ R. and T. omit उपमेयोपमायामु°—प्रतिपादनम्. ६ For प्रतीयमानौ°—वैलक्षण्यम् P. has गम्यौपम्यरूपकादेर्व्यावृत्तिः and M. has गम्यौपम्यस्य रूपकादेर्व्यावृत्तिः.

वतुल्ययोगितादीपकप्रतिवस्तूपमादृष्टान्तसहोक्तिव्यतिरेकनिदर्शनानां वैलक्षण्यम् ।

तथा हि

प्रतापरुद्रनृपतेर्मण्डलाग्रविधुंतुदः ।
अखण्डविक्रमोद्दामो ग्रसते राजमण्डलम् ॥ ७ ॥

अत्र मण्डलाग्रविधुंतुदपदयोः सामानाधिकरण्यप्रयोगान्यथानुपपत्त्या सादृश्यं लक्ष्यत इति नोपमा किं तु रूपकालंकारः ।

किमेष नवमो हरित्पतिरमन्दसंपत्पदं[1]
किमेष दशमः प्रजापतिरपूर्वसर्गक्रमः ।
किमेष हरिरुर्वरोद्धरणचञ्चुरेकादशः[2]
श्चिरादिति [3]विलोक्यते जगति काकतीन्द्रो जनैः ॥ ॥ ८ ॥

अत्र काकतीश्वरस्य[4] दिगीश्वरादीनां च परस्पराभेदप्रतीतेः संदेहनिबन्धनान्यथानुपपत्त्या सादृश्यमाक्षिप्यते । ततः संदेहालंकारः ।

काकतीयविभोः कीर्तिविभवे व्याप्तरोदसि ।
दिवापि चन्द्रिकाबुद्धया चकोरा यान्ति निर्वृतिम् ॥ ९ ॥

अत्र कीर्तिविभवे चन्द्रिकाबुद्धिः चन्द्रिकासादृश्यं विना न संभवतीति सादृश्याक्षेपात् भ्रान्तिमदलंकारः ।

लक्ष्मीनिवासगृहमित्यखिला नरेन्द्रा
शौर्यातिभूमिखनिरित्यरिवीरवर्गाः ।
विद्याविहारपदवीति[5] च लब्धवर्णाः
श्रीकाकतीन्द्रनगरीमनिशं स्तुवन्ति ॥ १० ॥

वाच्यव्यवच्छेद्यतया साधर्म्यस्य गम्यत्वं केषुचिदलंकारेषु दर्शयति । तथाहीत्यादिना । उदाहरणश्लोका यथायोगं स्वस्वप्रकरणे एव व्याख्यास्यन्ते ।

---

१ संपत्पदः M_1, M_2. २ °चुञ्चु M_1, M_2., R. ३ वितर्क्यते M_2. ४ काकतीन्द्रस्य R. ५ °विहारवलभी° R.

अत्र नगर्यां तत्तत्पदार्थतारोपः सा[1]दृश्यादृते न संभवतीति सादृश्यकल्पनादुल्लेखालंकारः ।

वीर[2]रुद्रस्य भूपालजयहोमं वितन्वतः ।
धू[3]मराजिरियं भाति न चमूरेणुरुत्थिता ॥ ११ ॥

अत्रोत्थितां चमूरेणुमवलोक्य धूमपङ्क्तिरित्यपह्नवेनारोपः सादृश्यमूल एवेति सा[4]दृश्याक्षेपादपह्नवः । एवं तुल्ययोगितादिष्वपि सादृश्यगम्यत्वान्नोपमाशङ्का । अतः सर्वेभ्यः साधर्म्यमूलेभ्यो विलक्षणेयमुपमा ।

सा प्रथमं द्विधा । पूर्णा लुप्ता चेति । उपमानोपमेयसाधारणधर्मसादृश्यप्रतिपादकानां च[5]तुर्णां प्रयोगे पूर्णा । एकस्य द्वयोस्त्रयाणां वा लोपे लुप्ता । पूर्णा द्वि[6]विधा । श्रौती आर्थी चेति । साक्षात्सादृश्यप्रतिपादकेवादिश[7]ब्दानां प्रयोगे श्रौती । धर्मिव्यवधानेन सादृश्यप्रतिपादकानां सदृशसंकाशानी-

---

उपमायाः स्वरूपमुक्त्वा विभागमाह । सा प्रथममिति । पूर्णामाह । उपमानेति । उपमीयते सदृशीक्रियते येनोत्कृष्टगुणेन तदुपमानं चन्द्रादि । उपमीयते यदपकृष्टगुणं तदुपमेयं मुखादि । साधारणो धर्मो गुणः क्रिया वा । सादृश्यप्रतिपादका यथेवादयः । चतुर्णामेतेषां कण्ठोक्तौ पूर्णेत्यर्थः । कतिपयलोपे लुप्तेत्याह । एकस्येति । लोपे शास्त्रीये स्वारसिके च । तत्राद्यां विभजते । पूर्णेति । श्रुत्या सादृश्यप्रतिपादनात् श्रौती । अर्थतस्त्वार्थीत्यर्थः । श्रौतीं लक्षयति । साक्षादिति । आर्थीं लक्षयति । धर्मिव्यवधानेनेति । स[8]दृशाभिधानद्वारेत्यर्थः । ननु यथेवादिशब्दानां स[9]दृशादिशब्दवत् सादृश्यविशिष्टार्थपरत्वाभावात् केवलसादृश्यपरत्वं वक्तव्यम् । तथा सति मुखं चन्द्रसादृश्यमित्यर्थः स्यात् । एवं च दशदाडिमादिवाक्यवदसम्बद्धमिदं भविष्यतीति चेत् सत्यम् ।

---

१ सादृश्यादिना R. २ धीररुद्र महीपाले जयहोमं वितन्वति M. ३ धूमरेणु° R. ४ सादृश्यस्य R. ५ T'. and M. drop चतुर्णाम्. ६ द्विधा R. ७ R. drops शब्दानाम्. ८ तादृशाभिधान° t. ९ तादृशादि° t.

काशप्रतीकाशादिशब्दानां प्रयोगे आर्थी । द्वे अपि वाक्यसमासतद्धितग[1]तत्वेन त्रिविधे[2] । एवं पूर्णोपमा षट्प्रकारा । लुप्तोपमा एकोनविंशतिभेदा । 'तेन तुल्यं क्रिया चेद्वतिः' इति सदृशार्थे[3] विहितस्य वतेरुपादाने आर्थी । 'तत्र तस्येव' इतीवार्थे विहितस्य वतेरुपादाने श्रौती । अत एव सादृश्यार्थे विहितस्य वतेः प्रयोगे धर्मोपादान[4] एवान्वयसौकर्यादनुक्तधर्मा तद्धितगा श्रौती लुप्ता[5] नास्ति । कल्पबादिप्रयोगे त्वार्थ्येव[6] ।

अथोदाहरणानि[7] ।

वाक्यगा पूर्णा श्रौती यथा ।

यथा राज्ञः पुरुष इत्यत्र गुणभूतराजविशेषणभूता षष्ठी अनुशासनबलादुभयनिष्ठसंबन्धमात्रमभिदधानापि तद्द्वारा प्रधानभूतं पुरुषमप्याक्षिपति । तदुक्तं हरिणा ।

'द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते ।
तत्राभिधीयमानः सन् प्रधानेऽप्युपयुज्यते ॥' इति ।

एवमुपमानविशेषणभूता यथेवादयः शब्दाः श्रुत्या सादृश्यं बोधयन्तोऽपि शब्दशक्तिस्वाभाव्यात् तात्पर्येण सादृश्यवति[8] वर्तन्ते । एवं च यथेवादिशब्दानां श्रुत्या सादृश्यपरत्वात् तत्प्रयोगे श्रौती । सदृशादिशब्दानामर्थात् सादृश्यपरत्वात् तत्प्रयोगे त्वार्थीति विवेकः । तयोः पुनः प्रत्येकं त्रैविध्यमाह । द्वे इति । एकोनविंशतिभेदेति । वक्ष्यमाणप्रकारेणेति शेषः । वतिप्रत्ययभेदादुपमाभेद इत्याह । तेन तुल्यमित्यादिना । तत्र श्रौत्या विशेषमाह[9] । अत एवेति । अतोऽस्मादेवान्वयसौकर्यादिति संबन्धः । कूर्मवदित्यादिवक्ष्यमाणोदाहरणे मेदिनीभानरूपस्य समानधर्मस्योपादान एवान्वयसौकर्यादन्यथा तदभावाच्च तद्धितगतायां श्रौत्यां धर्मोपादानमावश्यकमिति भावः । कल्पपादिप्रयोगे[10] त्विति । 'ईषदसमाप्तौ—' इति विहितानां कल्पब्देश्यदेशीयर्प्रत्ययानां 'विभाषा सुपः' इति विहितस्य बहुच्प्रत्ययस्य च प्रयोग इत्यर्थः । आर्थ्येवेति । धर्मिव्यवधानेनैव सादृश्यप्रतिपादनादित्यर्थः ।

---

१ वाक्यगतसमासगततद्धित° T′; वाक्यतद्धितसमास° R. २ R. has इति after it. ३ R. drops सदृशार्थे विहितस्य. ४ धर्मानुपादानेऽन्वयासंभवान्नानुक्तधर्मा तद्धितगा श्रौती । P. ५ लुप्तापि P. ६ चार्थ्येव P., M. ७ तयोदाहरणानि R. ८ सादृश्यवति वर्तन्ते t. ९ श्रौत्यादिविशेष t. १० °प्रयोगेष्विति p.

उद्दामोद्यतविक्रमे कृतयुगे बाहौ ययातेर्यथा
त्रेतायां रघुनायकस्य महितख्यातौ भुजायां यथा।
दोर्दण्डे च युधिष्ठिरस्य विलसच्छौर्ये यथा द्वापरे
विश्रब्धाद्य[1] कलौ तथैव रमते क्षोण्यन्ध्रभर्तुर्भुजे[2] ॥ १२ ॥

समासगा पूर्णा[9] श्रौती यथा।

भास्वानिवोद्यन्नुदयाद्रिलम्बी
भद्रासनस्थो वरवीररुद्रः।
उत्पश्यतामन्ध्रपुरीजनानां
नेत्राब्जजाड्यं शमयत्य[3]शेषम् ॥ १३ ॥

अत्र भास्वानिवेति 'इवेन स[4]ह नित्यसमासः' इति नित्यसमासः।

तद्धितगा पूर्णा[9] श्रौती यथा।

कूर्मवच्छेषवद्गोत्रगिरिवद्दिङ्महेभवत्।
भुजे प्रतापरुद्रस्य[6] धुरीणे भाति मेदिनी ॥ १४ ॥

वाक्यगा[7] पूर्णार्थी यथा।

'तैस्तैर्म[8]हीपालनसंविधाने-
स्तैस्तैः प्रजारञ्जनवैभवैश्च।

उद्दामेति। अत्र यथाशब्दप्रयोगादियं वाक्यगता श्रौती च।

भास्वानिवेति। कथमियं समासगेत्याकाङ्क्षायामाह। 'इवेन सह नित्यसमासः' इति। 'इवेन स[10]ह समासो विभक्त्यलोपश्च पूर्वपदप्रकृतिस्वरत्वं च' इति वार्त्तिकादिति शेषः।

कूर्मवदिति। 'तत्र तस्येव' इति स[11]प्तमीसमर्थादिवार्थे वतिप्रत्ययः। अत एवेयं तद्धितगा श्रौती। धुरं वहतीति धुरीणे धुरन्धरे। 'खः सर्वधुरात्' इत्यत्र 'खः' इति योगवि[12]भागात्खप्रत्ययः। 'गाम्भीर्यगरिमा तस्य सत्यं गङ्गाभुजङ्गवत्' इति तस्येवेति वतेरुदाहरणम्।

तैस्तैरिति। महीपालसंविधानैर्वापीकूपतटागादिनिर्माणैरित्यर्थः। प्रजारञ्जन-

---

१ विश्रब्धा हि कलौ M. २ °भूभृद्भुजे P. ३ °त्यजस्रम् P. ४ P. and R. drop सह. ५ नित्यसमासो विभक्त्यलोपश्चेति P. ६ प्रतापरुद्रस्य भुजे R. ७ वाक्यगता पूर्णार्थी T'. ८ तादृङ्मही° for तैस्तैर्मही° P. ९वाक्यगा t. १० t. drops सह. ११ समानधर्मार्थवतिप्रत्ययः t. १२ °विभागादिति p.

विराजते संप्रति काकतीय-
लक्ष्मीपतिर्दाशरथेः समानः ॥ १५ ॥

समासगा पूर्णार्थी यथा ।

तादृक्पालनसामर्थ्यसंपदा काकतीश्वरः ।
हरिदीश्वरसंकाशः शास्ति मध्यमविष्टपम् ॥ १६ ॥

तद्धितगा पूर्णार्थी यथा ।

हिमाचलवदौन्नत्ये गाम्भीर्ये क्षीरसिन्धुवत् ।
प्रतापे भानुवद् भाति वीररुद्रनरेश्वरः ॥ १७ ॥

एषूदाहरणेषूपमेयोपमानसाधारणधर्मसादृश्यप्रतिपादकानि चत्वारि निबद्धानीति पूर्णत्वम् ।

अथ लुप्तोपमाया उदाहरणानि ।

अनुक्तधर्मा वाक्यगा श्रौती लुप्ता यथा ।

यथा रुचां स्वामिनि चक्रवाक्यो
यथा च नीहाररुचौ चकोर्यः ।

वैभवैश्चौरादिनिवारणपूर्वकैः पालनविशेषैरित्यर्थः । अत्र दाशरथेः समान इति व्यासेन समानशब्दोपादानादार्थीयमुपमा वाक्यगता च ॥

तादृगिति । हरिदीश्वरेण दिक्पतिना सदृशो हरिदीश्वरसंकाश इति नित्यसमासः । 'स्युरुत्तरपदे त्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः ॥' इत्यमरकोशे निभादिशब्दानामुत्तरपदनियमात् । अत एव समासगतेयमार्थी ।

हिमाचलवदिति । औन्नत्यादौ मेर्वादितुल्यं भातीत्यर्थः । अत्र 'तेन तुल्यम्—' इति विहितस्य वतेः प्रयोगादार्थीयं तद्धितगा । एषूदाहरणेषूपमानादिचतुरङ्गनिबन्धनात् पूर्णत्वमित्याह । एष्विति ।

अथ लुप्तोदाहरणेषु प्रथमं धर्मानुपादाने पद्योदाहरणानि क्रमेणाह । यथेत्यादि । रुचां स्वामिनि सूर्ये । वीररुद्रे वर्तन्ते इति शेषः । अत्र प्रतापाह्लादसारस्यानां धर्माणामनुपादानम् ।

---

१ काकतीयो P. २ काकतीयनरेश्वरः R. ३ M. drops एषूदाहरणेषु—पूर्णत्वम्. ४ °षूपमानोपमेय° R ५ निबन्धनानीति T. ६ चक्रवाका M. ७ 'चौरादिभयनिवारण° t.

यथा प्रसूनस्तबके भ्रमर्य-
स्तथा प्रजाः काकतिवीररुद्रे ॥ १८ ॥

अनुक्तधर्मा समासगा श्रौती लुप्ता यथा ।

प्रतापरुद्रदेवस्य [१]पादपीठीमनारतम् ।
आराधयन्ति भूपालाः प्रणता देवतामिव ॥ १९ ॥

अनुक्तधर्मा वाक्यगा आर्थी लुप्ता यथा ।

काकतिक्ष्मापतेर्जैत्रप्रस्थानपटहध्वनिम् ।
तुल्यं दम्भोलिनिर्घोषैः [२]शृण्वन्त्यरिमहीभृतः ॥ २० ॥

अनुक्तधर्मा समासगा आर्थी लुप्ता यथा ।

शश्वत् पुरीमेकशिलाभिधानां
[३]वस्वोकसारासदृशीमवेक्ष्य ।
नमन्ति भूपा भुवि [४]काकतीय-
राज्यप्रतिष्ठां बहुमन्यमानाः ॥ २१ ॥

अनुक्तधर्मा तद्धितगा आर्थी लुप्ता यथा ।

प्रतापरुद्रनृपतेर्[५]जगन्महिततेजसः
कन्दर्पकल्पमाकारं पश्यन्त्यन्[६]यपुरस्त्रियः ॥ २२ ॥

[७]एषूदाहरणेषु धर्मस्यानुपादानम् ।

प्रतापेति । अत्र पादपीठीदेवतयोः समानो धर्मः सम्पत्प्रदत्वमनुक्तम् । अनुक्तधर्मा तद्धितश्रौती लुप्ता नास्तीत्युक्तम् ।

काकतीति । दम्भोलिनिर्घोषैरशनिध्वनिभिस्तुल्यं तद्वत् भीषणमिति गम्यते ।

शश्वदिति । वस्वोकसारासदृशीमलकासमानां वैभव इति नोक्तम् ।

प्रतापरुद्रेति । कन्दर्पकल्पं कन्दर्पसदृशम् । रूपसंपदेति शेषः । ईषदसमाप्तौ कल्पप्प्रत्ययः । इयमेकलोपे लुप्ता पञ्चविधा ।

---

१ पादपीठमनारतम् P. २ शृण्वन्त्यन्धमहीभृतः R.; शृण्वन्त्यरिमहीभुजः P. ३ वस्वेकसारा° T'. ४ काकतीये P. ५ °जगन्मोहित° R.; °जगन्महिम° P. ६ °पुरन्ध्रयः P. ७ R. and M. drop एषू°-दानम्.

अनुक्तधर्मेवादिः कर्मक्यचा लुप्ता यथा ।

दुग्धार्णवीयत्यम्भोधीन् कैलासीयति भूधरान्[1] ।
प्रतापरुद्रदेवस्य यशोवैराग्यवैभवम् ॥ २३ ॥

अनुक्तधर्मेवादिराधारक्यचा लुप्ता यथा ।

क्रीडाद्रीयति गोत्रशैलशिखरेष्वास्थानसद्मीयति[2]
द्वीपेष्वब्धिषु दीर्घिकीयति हरित्स्वेकान्तगेहीयति[3] ।
उद्यानीयति सीमपर्वततटारण्ये सुपर्वाचले[4]
प्रासादीयति वीररुद्रनृपतेः स्फारः प्रतापोदयः ॥ २४ ॥

अनुक्तधर्मेवादिः कर्मणमुल्लुप्ता[5] यथा ।

पश्यन्त्यात्मजदर्शमिन्दुममरस्रोतस्विनीं सत्सरो-[6]
दर्शं क्षीरपयोनिधिं प्रियसुहृद्दर्शं गिरिं राजतम् ।

अथ द्विलोपे[7] लुप्तां क्रमेणोदाहरति । दुग्धार्णवीयतीत्यादिना । अत्र 'उपमानादाचारे' इति क्यच्प्रत्ययः । 'क्यचि च' इतीकारः । धावल्यमत्र साधर्म्यं गम्यते । अम्भोधीन् दुग्धार्णवानिवाचरतीत्यत्र वाक्ये प्रक्रान्तं कर्मद्वयम् । तत्रोपमानकर्मणोऽन्तर्भूतत्वात् तदपेक्षयासावकर्मको धातुः । तदुक्तम् ।

'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ।
प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया ॥' इति ।

कर्मान्तरापेक्षया तु सकर्मक एव । यथाह भगवान् भाष्यकारः । 'द्वे ह्यत्र कर्मणी उपमानकर्मोपमेयकर्म चेति । उपमानकर्मान्तर्भूतमुपमेयेन कर्मणा सकर्मको भवति' इति । एवमन्यत्रापि द्रष्टव्यम् ।

क्रीडाद्रीयतीति । आस्थानसद्म सभामण्डपः । दीर्घिकाः क्रीडासरांसि । सीमपर्वतो लोकालोकः । सुपर्वाचलो मेरुः । क्रीडापर्वतादिष्विव कुलपर्वतशिखरादिष्वाचरतीत्यत्र सुखसाधनत्वं साधर्म्यं गम्यते । 'अधिकरणाच्च' इति वचनात् क्यच्प्रत्ययः । क्रीडाद्रीयतीत्यत्र 'अकृत्सार्वधातुकयोः' इति दीर्घः । अन्यत्र यथायोगं टिलोपे 'क्यचि च' इतीकारः ।

पश्यन्तीति । आत्मजं पुत्रमिव दृष्ट्वा आत्मदर्शम् । एवमुत्तरत्रापि द्रष्टव्यम् ।

---

१ पर्वतान् R. २ हैमगोत्रशिरसि R. ३ °पद्मीयति P., R. ४ पूर्वाचले P., R.
५ °णमुला लुप्ता T'. ६ सत्सखीं° M, P., R. ७ द्विलोपलुप्ताम् t.

लीलादर्पणदर्श[1]मन्यदमलं तारादिहारावली-
दर्शं खेलति वीररुद्रनृपतेः कीर्त्तिर्जगद्व्यापिनी ॥ २५ ॥

अनुक्तधर्मेवादिः कर्तृण[2]मुल्लु[3]प्ता यथा ।

नृपेषु शिक्षाविधिदण्डचारं
कान्तासु पुष्पायुधधन्वचारम् ।
प्रजासु चालम्बनयष्टिचारं
चरत्ययं रुद्र[4]नरेन्द्रखड्गः ॥ २६ ॥

अनुक्तधर्मेवादिः क्विपा लु[5]प्ता यथा ।

सुधाप्रवाहति सतामसतां कालकूटति ।
वीररुद्रनरेन्द्रस्य गुणज्योत्स्नाविजृम्भितम् ॥ २७ ॥

[6]इति दशोदाहरणानि । एपूदाहरणेषु द्वयोरनुपादानम् ।

'उपमाने कर्मणि च' इति णमुल्प्रत्यये कषादित्वात् सर्वत्र पश्यन्तीत्यनुप्रयोगः । अत्रात्मजसख्यादीनामिन्दुमन्दाकिनीमुख्यानां चोपमानोपमेयभावे नैर्मल्यमेव साधर्म्यमूलमिति गम्यते ।

नृपेष्विति । शिक्षाविधेर्दण्डः शिक्षाविधिदण्ड इति तादर्थ्ये अश्वघासादिवत् षष्ठीसमासः । स इव चरित्वा तच्चारमिति 'उपमाने कर्मणि च' इति चकारात् कर्त्तरि णमुल् । कषादित्वाच्चरतेरनुप्रयोगः । अत्र भीषणोद्दीपनविश्रामभूमित्वानां क्रमेण समानधर्मत्वमुन्नेयम् ।

सुधेति । गुणज्योत्स्नाविजृम्भितं कर्त्तृ । सुधाप्रवाह इवाचरति सुधाप्रवाहति तद्वच्छ्लाघ्यमित्यर्थः । कालकूटमिवाचरति कालकूटति तद्वदसह्यमित्यर्थः । 'सर्वप्रातिपदिकेभ्यः क्विब्वाचारे' इत्याचा[7]रे क्विप्प्रत्ययः । अत्राचारस्य समानधर्मत्वं मन्यमानः काव्यप्रकाशकारस्तद्वाचकस्य क्विपः सर्वलोपादिवादिलोपाच्च द्विलोपः । क्यजादौ तु प्रत्ययश्रवणादेकलोप एवेत्याह । विद्यानाथस्तु कर्त्तरि क्यजादावस्तु नाम धर्मान्तरोद्भावना शक्तौ कथंचिदाचारः सामर्थ्यम् । कर्मणि क्यजादौ तूपमानोपमेयगतो धावल्यादिरेव समानधर्मो नाचारमात्रं तस्यान्यधर्मत्वादिति मन्यमानः क्यजादावपि द्विलोप इत्याह । एपूदाहरणेषु द्वयोरनुपादानमिति । एत-

---

१ °मन्यदखिलम् P., R. २ °णमुला लुप्ता T'. ३ M. drops लुप्ता. ४ °नृपेन्द्रखड्ग M. ५ M. omits लुप्ता. ६ The portion from इति दशो° to लुप्तत्वम् is omitted in P. and M. ७ °चार इत्येके ' T'.

अम्भोधीन् दुग्धार्णवीयतीत्यत्र कर्मक्यचि दुग्धार्णवानिव करोतीति गोत्रशिखरेषु[1] क्रीडाद्रीयती[2]त्याधारक्यचि क्रीडाद्रिष्विव वर्त्तत इति चन्द्रमात्मजदर्शं पश्यन्तीति कर्मणमुलि आत्मजमिव पश्यन्तीति शिक्षाविधिदण्डचारं चरतीति कर्त्तृणमुलि शिक्षाविधिदण्ड इव चरतीति इवशब्दोऽन्तर्गत इति तस्य लुप्तत्वम् ।

[3]अनुक्तधर्मीवादिः कर्त्तृक्यचा लुप्ता यथा ।

ज्योत्स्नीयन्ति सुधीयन्ति चन्दनीयन्ति सर्वतः ।
प्रतापरुद्रनृपतेः शुभ्राः[4] कीर्त्तेर्महोर्मयः ॥ २८ ॥

अत्र कीर्त्तीनां स्वरूपमुपमेयम् ।

देव विविनक्ति । अम्भोधीनित्यादि । इवशब्दोऽन्तर्गत इति गम्यमानार्थ इत्यर्थः । एतद्यथोदाहरणमस्मदुद्घाटितधावल्यादिसाधारणधर्मस्याप्युपलक्षणम् । तस्य लुप्तत्वमिति । अप्रयुक्तत्वमित्यर्थः । यदाह कैयटः । ‘ गम्यमानार्थस्याप्रयोग एव लोपः ’ इति । क्विबन्तोदाहरणं तु सर्वसंप्रतिपन्नत्वान्न विवृतमिति द्रष्टव्यम् ।

क्वचित् त्रिलोपे लुप्तामाह । अनुक्तेति । धर्मः समानधर्मोऽस्यास्तीति धर्मि उपमेयं तच्चेवादिश्चानुक्तौ यत्रासावनुक्तधर्मीवादिः । अनुक्तोपमेयेवादिरित्यर्थः । धर्मलोपस्तु प्रसिद्धः । कर्त्तृक्यचेति । यत्र क्यच्प्रत्यये प्रकृतिभूतस्योपमानस्य कर्मणः कर्त्तैवोपमेयं तेनेत्यर्थो द्रष्टव्यः । केवलकर्त्तृक्यच्प्रत्ययस्यैवाभावात् । तेन लुप्तामुदाहरति । ज्योत्स्नीयन्तीति । ज्योत्स्नामिवात्मानमाचरन्तीत्यत्रात्मन उपमेयस्येवादेः साधर्म्यस्य नैर्मल्यादेश्चानुपादानात् त्रिलोपे लुप्तेयमिति भावः । आचारसामर्थ्यवादिनां तु द्विलोप एव । तदुक्तं काव्यप्रकाशे । ‘ क्यचीवाद्युपमेयौ ’ इति । न च कीर्त्तिमहोर्मय इत्युपमेयोपादानम् । उपमानापेक्षया भिन्नविभक्तिकत्वात् । न चैतदनुसारेण ज्योत्स्नीयन्तीत्यत्र ज्योत्स्ना इवाचरन्तीति समानविभक्तिकत्वकल्पनमुपपद्यते । कर्त्तृक्यच्प्रत्ययस्यानुशासनविरुद्धत्वात् । न च शुभ्रा इति समानधर्मोपादानम् । तस्याकर्त्तृभूतकीर्त्तिविशेषणत्वेन तत्रैवोपक्षीणत्वादित्यलमतिप्रसङ्गेन ।

---

१ गोत्रशैलेषु M., M₂. २ °त्याचारक्यचि M₂. ३ अनुक्तधर्मोपमेयेवादिः कर्मक्यचा लुप्ता यथा P.; अनुक्तधर्मोपमेवादिरुपमेयवद्यचा यथा M. ४ कीर्णाः P., R.; पूर्णाः M.

अनुक्तधर्मेवादिः कर्तृक्यङा[1] यथा।

शेषायते मही वोढुं कल्पशाखायते[2]ऽर्थिनाम्।
प्रतापरुद्रदोर्दण्डः कालदण्डायते द्विषाम्॥ २९॥

अनुक्तोपमाना[3] वाक्यगा लुप्ता यथा।

वदान्यो नान्योऽस्ति त्रिजगति समो रुद्रनृपते-
र्गुणश्रेणीश्लाघापिहितहरिदीशानयशसः।
समन्तादुद्भूतैर्द्विरदमदगन्धैः सुरभयः
क्रियन्ते यद्विद्वज्जनमणिगृहप्राङ्गणभुवः॥ ३०॥

अनुक्तोपमाना[4] समासगा लुप्ता यथा।

पुनरपि धर्मेवादिलोपे लुप्तामाह। शेपायत इति। शेष इवाचरति इति शेषायते। 'कर्तुः क्यङ् सलोपश्च' इति क्यङ्प्रत्यये ङित्वादात्मनेपदम्। अत्रोपमानकर्तुरन्तर्भूतत्वादुपमेयकर्त्रा सकर्तृकत्वमिति भाष्यकारः। अत्र महीवहनलक्षणस्य साधर्म्यस्योपादानात् कल्पशाखायत इत्यादिकमेवोदाहरणम्। शेपायत इत्येतदेकलोपस्येति विवेकः। अत एवास्य प्रकरणादुत्कर्षः। अत एव कर्तृणमुलि क्विपि च समानधर्मस्योपादानानुपादानाभ्यां द्वैविध्यं द्रष्टव्यम्। पुरुषव्याघ्र इत्यत्र सामान्याप्रयोग एव सामानाधिकरण्यात् समासः संभवति। तदुक्तं हरिणा[5]।

'व्याघ्रशब्दो यदा शौर्यात् पुरुषार्थेऽवतिष्ठते।
तदाधिकरणाभेदात् समासस्यास्ति संभवः॥
शूरशब्दप्रयोगे तु व्याघ्रशब्दो मृगे स्थितः।
भिन्नेऽधिकरणे वृत्तेस्तत्र नैवास्ति संभवः॥' इति।

अतोऽत्र धर्मलोपादिवादेरभावाच्चानुक्तधर्मेवादिः समासगा लुप्तेत्यप भेदोऽन्यत्र[?]पुस्तकेष्वभावादुपेक्ष्यः।

उपमानानुक्तौ वाक्यसमासगतत्वेनोदाहरणद्वयं क्रमेणाह। वदान्य इति। गतमेतत्। रुद्रनृपतेः समो वदान्य इत्युपमेयवाचकसमानधर्माणां प्रयोगः। उपमानं नोक्तम्[6]।

---

१ कर्तृक्यङा लुप्ता यथा T'. २ कल्पशाखीयते P. ३ अनुक्तोपमेया P., R.; अनुक्तधर्मोपमानवाक्यगा M. ४ अनुक्तोपमेया P., R. ५ p. drops हरिणा. ६ तु नोक्तम् t.

वीररुद्रसमो राजा नास्ति नास्त्येव भूतले ।
यस्य धर्मानुबन्धेन कलिः कृतयुगीकृतः ॥ ३१ ॥

अनुक्तधर्मोपमाना[1] वाक्यगा लुप्ता यथा ।

लोके काकतिवीररुद्रनृपतेरुद्दामभूमिश्रियः[2]
कीर्त्या कार्त्तिककौमुदीधवलया तुल्यं न किंचित् क्वचित् ।
यन्माधुर्यविजृम्भितक्षतविषां[3] ग्रीवां विलोक्याधुना
कण्ठालिङ्गनमीशितुर्वितनुते नीरन्ध्रमद्रेः सुता ॥ ३२ ॥

अनुक्तधर्मोपमाना[4] समासगा लुप्ता यथा ।

प्रतापश्रीतुल्यं क्वचिदपि न भूतं न च भवन्
न भावि त्रैलोक्ये किमपि जयिनः काकतिविभोः ।
यथा लोकालोकक्षितिधरतटेष्वर्कदृषदः
प्रकाशन्ते नक्तंदिवमुदितरोचिःपरिचयाः ॥ ३३ ॥

पूर्वोदाहरणद्वये वदान्येति राजेति[5] शब्दाभ्यां वितरणशीलत्वं प्रजा-[6]रञ्जकत्वं च साधर्म्यमुक्तम्[7] । अनन्तरोदाहरणद्वये च[8] धर्मस्याप्यनुपा-[9]दानम् । एषु चतुर्षूदाहरणेषु न प्रतीपालंकारशङ्का ! उपमानस्याक्षेपा-[10]

वीररुद्रसम इति समासेनोपमेयवाचकयोः प्रयोगः । रञ्जनाद्राजेति साधर्म्यकथनम् ।

पूर्ववद्धर्मोपमानानुक्तावुदाहरणद्वयमाह । लोक इति । कीर्त्या तुल्यं मधुरं वस्तु किमपि नास्तीत्यर्थः । अत एव साधर्म्योपमानयोरनुपादानम् । यन्माधुर्यविजृम्भितैः यस्याः कीर्तेर्माधुर्यातिशयैरित्यनेन साधर्म्योपादानमिति न शङ्कनीयम् । तस्य वाक्यान्तरगतत्वात् । किं तु माधुर्यमेव साधर्म्यं विवक्षितं न कौमुदीधवलत्वादिकमित्यनेन सूच्यते ।

प्रतापेति । लोकालोकक्षितिधरतटेषु पाश्चात्येष्वपीति भावः । अर्कदृषदः सूर्यकान्ताः । देशतः कालतश्च परिच्छेदातीतत्वात् प्रतापश्रीतुल्यं नास्तीत्यत्रोपमेयवाचकयोरेवोपादानम् । एषूदाहरणेष्वाद्ययोरेकलोपमन्त्ययोश्च द्विलोपं विविनक्ति । पूर्वेति । अत्रोदाहरणचतुष्टये प्रतीपालंकारसाङ्कर्यं वारयति । एष्विति ।

१ °धर्मोपमेया P. २ °भूमस्पृशा P., °शुभ्रश्रियः M. ३ °विजृम्भितैः क्षत° P. ४ °धर्मोपमेया P. ५ वदान्यो नान्योऽस्तीति T′., M_1., M_2. ६ °शीलत्वप्रजा° T′., M_1. ७ °रञ्जकत्वसाधर्म्यम् T′., M_1., M_2. ८ T′. drops it. ९ धर्मस्य चानुपा° M_1. १० °नुपादानमिति भेदः P.

भावात् । उपमेयस्याधिक्याविवक्षणाच्च । यत्रोपमेयस्याधिक्यविवक्षयोपमानत्वमुच्यते तत्रैव प्रतीपालंकारः ।

अनुक्तेवादिः समासगा लुप्ता यथा ।

असतामुष्णभानूष्णं सतां शीतांशुशीतलम् ।
प्रतापरुद्रदेवस्य चरितं विश्वमङ्गलम् ॥ ३४ ॥

अनुक्तधर्मेवाद्युपमाना समासगा लुप्ता यथा ।

काकतीन्द्रो रणे भाति भीमसेनपराक्रमः ।
किं त्वदुःशासनाः सर्वे यस्य प्रत्यर्थिपार्थिवाः ॥ ३५ ॥

अत्र भीमसेनस्य पराक्रम इव पराक्रमो यस्य स भीमसेनपराक्रम इति धर्मेवाद्युपमानलुप्ता ।

'आक्षेप उपमानस्य कैमर्थक्येन कथ्यते ।
यद्वोपमेयभावः स्यात् तत् प्रतीपमुदाहृतम् ॥'

इति लक्षणानुसारेण द्विविधस्यापि प्रतीपस्येहानुप्रवेशाभावान्न तत्साङ्कर्यशङ्काकलङ्कावकाश इति भावः ।

असतामिति । उष्णभानुरिवोष्णमुष्णभानूष्णमित्यत्र वाचकमात्रलोपादेकलोपे लुप्ता समासगा । सर्वस्यापि शब्दस्य शब्दान्तरसंबन्धेन विशेषवाचित्वादुष्णादिशब्दानां तथात्वेन सामान्यवचनत्वाभावेऽपि भाष्योक्तरीत्या समासात् पूर्वं सामान्यवचनत्वेन 'उपमानानि सामान्यवचनैः' इति समासः ।

समासे त्रिलोपमुदाहरति । काकतीन्द्र इति । भीमसेनपराक्रम इव दुःसहः पराक्रमो यस्यासौ भीमसेनपराक्रमः । अत्र विशेषमाह । किं त्विति । दुःशासनो दुर्योधनानुजः तत्सहिता भीमसेनप्रत्यर्थिनः वीररुद्रवैरिणस्तु तद्रहिता इति प्रातीतिकोऽर्थः । दुष्करं शासनं स्वविषयं येषां ते दुःशासनाः दुःसाध्याः । ते न भवन्तीत्यदुःशासनाः । सर्वेऽपि सुसाध्या इत्यर्थः । त्रिलोपं दर्शयति । अत्रेति । धर्मेवाद्युपमानलुप्ता इति । धर्मेवाद्योर्गम्यमानार्थत्वाल्लुप्तत्वम् । उपमानस्य तु वार्तिकादिति भावः । तथा हि 'सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्य उत्तरपदलोपश्च' इति वार्तिकम् । अस्यार्थः । सप्तम्यन्तं तावदास्ताम् । उपमानं पूर्वपदं

---

१ °स्याधिक्यं न विवक्षितम् M_1., M_2. २ °पमानस्याधिक्यमुच्यते M_2. ३ प्रतीपालंकारात् P. ४ मङ्गलान्वितम् M_1. ५ किं तु दुःशासनाः P. ६ °धर्मोपमानेवादिः P.; धर्मेवाद्युपमानं लुप्तम् M_1., M_2.

इति लुप्तोपमा ऐकोनविंशतिप्रकारा[1] ।

अथ साधारणधर्मोपादाने द्वैविध्यम् । धर्मस्य सकृदुपमानोपमेयगतत्वेन निर्देशः । उभयगतत्वेन[2] पृथगुपादानं वा । पृथगुपादानं च वस्तुप्रतिवस्तुभावेन बिम्बप्रतिबिम्बभावेन च[3] द्विविधम् । एकस्यार्थस्य शब्द-

---

यस्य समासस्य तस्य शब्दान्तरेण बहुव्रीहिः पूर्वसमासावयवस्योत्तरपदस्य च लोप इति । एतेनेदं फलितम् । अत्रोपमानशब्देन मुख्योपमानभूतस्य भीमसेनपराक्रमस्याश्रयो भीमसेनो लक्ष्यते । तत्पूर्वपदस्य भीमसेनपराक्रम इत्यस्य समासस्योपमेयवाचिना पराक्रमशब्देन बहुव्रीहिः । भीमसेनपराक्रम इव दुःसहः पराक्रमो यस्येति । ततः पूर्वसमासावयवस्योत्तरपदस्य मुख्योपमानपराक्रमशब्दस्य लोप इति । तेन धर्मेवाद्युपमानानां लोपात् त्रिलोपवती समासगा । अत्रायं संग्रहः ।

समासगेवादिलोपे स्यादेका वृत्तिवाक्यगे ।
द्वे लोप उपमानस्य वाक्यतद्धितवृत्तिगाः ॥ १ ॥
धर्मानुक्तौ पञ्च चैकलोपेऽष्टौ मिलिता भिदाः[5] ।
कर्माधारक्यचा कर्मकर्त्रोश्च णमुला क्विपा ॥ २ ॥
क्यङा कर्त्र्युपमितवृत्त्या चेवादिधर्मयोः ।
अनुक्तौ सप्त धर्मोपमानलोपे समासगा ॥ ३ ॥
वाक्यगा च द्विधेत्येवं द्विलोपे नव कीर्त्तिताः ।
क्यचोपमानान्यलोपे स्यादेकान्या समासगा ॥ ४ ॥
उपमेयान्यलोपे द्वे स्यातामेवं त्रिलोपगे ।
लुप्तभेदा मिलित्वा स्युरेवमेकोनविंशतिः ॥ ५ ॥
पूर्णाभिः सह षड्भिस्तु भेदाः स्युः पञ्चविंशतिः ।
द्वे श्रौत्यौ धर्मलोपेऽन्या आर्थ्यः सप्तदश स्मृताः ॥ ६ ॥
कुत्रचित् कर्त्तृणमुलि तथाचारक्विपि क्यङि ।
एकलोपे विलुप्ता स्याद्धर्मोपादानसंभवात् ॥ ७ ॥ इति ।

समानधर्मोपादाने सर्वभेदसाधारणं विशेषणमाह । अथेति । द्वितीयं द्वेधा विभजति । पृथगिति । तत्राद्यं लक्षयति । एकस्येति । द्वितीयं लक्षयति । द्वयो-

---

१ P. has दर्शिता for एकोनविंशतिप्रकारा. २ उभयगतत्वेन च पृथगुपादानम् P.; M₂. drops उभयगतत्वेन. ३ वा द्विधा T'. ४ °क्यचौ t. ५ कर्मलोपेऽष्टौ मिलिता भिदाः ।

द्वयेनाभिधानं वस्तुप्रतिवस्तुभावः । द्वयोरर्थयोर्द्विरुपादानं बिम्बप्रतिबिम्बभावः । सकृन्निर्देशो यथा ।

> [1]नृपाः प्रणतमूर्द्धानः सेवन्ते काकतीश्वरम् ।
> असाधूनां विनेतारं गुरुं शिष्या इवाभितः ॥ ३६ ॥

अत्र नरेश्वराणां शिष्याणां च प्रणतमूर्द्धान इति सकृदेव साधर्म्यमुक्तम् । तथासाधूनां विनेतारमिति राज्ञो गुरोश्च [2]तुल्यधर्मत्वं [3]सकृदेवोक्तम् ।

वस्तुप्रतिवस्तुभावेन [4]द्विधा निर्देशो यथा ।

> वंशोऽयं काकतीयानां वीररुद्रेण भूषितः ।
> अन्ववायः ककुत्स्थानां [5]रामेणैव परिष्कृतः ॥ ३७ ॥

अत्र भूषितपरिष्कृतशब्दाभ्यामेकार्थप्रतीतेर्वस्तुप्रतिवस्तुभावः ।

बिम्बप्रतिबिम्बभावो [6]यथा ।

> स्फुरच्छ्वेतातपत्रश्रीः काकतीयनरेश्वरः ।
> हाटकाद्रिरिवाभाति शश[7]सङ्गीन्दुमण्डलः ॥ ३८ ॥

अत्र श्वेतातपत्रचन्द्रमण्डलयोः सादृश्येन काकतीन्द्रसुवर्णाचलयोः सादृश्यमिति बिम्बप्रतिबिम्बभावः ।

रिति । द्वयोः सदृशयोरिति शेषः । तेन धर्मापेक्षो वस्तुप्रतिवस्तुभावः । धर्म्यपेक्षस्तु बिम्बप्रतिबिम्बभाव इति फलितम् । नृपा इति । अत्र समानधर्मस्य सकृन्निर्देशं योजयति । अत्रेति ।

द्विधा निर्देश इति । उपमानगतत्वेनोपमेयगतत्वेन चेति भावः । वंश इति । परिष्कृत इत्यत्र 'संपरिभ्यां करोतौ भूषणे' इति सुडागमे षत्वम् । अत्र संबन्धिभेदेन भूषितपरिष्कृतशब्दाभ्यां समानधर्मकथनाद्वस्तुप्रतिवस्तुभावः ।

स्फुरदिति । अत्र श्वेतातपत्रस्येन्दुमण्डलं प्रतिबिम्बतया निर्दिश्यते । काकतीन्द्रस्वर्णाचलयोः स्वरूपतः सादृश्याभावाद्विशेषणसादृश्यनिबन्धनं विशेष्यसादृश्यमिति वक्तव्यम् । स एव बिम्बप्रतिबिम्बभाव इत्याह । अत्रेति ।

---

१ भूपाः P. २ तुल्यत्वम् M_2. ३ सकृदेवोपात्तम् P. ४ द्विविधो M_2 ५ रामेणेव M_1.
६ For यथा T'. has वस्तुतो भिन्नयोरप्युपमानोपमेयधर्मयोः परस्परसादृश्याद् भिन्नयोः पृथगुपादानं बिम्बप्रतिबिम्बभाव इत्यालंकारिकसमयः । ७ °सङ्गमण्डलः M_2. ८ t. drops फलितम्. ९ °सुवर्णाचलयो° t.

[1]अपरमपि द्वैविध्यमस्यालंकारस्य । समस्तवस्तुविषया एकदेशवर्त्तिनी चेति ।

यथाक्रमं द्वयोरुदाहरणम् ।

विभाति भूद्यौरिव काकतीन्द्र-
पुरी विराजत्यमरावतीव ।
पौराः [2]प्रथन्ते त्रिदशा इवार्द्धिं
धत्ते मरुत्वानिव वीररुद्रः ॥ ३९ ॥

एषा समस्तवस्तुविषया ।

एकदेशविवर्त्तिनी यथा ।

द्विपैश्चरद्भिर्धरणीधरैर्वा
तुरङ्गमश्रेणिभिरूर्मिभिर्वा ।
नानायुधैर्व्यालजलग्रहैर्वा
बलं त्रिलिङ्गाधिपतेर्दुरापम् ॥ ४० ॥

अत्र त्रिलिङ्गाधिपतेर्बलं समुद्र इवेत्यर्थप्रतीतेरेकदेशविवर्त्तित्वम् ।

मालारूपेणाप्ययमलंकारो दृश्यते ।

यथा ।

कुन्दति कुमुदति हंसति हारति [3]हरति [4]क्षपाकरति ।
कैलासति च [5]यशःश्रीवैशद्यं वीररुद्रस्य ॥ ४१ ॥

प्रकारान्तरेण विभागमाह । अपरमिति । समस्तानि वस्तून्यवयव्यवयवाश्च विषया यस्याः समस्तवस्तुविषया । अवयवावयविनोरेकदेशो वर्त्तत इत्येकदेशवर्त्तिनी । आद्यामुदाहरति । विभातीति । मरुत्वानिन्द्रः । 'तसौ मत्वर्थे' इति भसंज्ञायां [6]पदकार्यं न भवति । 'झय' इति मतोर्वत्वम् । इयमनेकेवोपमेति केचित् । इवशब्दान्तरप्रयोगे पौनरुक्त्यापत्तेरेकेनैवालमिति विद्याधरः ।

द्वितीयामुदाहरति । द्विपैरिति । धरणीधरैर्मैनाकादिभिः । सर्वत्र वाशब्द इवार्थे । 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इति विश्वः । त्रिलिङ्गाधिपतेरन्ध्रदेशाधीश्वरस्य । नाटके व्युत्पत्तिरुक्ता ।

एकस्यैवोपमेयस्य बहूपमानोपादाने मालोपमा । तामुदाहरति । कुन्दतीति ।

---

१ अन्यद् द्वैवि॰ P. २ भजन्ते P. ३ P. drops हरति; M_1. has नीहारति. ४ सुधाकरोति M_2. ५ यशसो वैशद्यम् M_2. ६ पदकार्ये जत्वं f.

अत्रैकस्योपमेयस्यानेकोपमानदर्शनात् मालात्वम्। उपमायां भेदाभेदसाधारणसाधर्म्यस्य प्रयोजकत्वम्। एवं भेदान्तरं यथासंभवमुदाहार्यम्।

अनन्वयालंकारः।

एकस्यैवोपमानोपमेयत्वेऽनन्वयो मतः।

यत्र द्वितीयसब्रह्मचारिनिवृत्त्यर्थमेकस्योपमानोपमेयभावो निबध्यते असावनन्वयालंकारः।

यथा।

सन्तु लोके सुवर्णाद्रिरत्नाकरसुधाकराः।
तथापि वीररुद्रोऽयं वीररुद्र इव स्वयम्॥ ४२॥

उपमेयोपमालंकारः।

पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमा मता।

तस्मिन्नित्युपमानोपमेयत्वपरामर्शः।

सर्वत्राचारे क्विप्प्रत्ययः। साधर्म्यं त्रिविधम्। भेदप्रधानमभेदप्रधानं भेदाभेदप्रधानं चेति। तत्राद्यं व्यतिरेकादौ। द्वितीयं रूपकादौ। तृतीयमत्रेत्याह। उपमायामिति। यदाह भगवान् भाष्यकारः। 'यत्र किंचित् सामान्यं कश्चिच्च विशेषस्तत्रोपमानोपमेये भवतः' इति। 'भणितिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्तिः—' इत्यादिरशनोपमादिकमन्यतो द्रष्टव्यमित्याह। एवमिति॥

भेदाभेदसाधारणसाधर्म्यमूलेपूपमानन्तरं प्रतीयमानवस्तुकयोरेकवाक्याश्रयमनन्वयं लक्षयति। एकस्येति। एकस्यैवोपमानोपमेयभावानन्वयादन्वर्थेयं संज्ञा। वाच्याभिप्रायेणोपमेयस्यैव द्वितीयसदृशनिवृत्तिलक्षणव्यङ्ग्याभिप्रायेणोपमानस्यमन्वेतीत्यभिप्रायेण व्याचष्टे। यत्र द्वितीयेति। उदाहरति। सन्त्विति। उपमानभावानर्हैः किं तैरिति भावः॥

अनन्वयवैलक्षण्येन वाक्यभेदाश्रयमुपमेयोपमालंकारं लक्षयति। पर्यायेणेति। पर्यायो यौगपद्याभावः। द्वयोरुपमानोपमेययोः। तच्छब्दस्य प्रकृतानन्वयपरामर्शं वारयति। तस्मिन्निति। द्वयोरुपमानोपमेयभावविनिमये सत्युपमेयोपमालं-

---

१ अनेकदेशस्यो' M_2. २ 'प्रधान' P. ३ 'मूह्यम् M_2. ४ °सदृश' P. ५ °नोपमेयप्रत्यवमर्शः M. ६ क्वचित् t. ७ क्वचिच्च t. ८ 'शृङ्खलोपमादित्व° t.

यथा ।

> धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव स्थितः ।
> कामस्ताविव तौ काम इव रुद्रनरेश्वरे ॥ ४३ ॥

स्मरणालंकारः ।

सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते ।

यत्र सदृशस्य पदार्थस्यानुभवेन सदृशवस्त्वन्तरपरामर्शो जायते तत्र स्मरणालंकारः ।

यथा ।

> राज्ञा प्रतापरुद्रेण पालितेयं वसुंधरा ।
> हरिश्चन्द्रनलादीनां प्राचां स्मरति भूभुजाम् ॥ ४४ ॥

अत्र नलनहुषादितुल्यपालनप्रवीणतया[1] प्रतापरुद्रं रक्षितारं प्राप्तवत्याः मेदिन्याः पूर्वराजस्मरणम्[2] ।

भेदाभेदसाधारणसाधर्म्यनिबन्धनालंकाराः[3] प्रदर्शिताः ।

कार इत्यर्थः । उपमेयेनोपमा उपमेयोपमेत्यन्वर्थत्वम् । धर्म इति । अत्र वाक्यभेदेन द्वयोरेवोपमानोपमेयभावात् तृतीयसब्रह्मचारिनिवृत्तिलक्षणं वस्तु प्रतीयते । अत्र पूर्णश्रीरिति धर्मस्य साधारण्यं स च वस्तुप्रतिवस्तुनिर्देशेनापि दृश्यते ।

> सच्छायाम्भोजवदनाः सच्छायवदनाम्बुजाः ।
> वाप्योऽङ्गना इवाभान्ति यत्र वाप्य इवाङ्गनाः ॥ इति ।

भेदाभेदप्रधानेषु परिशेषात् स्मरणं लक्षयति । सदृशेति । व्याचष्टे । यत्रेति । अन्यशब्दार्थमाह । सदृशवस्त्वन्तरेति । 'सदृशादृष्टचिन्ताद्या स्मृतिबीजस्य बोधका' इति न्यायेन सदृशानुभवात् पूर्वानुभवजनितसंस्कारोद्बोधे सति सदृशवस्त्वन्तरस्मृतिः स्मरणालंकार इत्यर्थः । सादृश्यव्यतिरिक्तनिमित्तत्वेन 'अत्रानुगोदं मृगयानिमित्तम्—' इत्यादौ नायमलंकारः। न चेदमनुमानम् । अविनाभावाभावात् । उदाहरति । राज्ञेति । भूभुजामित्यत्र 'अधीगर्थ—' इत्यादिना कर्मणि षष्ठी ।

अथ वृत्तानुकथनपुरःसरं प्रघटकसङ्गतिमाह । भेदाभेदेति । आरोपगर्भा

---

१ °प्रवीणम् P. २ पूर्वजस्मरणम् M. ३ °निदर्शनालंकारा R.

संप्रत्यारोपगर्भालंकारप्रस्तावः[1]। तत्रापि प्राधान्यात् प्रथमं रूपकं निरूप्यते।

रूपकालंकारः।

आरोपविषयस्य स्यादतिरोहितरूपिणः।
उपरञ्जकमारोप्यमाणं तद्रूपकं मतम्॥

अनारोपमूलानां चोपमादीनां व्यावृत्तिः। अतिरोहितरूपिण इत्यनेन संदेहभ्रान्तिमदपह्नुतीनां[2] च व्यावृत्तिः। संदेहालंकारे[3] विषयस्य संदिह्यमानतया तिरोधानम्। भ्रान्तिमदलंकारे[4] भ्रान्त्या विषयतिरोधानम्। अपह्नुत्यलंकारेऽपह्नवेनारोपविषयतिरोधानम्। उपरञ्जकमित्यनेन परिणामालंकारव्यावृत्तिः। परिणामालंकारे[5] आरोप्यमाणस्य प्रकृतोपयोगित्वेनान्वयो न प्रकृतोपरञ्जकत्वेन। अतः सादृश्यमूलेभ्यः[6] सर्वेभ्यो विलक्षणं रूपकम्।

तस्य प्रथमं त्रैविध्यम्। सावयवं निरवयवं परम्परितं चेति। साव-

अभेदप्रधाना इत्यर्थः। तेषु रूपकस्य संगतिमाह[7]। तत्रापीति। अभेदप्रधानेष्वित्यर्थः। प्राधान्यादिति[8]। आरोपमूलालंकारबीजभूतत्वेनेति भावः। तस्य लक्षणमाह। आरोपेति। अन्यत्रान्यज्ञानमारोपः[9]। तद्विषयस्य मुखादेरतिरोहितरूपिणः। अतिरस्कृतस्वरूपस्य। सर्वधनादित्वादिन् प्रत्ययः। आरोप्यमाणं चन्द्रादि। उपरञ्जकं ताद्रूप्यप्रतीतिमात्रजनकम्। आरोपस्य तावतैव चरितार्थत्वान्न पुनः परिणामवत् प्रकृतोपयोगान्तमारोपविवक्षेति भावः। यदेवंविधं तद्रूपकम्। प्रकृतमप्रकृतेन रूपवत् क्रियत इति लक्ष्यनिरुक्तिः। तदुक्तम्।

'ततो विषयिरूपेण रूपवान् विषयो यतः।
आरोपणेन क्रियते तेनैतद्रूपकं मतम्॥' इति।

विशेषणकृत्यमाह। अत्रारोपविषयस्येत्यादिना। तस्य विभागमाह। तस्य प्रथममित्यादिना। समस्तवस्तुविषयं लक्षयति। यत्रेति। आरोपविषय-

---

१ संप्रत्याहार्यारोप° P. २ °दपह्नुतिप्रमुखाणाम् P., °दपह्नुतिमूलानामेवमादीनां च M. ३ संदेहालंकारस्य P. ४ M. drops the portion from भ्रान्तिमद°—to पह्नवेनारोपविषयातिरोधानम्. ५ परिणामे R. ६ सर्वेभ्यः सादृश्यमूलेभ्यः R., M. ७ प्रसङ्गमाह t. ८ °भूतत्वादिति भावः t. ९ अन्यत्रान्यधर्मारोप आरोपः p., T.

एवं द्विविधम्। समस्तवस्तुविषयमेकदेशविवर्त्ति च। निरवयवं द्विविधम्। केवलं मालारूपं चेति[1]। परम्परितस्यापि श्लिष्टनिबन्धनत्वेनाश्लिष्टनिबन्धनत्वेन च द्वैविध्यम्। तयोरपि प्रत्येकं केवलमालारूपतया चातुर्विध्यम्। एवमष्टविधो रूपकालंकारः।

अथोदाहरणानि।

यत्रावयवानामवयविनश्च सामस्त्येन निरूपणं निबध्यते तत् समस्तवस्तुविषयं रूपकम्।

यथा।

यात्राप्रावृषि वीररुद्रनृपतेर्निस्साणधाराधरे[2]
वैरिक्ष्मापतिगर्वपर्वतभिदाभीमं मुहुर्गर्जति।
शत्रुस्त्रीनयनाम्बुवृष्टिरसकृज्जातानया सर्वतो[3]
वर्धन्ते[4] हरिदन्तरेषु जगदानन्दा यशःकन्दलाः॥ ४५॥

यत्रावयवनिरूपणादवयविनो निरूपणं गम्यते तदेकदेशविवर्त्ति रूपकम्।

यदारोप्यमाणानामपि यत्र शब्देनोपादानं तत् समस्तवस्तुविषयमित्यर्थः। उदाहरति। यात्रेति। अत्र यात्राप्रावृषीत्यादावयवरूपणम्। यशःकन्दला इत्यवयविनिरूपणम्। ननु यशांसि कन्दला इवेत्युपमितसमासः प्राप्नोति यशांस्येव कन्दला इति रूपकसमासोऽपि। उभयोः साधकबाधकाभावात् संदेहसंकर एवायं तेन रूपकमेवेति कथं निश्चीयते इति चेत् सत्यम्। जगदानन्दा इति सामान्यप्रयोगान्नोपमितसमासः[5] किं तु मयूरव्यंसकादित्वाद्रूपकसमास एव तेन रूपकमेवेदं नोपमा। एवमुत्तरत्रापि साधकबाधकयोरुद्भावनं द्रष्टव्यम्।

एकदेशविवर्त्ति रूपकं लक्षयति। यत्रेति। उपलक्षणमेतत्। तेन यथायोगमवयवावयविनोरेकदेशस्य शाब्दत्वार्थत्वाभ्यामेकदेशविवर्त्ति रूपकमिति लक्षणं यथोदाहरणं द्रष्टव्यम्। अत एव आह काव्यप्रकाशकारः।

'श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्त्ति तत्' इति। एकदेशे विशेषेण

---

१ माला चेति P. २ °धारावरैर्वैरि P.; °धाराधरो वैरि° M. ३ यथा सर्वतो M. ४ वर्तन्ते P. ५ °प्रयोगसंभवान्नो° P.

यथा।

प्रसाधिताशावलयान्तरालः
शौर्याकरः काकतिवीररुद्रः।
विकस्वरैर्वासनया त्रिलोकीं
गुणप्रसूनैः सुरभीकरोति ॥ ४६ ॥

अत्रावयवानां गुणानां प्रसूनत्वनिरूपणेन नृपतेः कल्पशाखित्वं निरूप्यते। तस्मादेकदेशविवर्तित्वम्।

यथा वा।

मथिताद्वैरिवाराशेर्भुजामन्दरभूभृता।
राज्ञः प्रतापरुद्रस्य कीर्तिर्लोकान् धिनोत्यमून् ॥ ४७ ॥

अत्र वैरिजनस्य वारां राशित्वनिरूपणेन भुजस्य मन्दराद्रित्वनिरूपणेन च जातायाः कीर्तेः सुधात्वमर्थादापतति लोकानाममरत्वं चेत्येकदेशविवर्ति रूपकम्।

यत्रावयवनिरूपणमात्रे कविसंरम्भविश्रान्तिस्तन्निरवयवं रूपकम्। अवयविनिरूपणमात्रेऽपि तदेव।

वर्तनादेकदेशविवर्तीत्यर्थः। उदाहरति। प्रसाधितेति। प्रसाधिताशावलयान्तरालो वशीकृतदिङ्मण्डलः। विकस्वरैर्विकासिभिः। 'स्थेशभास—' इत्यादिना वरच्प्रत्ययः। अवयवरूपणादवयविरूपणं गम्यत इत्याह। अत्रेति।

उदाहरणान्तरमाह। मथितादिति। पूर्वोदाहरणे अवयवरूपणादवयविरूपणस्य गम्यत्वमत्र त्ववयवस्यापीति भेदः। 'निरकासयद्रविमपेतवसु वियदालयादपरदिग्गणिका' इत्यत्र रविशब्देन विटप्रतीतेरवयवैकदेशमात्रगम्यत्वेऽप्येकदेशविवर्तिरूपकत्वं द्रष्टव्यम्।

निरवयवं लक्षयति। यत्रेति। पूर्वत्रावयवमात्रेऽन्यत्रावयवान्तरे च रूपणा-

---

१ प्रासादिता° P. २ प्रसूनत्वरूपणेन T'.; प्रसूनैर्निरूपणेन M. ३ °देकदेशवर्ति R.; °देकदेशवृत्ति M.; °देकदेशवर्तित्वम् M₁. ४ यथा च T'. ५ °भुजी मन्दरभूभृती M₁. ६ वाराशित्वरूपणेन T'.; वारिधरत्वरूपणेन M₁. ७ °रूपणेन T'. M₁. ८ सुधात्वरूपणम° M₁ ९ °विसम्भ° M.

तत्र केवलं यथा ।

यात्रारम्भविजृम्भमाणसुभटप्रक्ष्वेडिताम्रेडितै-[1]
र्निस्साणध्वनिभिः स्फुटं प्रविदलद्रोदःकटाहान्तरैः[2] ।
क्षुब्धेष्वब्धिषु कम्पितेषु गिरिषु श्रुत्वैव मुञ्चन्त्यसून्
भीताः काकतिवीररुद्रनृपतेः प्रत्यर्थिनः पार्थिवाः ॥ ४८ ॥

अत्र रोदसः कटाहत्वं[3] निरूप्यते ।

मालानिरवयवं यथा ।

राज्ञां मौलिविभूषणस्रगमला दिक्कुञ्जरश्रोत्रयोः
स्फारं चामरभूषणं धरणिभृच्छृङ्गेषु गङ्गासरित् ।
व्योम्नः क्षौमवितानमुज्ज्वलतरं[4] मुक्ताकलापो भुवः
स्फारः[5] काकतिवीररुद्रयशसां जागर्ति विस्फूर्जितम् ॥ ४९ ॥

रूपकहेतुरूपकं[6] परम्परितरूपकम् ।

रूपकद्वयमात्रव्यवस्थितत्वान्न[7] समस्तवस्तुविषयेऽन्तर्भावि ।

श्लिष्टकेवलपरम्परितं यथा ।

आवाभिरवयवमिति भावः । अत्रैकस्यारोपविषयस्यैकमेवारोप्यमाणं चेत् केवलम् । अनेकं चेद् माला चेति द्वेधा । तत्राद्यमुदाहरति । यात्रारम्भेति । प्रक्ष्वेडिताम्रेडितैः सिंहनादावृत्तिभिः । रोदो ब्रह्माण्डमेव कटाहः पात्रविशेषः क्षुब्धेषु क्षुभितेष्वित्यर्थः । व्याख्यातमेतद्रसप्रकरणे ।

द्वितीयमुदाहरति । राज्ञामिति । गङ्गा भागीरथी । विस्फूर्जितं विजृम्भणम् । अत्रैकस्य यशसो माल्याद्यारोप्यमाणानेकत्वान्मालानिरवयवम् ।

परम्परितं लक्षयति । रूपकेति । रूपकं हेतुर्यस्य तत् तथोक्तम् । अत एव परम्परास्य संजाता परम्परितमित्यन्वर्थम् । एकरूपकसापेक्षं रूपकं परम्परितमित्यर्थः । तेनानेकरूपकसापेक्षो समस्तवस्तुविषये नान्तर्भावोऽस्येत्याह । रूपक-

---

१ °प्रक्ष्वेलिता° R. २ प्रविदलद्रो° T′. ३ कटाहरूपत्वम्. ४ क्षौम° M. ५ स्फारम् M. ६ °हेतुकं रूपकं परम्परितमिति बोध्यम् M₁. ७ °व्यवस्थितत्वादस्य T′.

प्रतापवीररुद्रस्य मण्डलाग्रविधुन्तुदः ।
अखण्डवि[1]क्रमोद्दामो ग्रसते राजमण्डलम् ॥ ५० ॥

श्लिष्टमालापरम्परितं यथा ।

पद्मोल्लाससहस्रभानुरसकृत्सन्मार्गचर्या बुधः
क्ष्माभृत्पक्षभिदाशनिः कुवलयालंकारराकाशशी ।
नित्योद्यत्सुमनोविकाससुरभिः कल्याणसंपत्सुर-
क्षोणीभृद्भुवना[2]श्रयाम्बुधिरयं श्रीवीररुद्रो नृपः ॥ ५१ ॥

अश्लिष्टकेवलपरम्परितं यथा ।

का[3]कतीयस्य दुग्धाब्धेर्यशो लीलामहोर्मयः ।
दिक्कूलमु[4]द्रुजाटोपाः खे[5]लन्त्यभ्रंकषोच्छ्रयाः ॥ ५२ ॥

द्वयेति । प्रतापेति । मण्डलाग्रः खड्ग एव विधुन्तुदो राहुः । राजमण्डलं क्षत्रियसमूह एव राजमण्डलं चन्द्रबिम्बम् । अत्र मण्डलाग्रविधुन्तुद इति रूपणं राजमण्डलमेव राजमण्डलमिति श्लिष्टरूपके निमित्तमेकमेवेति श्लिष्टकेवलपरम्परितम् ।

पद्मेति । पद्माया लक्ष्म्या उल्लास एव पद्मानामुल्लासः । तत्र सहस्रभानुः सूर्यः । सन्मार्गः साधुमार्ग एव सन्मार्गो नक्षत्रमार्गः तत्र चर्यायां बुधः सौम्यः । क्ष्माभृत्पक्षो [6]राजबलमेव क्ष्माभृत्पक्षाः । प[7]र्वतपत्राणि तद्भिदायामशनिः कुलिशम् । कुवलयस्य भूमण्डलस्यैव कुवलयानामुत्पलानामलंकारो राकाशशी पूर्णिमाचन्द्रः । सुमनोविकासो विद्वदाह्लाद एव सुमनोविकासः पुष्पविकासः तस्य सुरभिर्वसन्तः । कल्याणसंपन्मङ्गलसंपत्तिरेव कल्याणसंपदक्षयस्वर्णसमृद्धिः । ‘ कल्याणमक्षयस्वर्णे कल्याणं मङ्गलेऽपि च ’ इति विश्वः । तस्याः सुरक्षोणीभृत् सुवर्णाचलः । भुवनं लोक एव भुवनमुदकं तदाश्रयस्याम्बुधिः । अत्र वीररुद्र एव सहस्रभानुरित्याद्यारोपपूर्वकस्य पद्मोल्लास एव पद्मोल्लास इत्यारोपस्य श्लेषनिबन्धनस्यानेकधा निबन्धनात् श्लिष्टमालापरम्परितम् ।

काकतीयस्येति । दिशां कूलमुद्रुजतीति दिक्कूलमुद्रुजः आटोपो यासां तास्तथोक्ताः दिगन्तविश्रान्तसंभ्रमा इत्यर्थः । अभ्रं कषतीत्यभ्रंकष उच्छ्रयो यासां

---

१ °विक्रमोद्दण्डो M. २ °नाश्रयोऽम्बुधि° R. ३ श्रीकाकतीयदुग्धाब्धे° P., R. ४ °मुद्धताटोपाः P. ५ खेलन्त्युच्चैस्तलोच्चयाः P., R. ६ राजमण्डल’ t. ७ पर्वतपक्षा t.

अश्लिष्टमालापरम्परितं यथा ।

दोराशीविषजिह्वया रिपुवनश्रेणीमहावात्यया
शौर्योग्रानलधूम्यया जयरमायोषाविलासभुवा ।
संहृष्यद्धरणीविलासशिखिनीसंवासयष्ट्या जगत्-
प्रासादार्गलया कृपाणलतया रुद्रो नृपः क्रीडति ॥ ५३ ॥

अश्लिष्टमालापरम्परितं वैधर्म्येणापि संभवति । यथा ।

त्रासान्धकारमध्याह्नाः कैतवातपरात्रयः ।
जयन्ति वीररुद्रस्य रणप्राङ्गणकेलयः ॥ ५४ ॥

एवमष्टविधस्यापि वाक्यसमासगतत्वेन षोडशरूपकभेदाः संभवन्ति ॥

तास्तथोक्ताः ।'उदि कूले रुजिवहोः' 'सर्वकूलाभ्र—' इत्यादिनोभयत्र खश्-प्रत्ययः । अत्र यशोलीलानां महोर्मित्वरूपणं काकतीयस्य दुग्धार्णवत्वरूपणाधीनमित्यश्लिष्टकेवलपरम्परितम् ।

दोराशीविषेति । वातानां समूहो वात्या । धूमानां समूहो धूम्या । उभयत्र 'पाशादिभ्यो यः' इति यप्रत्ययः । विलासशिखिनी क्रीडामयूरी । अर्गला-विष्कम्भः । अत्र कृपाणलतायां जिह्वाद्यनेकरूपस्य भुजादीनामाशीविषाद्यारोपप्रतीक्षत्वादश्लिष्टमालापरम्परितम् । सर्वत्र चात्र हेतुहेतुमद्भावोऽयमलंकारसर्वस्वकारमतेनोक्तः । काव्यप्रकाशकारस्तु विपरीतमवोचत् । यदत्र युक्तं तद् ग्राह्यम् ।

व्यतिरेकेणाप्येतत् संभवतीत्याह । अश्लिष्टेति । त्रास एव अन्धकारस्तस्य मध्याह्नाः । शक्तस्य तस्य त्रासासंभवादिति भावः । कैतवं कपटमेवातपस्तस्य रात्रयः । धर्मयोधित्वात् तस्येत्यर्थः । एतच्च मुखचन्द्र इत्यादौ समासगतं मुखमेव चन्द्र इत्यादौ वाक्यगतम् । अतः षोडशैते भेदाः । तत्रावशिष्टा भेदा अन्यतो द्रष्टव्या इत्याशयेनाह । एवमिति । आरोप्यमाणस्य धर्मित्वाल्लिङ्गसंख्ययोर्नैयत्येऽपि जटावल्कलालम्बिनः कपिलादावत्रय इत्यत्रैकस्य कपिलमुनेरनेकत्वमनेकविषयारोपात् । तदुक्तमलंकारसर्वस्वे । 'अत्र चारोप्यमाणस्य धर्मित्वादाविष्टलिङ्गसंख्यानेकत्वेऽपि क्वचित् स्वतोऽसंभवत् संख्यायोगस्य विषयसंख्यानं प्रत्येकमारोपात्' इति ।

---

१ °योषिद्विलास° R. २ भवति P. ३ °गतत्वे M. ४ षोडश भेदा भवन्ति P. ५ ° प्रतिनिमित्तत्वाद° ६. ६ तच युक्तं ग्राह्यम ६. ७ तस्येति भावः ६.

परिणामालंकारः।

आरोप्यमाण[1]मारोपविषयात्मतया स्थितम्।
[2]प्रकृतस्योपयोगित्वात् परिणाम उदाहृतः॥

आरोप्यमाणं प्रकृतोपयोगीत्यनेन सर्वालंकारव्या[3]वृत्तिः। तस्य सामानाधिकरण्यवैयधिकरण्याभ्यां द्वैविध्यम्।

सामानाधिकरण्येन परिणामो यथा।

शश्वत् [4]प्रसाधनविधानकृताभिलाषा
नम्रैर्भजन्ति मुकुटैरवनीपवर्गाः।

रूपकालंकारात् प्रकृतोपयोगित्ववैधर्म्येण परिणामं लक्षयति। आरोप्यमाणमिति। प्रकृतस्योपयोगित्व इति विषयसप्तमी। प्रकृतोपयोगार्थमित्यर्थः। आरोप्यमाणं चन्द्रादिकम्। आरोपवि[5]षयात्मतया मुखादि[6]तादात्म्येन। मुखचन्द्रेण तापः शाम्यतीत्यत्र प्रकृतोपयोगान्तमारोपस्य विवक्षितत्वात्। वस्तुतो मुखस्यैव तापशान्तिनिमित्तत्वेन तादात्म्याभावे चन्द्रस्य प्रकृतोप[7]योगाभावादिति भावः। अतः प्रकृतमनपह्नुतस्वरूपमेवारोप्यमाणात्मना परिणमतीति परिणामालंकार इत्यर्थः। एवं च यत्रारोपस्य ताद्रूप्यप्रतीतिमात्रपर्यवसायितया प्रकृतमपह्नुतस्वरूपमप्रकृतरूपापन्नं भवति तस्माद्रूपकात् परिणामस्य वैलक्षण्यं दर्शितम्। तदुक्तं चक्रवर्तिना।

'विषय्याकारमारोप्य विषयस्थगनं [8]यदा।
रूपकत्वं तदा तत्र रञ्जनेन समन्वयः॥
यदा तु विषयो रूपात् स्वस्मादप्रच्युतो भवेत्।
उपयुक्ते पराकारं परिणामस्तदा मतः॥' इति।

अस्य द्वैविध्यमाह। तस्येति। आद्यमुदाहरति। शश्वदिति। प्रसाधनविधानमलंकारविधिः। अत्रारोपेण प्रकृताज्ञातादात्म्यमापन्नाया अप्रकृतायाः

---

१ °मारोप्य° M. २ प्रकृतस्योपयोगी स्यात् M.; प्रकृतस्योपयोगित्वे Com. ३ °व्यवच्छेदः M. ४ प्रसाधनविधौ हि P. ५ °विषयात्मकतया p. ६ °तादात्म्येन स्थितम्। t. ७ °योगादिति भावः t. ८ यथा p.

श्रीवीररुद्रनृपतेः ककुभां विजेतु-
राज्ञामयीं स्रजममन्दविलासलक्ष्मीम् ॥ ५५ ॥

वैयधिकरण्येन परिणामो[1] यथा ।

किरीटमाणिक्यमयूखजालै-
र्विधाय पुष्पाञ्जलिमर्चयन्ते ।
फलार्थिनो रुद्रनरेन्द्रपाद-
पीठान्तसीमानमरिक्षितीशाः[2] ॥ ५६ ॥

समासोक्तावारोप्यमाणस्य प्रकृतोपयोगित्वेऽप्यवाच्यत्वान्न परिणामेऽन्तर्भावः ।

संदेहालंकारः ।

विषयो विषयी यत्र सादृश्यात् कविसंमतात् ।
संदेहगोचरौ स्यातां संदेहालंकृतिश्च सा ॥

सा त्रिविधा । शुद्धा निश्चयगर्भा निश्चयान्ता चेति ।

संदेहमात्रपर्यवसायिनी शुद्धा यथा ।

स्रजो मुकुटधारणात्मकप्रकृतोपयोगात् परिणामालंकारः । अत्र विषयविषयिणो समानविभक्तिकत्वात् सामानाधिकरण्यम् ।

किरीटेति । अत्र च पूर्ववत् परिणाम[3] उद्भावनीयः । किं तु मयूखजालपुष्पाञ्जलयो विषयविषयिणोर्भिन्नाविभक्तिकत्वात् वैयधिकरण्यमिति विशेषः[4] । ननु प्रकृतोपयोगाविशेषात् परिणामसमासोक्त्योः को भेद इत्याशङ्क्यारोप्यमाणस्योपादानानुपादानाभ्यां भेद इत्याह । समासोक्ताविति ।

आरोपगर्भेष्वनवधारणात्मकं संदेहालंकारं लक्षयति । विषय इति । कविसंमतादित्यनेन स्थाणुर्वा पुरुषो वेति संदेहस्यालंकारता व्यावर्त्यते । वर्ण्योत्कर्षार्थं कविप्रतिभोत्थापितः प्रकृताप्रकृतगोचरः संदेहः संदेहालंकार इत्यर्थः । तस्य त्रेधा

---

१ R. omits परिणामो, R. has this verse after यथा—प्रतिभटविजयाय प्रस्थितस्याग्रयायी प्रलयदहनरूक्षो वीररुद्रप्रतापः । समजनि भुजशौर्यं वर्मखण्डः सहायः समिति विहरतस्ते साक्षिणी वीरलक्ष्मीः ॥ अत्र प्रतापभुजशौर्यादयः अग्रयायिवर्मादिरूपेण परिणमन्तः शत्रुविजयहेतौ समरकाल उपयोगमुपगताः । २ °क्षितीन्द्राः P. ३ परिणामः t. ४ °विशेषत्वे t.

किमेष नवमो हरित्पतिरमन्दसंपत्पदं
किमेष दशमः प्रजापतिरपूर्वसर्गक्रमः।
किमेष हरिरुर्वरोद्धरणचञ्चुरेकादशा-
श्चिरादिति विलोक्यते जगति वीररुद्रो जनैः॥ ५७॥

निश्चयगर्भा यथा।

कालाहिः किमयं मृणालमृदुलं भोगं स धत्ते पुनः
कालभ्रूकुटिरेष किं नु मुख एवोजृम्भते सा पुनः।
कालोग्रानलधूमपद्धतिरसौ किं सा पुनर्धूयते
वातेनेति विकल्प्यते प्रतिभटै रुद्रस्य कौक्षेयकः॥ ५८॥

निश्चयपर्यवसाना यथा।

विभागमाह। सेति। आद्यमुदाहरति। किमिति। हरित्पतिर्लोकपालः। प्रजापतिर्ब्रह्मा। उर्वरोद्धरणचुञ्चुः क्षोणीरक्षणदक्षः। अत्र संपदादिसादृश्याद्वीररुद्रलोकपालादिकोटिद्वयगोचरस्य संदेहस्य तावन्मात्रपर्यवसायित्वाच्छुद्धोऽयं संदेहभेदः। ननु नवमादिपदविरहे केवललोकपालादीनामारोप्यमाणत्वसंभवादस्तु संदेहः। नवमादिपदप्रयोगे तु लोकपालादीनां वीररुद्रत्वेन संभावनादुत्प्रेक्षेयं न संदेह इति चेत् सत्यम्। अस्तु संभावनमारोपो वा। यत्र कोटिद्वयावलम्बित्वं तत्र संदेह एवेति स्वमतम्। एवंविधस्थले केचिदुत्प्रेक्षाश्रयः संदेह इत्याहुः। उत्प्रेक्षा एव इत्यन्य इत्यादि सर्वमलंकारसर्वस्वे स्पष्टम्।

द्वितीयमुदाहरति। कालाहिरिति। भोगं सर्पशरीरम्। कालभ्रुकुटिरन्तकभ्रूभङ्गः। कालोग्रानलः प्रलयकालाग्निः। तस्य पद्धतिर्धूमरेखा। धूयते कम्प्यते। अत्र कौक्षेयकं कृष्णसर्पादिरूपतया संदिह्य सुकुमारशरीरादिविशेषादर्शनेन सर्पादिनिषेधनिश्चयेऽपि कौक्षेयकनिश्चयाभावान्निश्चयगर्भोऽयं संदेहः।

---

१ °रमन्दसंपत्पदः M.; °रमन्दसत्त्वास्पदम् P. २ °चुञ्चु° T'.; com. ३ वा M. ४ सुकुमारादिशरी° P.

किं कल्पद्रुममञ्जरीस्रज इमे किं वा पयोराशयः[1]
स्वर्धेनोरथवा किमुज्ज्वलतराश्चिन्तामणिस्फूर्तयः ।
किं वा सिद्धरसोर्मयश्चिरमिति[2] व्यामृश्य निश्चिन्वते
सन्तः काकतिवीररुद्रनृपतेः स्मेराः कटाक्षा इति ॥ ५९ ॥

भ्रान्तिमदलंकारः ।

कविसंमतसादृश्याद्विषये पिहितात्मनि ।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः ॥

यथा ।

काकतीयविभोः कीर्तिविभवे व्याप्तरोदसि ।
दिवापि चन्द्रिकाबुद्ध्या चकोरा[3] यान्ति निर्वृतिम् ॥ ६० ॥

अपह्नवालंकारः ।

निषिध्य विषयं साम्यादन्यारोपे[4] ह्यपह्नुतिः ।

तृतीयमुदाहरति । किमिति । सिद्धरसोर्मयः सुधारसकल्लोलाः । व्यामृश्य कल्पद्रुममञ्जरीमाल्यादिरूपेण संदिह्य । स्मेराः स्मितप्रधानाः सानुग्रहा इत्यर्थः । कटाक्षा इति निश्चिन्वते । अत एव निश्चयान्तोऽयं संदेहः । वीररुद्रकरुणावलोकनविषयाः सर्वे समृद्धा जीवन्तीति भावः ।

अयथार्थज्ञानत्वसाधर्म्यात् संदेहानन्तरं भ्रान्तिमन्तं लक्षयति । कवीति । पिहितात्मनि आच्छादितस्वरूपे । भ्रान्तिश्चित्तधर्मोऽस्यास्तीति भ्रान्तिमान् । कविप्रतिभोत्थापितः प्राकरणिकं प्रत्यप्राकरणिकत्वेनोपलम्भो भ्रान्तिमानित्यर्थः । एतेन सादृश्यमात्रनिबन्धनायाः शुक्तिरजतादिभ्रान्तेर्नालंकारत्वमिति दर्शितम् । दोषमूलायास्तु किमुतेति भावः । उदाहरति । काकतीयेति । व्याप्तरोदसि व्याप्तब्रह्माण्डे । अत्र कीर्त्यां चन्द्रिकानुभवात् भ्रान्तिः ।

सादृश्याद्वस्त्वन्तरप्रतीतिसाम्याद् भ्रान्तिमदनन्तरमपह्नुतिं लक्षयति । निषि-

---

१ पयोराशयः M. २ °सरोर्मय° P., R. ३ चकोरायन्ति वृत्तये M. ४ या स्यादन्यारोपे T'.

तस्यास्त्रैविध्यम्। अपहुत्यारोपः आरोप्यापह्नवः छलादिशब्दै-रसत्यत्वप्रतिपादनं च।

आद्यद्वयस्योदाहरणं यथा।

उद्वेल्लच्चतुरर्णवीकलकलो नायं चमूडम्बरो
नेदं दुन्दुभिगर्जितं त्रिपुरजित्कल्पान्तढक्कारवः।
इत्थं रुद्रनरेन्द्रधाटिषु महीभारावनम्रीभव-
च्छेपारोपशिरस्सु विस्मितमथ भ्रष्टं दिगीशैरपि ॥ ६१ ॥

छलादिपदैरसत्यत्वप्रतिपादनं यथा।

सत्यं काकतिवीररुद्रधरणीनाथच्छलेन क्षितिं
पातुं मध्यमलोकपालपदवीं प्राप्तः स्वयंभूः शिवः।
नैवं चेद्विषमावलोकनकलामात्रेण भस्मीकृतै-
र्जातं वैरिपुरैः कथं कथमवाग्भूतं च भूभृद्गणैः ॥ ६२ ॥

द्येति। अन्यारोपे आरोप्यमाणप्रतीतावित्यर्थः। तस्यास्त्रैविध्यं विविनक्ति। अपहुत्यारोप इत्यादि। उद्वेल्लदित्यारोप्यापह्नवः। नेदं दुन्दुभिगर्जितमित्यपहुत्यारोपः। नरेन्द्रधाटिष्विति। ढृदिकारः। तल्लक्षणं तु 'शत्रुदेशावमर्दाय सद्यः सुभटघोटकैः। विजिगीषोः प्रवृत्तिर्या सा धाटीति निगद्यते ॥' इत्याहुः।

सत्यमिति। धरणीनाथच्छलेनेत्यत्र छलशब्देन नायं धरणीनाथः किं तु स्वयंभूः शिव इति राज्ञः सत्यत्वं प्रतिपाद्यते। तदेव समर्थयते। नैवमिति। विषमावलोकनं निग्रहदृष्टिः। अन्यत्र तृतीयनयनदृष्टिः। वैरिपुरैरसंख्यैः त्रिभिश्च कर्तृभिर्भस्मीभूतैः कथं जातं जज्ञे। भूभृद्गणैः राजसमूहैः। अन्यत्र भूभृता कैलासेन गणैः प्रमथैश्च कथमवाग्भूतं न्यग्भूतमित्युभयत्र भावे क्तः। ईश्वरस्य गिरीशत्वात् प्रमथाधिपत्वाच्चेति भावः।

---

१ °पदै° P., B. २ यथा is dropped by R., T′. ३ °डक्का° M. ४ भस्तम् M. ५ °रुद्रदेवधरणी° T′. ६ °मवाग्जातम् R. ७ इत्यादिना t. ८ इत्याह t. ९ भूभृता कैलासादीना गणैः t.

उल्लेखालंकारः ।

अर्थयोगरुचिश्लेषैरुल्लेखनमनेकधा ।
ग्रहीतृभेदादेकस्य स उल्लेखः सतां मतः ॥[1]

रुच्यर्थयोगाभ्यां[2] यथा ।

लक्ष्मीनिवासगृहमित्यखिला नरेन्द्रा
शौर्यातिभूमिखनिरित्यरिवीरवर्गाः ।
विद्याविलासपदवीति च लब्धवर्णाः
श्रीकाकतीन्द्रनगरीमानिशं स्तुवन्ति ॥ ६३ ॥

श्लेषेण[3] यथा ।

उग्रः सपत्नेषु गुणेषु भास्वान्
रामः प्रतीकेषु रणेषु भीमः ।
लीलासु लक्ष्म्याः पुरुषोत्तमश्चे-
त्याचक्षते रुद्रनृपं कवीन्द्राः ॥ ६४ ॥

आरोपगर्भेषु परिशेषादुल्लेखं लक्षयति । अर्थेति । अर्थेन प्रयोजनेन योगो-ऽर्थित्वं लिप्सेति यावत् । रुचिरभिरतिः । श्लेषः प्रसिद्धः । एतैः समस्तैर्व्यस्तैर्वा यथायोगं ग्रहीतृगतैरेकस्य वस्तुनो नानाधर्मयोगादनेकधोल्लेखनं निर्धारणमुल्लेखालंकार इत्यर्थः । सर्वालंकारव्यावर्तकेन ग्रहीतृभेदादित्यनेन विषयभेदोऽप्युपलक्ष्यते । लक्ष्मीति । शौर्यातिभूमेः पराक्रमातिशयस्य । खनिराकरः । लब्धवर्णा विद्वांसः । अत्रैकस्याः काकतीन्द्रनगर्याः समृद्ध्यादिधर्मयोगान्नरेन्द्रादिग्रहीतृभेदेन रुच्यर्थयोगाभ्यां लक्ष्मीनिवासगृहादिरूपतयानेकधोल्लेखनादुल्लेखः ।

उग्र इति । सपत्नेषु शत्रुषु उग्रः कपर्दी क्रूरश्च । गुणेषु भास्वान् सूर्यस्तेजस्वी[4] च । प्रतीकेष्वङ्गेषु रामो दाशरथिरभिरामश्च । लक्ष्म्या लीलासु पुरुषोत्तमो विष्णुः पुरुषश्रेष्ठश्च । अत्र ग्रहीतृभेदाभावेऽपि सपत्नादिविषयभेदाच्छ्लेषेणोग्रत्वाद्यनेकधर्मोल्लेखनादुल्लेखः ।

---

१ उल्लेखश्च सतां मतः P. २ अर्थयोगाभ्याम् R. ३ श्लेषे R. ४ P. omits सूर्यः

अथाध्यवसायगर्भमलंकारद्वयं[1] निरूप्यते।

विषयविषयिणोरन्यतरनिगरणेनाभेदप्रतिपत्तिरध्यवसायः। स द्विविधः। विषयिनिगरणेन[2] विषयनिगरणेन[3] च।

उत्प्रेक्षा।

यत्रान्यधर्मसंबन्धादन्यत्वेनोपतर्कितम्[4]।
प्रकृतं हि भवेत् प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते॥

यत्राप्रकृतगुणक्रियासंबन्धादप्रकृतत्वेन प्रकृतस्य संभावनं सोत्प्रेक्षा। सा द्विविधा। वाच्या प्रतीयमाना च। संभावनाप्रतिपादकानां नूनं-

---

अभेदप्रतिपत्तेरविशेषेऽप्यारोपादध्यवसायस्योत्कृष्टत्वादारोपमूलानन्तरमध्यवसायमूलालंकारप्रस्ताव इत्याशयेनाह। अथेति। मूलभूतमध्यवसायं निरूपयति। विषयेति। एकतरपरिशेषो मा भूदित्यन्यथा व्याचष्टे। स द्विविध इति। निगरणमसत्यत्वमित्यर्थः। अन्यथा विषयनिगरणेनाभेदप्रतिपत्तिरध्यवसाय इति सर्वसंप्रतिपन्नेन स्वयमपि पूर्वोक्तेनाध्यवसायलक्षणेन विरोधात्। यदा विषयिणोऽसत्यत्वं तदाध्यवसायः साध्यः। यदा विषयस्यासत्यत्वं तदाध्यवसायः सिद्ध इति विवेकः। तथा हि यदा चन्द्रादिविषयिगतं माधुर्यादिकं विषयभूते मुखादावुपनिबद्धं मुखं मुखत्वेन जानन्नेव नूनमिदं चन्द्र इति प्रयुङ्क्ते तदा विषयी चन्द्रो मुखत्वेनासत्यो निगीर्णः प्रतिभाति विषयस्तु परमार्थतः सत्य एव। एवं सत्यासत्ययोरभेदप्रतिपत्तेरभावान्नूनमादिशब्दैर्विषयिणोऽपि सत्यत्वसमर्थनादध्यवसायः साध्य इत्यत्राध्यवसायप्राधान्यम्। यदा तु मुखपदमनुक्त्वा चन्द्रोऽयमिति प्रयुङ्क्ते तदा वस्तुतोऽसत्यस्यापि विषयिणः सत्यता प्रतीयते। असत्यत्वनिमित्तस्य मुखपदप्रयोगस्याभावात्। विषयस्य वस्तुतः सत्यस्यापि अत्यन्तापलापादसत्याभिमतस्य निगीर्णत्वादध्यवसायः सिद्ध इत्यत्राध्यवसितप्राधान्यमित्यादि सर्वमलंकारसर्वस्वे तद्व्याख्यायां च संजीविन्यां प्रपञ्चितम्। तत् सर्वमनेनैव गतार्थमिति नेह विस्तरः क्रियते। तत्र साध्यावध्यवसायमूलामुत्प्रेक्षां लक्षयति। यत्रेति। अन्यदप्रकृतं तस्य धर्मो गुणक्रियादिरूपः। तत्संबन्धात् प्रकृतमन्यत्वेनाप्रकृतत्वेनोपतर्कितं संभावितं यत्र भवेत् तामुत्प्रेक्षां प्रचक्षत इत्यर्थः। तदेतद् व्याचष्टे। यत्रेति। तस्या विभागमाह। सेति। वाच्यां लक्षयति। संभावनेति।

---

१ °द्वयमुच्यते M., R. २ विषय° R. ३ विषयि° R. ४ °नोपदर्शितम् P. ५ प्राञ्चस्ताम् M. ६ P. drops यत्र. ७ संभावना M. ८ तत्रोत्प्रेक्षा M.; संभावनमुत्प्रेक्षा P. ९ संभावन° P. १० °त्संभवात् t. ११ t. omits आदि.

[1]ध्रुवंप्रायइत्येवमादीनां प्रयोगे वाच्या । अप्रयोगे तु[2] प्रतीयमाना । जातिक्रियागुणद्रव्याणां च[3]तुर्णामध्यवसायवि[4]षयत्वे सा द्विविधा प्रत्येकं च[5]तुर्विधा । तेषां भावाभावरूपतया द्वैविध्येऽष्टविधा । अध्यवसायस्य गुणनिमित्तत्वेन [6]क्रियानिमित्तत्वेन च द्वैविध्ये प्रत्येकं षोडशप्र[7]कारा । निमित्तस्य वाच्यत्वगम्यत्वाभ्यां द्वैविध्यं वाच्योत्प्रेक्षायामेव । प्रतीयमानोत्प्रेक्षायामिवाद्यनुपादाने निमित्तस्य चाप्रयोगे उत्प्रेक्षाया निर[8]वलम्बनत्वात् । तथा जात्यादीनां स्वरूपेण फलरूपेण चा[9]ध्यवसायविषयत्वे बहुविधत्वम् । वाच्योत्प्रेक्षायामपि हेतुफलयोरुत्प्रेक्षावि[10]षयत्वे निमित्तस्योपादानमेव । तथा हि । सा[11]ध्येऽनुपात्ते साधनत्वेन निर्देशो नान्वयं पुष्णाति । तथा साधनेऽनुपात्ते साध्यत्वेन निर्देशोऽपि । तयोरन्योन्या[12]पेक्षत्वात् । हेतूत्प्रेक्षायां फलं निमित्तम् । तस्यानुपादाने कं प्रति हेतुत्वं संगच्छते । फलोत्प्रेक्षायां साधनं निमित्तम् । तस्यानुपादाने कं प्रति फ[13]लत्वेन संघटेत ।

य[14]था ।

[illegible]शब्देन मन्ये शङ्के ध्रुवमित्यादीनां ग्रहणम् । जातिक्रियागुणद्रव्याणां गौश्चलति शुक्लो डित्थ इत्येवमादीनामध्यवसायविषयत्वेनोत्प्रेक्षाविषयत्वेन द्विविधा वाच्या प्रतीयमाना च प्रत्येकं चतुर्विधेत्यष्टविधा जातेत्यर्थः । तेषां जात्यादीनाम् । अष्टविधेति । प्रत्येकमिति शेषः । निमित्तद्वैविध्येनास्या द्वात्रिंशद् भेदा भवन्तीत्याह । अध्यवसायस्येति । वाच्योत्प्रेक्षायां विशेषमाह । निमित्तस्येति । अन्यत्रैतदभावे हेतुमाह । प्रतीयमानेति ।

---

१ ध्रुवम् is dropped by R. and M. २ R. drops तु. ३ P. drops चतुर्णाम्. ४ °विषयत्वेन P. ५ चतुर्धा R. ६ हेतुक्रिया° R. ७ °प्रकाराः R. ८ निरवलम्बनत्वापातात् M. ९ चाध्यवसाय° R. १० °विषयत्वेन R. ११ यथा साध्ये T'. १२ °न्यापेक्षितत्वात् M. १३ फलत्वं संघटते P.; फलत्वेन संघटते M.; फलत्वेन संघटनम् R. १४ तथा हि R. १५ संग्रहः t.

प्रतापरुद्रनृपतेरपारे कीर्त्तिसागरे ।
मग्ना दुरीतदुष्कीर्त्तिसङ्गादिव जगत्त्रयी ॥ ६५ ॥

अत्रोत्प्रेक्षानिमित्तस्य मज्जनस्यानुपादाने सङ्गादिति हेतूत्प्रेक्षा न शोभामावहति ।

यथा वा ।

जयश्रीवासपद्मस्य विकासायेव भानुमान् ।
प्रतिबिम्बमिषात् खड्गं प्रविशत्यन्ध्रभूभृजः ॥ ६६ ॥

' महिलासहस्सभरिए तुह हिअए सुहअ सा अमाअन्ती ।
दिअहं अणण्णसरणा अंगं तणुअं वितणुए हि ॥'

छाया

महिलासहस्रभरिते तव हृदये सुभग सा अमान्ती ।
दिवसमनन्यशरणा अङ्गं तनुकं वितनुते हि ॥

इत्यत्र महिलासहस्रभरिते तव हृदये अमान्तीत्युत्प्रेक्षा प्रतीयमाना इवादिप्रयोगाभावात् । तस्याङ्गतनूकरणं निमित्तं यदि नोपादीयेत तदा तस्या निष्प्रमाणकत्वं स्यादित्यर्थः । प्रकारान्तरेण त्रैविध्यमाह । तथा जात्यादीनामिति । यदा जातिस्वरूपमुत्प्रेक्ष्यते तदा तस्य भावाभावरूपतया द्विविधस्योपात्तगुणक्रियानिमित्तभेदाच्चातुर्विध्यम् । निमित्तानुपादाने तु तत्कृतभेदाभावात् द्वैविध्यमेव । इत्थं षोडा जातिस्वरूपोत्प्रेक्षा । एवं क्रियागुणद्रव्याणां भेदकल्पने मिलित्वा चतुर्विंशतिस्वरूपोत्प्रेक्षाभेदाः । हेतुफलोत्प्रेक्षयोर्निमित्तोपादाननियमात् प्रत्येकं चातुर्विध्यमेवेति द्वात्रिंशत् । प्रतीयमानोत्प्रेक्षायां सर्वत्र निमित्तोपादाननियमात् निमित्तानुपादाननिबन्धनभेदाष्टकन्यूनत्वेऽष्टाचत्वारिंशद्भेदाः । एवं षण्णवतिभेदा इत्याशयेनोक्तम् । बहुविधमिति । वाच्योत्प्रेक्षायामपि हेतुफलोत्प्रेक्षयोर्निमित्तोपादाननियममुदाहरणमुखेन हृदयङ्गमीकर्तुमारभते । तथाहीत्यादिना । हेतूत्प्रेक्षायां फलं निमित्तम् । फलोत्प्रेक्षायां हेतुर्निमित्तम् । एवं च निमित्तनैमित्तिकयोरन्यतरोपादानेऽन्वयबोधाभावादुभयोपादाननियमे निमित्तोपादानं नियतमेवेति भावः । प्रतापेति । अस्पृश्यस्पर्शने स्नानस्य विहितत्वादिति भावः ।

जयश्रीत्यादि । स्पष्टम् ।

---

१ °भोगादिव जगत्त्रयी R. २ यथा T'.; omitted in R. and M. ३ हृदयं समीकर्तुं t. ४ वाच्येत्यादिना.

[1]अत्रोत्प्रेक्षा[2]निमित्तस्य [3]भानुमत्प्रवेशस्यानुपादाने जयश्रीकमलविकासार्थेवेति फलोत्प्रेक्षणमसमीचीनम् । अतः स्वरूपोत्प्रेक्षायामेव निमित्तस्योपादानानुपादानाभ्यां द्वैविध्यम् । अतश्चेत्थं वाच्योत्प्रेक्षाया भेदगणना । उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा । १ । उपात्तगुणनिमित्तजात्यभावस्वरूपोत्प्रेक्षा । २ । उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा । ३ । उपात्तक्रियानिमित्तजात्यभावस्वरूपोत्प्रेक्षा । ४ । अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा । ५ । अनुपात्त[4]निमित्तजात्यभावस्वरूपोत्प्रेक्षा । ६ । उपात्तगुण[4]निमित्तजातिभावहेतूत्प्रेक्षा । ७ । उपात्तगुणनिमित्तजात्यभावहेतूत्प्रेक्षा । ८ । उपात्तक्रियानिमित्तजातिभावहेतूत्प्रेक्षा । ९ । उपात्तक्रियानिमित्तजात्यभावहेतूत्प्रेक्षा । १० । उपात्तगुणनिमित्तजातिभावफलोत्प्रेक्षा । ११ । उपात्तगुणनिमित्तजात्यभावफलोत्प्रेक्षा । १२ । उपात्तक्रियानिमित्तजातिभावफलोत्प्रेक्षा । १३ । उपात्तक्रियानिमित्तजात्यभावफलोत्प्रेक्षा । १४ । एवं चतुर्दश भेदा जात्युत्प्रेक्षा । अनेनैव क्रमेण गुणक्रियाद्रव्योत्प्रेक्षापि परिगणनीया । एवं च वाच्योत्प्रेक्षायाः षट्पञ्चाशद् भेदाः । प्रतीयमानोत्प्रेक्षायास्त्वष्टचत्वारिंशद् भेदाः । तत्र स्वरूपोत्प्रेक्षायामपि निमित्तोपादाननियमात् निमित्तस्य गम्यत्वे गुणरूपत्वेन क्रियारूपत्वेन च चारुत्वविशेषाभावादेक एव भेदो [5]गण्यते । गुणक्रिययोरुत्प्रेक्षाविषयत्वमुत्प्रेक्षानिमित्तत्वं चाभ्युपगतम् । प्राचामलंकारप्रबन्धेषु षण्णवतिभेदोत्प्रेक्षेति गणनामात्रम् । चारुत्वातिशयस्तु [6]षट्पञ्चाशत एव भेदानाम् । तत्र यथासंभवमुदाहरणानि ।

बुद्धिसौकर्यार्थं भेदगणनामाह । अतश्चेत्यादिना । निगदव्याख्यानमेतत् । प्रतीयमानोत्प्रेक्षाया भेदाष्टकन्यूनत्वे निमित्तमाह । अत्रेति । यथा निमित्तस्योपादाने निमित्तभेदाद्भेदस्तथानुपादाने नास्तीत्याह । निमित्तस्येति । गम्यत्वेनानुपादानादिति भावः । अत एव तत्र गुणक्रियारूपनिमित्तभेदनिबन्धनस्य विच्छित्तिविशेषस्यानुत्पन्नपुत्रनामकरणकल्पत्वात् एक एव भेदो [9]गम्यत इत्याह ।

१ इत्यत्रोत्प्रे° R. २ °निमित्तभूतस्य R. ३ भानुमतः प्रवेशस्य M.; भानुमतः सम्प्रवेशस्य R. ४ P. has निमित्तक for निमित्त. ५ गम्यते T′. ६ षट्पञ्चाशदभेदानाम् P. ७ निमित्तयोर्द्वयोरुपादाने t. ८ °क्रियानुपादाने निमित्त° t. ९ गम्यत t.

उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा ।

कीर्तिः काकतिवीररुद्रनृपतेः सिंहासनाध्यासिनः
प्राच्यां भूमिभृतां यशः पिदधती राकेन्दुतुल्यद्युतिः ।
रक्षादक्षिणराजलाभजनितामन्दप्रमोदोत्थिता
त्रैलोक्याट्टहसप्रभेव ककुभां प्रान्तेषु विद्योतते ॥ ६७ ॥

अत्र प्रभाशब्दो जातिवचनः । त्रैलोक्याट्टहसप्रभायाः कविप्रौढोक्तिसिद्धत्वान्नोपमाशङ्का ।

उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा ।

वीरस्य रुद्रनृपतेः प्रियवल्लभस्य
राज्याभिषेकसलिलैः सरसीकृतायाः ।
सद्यः समुच्छलितसान्द्रपरागरेखा-
क्षोण्याः प्रमोदपुलकाङ्कुरमञ्जरीव ॥ ६८ ॥

अत्र पुलकाङ्कुरमञ्जरीवेत्युत्प्रेक्षायां सरसीकरणं क्रियारूपं निमित्तम् ।

गुणरूपत्वेनेत्यादि । गुणक्रिययोरिति । न तु जातिद्रव्ययोरिव केवलोत्प्रेक्षाविषयत्वमिति भावः । यथायोगमुदाहरति । कीर्तिरित्यादि । पिदधती आच्छादयन्ती । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यकारलोपः । अट्टहसोऽट्टहासः । 'स्वनहसोर्वा' इति पाक्षिकोऽप्प्रत्ययः । एषा प्रमोदगुणनिमित्ता जातिभावस्वरूपोत्प्रेक्षा । अत्राट्टहासप्रभायाः स्वतःसिद्धत्वेऽपि त्रिलोकसंबन्धित्वेन कविकल्पितत्वात् नोपमावकाश इत्याह । त्रैलोक्येति । अत एवात्रेवशब्दोऽपि संभावनावाचको नोपमावाचकः । तदुक्तं चक्रवर्तिना ।

'यदायमुपमानांशो लोकतः सिद्धिमृच्छति ।
तदोपमैव येनेवशब्दः साधर्म्यसूचकः ॥
यदा पुनरयं लोकादसिद्धः कविकल्पितः ।
तदोत्प्रेक्षैव येनेवशब्दः संभावनापरः ॥' इति ।

वीरस्येति । प्रिया वल्लभा प्रेयसी यस्य प्रियवल्लभस्य । पुलकमञ्जरीवेत्युत्प्रेक्षायामिति । जातिभावस्वरूपोत्प्रेक्षायामित्यर्थः । क्रियारूपमिति । निमित्तमिति शेषः ।

---

१ °भुजाम् R. २ यशोऽपिदधती P. ३ कोटीन्दु° P., M., R. ४ °पमावकाशः M., T′. ५ प्रियमादधानैः T′. ६ °मुपमानार्थो t. ७ °मिच्छति t.

अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा ।

प्रतापरुद्रस्य नखेन्दुकान्तिः
  प्रणामभाजां पदयोर्नृपाणाम् ।
ललाटलग्ना विधिनिर्मिताया
  वर्णावलेर्वाचनदीपिकेव ॥ ६९ ॥

अत्र दीपिकेवेति जातिवचनाज्जातिरुत्प्रेक्ष्यते ।

उपात्तगुणनिमित्तजात्यभावस्वरूपोत्प्रेक्षा यथा ।

प्रतापरुद्रस्य गुणामृतोर्मि-
  धौता विराजन्त्यमलीकृताङ्गाः ।
प्रक्षालितात्युद्धतभूमिपाला
  खड्गाम्बुभिः स्वच्छतरा भवन्ति ॥ ७० ॥

अनुपात्तनिमित्तजात्यभावस्वरूपोत्प्रेक्षा यथा ।

दिशां जेतुर्विश्वप्रथितमहसो रुद्रनृपते-
  र्जयप्रस्थानोद्यत्करितुरगसंमर्दजनितम् ।
रजः कृत्वा ग्रस्तप्रतिबलमसूर्यामिव दिवं
  प्रताषाख्यानन्यान् दिशि दिशि विधत्ते दिनकरान् ॥ ७१ ॥

अत्रासूर्यामिति जात्यभावः ।

जातिहेतूत्प्रेक्षा यथा ।

प्रतापरुद्रस्येति । अत्र वाचनदीपिकेवेति जातिभावस्वरूपोत्प्रेक्षायां निमित्तं नोपात्तम् ।

दिशामिति । रजः कर्तृ । दिवमसूर्यामिव कृत्वेत्यत्र जात्यभावस्वरूपोत्प्रेक्षा अनुपात्तनिमित्ता ।

---

१ जातिवचनात् is omitted in P. २ जातिरुत्प्रेक्षा M. ३ संयाति वीरवर्याः M. ४ After this M. has अत्र भूमिपाला इति जात्यभावः । ५ जात्यभावोत्प्रेक्षा M. ६ °प्रसृत° T'. ७ रजश्छिन्नं कृत्वा प्राति° R. ८ M. has उपात्तक्रियानिमित्तजातिहेतूत्प्रेक्षा and similar whole expressions further on.

उदारकीर्त्यां भुजया प्रताप-
रुद्रस्य विश्वैकधुरन्धरस्य ।
विश्वंभरा कोमलशय्ययेव
विस्मारिता गोत्रमहीध्रवासम् ॥ ७२ ॥

अत्र शय्ययेवेति जातिहेतुत्वम् ।

जात्यभावहेतूत्प्रेक्षा यथा ।

भूमेरकल्पवृक्षत्वादिति धाता विचिन्तयन् ।
सृष्टवान् काकतीशानां निर्व्याजत्यागवैभवम् ॥ ७३ ॥

अत्राकल्पवृक्षत्वादिति जात्यभावस्य हेतुत्वम् ।

जातिफलोत्प्रेक्षा यथा ।

नूनं विश्वंभराभारस्तम्भीभवितुमायतौ ।
वीररुद्रनरेन्द्रस्य भुजावाजानुलम्बिनौ ॥ ७४ ॥

अत्र स्तम्भीभवितुमिति जातेः फलत्वम् ।

जात्यभावफलोत्प्रेक्षा यथा ।

उदारेति । उदाररीत्या उदारस्वभावया । गोत्रमहीध्रवासं कुलपर्वतनिवासम् । विस्मारितेति । 'गतिबुद्धि—' इत्यादिना अण्यन्तकर्त्र्या विश्वंभरायाः णौ कर्मत्वं तस्मिन्नभिधेये कर्मणि क्तः । 'ण्यन्ते कर्तुश्च कर्मणः' इति वचनात् । अत्र शय्ययेवेति जातिभावहेतूत्प्रेक्षायाः पर्वतनिवासविस्मरणं निमित्तम् ।

भूमेरिति । निर्व्याजं निरुपाधिकं त्यागवैभवमौदार्यातिशयो यस्य तथोक्तम् । काकतीशानं सृष्टवानिति फलं प्रत्यकल्पवृक्षत्वादिवेति जात्यभावहेतूत्प्रेक्षा ।

नूनमिति । भुजयोराजानुलम्बित्वं पुरुषस्य भाग्यलक्षणम् । तदुपाटके तृतीयेऽङ्के । अत्राधारस्तम्भीभवितुमिति जातिभावफलोत्प्रेक्षायामाजानुलम्बित्वं गुणो निमित्तम् ।

---

१ °रीत्या R. M., Com. २ °महीप्रवासम् R. ३ °वंशं तत्त्यागवैभवम् M. ४ °मायतौ P. ५ जातिफलाभावोत्प्रेक्षा R. ६ फलं निमित्तम् t.

पशूनवध्यानालोक्य शत्रवः काकतीशितुः ।
प्रायेणामानुषत्वाय तृणवृत्तिं समाश्रिताः ॥ ७५ ॥

[1]अत्रामानुषत्वायेति जात्यभावस्य फलत्वम् ।

क्रियास्वरूपोत्प्रेक्षा यथा ।

श्रीकाकतीयनृपते[2]र्द्विषदङ्गनानां
श्वासोर्मिभिः सपदि मर्मरितान्तरालाः ।
तासां नि[3]वासविषये कृतयाचनानां
प्रत्युत्तराणि दधतीव मरोर्वनान्ताः ॥ ७६ ॥

[5]क्रियाभावस्वरूपोत्प्रेक्षा यथा ।

विमुखे सति काकतिक्षितीन्द्रे
वनलीमापि कठोरकण्टकाग्रा ।
चि[4]कुरेषु विकर्षति प्रतीशा-
नददानेव निजान्तरप्रवेशम् ॥ ७७ ॥

आददानेति क्रियाभावः ।

क्रियाहेतूत्प्रेक्षा यथा ।

पशूनिति । अत्रामानुषत्वायेति जात्यभावफलोत्प्रेक्षायां तृणवृत्तिसमाश्रयण-क्रियानिमित्तम् । एवमुत्तरत्रापि तादर्थ्यप्रतिपादकचतुर्थ्यादिश्रवणे फलत्वम् । तृतीयाविभक्त्या सामर्थ्येन वा हेतुत्वं चेत्यादिकमूहनीयम् ।

काकतीयेति । मर्मरः पर्णध्वनिः । ‘ अथ मर्मरः । स्वनिते वस्त्रपर्णानाम् ’ इत्यः । तद्वन्ति कृतान्यन्तरालानि येषां ते तथोक्ता इति गुणनिमित्तकत्वं वानोक्षत्वात् ।

विमुख इति । प्रतीशान् प्रत्यर्थिभूपान् । चिकुरेषु केशेषु । निमित्तात् कर्म-संयोगे सप्तमी । विकर्षतीति क्रियादानाभावोत्प्रेक्षायां निमित्तम् । एवं निमि-त्तानुगमेऽप्युदाहार्यम् ।

---

१ drops this sentence, so does M. २ °नृपतिद्विष° P. ३ निवासविषये M. ४ चिकुरे प्रविकर्षति प्रतीशा° M.; चिकुरेषु विकर्षते प्रतीपा° P. ५ क्रियाया अभावः, M.; क्रियास्वरूपाभावः T'.

राज्ञां गर्वाङ्कुरोच्छेदाः परिम्लाना दिने दिने ।
काकतीन्द्रप्रतापार्कतीव्रोष्माभिभवादिव ॥ ७८ ॥

अत्राभिभवादिति क्रियाहेतुत्वम् ।

क्रियाभावहेतूत्प्रेक्षा यथा ।

कपोलफलकावस्याः कथं भूत्वा तथाविधौ ।
अपश्यन्ताविवान्योन्यमीदृशीं क्षामतां गतौ ॥ ७९ ॥

क्रियाफलोत्प्रेक्षा यथा ।

दम्भोलिसंरम्भमहाजिगोपः
प्रस्थानभेरीनिनदोऽन्ध्रभर्तुः ।
लीनानिवान्वेष्टुमरातिवर्गान्
विगाहते शैलगुहान्तराणि ॥ ८० ॥

क्रियाभावफलोत्प्रेक्षा यथा ।

सीमाद्रिकुञ्जेषु विहारभाजः
सिद्धाङ्गनाकल्पितचन्द्रिकार्घान् ।

राज्ञामिति । परिम्लानत्वमुत्प्रेक्षाफलम् । क्रियाहेत्वभावोत्प्रेक्षायाः प्रतिज्ञामात्रमेव नोदाहरणमत्र दृश्यत इत्यन्यतो लिख्यते ।

कपालफलकावस्याः कथं भूत्वा तथाविधौ ।
अपश्यन्ताविवान्योन्यमीदृशीं क्षामतां गतौ ॥

इति । अत्र दर्शनक्रियाहेत्वभावोत्प्रेक्षा क्षामतागमननिमित्ता ।

दम्भोलीति । महाजिर्महायुद्धमन्याभिभव इति यावत् । दम्भोलिसंरम्भमेव महाजिं गोपयत्याच्छादयतीति तथोक्तः तिरस्कृताशनिध्वनिरित्यर्थः । अन्वेष्टुमिवेति । अन्वेषणक्रियाफलोत्प्रेक्षा गुहान्तरगहनक्रियानिमित्ता ।

सीमाद्रीति । सीमाद्रिर्लोकालोकः । कल्पितश्चन्द्रिकाया इवार्घः पूजावि-

---

१ क्रियाहेतुत्वाभावो° R.; क्रियाहेत्वभावो° T'. Com. notices the omission of this kind of उत्प्रेक्षा. २ °मीदृशाम् P. ३ °घोष: P., R. ४ हेमाद्रि° P., M. ५ चन्द्रिकार्थान् P.; चन्द्रिकौघान् M.

श्रीवीररुद्रस्य यशोविलासान्
गायन्त्यसंस्पृष्टुमिवान्धकारम् ॥ ८१ ॥

अत्रासंस्पृष्टुमिति क्रियाभावस्य फलत्वम् ।

गुणस्वरूपोत्प्रेक्षा यथा ।

चकास्ति काकतीन्द्रस्य कृपालोकनविभ्रमः[1] ।
प्रकृतिष्वपि सर्वासु प्रसाद इव मूर्त्तिमान् ॥ ८२ ॥

गुणाभावस्वरूपोत्प्रेक्षा यथा ।

प्रतापरुद्रस्य महाभिषेक-
पयःकणैः शीतलिताखिलाङ्गा[2] ।
प्रशान्तभारार्त्तफणीन्द्रगाढ-[3]
श्वासानिलोष्मेव विभाति पृथ्वी ॥ ८३ ॥

अत्र प्रशान्तोष्मेति गुणाभावः ।

गुणहेतूत्प्रेक्षा यथा ।

जयश्रियामाश्रयतामुपैति[4]
श्रीवीररुद्रस्य रणे कृपाणः[5] ।
जयश्रियं वैरिमहीपतीनां[6]
समुत्सुको हर्तुमसूययेव ॥ ८४ ॥

अत्रासूययेवेति गुणहेतुत्वम्[7] ।

गुणाभावहेतूत्प्रेक्षा[8] यथा ।

धिर्येषां तान् तद्योकान् चन्द्रिकासदृशानित्यर्थः । यशोगानस्यान्धकारासंस्पर्शः फलम् ।

चकास्तीति । प्रकृतिषु प्रजासु प्रसादगुणस्य मूर्त्तिमद्विशेषणादुत्प्रेक्षालाभः । निमित्तमत्र नोक्तम् ।

प्रतापेति । अन्यत्र धर्मिणि धर्म्यन्तरोत्प्रेक्षा । अत्र भूरूपे धर्मिण्युष्मप्रशान्तिलक्षणो धर्म उत्प्रेक्ष्यते तत्र शीतलाङ्गत्वं निमित्तमुपात्तम् ।

जयेति । विशिष्टवस्तुसंग्रहो लेशतोऽपि तस्यान्यत्रावस्थानं न सहत इति भावः । अत एवोपात्तनिमित्तेयं गुणहेतूत्प्रेक्षा ।

---

१ °संभ्रमः R. २ °खिलाङ्गी R. ३ प्रशीत° R. ४ °मुपैतः R. ५ करे P., R. ६ आयुःस्थिति वैरि° M. ७ गुणस्य हेतुत्वम् R. ८ गुणहेत्वभावोत्प्रेक्षा R. ९ °संग्रही t.

जाता वयं संप्रति वीरभद्र-
नरेन्द्रगम्भीरिमगुल्फदघ्नाः ।
इत्यप्रमोदादिव जीवनेषु
मालिन्यमम्भोनिधयो भजन्ते ॥ ८५ ॥

अत्राप्रमोदादिवेति गुणाभावस्य हेतुत्वम् ।

गुणफलोत्प्रेक्षा यथा ।

आशिषां विषधूम्राणां नैर्मल्यार्थमिवोत्सुकाः ।
भुजङ्ग्यः काकतीन्द्रस्य गुणान् गातुं सुधामुचः ॥ ८६ ॥

अत्र नैर्मल्यार्थमिति गुणस्य फलत्वम्[1] ।

गुणाभावफलोत्प्रेक्षा[2] यथा ।

अरण्यवासोचित[3]बान्धवासु
मृगीष्ववैरार्थमिवाशरण्याः ।
बिलप्रदेशेष्वरिवैरिनार्यः
पराङ्मुखा लोचनविभ्रमेषु[4] ॥ ८७ ॥

जाता इति । पार्श्वनिस्सृतौ पादग्रन्थी गुल्फौ तद्दघ्नास्तत्प्रमाणाः । 'प्रमाणे द्वयसच्—' इत्यादिना दघ्नच्प्रत्ययः । नरेन्द्रगम्भीरिम्णो गुल्फदघ्नाः तदपेक्षयातिस्वल्पगाम्भीर्या इत्यर्थः । जीवनेषूदकेषु वृत्तिषु च मालिन्यं कार्ष्ण्यं क्लिष्टत्वं च भजन्ते । अत्राप्रमोदादिवेति गुणहेत्वभावोत्प्रेक्षाया न श्लेषो बाधकः किं त्वङ्गमेव । तदुक्तं रुचकेन । 'ऐषाधर्मेऽप्यपि धर्मविषये श्लिष्टशब्दहेतुका क्वचिद् दृश्यते[5]' इति । चक्रवर्तिनाप्युक्तम् । 'क्वचिच्छ्लेषेण धर्मांशगतेनैषा न बाध्यते' इति ।

आशिषामिति । विषधूम्राणां विषमलिनानामाशिषां दंष्ट्राणाम् । 'आशीस्स्यादुरगदंष्ट्रायाम्' इति विश्वः । गुणगाननिमित्तां गुणभावफलोत्प्रेक्षां योजयति । अत्रेति ।

अरण्येति । शरणे रक्षणे साधुः शरण्यः । तद्रहिता अशरण्याः अनाथा

---

१ गुणफलत्वम् P. २ गुणफलाभावो B. ३ °वासार्जित° M. ४ लोकनविभ्रमेषु P.
५ उत्प्रेक्षायामपि धर्मविषये श्लिष्टशब्दहेतुत्वं क्वचित् दृश्यते t.

अत्रावैरार्थमिति गुणाभावस्य फलत्वम् ।

द्रव्यस्वरूपोत्प्रेक्षा यथा ।

न नित्यमस्मिन् परिपूर्णतेति
त्यक्त्वा नभः क्षोणितलावतीर्णः ।
आनन्दयन्निन्दुरिव स्वधाम्ना
विभाति लोके नवकाकतीन्द्रः ॥ ८८ ॥

द्रव्यस्वरूपाभावोत्प्रेक्षा यथा ।

अनन्यसाधारणदानशौण्डे
सद्यःकृतार्थीभवदर्थिसार्थे ।
श्रीकाकतीन्द्रे भुवि राजमाने
द्यौः पारिजातेन विनाकृतेव ॥ ८९ ॥

अत्र दिवः पारिजाताभाव उत्प्रेक्ष्यः[2] ।

द्रव्यहेतूत्प्रेक्षा यथा ।

इत्यर्थः । अवैरार्थमिवेति । विलासविमुखा मृगाङ्गना विलासिनीर्विलोक्य वैरायन्ते तन्निषेधार्थमिवेत्यर्थः । विभ्रमाविमुखत्वमत्र निमित्तम् ।

नेति । अस्मिन् नभसि नवो गुणैरपूर्वः काकतीन्द्रः । अत्रेन्दोः क्षोणितलावतीर्णस्य कविकल्पितत्वादुत्प्रेक्षाविषयत्वमेकत्वाद् द्रव्यत्वं च ।

अनन्येति । दानशौण्डो बहुप्रदः । 'स्युर्वदान्यः स्थूललक्षदानशौण्डा बहुप्रदे' इत्यमरः । अस्यानन्यसाधारणत्वमर्थाद् दान इति लभ्यते । उभयोः खञ्जकुब्जादिवद्विशेषणसमासः । यद्वा तादृशदाने शौण्डो[3] मत्तः निःसीमवितरणे [4]निर्विचार इत्यर्थः । पारिजातस्तावदेक एव तस्य राजरूपतया भूलोके वर्तमानत्वात् कुतो दिवः पारिजात इति भावः ।

---

१ परिपूर्णिमेति M. २ R. omits उत्प्रेक्ष्यः; M. has पारिजाताभावादुत्प्रेक्ष्यः. ३ शौण्डोत्तमः t. ४ दक्षिण इत्यर्थः t.

प्रतापरुद्रदेवेन क्ष्माभृत्पक्षविजृम्भितम् ।
समुन्मूलितमामूलादपरेणेव वज्रिणा ॥ ९० ॥

[1]द्रव्याभावहेतूत्प्रेक्षा यथा ।

काकतीयप्रतापोष्म[2]विलीनाङ्गेन मेरुणा ।
असुवर्णाचलेनेव विरिञ्चिर्व्याकुलीकृतः ॥ ९१ ॥

अत्रासुवर्णाचलेनेति हेत्वभावः ।

द्रव्यफलोत्प्रेक्षा यथा ।

दुग्धार्णवशतायेव [3]कैलासाचलकोटये ।
नूनं प्रतापरुद्रेण यशो दिक्षु प्रसारितम् ॥ ९२ ॥

अत्र दुग्धार्णवशतायेति [4]फलत्वम् ।

[5]द्रव्याभावफलस्योत्प्रेक्षा यथा ।

प्रतापेति । क्ष्माभृत्पक्षविजृम्भितं वैरिभूपालबलविजृम्भणमन्यत्रपर्वतपक्षविजृम्भणम् । अत एवापरेणेव वज्रिणेति श्लेषाङ्गा द्रव्यहेतूत्प्रेक्षा । अत्रापरशब्दाप्रयोगे शब्दमात्रसाधर्म्याच्छ्लेष एव स्यात् । अथ सामर्थ्ये त्विन्द्रस्य सिद्धतया प्रतीतेरुपमैव । तत्प्रयोगे तु प्रकृतो राजैवापरवज्रित्वेनाध्यवसीयते तस्यैवशब्देन साध्यत्वात् प्रतीतावप्युत्प्रेक्षैव । इवशब्दाप्रयोगे तु सिद्धत्वादध्यवसायस्यातिशयोक्तिः । इवापरशब्दयोरुभयोरप्यप्रयोगे रूपकमित्यादिविशेषा यथासंभवमूहनीयाः ।

काकतीयेति । [6]विलीनाङ्गेन द्रवीभूतावयवेन असुवर्णाचलेन सुवर्णाभावेनेत्यर्थः । अत्राभाववाचिनो नञः क्रियासापेक्षत्वेनासमर्थस्यापि ‘ सुडनपुंसकस्य ’ इति ज्ञापकात् क्वचित् समास इष्यते । यदाह कैयटः । ‘ असमर्थनञ्समासस्य क्वचित् साधुत्वज्ञापनायानपुंसकस्येति प्रसज्यप्रतिषेध आश्रीयते ’ इति ।

दुग्धार्णवेति । नूनमित्येतत् द्वितीयोत्प्रेक्षासाधकम् ।

---

१ द्रव्यहेत्वभावोत्प्रेक्षा R., T′. २ °भलिनाङ्गेन T′. ३ कैलासशतकोटये P. ४ द्रव्यस्य फलत्वम् T′. ५. द्रव्यफलाभावोत्प्रेक्षा R.; उपात्तद्रव्यफलाभावोत्प्रेक्षा M. ६ विलीनाङ्गत्वेन P.

वीररुद्रनरेन्द्रस्य जयप्रस्थानसंभवम् ।
रजः पिहितदिग्गोलं[1] निराकाशमिवो[2]त्थितम् ॥ ९३ ॥

अत्र निराकाशमित्या[3]काशाभावाय इत्यर्थः ।

एवं भेदान्तरं यथासंभवमुदाहार्य्यम् ।

[4]सौपम्यगर्भालंकार[5]विवेकः ।

अतिशयोक्त्यलंकारः ।

विषयस्यानुपादानाद्विषय्युपनिबध्यते ।
यत्र सातिशयोक्तिः स्यात् कविप्रौढोक्तिजीविता[6] ॥

[7]यत्र कविप्रौढोक्त्या विषयतिरोधानेन विषयी निबध्यते सातिशयोक्तिः। तस्याश्चातुर्विध्यम् । भेदेऽभेदः । अभेदे भेदः । संबन्धेऽसंबन्धः । असंबन्धे

वीररुद्रेति । आकाशस्याभावो निराकाशम् । अर्थाभावेऽव्ययीभावः । ततश्चतुर्थ्यां 'नाव्ययीभावादतोऽम् त्वपञ्चम्याः' इत्यम्भावः 'कस्तूरीति[8]लकान्ति भालफलके देव्या मुखाम्भोरुहे' इत्यादावुपमोपक्रमोत्प्रेक्षा । 'यत्रोल्लसत्फेनततिच्छलेन मुक्ताट्टहासेव विभाति शिप्रा' इत्यादौ सापह्नवोत्प्रेक्षेत्यादिकं तु स्वयमूहनीयमित्याह । एवमिति ।

इत्थं साध्याध्यवसायमूलामुत्प्रेक्षां निर्णीय सिद्धाध्यवसायमूलामतिशयोक्तिं लक्षयति । विषयस्येति । यत्र विषय्यप्रकृतश्चन्द्रादिरुपनिबध्यते प्राधान्येनेति शेषः । कुतः । विषयस्य प्रकृतस्य मुखादेरनुपादानात् विषयिणा निगीर्णत्वादित्यर्थः । इदमत्रानुसंधेयम् । अध्यवसाये त्रयं संभवति । विषयो विषयी अध्यवसानव्यापारात्मकं स्वरूपं च । तत्र विषयस्य निगीर्णत्वेन स्वरूपप्रतिपत्तेरेवाभावादध्यवसाये न कुत्रापि प्राधान्यशङ्कावकाशः । नूनमादिशब्दैरध्यवसायेन व्यापारप्राधान्ये तूत्प्रेक्षा दर्शिता । नूनमादिशब्दाप्रयोगे विषयिण एव प्राधान्येऽध्यवसायस्य सिद्धत्वादतिशयोक्तिरिति । अत एवोक्तं [9]रुय्यकेन । 'अध्यवसितप्राधान्ये त्वतिशयोक्तिः' इति । इदं रजतमित्यस्यातिशयोक्तिता मा भूदित्युक्तम् । कविप्रौढोक्तिजीवितेति । विभागमाह । तस्या इति । ननु पञ्च[10]-

---

१ °दिक्कालम् R. २ °मिवोत्थितम् R. ३ °त्याकाशाभाव इत्यर्थः P., R. ४ इति महामहोपाध्यायविद्यानाथकृतौऽलंकारशास्त्रे औपम्यगर्भालंकारः । R., M. ५ °विवेचनम् T'. ६ °जीवितम् P., R. ७ P. drops the portion from यत्र कवि° to °शयोक्तिः. ८ °तिलकं ललाटफलके t. ९ t. drops रुय्यकेन. १० पञ्चमस्याप्य° t.

संबन्धश्चेति। कार्यकारणयोः पौर्वापर्यविपर्ययरूपा त्वनध्यवसायमूल-त्वाद्व्यतिरिच्यैव। किं तु [2]प्रौढोक्तिमूलत्वादतिशयोक्तिरिति कथ्यते।

तत्र भेदेऽभेदो यथा।

> स्नाले कल्पतरुर्जातः काकतीयम[3]होदधेः।
> लक्ष्मीपतिरसौ चित्रं [4]मर्त्यरूपमहोत्सवः॥ ९४॥

अत्र प्रतापरुद्रकल्पवृक्षयोरभेदाध्यवसायः।

अभेदे भेदो यथा।

> औन्नत्यं महदन्यदेव महितः कोऽप्येष गम्भीरिमा
> काप्यन्या सरणिः प्रतापयशसोरन्यैव बाह्वोः प्रथा।
> सर्वं नूतनमेव रुद्रनृपतेर्जाने न तन्निर्मितौ
> सामग्री चतुराननेन कियती कीदृक्क्रमा कल्पिता॥ ९५॥

अत्रौन्नत्यादेर्[5]वास्तवभेदाभावेऽपि भेदः कल्पितः। स्वतःसिद्धकविप्रौढो-क्तिसिद्ध[6]योर[7]ौन्नत्ययोरभेदेपि भेदाध्यवसायः।

मस्यातिशयोक्तिभेदस्य संभवात् कथं चातुर्विध्यमित्याशङ्क्याह। कार्यकारण-योरिति। काव्यप्रकाशकारोक्तवैषम्यं स्वसदुपाध्यायैरेकावलीतरले समा-हितमिति नेह प्रपञ्च्यते। क्रमेणोदाहरति। स्नान इति। कल्पतरोरुदधेरुत्प-त्तिरुचिता किं तु लक्ष्मीसोदरस्यामर्त्योपयोगिनस्तस्येदमद्भुतमिति भावः।

औन्नत्यमिति। व्याख्यातमेतत्। अत्र राजमेर्वादिसंबन्धिनोरौन्नत्ययोर्वास्त-वाभेदेऽप्यन्यदेवेत्यादिना काल्पनिको भेदः प्रतिपाद्यत इत्याह। अत्रेति। तर्ह्य-स्मिन् भेदे नाध्यवसायलक्षणानुगतिरित आह। स्वत इति। स्वतः सिद्धं यदौ-न्नत्यं तदेवान्यदेवेति कविप्रौढोक्त्या सातिशयम्। अतः स्वतःसिद्धप्रौढोक्तिसिद्ध-

---

१ °मूला R.; °रूपत्वेऽनध्यवसायमूलोक्तिस्तदव्याप्ति° P. २ कविप्रौढोक्ति° R. ३ °कुलो-दधेः T'. ४ चित्रं मर्त्यमहोत्सवः R.; मर्त्यरूपो महोत्सवः M. ५ °र्वास्तवाभेदेऽपि भेदः कथितः। ततः स्वतःसिद्ध° M.; for the whole prose passage P. has °वास्तवाभेदेऽपि भेदाध्यवसायः। ६ °सिद्धयोरभेदाध्यवसायः M. ७ °रौन्नत्ययोर्भेदेऽप्यभेदाध्यवसायः T'. ८ t. drops अतः.

संबन्धेऽसंबन्धो यथा ।

शिला चिन्तारत्नं तरुरमरशाखी पशुरसौ
वियद्धेनुः सर्वं जगदपि तथा दोषविधुरम् ।
न सृष्टिर्वैधात्री तदिह चतुरश्रीः कथमियं
स्पृशेद्देवं रुद्रं सकलगुणसाम्राज्यनिलयम् ॥ ९६ ॥

अत्र विधातृसृष्टिसंबन्धेऽप्यसंबन्ध उक्तः । अतीतब्रह्मसृष्टिनेश्वरेणात्राभेदाध्यवसायः ।

असंबन्धे संबन्धो यथा ।

ब्रह्मन् मेरुगिरौ कृतेऽपि किमिदं नैवंविधास्ते मुदः
स्वामिन् सत्यमधिक्रियाद्य फलिता यद्वीररुद्रः कृतः ।

योरौन्नत्ययोः फलरूपयोर्भेदेऽप्यभेदाध्यवसायो न पुनः फलिनोस्तयोर्वास्तवभेदे सत्यभेदाध्यवसायकल्पनायोगात् । तदुक्तं चक्रवर्तिना ।

'अभेदाध्यवसायो हि फलेऽतिशयनादिह ।
न पुनः फलिनोस्तत्र भेदेऽभेदो न सिध्यति ॥' इति ।

किं च प्रथमोदाहरणेऽपि स्वतःसिद्धप्रौढोक्तिसिद्धवदान्यत्वयोरेवाभेदाध्यवसायो न राजकल्पवृक्षयोः । अन्यथैकत्र फलयोरध्यवसायोऽन्यत्र फलिनोरिति वैरूप्यप्रसङ्गात् । एवं च प्रतापरुद्रकल्पवृक्षयोरभेदाध्यवसाय इति यत् पूर्वमुक्तं तत् फलगताभेदाध्यवसायविषयमिति द्रष्टव्यम् ।

शिलेति । यथा चिन्तारत्नादिकं शिलात्वादिदोषदुष्टं तथा सर्वमपि जगदिति दुष्टेयं ब्रह्मसृष्टिः कथमनवद्यमशेषगुणमेनं संस्पृशेदिति रुद्रदेवस्य ब्रह्मसृष्टिसंबन्धेऽप्यसंबन्धकथनम् । अत्राप्यध्यवसायं संपादयति । अतीतब्रह्मसृष्टिनेति । अयं च स्वतःसिद्धप्रौढोक्तिसिद्धगुणातिशयाध्यवसायमूल इति द्रष्टव्यम् ।

ब्रह्मन्निति । हरिवाक्यमेतत् । विरिञ्चिरुत्तरमाह । स्वामिन्निति । अधि

---

१ कमलगुण° R. २ सिद्धेऽत्र R. ३ °सृष्टीनामीश्वरेण M. ४ °ध्यवसायं संपादयति t.

मिथ्या किं नु विकत्थसे त्रिंजगतस्त्राणाय मत्प्रार्थितः
शंभुः क्ष्मामवतीर्णवानिति कथा जाता हरिब्रह्मणोः ॥ ९७ ॥

अत्र हरिब्रह्मणोरेवंविधगोष्ठ्यसंबन्धेऽपि संबन्ध उक्तः । शंभुना सह काकतीन्द्रस्याभेदाध्यवसायः ।

कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिर्यथा ।

मातः कथं काकतिनाथदृष्टे-
रग्रेसराः कामशराः पतन्ति ।
तद्रूपलावण्यजितः स्मरोऽपि
नूनं गतः किं करताममुष्य ॥ ९८ ॥

अत्र कार्यभूतस्य स्मरशरपातस्य कारणभूतात् प्रियदृष्टिपातात् पूर्वकालत्वमुक्तम् ।

क्रिया जगत्सर्जनाधिकारः । विष्णुर्विरिञ्चिकथनमन्यथा करोति । मिथ्येति । अत्रालौकिकौन्नत्यादिगुणयुक्तमेनं ब्रह्मापि निर्मातुं न शक्नोतीति भावः । असंबन्धे संबन्धं योजयति । अत्रेति । पूर्ववदभेदाध्यवसाय इत्याह । शंभुनेति ।

पञ्चमं भेदमुदाहरति । मातरिति । कामशरपीडामसहमानायाः कस्याश्चिन्मात्रा सह वचनम् । तस्य काकतीन्द्रस्य । अभूषणेऽपि भूषितवद्भासमान आकारो रूपं लावण्यं कान्तिविशेषः । अनयोर्लक्षणमुक्तम् । अमुष्य काकतीन्द्रस्य । कारणं पूर्वमपरं कार्यमिति सर्वत्र नियमः । कविप्रौढोक्त्या तद्विपर्ययोऽलंकार इत्याशयेनाह । अत्रेति ।

'अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः ।
अयमागच्छति कालो हन्त हताः पथिकगेहिन्यः ॥'

इत्यादि कार्यकारणयौगपद्यमपि पौर्वापर्यविपर्यय एवेति द्रष्टव्यम् ।

---

१ त्रिभुवनत्राणाय M. २ °विरिञ्च्यो° M. ३ °गोष्ठ्यामसं° M. ४ काकतिवीरदृष्टेः M. ५ अत्रेति t.

अथोक्तिसाम्यालंकारनिरूपणेऽतिशयोक्तिहेतुका सहोक्तिर्निरूप्यते।

सहोक्त्यलंकारः।

सहार्थेनान्वयो यत्र भवेदतिशयोक्तितः।
कल्पितौपम्यपर्यन्ता सा सहोक्तिरितीष्यते॥

यत्र भेदेऽभेदरूपतया कार्यकारणपौर्वापर्यविपर्ययरूपया वातिशयोक्त्या एकस्य प्राधान्येनान्वयेऽपरस्य सहार्थेन संबन्धे उपमानोपमेयभावः कल्प्यते तत्र सहोक्तिः। प्राकरणिकाप्राकरणिकविषयत्वादुपमानोपमेयभावस्य सहार्थसंबन्धेन द्वयोरपि प्रकृतत्वान्न तदात्मता।

कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्तिमूला सहोक्तिर्यथा।

अन्ध्रक्षमाभृत्सुभटासिधारा
रणेषु नीलोत्पलपत्रभासः।

सहोक्तेः संगतिमाह। अथेति। लक्षणमाह सहार्थेनेति। सहशब्दस्यार्थो यस्य तेन सहार्थेन तत्पर्यायेण चेत्यर्थः। 'अनेन सार्धं विहराम्बुराशेः' इत्यादौ सहोक्तिमात्रस्यालंकारता मा भूदित्युक्तमतिशयोक्तित इति। अत्राकाङ्क्षितमंशमध्याहारादिभिः पूरयन् व्याचष्टे। यत्रेति। एकस्य प्राधान्येनान्वय इति। तथा पुत्रेण सहागतः पितेत्यादौ पितुरागमनादिना शाब्दः संबन्धस्तद्वदिति भावः। अपरस्य सहार्थेन संबन्ध इति। तत्रैव पुत्रादिवदिति भावः। उपमानोपमेयभावः कल्प्यत इति। 'सहयुक्तेऽप्रधाने' इत्यप्रधाने तृतीयाविधानात् तदन्तस्य गुणभावादुपमानत्वम्। अर्थादितरस्य प्राधान्यादुपमेयत्वं च कल्प्यत इत्यर्थः। अत एवात्र भेदप्रधानं साधर्म्यमिति द्रष्टव्यम्। सह शाखया प्रस्तरं प्रहरतीत्यत्र प्रहरणे शाखाप्रस्तरयोरिव शाब्द एवायं गुणप्रधानभावो न वास्तवः। पित्रा सहागतः पुत्र इत्यपि सुवचत्वात्। उपमानोपमेयभावश्चात्र काल्पनिको न वास्तव इत्यत्र निमित्तमाह। प्राकरणिकेति। तदात्मता अप्रकृतरूपता। उदाहरति। अन्ध्रेति। अत्र दिव्यमाल्यानीव खड्गधाराः कण्ठे

---

१ °निरूपणातिशयोक्ति° M. २ °रूपयातिशयोक्त्या T'. ३ प्रकल्प्यते P.; परिकल्प्यं R., M. ४ सहार्थेन संबन्धेन M.. ५ मान्ध्र° M. ६ अथोक्तं संगति° t. ७ °साध साधर्म्यं° t.

पतन्ति कण्ठेष्वरिभूपतीनां
साकं सुरस्त्रीजनमुक्तमाल्यैः ॥ ९९ ॥

अत्र कृपाणपतनोत्तरकालभाविनो दिव्य[1]माल्यपतनस्य सह[2]कालत्वमिति पौर्वापर्यविपर्ययः।

भेदेऽभेद[3]रूपातिशयोक्तिमूला श्लेषगर्भा[4]भेदाध्यवसायरूपा चारुतातिशयहेतुर्यथा।

दिने दिने रुद्रनराधिपस्य
प्रतापलक्ष्मीरुदयं प्रयाति।
प्रकाशिताशेषदिगन्तराला
विवस्वता सार्धमनिन्द्यभासा ॥ १०० ॥

अत्रोदग्रं प्रयातीति श्लेषेणोदयपर्वताभ्युदययोरभेदाध्यवसायः।

अथ सहोक्तिप्रतिपक्षरूपा[5] विनोक्तिर्निरूप्यते।

पतन्तीत्येवं प्रतीयमानस्योपमानोपमेयभावस्य द्वयोः प्राकरणिकत्वात् वैवक्षिकत्वम्। कण्ठपतनसाधर्म्यस्य भेदप्रधानत्वं चोपमानोपमेययोः सहार्थप्रयुक्तगुणप्रधानभावमि[illegible] चेत्याद्युन्नेयम्। अत्र कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्तिमूलत्वमुपपद्यत इति। [6]अत्रेति।

दिने दिन इति। श्लेषभित्तिकाभेदाध्यवसायोऽत्र सहोक्तिमूलमित्याह। [7]अत्रोदग्रमिति। 'कुमुददलैः सह संप्रति विघटन्ते चक्रवाकमिथुनानि' इत्यत्र श्लेषभित्तिकाभेदाध्यवसायो मूलम्। अत्र विघटनं संबन्धिभेदाद् भिन्नं न तद्भिन्नत्वमित्याह सर्वस्वकारः। 'उत्क्षिप्तं सह कौशिकस्य पुलकैः' इत्यादौ एवं मालयापि दृश्यते। अत्र कर्मसाहित्यात् सहोक्तिः पूर्वत्र कर्तृसाहित्यादिति भेदः।

---

१ दिव्यमालापतनस्य R. २ °कालत्वमुक्तमिति R. ३ °रूपश्लेषगर्भा° P. ४ °रूपातिशयोक्तिमूला यथा P.; °रूपत्वातिशयहेतुर्यथा M. ५ °रूपविनोक्ति° M. ६ अपेति t. ७ अत्र कृपाणेति t.

विनोक्त्यलंकारः ।

विना संबन्धि यत् किंचिद्यत्रान्यस्य पराभवेत्[1] ।
अरम्यता रम्यता वा सा विनोक्तिरिति स्मृता[2][3] ॥

यत्र कस्यचिदसंनिधानाद्वस्तु रम्यमरम्यं वा भवेत् सा विनोक्तिः । सा द्विविधा अरम्यता रम्यता चेति ।

अरम्यता[4] यथा ।

प्रतापरुद्रदेवस्य गुणवर्णनया[5] विना ।
कीदृशी काव्यरचना संशृणुध्वं कवीश्वराः ॥ १०१ ॥

अत्र प्रतापरुद्रस्य गुणवर्णनं विना काव्यश्रियो[6]ऽशोभनत्वमुक्तम् । अनेन काव्यशोभामिच्छद्भिः कविभिः[7] प्रतापरुद्रगुणा[8] वर्णयितव्या इति विधिरेव प्रकाश्यते[9] ।

रम्यता[10] यथा ।

विनोक्तेः संगतिमाह । अथेति । लक्षणमाह । विनेति । यत्र संबन्धि यत् किंचिद्वस्तु विनान्यस्य प्रतिसंबन्धिनो रम्यता शोभनत्वमरम्यताशोभनत्वं वा पराभवेन्निवर्तेत सा विनोक्तिरित्यर्थः । फलितं व्याचष्टे । यत्रेति । रम्यमरम्यं सारहितमरम्यं रम्यतारहितं वेत्यर्थः । व्याख्यानोक्तं व्युत्क्रमं परिहरन् विभजति । सेति । रम्यत्वाभावः अरम्यत्वाभावश्चेत्यर्थः । कस्मिंश्चित् सति कस्यचिद्रम्यत्वमरम्यत्वं वेति विधिमुखेनापि विच्छित्तिविशेषो नास्तीत्येवमभिधानमिति[11] द्रष्टव्यम् । तदुक्तम् ।

‘ सदसत्त्वनिवृत्तिश्चेन्निवृत्त्यान्यस्य वर्ण्यते ।
तदा द्विधा विनोक्तिः स्याद्विधिरत्र फलं भवेत् ॥ ’ इति ।

आद्यमुदाहरति । प्रतापेति । कीदृशी रम्या न भवतीत्यर्थः । संशृणुध्वं व्याख्यातम् । अलंकारफलं विधिमाह । अनेनेति ।

---

१ परापतेत् P., M. २ रम्यतारम्यता वा स्यात् सा विनोक्तिरिति स्मृता ॥ T'. ३ °रनुस्मृता M.; °र्विलोक्यताम् P. ४ अरम्यतया M. ५ °रुद्रगुणवर्णनेन R., M. ६ °श्रिया-मशोभनत्व° T'., M. ७ कवीश्वरैः R., M. ८ प्रतापरुद्रस्य R., M. ९ प्रकाशिता R., M. १० रम्यतया M. ११ °मभिदधानमिति P.

कलापूर्णे नित्यं जयति जगतीन्दौ त्रिजगतो
वपुष्मत्यानन्दे विमलविभवे रुद्रनृपतौ ।
विना लक्ष्म्याप्त्या प्रतिदिवसपूर्णो निजतनुं
प्रकाशः स्यादिन्दुर्यदि दिवि भवेत् सोऽपि सुभगः ॥१०२॥

अत्र प्रतापरुद्रे प्रकाशमाने चन्द्रमसः कलङ्केन विना शोभनत्वमुक्तम् । सकलगुणशालिनः प्रतिपक्षस्य पुरस्तात् तादृशगुणवत्तयैव रम्यता नान्यथेति ।

समासोक्त्यलंकारः ।

विशेषणानां तौल्येन यत्र प्रस्तुतवर्तिनाम् ।
अप्रस्तुतस्य गम्यत्वे सा समासोक्तिरिष्यते ॥

यत्र प्रकृतविशेषणसाम्यादप्रस्तुतं गम्यते सा समासोक्तिः । तत् त्रिविधम् । श्लिष्टविशेषणसाम्यं साधारणमौपम्यगर्भं चेति ।

श्लिष्टविशेषणेन यथा ।

द्वितीयमुदाहरति । कलेति । जगतीन्दौ भूलोकचन्द्रे रुद्रनृपतौ कलापूर्णत्वादिविशेषणैः प्रतीयमानेन चन्द्रादुत्कर्षेण जयति सति इन्दुः कलङ्कराहित्येन नित्यं पूर्णः प्रकाशत इति प्रकाशः प्रकाशमानो दिवि यदि स्याद्भूलोके त्वेतत्संनिधानेन तथाविधोऽपि न शोभत इति भावः । स चन्द्रोऽपि सुभगो भवेदित्यशोभनत्वाभावकथनं तदेवाह । अत्रेति । सहोक्तिविनोक्त्योः सहार्थविनार्थयोरभावेऽपि तदर्थविवक्षायामुदाहरणमलंकारसर्वस्वादौ द्रष्टव्यम् ।

उक्तिसाम्यात् समासोक्तिं लक्षयति । विशेषणानामिति । स्पष्टम् । समासेन संक्षेपेणार्थद्वयकथनात् समासोक्तिः । विशेषणसाम्यं विभजते । तदिति । यत्र सकृदुच्चारितशब्देनार्थद्वयं प्रतीयते तच्छ्लिष्टम् । यत्रोभयप्रवृत्तिनिमित्तैक्यं तत् साधारणम् । यत्रौपम्यगर्भसमासविशेषाश्रयणं तदौपम्यगर्भम् । तेन समासो-

---

१ प्राप्त्य M. २ चन्द्रस्य विना कलङ्केन R. ३ °वर्णना R. ४ °साम्यसाधारणाद° R. ५ °विशेषणसाम्यं यथा T'.; °विशेषणे यथा M. ६ तत्रेति । t. ७ प्रतिपाद्यते t. ८ तच्छ्लेषः t.

सद्यो विश्लथमे[1]खलापुलकितामृज्वीं तनुं बिभ्रती
रागादभ्रपतेः कृपाणलतिका गृह्णाति कण्ठेष्वरीन् ।
तद्योगादनुरक्तभावविवशाः [2]संमीलिताक्षाश्चिरं
शून्यान्तःकरणा भजन्ति खलु ते भावस्थितिं कामपि ॥१०३॥

अत्र विश्लथमे[3]खलापुलकितामिति श्लिष्टविशेषणमहिम्ना कृपाणलतिकाया नायिकात्वप्रतीतिः । अनुरक्तभावविवशा इत्यादिविशेषणद्वारा रिपूणां नायकत्वप्रतीतिः ।

साधारणविशेषणेन यथा ।

वीतव्रीडमपास्तमौनमुदयद्वैस्वर्यमाविर्भवत्-
स्वेदं निर्भरगात्रवेपथुमिलन्मूर्च्छं गलद्बाष्पकम् ।
संजातप्रलयं च काकतिमहीना[4]थ स्मरोद्वेजिता
भूपाः शैलगुहासु यान्ति विजनं भीत्या समालिङ्गिताः ॥१०४॥

क्तिरपि त्रिविधा । तत्राद्यं भेदमुदाहरति । सद्य इति । विश्लथा प्रयोगानुकूला मेखला कण्ठरज्जुर्यस्यास्तां तथोक्तां शिथिलकाञ्चीगुणां च । पुलकाश्छाया अस्याः संजाताः पुलकिता रोमाञ्चिता च ताम् । ऋज्वीमकुटिलां रतावचामां च । तद्योगात् कृपाणलतिकासंबन्धात् । अनुरक्तोऽनुवृत्तरक्तो भावः स्वरूपं येषां ते तथोक्ताः अत एव विवशाः परवशाः । अन्यत्र तद्योगान्नायिकासंबन्धादनुरक्तभावेनानुरक्तत्वेन विवशा मीलिताक्षाः मूर्च्छया सुखपारवश्याच्च । तथा शून्यान्तःकरणा गतमनसो विगलितवेद्यान्तःकरणाश्च । कामपि वक्तुमयोग्यां साक्षादुक्तावमङ्गलत्वेनाश्लीलत्वादिति भावः । भावस्थितिं षष्ठभावविकारं वि[5]नाशनिमित्तमित्यर्थः । अन्यत्र कामपि वक्तुम[6]शक्यां भावस्थितिं प्रेमानुबन्धं भजन्ति । अत्र श्लिष्टविशेषणसाम्यात् खड्गलतायामरिषु नायिकानायकव्यवहारसमारोप इत्याह । अत्रेति ।

द्वितीयमुदाहरति वीतेति । व्याख्यातमेतत् । अत्र वीतव्रीडादिविशेषणानामुभयत्रैकार्थत्वं साम्यं तद्बलाद्भीरूणां शृङ्गारनायकव्यवहारसमारोप इत्याह ।

---

१ °मेखलाम् M. २ संमीलिताक्षाः परम् M. ३ मेखलाम् M. ४ °नाथेन संतर्जिता T². ५ विनाशमित्यर्थः t. ६ °मशक्यं p.

अत्र शृङ्गारभयानकसाधारणविशेषणबलाद् भीत्या समालिङ्गिता इति नृपाणां[1] नायकत्वप्रतीतिः।

औपम्यगर्भविशेषणेन[2] यथा।

भृतात्मगुणरत्नौघैः[3] पूर्णः सौजन्यवारिणा।
प्रतापरुद्रनृपतिर्धत्ते विश्वंभराश्रियम्॥ १०५॥

अत्रेति। भीत्यभयादिधर्मसमारोपोऽत्र निमित्तम्। 'घामालिलिङ्ग मुखमाशु दिशां चुचुम्ब' इत्यत्रेक्षणाग्नौ युवनायकव्यवहारारोपे आलिङ्गनादिकार्यसमारोपः कारणम्। साधारणविशेषणसाम्ये धर्मकार्ययोरन्यतरारोपं विना व्यञ्जनव्यापारोद्भेदनेनाप्रकृतप्रतीतेरसंभवात्। एवं च द्विविधो भेदो द्विविधो जातः।

तृतीयमुदाहरति। भृतात्मेति। गुणा रत्नानीवेत्युपमितसमासस्य गुणा एव रत्नानीति रूपकसमासस्य च साधकबाधकाभावात् संदेहसंकरः। ततो गुणसदृशै रत्नैरिति मध्यमपदलोपी समासः। एवमुत्तरत्रापि। इत्थमौपम्यगर्भविशेषणसाम्येन प्रतापरुद्रे समुद्रव्यवहारप्रतीतेः समासोक्तिः। यत्रोपमासमासे साधकमस्ति यथा

दन्तप्रभापुष्पचिता[4] लोलाक्षी चारुहासिनी।
केशपाशालिवृन्देन सुवेषा हरिणेक्षणा॥

इत्यत्र सुवेषत्वं तत्रोपमासमासानन्तरं मध्यमपदलोपिसमासो द्रष्टव्यः। तथा च तृतीयभेदस्यापि द्वैविध्यं सिध्यतीत्येवं पञ्चप्रकारा समासोक्तिः। तदुक्तमलंकारसर्वस्वे। 'तदेवं श्लिष्टविशेषणसमुत्थापितैका। साधारणविशेषणसमुत्थापिता धर्मकार्यसमारोपाभ्यां द्विधा। औपम्यगर्भविशेषणसमुत्थापिता तूपमासङ्करसमासाभ्यां द्विभेदा' इति। यत्र 'निरीक्ष्य विद्युन्नयनैः पयोद' इत्यादौ निरीक्षणादिकं रूपके साधकमस्ति तत्रैकदेशविवर्तिरूपकमेव न समासोक्तिरित्यादिविशेषा अपि तत्रैव द्रष्टव्याः।

---

१ R. drops नृपाणाम. २ °विशेषणे M. ३ भृतः स्वगुण° P.; भृतात्मा गुण° R. ४ °पुष्पपया t.

अत्र समासोक्तौ सर्वत्र व्यवहारसंमारोप एव जीवितम् । स चतुर्विधः । लौकिके वस्तुनि लौकिकव्यवहारसमारोपः शास्त्रीयवस्तुव्यवहारसमारोपश्चेति द्विविधः । तथा शास्त्रीयवस्तुनि शास्त्रीयव्यवहारसमारोपः लौकिकव्यवहारसमारोपश्चेति । एवं चतुर्विधः ।

यथाक्रममुदाहरणानि ।

सप्ताङ्गस्फुरदुद्दामदानलक्ष्मीविराजितः ।
प्रतापरुद्रो भद्रात्मा तनुते सार्वभौमताम् ॥ १०६ ॥

विशेषान्तरमाह । अत्रेति । व्यवहारसमारोप एवेत्येवकारो रूपसमारोपव्यवच्छेदार्थः । तथा हि यदा विशेषणसाम्यादप्रस्तुतं प्रस्तुतविशेष्यत्वेन प्रतीयते न तु प्रयुज्यते तदा निष्प्रतियोगिकत्वेनापरित्यक्तस्वरूपस्य प्रस्तुतस्य राजादेर्विशेषणसाम्यावगमितेनाप्रस्तुतसमुद्रत्वादिधर्मेण विशिष्टतया प्रतीतेः व्यवहारसमारोपः । यदा त्वप्रस्तुतमपि विशेष्यं प्रयुज्यते तदा तत् प्रस्तुतमर्थं स्वेन रूपेण रूपवन्तं कृत्वा न्यग्भवति । प्रस्तुतमपि स्वरूपं परित्यज्याप्रस्तुततादृूप्यमुपगृह्णाति अतस्तत्र रूपकसमारोप एव । तदुक्तम् ।

'अप्रस्तुतं प्रतीतं चेद् भेदकांशैकसाम्यतः ।
व्यवहारं समारोप्य प्रस्तुते न्यग्भवत्यथ ॥
तेनाप्रस्तुतवृत्तान्तारोपेणाप्रस्तुतं स्वयम् ।
संक्षेपेणोच्यते यस्मात् समासोक्तिरियं तदा ॥
स्याद्विशेष्यांशसाम्यं चेत् प्रस्तुताकाररूपितम् ।
भवेदप्रस्तुतं वेद्यं रूपकालंकृतिस्तदा ॥' इति ।

अत्राप्रस्तुतस्य प्रतीयमानत्वाद् व्यवहारसमारोप एवेति भावः । तं चतुर्धा विभजति । स इति । वस्तुनि जात्यादौ । क्रमेणोदाहरति । सप्ताङ्गेति । स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि सप्ताङ्गानि तद्गोचरया दानलक्ष्म्या त्यागवैभवेन विराजितः । अदेयमस्य किमपि नास्तीति भावः । अन्यत्र सप्ताङ्गानि करादीनि तत्र स्फुरन्त्या स्रवन्त्या दानलक्ष्म्या मदवैभवेन विराजितः । तदुक्तम् ।

'करात् कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदस्रुतिः' इति पालकाव्ये । करात् नासारन्ध्राभ्यामित्यर्थः । भद्रात्मा मङ्गलमूर्त्तिः । अन्यत्र भद्रजातिः । तल्लक्षणं

---

१ °समारोपणमेव M. २ सरागः स्फुर° P.; सप्ताङ्गः स्फुर° R. ३ भेदकांशोक्तिसाम्यतः p. ४ भेदः t.

अत्र लौकिके प्रकृतवस्तुनि लौकिकस्य सार्वभौमनामधेयस्य दिग्गजस्य व्यवहारप्रतीतिः।[1]

तथा।

गुरुप्रमाणेन निजेन सद्य-
स्तिरस्कृतोद्यत्प्रतिपक्षहेतौ।
प्रतापरुद्रस्य समित्युदग्रे
खड्गे महत्खण्डनपण्डितत्वम्॥ १०७॥

अत्र [2]लौकिके खड्गे [3]तर्कशास्त्रप्रसिद्धवस्तुर्व्यवहारसमारोपः।[4]

तथा।

मतङ्गज इति प्रतीयते। सर्वभूमेरीश्वरः सार्वभौमः। 'तस्येश्वरः' इत्यण्प्रत्ययः। अनुशतिकादित्वात् उभयपदवृद्धिः। तत्तां चक्रवर्त्तित्वम्। अन्यत्र [5]सार्वभौमत्वं दिग्गजविशेषत्वं तनुते। अत्र श्लिष्टविशेषणैः प्रकृतप्रतापरुद्रेऽप्रकृतभद्रगजव्यवहारसमारोपः।

लौकिके वस्तुनि [6]शास्त्रीयव्यवहारसमारोपमुदाहरति। [7]गुर्विति। गुरुणा श्रेष्ठेन प्रमाणेन ध्वजादिशुभायविशिष्टप्रमाणेनेत्यर्थः। [8]आयुधानां ध्वजाद्याया जयावहा इति तद्विदः। अन्यत्र प्रमाणेनानुमानेन तस्यैव कथासाधनत्वात्। गौरवं चास्य व्याप्तिपक्षधर्मताबैशिष्ट्यनिबन्धनं द्रष्टव्यम्। प्रतिपक्षस्य शत्रोः प्रतिवादिनश्च। हेतीरायुधं हेतुरनुमानं चेति। इकारयोकारयोः श्लेषः। उद्यदिति। [9]शस्त्रा प्रयोगप्रारम्भ एवानयोः पराभव इति लभ्यते। समिति युद्धे सभायां च। खण्डनपण्डितत्वं विदारणकौशलम्। अन्यत्र दूषणनैपुण्यम्। अत्र विशेषणसाम्याद्वैतण्डिकः प्रतीयते।

---

१ दिग्गजस्य प्रतीतिः R. २ लौकिकखड्गे R. ३ तर्कशास्त्रे प्रसिद्ध° M. ४ °व्यवहारारोपः M, r. ५ सार्वभौमता t. ६ शास्त्रीयवस्तुव्यव° t. ७ गुरुष्विति p. ८ आयुधेषु t. ९ उद्यच्छब्दप्रयोग° t.

अपूर्वार्थश्लाघागुरुभणितिसारस्यपदवी
श्रुतिग्राह्यं तत्त्वं किमपि कलयन्ती प्रतिपदम्[1]।
प्रबन्धश्रीर्वीरक्षितिभुजि[2] कवीनां विजयते
बुधश्रेणी यस्यां निपुणमधिकर्तुं प्रभवति ॥ १०८ ॥

शास्त्रीये वस्तुनि शास्त्रीयव्यवहारसमारोपमुदाहरति । अपूर्वेति । अपूर्वस्यास्पृष्टस्यार्थस्य श्लाघया कथनेन गुरूणां श्लाघ्यानां भणितानां वाक्यानां यत् सारस्यमभिमुखीकरणयोग्यत्वं तस्य पदवी स्थानमित्यर्थः । पदे पदे प्रतिपदम् । श्रुतिग्राह्यं श्रोत्रेन्द्रियग्राह्यम् । किमप्यनिर्वचनीयम् । तत्त्वं माधुर्यरूपम् । कलयन्ती धारयन्ती । श्रुतिकट्वादिदोषराहित्येन श्लेषादिगुणसाहित्येन च । स्ववत्सुधासमधुरशब्दार्थशरीरेत्यर्थः । प्रबन्धश्रीः काव्यनाटकादिप्रबन्धलक्ष्मीः विजयते । यस्यां बुधश्रेणी विदग्धपरिषत् निपुणमधिकर्तुं रसमास्वादयितुं प्रभवति । अधिकारस्य फलस्वाम्यलक्षणत्वात् सहृदय एवात्राधिकारी नान्य इत्यर्थः । अपूर्वाणामर्थानां चोदनैकसमधिगम्यत्वेन प्रमाणान्तरागोचराणामग्निहोत्रादीनां श्लाघया कथनेन गुरूणां श्रेष्ठानां भणितानां विधिवाक्यानां यत् सारस्यमर्थवादप्रयुक्तं प्रवर्तनौन्मुख्यं तस्य पदवी स्थानं विद्यादिविचारसध्रीचीनेत्यर्थः । श्रुतिशब्देन श्रुत्येकदेशो गृह्यते । तेन श्रुतिग्राह्यं लिङादिप्रत्ययवेद्यमत एव किमप्यलौकिकं तत्त्वं श्रेयःसाधनतारूपं धर्मम् । अत एवोक्तमाचार्यैः ।

‘ श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते ।
ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥ ’ इति ।

पद्यते गम्यते प्रामाण्यादिकमेभिरिति पदानि न्यायाः । प्रतिपदं सहस्रेणापि न्यायैरित्यर्थः । कलयन्ती इतिकर्तव्यतारूपेण प्रतिपादयन्तीत्यर्थः । मीमांसेति गम्यते । तदुक्तमाचार्यैः ।

‘ धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥ ’ इति ।

यस्यां मीमांसायां बुधश्रेणिः निगमनिरुक्तादिविद्यानिष्णातविद्वत्सङ्घ एवाधिकर्तुं प्रभवति तस्यैवात्राधिकारादिति भावः । तदुक्तं जिज्ञासाप्रस्तावे ।

---

१ प्रतिदिशम् M. २ क्षितिपाती R., T.

अत्रालंकारशास्त्रीये वस्तुनि तन्त्रशास्त्रप्रसिद्धवस्तुव्यवहारसमारोपः तथा ।

सालंकारा लसद्वर्णा सुगुणा रसनिर्भरा ।
भावानुबन्धिनी भाति भारती काकतीश्वरे ॥ १०९ ॥

अत्रालंकारशास्त्रीये वस्तुनि भारत्याख्ये लौकिकनायिकाव्यवहारसमारोपः ।

'जिज्ञासैकोपनीतस्य द्वितीया पठितश्रुतेः ।
ज्ञातविज्ञान्तरस्यान्या वा मीमांसा धुरन्धरी ॥'

इति । अथवा मतान्तरेणार्थान्तरं तु क्रियादिव्यतिरिक्तं स्वाधिकार्यं प्रमाणान्तरगोचरमपूर्वम् । तदुक्तं शालिकानाथेन ।

'क्रियादिभिन्नं यत् कार्यं वेद्यं मानान्तरैर्न तत् ।
अतो मानान्तरापूर्वमपूर्वमिति गीयते ॥' इति ।

तदेवार्थो वाक्यार्थः । प्रधानत्वात् । तदुक्तम् ।
'कार्यस्यैव प्रधानत्वाद्वाक्यार्थत्वं च युज्यते ।' इति ।

एवमादेः शाखा कल्पनम् । तत्प्रधानानां गुरुभणितानां निबन्धनविवरणादिप्रभाकरग्रन्थानां यत् सारस्यं प्रसन्नगम्भीरत्वं तस्य पदवी स्थानं तथाविधमन्त्रयुक्तेत्यर्थः । श्रुतिमात्रं लिङादिवाक्यम् । एवं कार्यात्मके 'लोके व्युत्पन्ना लिङादय' इति शालिकोक्तेः लिङ्गप्रयोगिकं तत्पदम् ।

'कार्यत्वेन नियोज्यं च स्वात्मनि प्रेरयत्यसौ ।
नियोग इति मीमांसाभिज्ञैरभिधीयते ॥'

इत्युक्तलक्षणनियोगपरत्वेन वर्णं प्रतिपदं कल्पयन्तीत्यादि पूर्ववत् । कक्ष्ये कल्पनं योजयति । अत्रालंकारेति । तन्त्रशास्त्रमत्र भाट्टं प्राभाकरं चेत्युभयं विवक्षितम् ।

शास्त्रीये वस्तुनि लौकिकव्यवहारसमारोपमुदाहरति । सालंकारेति । अलंकारैरुपमादिभिः । कटकादिभिश्च सहिता सालंकारा । लसद्वर्णा मधुराक्षरा मनोज्ञका-

---

१ °शास्त्रीयवस्तूनि R., P.; R. drops अत्रालंकार. २ °सिद्ध P., R. ३ सालंकारलसद्वर्णसु° P. ४ °शास्त्रीयवस्तूनि P. ५ भारताख्यलौकिकव्यवहार° R. ६ वस्तुनिगमम् for श्रुतिमात्रम् t. ७ वाक्यात्मके t. ८ त्वर्थे t. ९ व्युत्पद्यन्ति t.

समासोक्तौ विशेषणविशेष्ययोर्द्वयोरुपादानाभावाच्छ्लेषाद्विशेषः ।

अन्येषामप्यलंकाराणामुक्तिसाम्येऽपि श्लेषगर्भत्वविशेषाद् वक्रोक्तिरुच्यते ।

वक्रोक्त्यलंकारः ।

अन्यथोक्तस्य वाक्यस्य काका श्लेषेण वा भवेत् ।
अन्यथा योजनं यत्र सा वक्रोक्तिर्निगद्यते ॥

यत्र कयाचिद् विवक्षया केनचित्प्रयुक्तस्य वाक्यस्यान्येन विवक्षयान्यथा योजनान्या क्रियते सा वक्रोक्तिः । उक्तिवक्रत्वे कथंचित् संभवत्यप्येवंविधलक्षणाभावात् सर्वालंकारेभ्यो भिद्यते ।

न्तिश्च । सगुणा श्लेषादिगुणयुक्ता गाम्भीर्यादिगुणयुक्ता च । रसेन शृङ्गारादिनानुरागेण च । निर्भरा पूर्णा । काकतीश्वरे विषये । भावोऽभिप्रायः प्रेमा च । तस्यानुबन्धो विच्छेदाभावः । तद्वती भारती वाणी । नायिका तु गम्यते । ननु यत्र श्लिष्टविशेषणसाम्यं तत्र श्लेष एवालंकारः कथमत्र भवतीत्याह । समासोक्ताविति । अप्रकृतविशेष्यस्यापि पृथगुपादाने श्लेषः । तदभावादत्र न श्लेषत्वमिति भावः ।

वक्रोक्तेः संगतिपूर्वं लक्षणमाह । उक्तिसाम्य इत्यादिना अन्यथोक्तस्येति । केनचिदिति शेषः । अन्यथा योजनमिति । अपरेणेति शेषः । तदेतद् व्याचष्टे । यत्रेति । सर्वेभ्यो भेदमाह । उक्तीति । वक्रत्वे वैचित्र्यम संभवत्यपीति । सर्वालंकारेष्विति शेषः । विचित्रमात्रवाचिनो वक्रशब्दस्योक्तिविशेषे पर्यवसानात्

---

१ अन्येषामलंकाराणाम् is omitted in R. २ °र्निरूप्यते T'., M. ३ केनचिद्युक्तस्य P.; केनचित्प्रयुक्त° M. ४ R. omits अन्येन. ५ °नान्यथाविवक्षया P., M. ६ M. drops अन्या. ७ वैलक्षण्यम् M.

काका यथा ।

[1]बहुवल्लहो खु राआ[2] सहि तस्स सिरिम्मि[3] णिब्भरासत्ती[4] ।
णूणा[5] सिरिप्पवि[6] तुमं अप्पाणं किं णु[7] लहुएसि ॥ ११० ॥

अत्र त्वमपि श्रियो न्यूनगुणा न भवसि[8] । अतस्त्वय्यपि नृपतिरासक्त एवेति किमित्यात्मानं लघूकरोषीति काका प्रतीयते ।

श्लेषेण यथा ।

कस्ते सुन्दरि वर्तते हृदि सदा राजा किमिन्दुर्न हि
क्षोणीभृत्तिलकः सुमेरुरपि[9] किं नो रुद्रदेवो विभुः ।
ईशः किं सखि सत्यमात्थ सुभगे त्वं गोत्रसारोद्भवे-
त्याल्यां सल्वपहासवाचि[10] विरहं किंचिद्वधूर्व्यस्मरत् ॥ १११ ॥

सर्वविलक्षणत्वामिति भावः । काकुमूलां वक्रोक्तिमुदाहरति । बह्विति । अप्पाणमित्यत्र ‘आत्मनि पः’ इति सूत्रेणात्मशब्दे युक्तवर्णस्य पकारादेशः । अत्र प्रथमार्धे नायिकया संभावितस्यात्मन्यूनत्वस्य द्वितीयार्धे सेर्ष्यां श्रियो न्यूनेत्यत्र काका निषेधयोजनाद् वक्रोक्तिः ।

श्लेषमूलामुदाहरति । क इति । अत्र सखीनायिकयोरुक्तिप्रत्युक्तितया[12] वाक्यानि योजनीयानि । राजा नृपश्चन्द्रश्च । क्षोणीभृत्तिलको राजश्रेष्ठः पर्वतोत्तमश्च । रुद्रदेवः प्रतापरुद्रो रुद्रश्च । सत्यमात्थ ब्रूषे । गोत्रसारोद्भवा सत्कुलप्रसूता पर्वतराजपुत्री च । अपहासप्रधाना वाचो यस्यास्तस्यामपहासवाचि विरहं वियोगदुःखं किंचिद् व्यस्मरत् ।

छाया ।

1 बहुवल्लभः खलु राजा सखि तस्य श्रियां निर्भरासक्तिः ।
न्यूना श्रियोऽपि त्वमात्मानं किं नु लघयसि ॥

१ क्खु P. २ राओ M. ३ सिरिए M. ४ णिमिरा° P. ५ नूणा T'. ६ वि यं M. ७ किं पु P. ८ त्वमपि न्यूना न भवसि R. ९ स मेरु° R. १० सानुपहास° P. ११ सखया t. १२ °प्रयुक्तिकतया t.

अथ स्वभावोक्तिः ।

स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् ।

यत्र चारुतया वस्तुनो यथावद्वर्णनं निबध्यते [1]सा स्वभावोक्तिः ।

यथा ।

मदश्च्युता नर्त्तितकर्णताल-
मुद्धूतमूर्ध्ना त्रिपदस्थितेन ।
लोलाग्रहस्तेन गजेन जातो
नित्योत्सवः [2]काकतिवीररुद्रः ॥ ११२ ॥

व्याजोक्त्यलंकारः ।

[3]अथोक्तिसाम्याद् व्याजोक्तिरुच्यते ।
व्याजोक्तिः सा समुद्भूतं [4]वस्तु यत्र निगूह्यते ।

यत्र प्रकाशं वस्तु [5]साम्यगर्भत्वेन निगूहनार्हत्वात् केनचिद् व्याजेन प्रच्छाद्यते व्याजोक्तिः ।

वक्रोक्तिविपर्ययेण स्वभावोक्तिं लक्षयति । स्वभावेति । यत्र चारु सम्यगग्राम्यम् । यथावदन्यूनातिरिक्तेन वस्तुनो वर्णक्रियासंस्थानरूपस्य वस्तुस्वभावस्य कविप्रतिभैकगोचरस्य वर्णनमसौ स्वभावोक्तिः । अत एवेदं ग्राम्यं नालंकार इत्युक्तं दोषप्रकरणे । उदाहरति । मदेति । मदश्च्युता मदस्राविणा नर्त्तितकर्णतालं यथा भवति तथा । उद्धूतमूर्ध्ना कम्पितकुम्भस्थलेन । त्रिभिः पदैः स्थितं स्थितिर्यस्य तेन त्रिपदस्थितेन । अग्रं चासौ हस्तश्चेत्यवयवावयविनोरभेदविवक्षायां विशेषणसमासः । यदाह वामनः । 'हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात्' इति । अत्र क्रियास्वभाववर्णनम् । एवं वर्णसंस्थानयोरुदाहार्यम् ।

व्याजोक्तेः संगतिमाह । उक्तीति । लक्षणमाह । व्याजोक्तिरिति । व्याचष्टे । यत्रेति । प्रकाशं निगूढचरं कुतश्चिन्निमित्तात् प्रकटमित्यर्थः । अत्र वस्त्वन्तर-

---

१ R. omits सा. २ काकतिरुद्रदेवः R. ३ R. omits अथ. ४ यत्र वस्तु R.
५ साम्यगर्भनिगूहनार्थम् P.

क्षोणीपाणिग्रहणसमये संभवद्रोमहर्षे
सर्वाङ्गीणे नृपतितिलकः काकतीयान्वयेन्दुः ।
धीरोदात्तः शिशिरसलिलैः किं नु राज्याभिषेकः
कर्तव्यः स्यादिति मृदु हसन् वीक्षते मन्त्रिवृद्धान् ॥११३॥

अत्र क्षोणीपाणिग्रहणजनितं[1] [2]रोमहर्षं धीरोदात्ततया प्रतापरुद्रदेवेन महाभिषेकसलिलशैत्यव्याजेन प्रच्छादयता मन्त्रिणो वीक्ष्यन्ते ।

मीलनालंकारः ।

[3]व्याजोक्त्युत्तरं किंचित्साम्यान्मीलनमुच्यते ।
मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम् ॥

यत्र वस्तुना वस्त्वन्तरं प्रच्छादितं भवति स मीलनालंकारः । स द्विविधः । सहजेनागन्तुकतिरोधानमागन्तुकेन सहजतिरोधानं [4]च ।
यथाक्रम[5]मुदाहरणम् ।

उग्रैः काकतिवीररुद्रनृपतेर्दोर्दण्डविस्फूर्जितै-
र्युद्धप्राङ्गण[6]वर्जितेषु पतिषु क्वापि प्रलीनात्मसु ।
विष्वक्तीव्रतरज्वरजुषामङ्गे द्विषद्योषितां
[7]संक्रान्तोऽपि न लक्ष्यते पथि महानूष्मा चिरं मारवः ॥ ११४ ॥

अक्षेपरूपस्य व्याजस्य वचनाद् व्याजोक्तिरित्यर्थः । उदाहरति । क्षोणीति । सर्वाण्यङ्गानि व्याप्नोतीति सर्वाङ्गीणः । 'तत्सर्वादेः' इति खप्रत्ययः । अत्र निगूढः क्षोणीपाणिग्रहणजन्यो हर्षो रोमहर्षेण प्रकाशितः सलिलशैत्येनाच्छाद्यत इत्याह । अत्रेति । धीरोदात्ततया गाम्भीर्येणाच्छादितस्यापि हर्षस्य मृदुहासेन पुनः प्रकाशनं लक्षणान्तःपातीति रहस्यम् ।

मीलनं संगमयति । व्याजोक्तीति । लक्षयति । मीलनमिति । उत्कृष्टवस्तुनापकृष्टवस्तुनिगूहनं मीलनमित्यर्थः । अत एव गुणसामान्यनिबन्धनात् सामान्यादस्य भेद इति द्रष्टव्यम् । सहजेनागन्तुक[8]तिरोधानमुदाहरति । उग्रैरिति । दोर्दण्डविस्फूर्जितैः भुजविजृम्भितैः । युद्धप्राङ्गणवर्जितेषु वर्जितयुद्धप्राङ्गणेष्वित्यर्थः । 'वाहिताग्न्यादिषु' इति परनिपातः । लक्षणं योजयति । अत्रेति ।

---

१ °ग्रहणसमयजनितम् T'.; °परिग्रहणजनितम् M. २ रोमहर्षणम् T'. ३ व्याजोक्त्या किंचित्साम्यात् M. ४ T'. and M. omit it. ५ °मुदाहरणे P. ६ °तर्जितेषु R. ७ संक्रान्तो न हि P. ८ °तिरोधानं लक्षयति t.

अत्र सहजेन रिपुकामिनीगतेन स्तनजोष्मणा मार्गश्रमादागन्तुको मरूष्मा तिरोधीयते ।

तथा ।

> प्रतापरुद्रस्य भुजप्रभावा-
> दन्तर्भयाद्भूमिभुजामजस्रम् ।
> स्वेदाश्रुकम्पाद्युदयेऽप्यनङ्ग-
> मोह्यां स्त्रियः प्रेम्णि न विश्वसन्ति ॥ ११५ ॥

अत्र भयजनितेन कम्पादिनागन्तुकेन सहजस्य प्रेमजनितस्य कम्पादेस्तिरोधानम् ।

सामान्यालंकारः ।

सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता ।

यत्र कस्यापि वस्तुनो गुणसाम्येन वस्त्वन्तरैकात्म्यं भवति स सामान्यालंकारः ।

यथा ।

> कैलासदुग्धार्णवयानहंसे-
> ष्वलक्षितेष्वन्ध्रनरेन्द्रकीर्तौ[2] ।

आगन्तुना सहजतिरोधानमुदाहरति । प्रतापेति । भुजप्रभावात् पराक्रमात् भयहेतोः । अन्तर्गतं भयमन्तर्भयमाकारगोपनेनानभिव्यक्तमित्यर्थः । तस्माद्धेतोः भूमिभुजां संबन्धिनि प्रेम्णि विषये न विश्वसन्ति । प्रेममूलानामपि स्वेदादीनां भयानुभावत्वशङ्कयेति भावः ।

मीलनसाधर्म्यात् तदनन्तरं सामान्यं लक्षयति । सामान्यमिति । यत्र गुणसाम्यात् प्रस्तुतस्य वस्तुनोऽप्रस्तुतवस्त्वन्तरैकात्म्यं निबध्यते तत् समानगुणसंबन्धात् सामान्यमित्यर्थः । कैलासेति । प्रथमे पुमांसः शिवकेशवधि-

---

१ यत्रैकस्य वस्तुनो T'. २ °कीर्त्यां B. १ भयमूलभावशङ्कयेति t.

न्यः पुमांसः प्रथमे स्मयन्ते
स्वसेवकान् संभ्रमतो विलोक्य ॥ ११६ ॥

अत्र प्रतापरुद्रकीर्त्यां जगत्सु विजृम्भितायां कैलासप्रभृतीनां विमलवस्तूनां तदैकात्म्यम् ।

तद्गुणालंकारः ।

इतरगुणसंनिधानातिशयसाम्यात् तद्गुण उच्यते ।

तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः ।

यत्र न्यूनं स्वगुणं विहाय संनिहितवस्तुनः सकाशादुत्कृष्टगुणः स्वीक्रियते स तद्गुणालंकारः ।

यथा ।

प्रतापरुद्रदेवाङ्घ्रिनखज्योत्स्नाविजृम्भितैः ।
नमन्नृपतिमाणिक्यमौलयः शुचयः कृताः ॥ ११७ ॥

अत्र प्रणमतां भूपतीनां पद्मरागमुकुटाः स्वां शोणप्रभां मुक्त्वा काकतिवीररुद्रपदनखज्योत्स्नागतं धवलिमानमुद्वहन्ति स्म ।

अतद्गुणालंकारः ।

[illegible] । संभ्रमतः संभ्रान्ततः कश्चिदप्यनवतिष्ठमानान् स्मयन्ते मन्दं हसन्ति । लक्षणं योजयति । अत्रेति ।

तद्गुणं संगमयन् कथयति । तद्गुण इति । मीलने वस्त्वन्तरनिगूहनम् । इह पुनरनिगूहितस्यान्यगुणेनोपराग इत्यनयोर्भेद इति सर्वस्वकारहृदयम् । तस्याप्रकृतस्य गुणोऽस्यास्तीति तद्गुणः । उदाहरणं स्पष्टम् ।

---

१ नमन्तु देवाः प्रथमम् R. २ कैलासादिविमलवस्तूनाम् P. ३ तादात्म्यम् R. ४ °गुणग्रहः M. ५ °मौक्तिकाः R. ६ भूमिपतीनाम् T'. ७ °पादनख° R. ८ °ज्योत्स्नाधवलिमानं भजति P. ९ °स्यान्यस्य t. १० कविहृदयम् t.

तत्प्रातिपक्ष्यादतद्गुणो निरूप्यते ।

सति हेतावसद्रूपस्वीकारः स्यादतद्गुणः ।

अत्र संनिधानरूप[2]हेतौ सत्यप्यन्यगुणस्वीकारो नास्ति असावतद्गुणालंकारः ।

यथा ।

ईशानं समया जगत्यटति तल्लीलाट्टहासोज्ज्वले
दैत्यारिं परितस्तदङ्गविलसन्नीलद्युतिद्योतिते[3] ।
ब्रह्माणं निकषा च तत्तनुमिलत्स्वर्णप्रभाभास्वरे
पुष्णन् रुद्रनरेन्द्रकीर्त्तिविभवः स्वामेव शुभ्रां छविम् ॥११८॥

अत्र हरिहरविरिञ्चीनां समीपवर्तिषु जगत्सु तत्तन्नानाप्रभासमग्रेष्वपि निरन्तरं विहरमाणस्य प्रतापरुद्रयशसो निरङ्कुशः स्वकीय एव धवलिमा विजृम्भते ।

विरोधालंकारः ।

अतद्गुणे किंचित् प्रक्रान्तत्वाद् विरोधस्य विरोधालंकारो निरूप्यते ।

आभासत्वे विरोधस्य विरोधालंकृतिर्मता ।

यत्र प्रथममाभासतया प्रतीतो विरोधः पर्यवसाने परिह्रियते स विरोधालंकारः । तत्र जातेर्जात्यादिना सह विरोधे चत्वारो भेदाः । क्रियायाः क्रियागुणद्रव्यैः सह विरोधे त्रयो भेदाः । गुणस्य गुणद्र-

---

अतद्गुणमाह । तत्प्रातिपक्ष्यादित्यादिना । ईशानमिति । अत्रेशानादिसमीपवर्तिनि तत्तद्वर्णविशिष्टे जगति कीर्तिविभवः स्ववर्णमजहदेवाटतीत्यर्थः । अत एवातद्गुण इत्याह । अत्रेति । ईशानमित्यादौ ‘अभितः परितः—’ इत्यादिना द्वितीया ।

विरोधं संगमयति । अतद्गुण इति । विरोधस्य सत्यपि संनिधानेऽन्यगुणस्वीकाराभावलक्षणस्येत्यर्थः । लक्षयति । आभासत्व इति । व्याचष्टे । यत्रेति । अत्र विशेषतो विभागमाह । तत्र जातेरिति । क्रियाधारत्रयो भेदा इति ।

---

१ हेतावतद्गुणस्वीकार॰ R., P. २ ॰रूपे हेतौ R. ३ ॰द्योतितः P. ४ परत्यनुमिलत् M. ५ ॰भासुरे P. ६ हरहरि॰ T'. ७ अतद्गुणेन T'. ८ विरोधाभास इष्यते P. ९ p. drops कीर्त्ति.

भ्याभ्यां विरोधे द्वौ भेदौ । द्रव्यस्य द्रव्येण सह विरोधे एको भेदः । एवं दश विरोधाः ।

जातेर्जात्या क्रियया च यथा ।

> [1]पद्माकरोऽपि विलसति नितरामजडाशयोऽयमुर्वीशः ।
> विमलतरवारिधाराप्यासीद्वैरिक्षितीशतापकरी ॥ ११९ ॥

अत्र पूर्वार्धे जात्योर्विरोधः । कमलाकरोऽप्यजडाशय इति विरोधात् । उत्तरार्धे जातिक्रिययोर्विरोधः । विमलतरवारिधारायाः संताप[2]करणविरोधात् । अत्र श्लेषमूलो विरोधः ।

जातेर्गुणद्रव्याभ्यां विरोधो यथा ।

> अमदः सार्वभौमोऽपि भास्वानपि कलानिधिः ।
> वीररुद्रनरेन्द्रोऽयमद्भुतानां विहारभूः ॥ १२० ॥

अत्र सार्वभौमोऽप्यमद इति जातिगुणयोर्विरोधः । भास्वानपि कला-

जात्या सहैतस्या विरोधस्य जातेरेतया विरोधेन गतार्थत्वादिति भावः । एवं यथोत्तरमेकैकन्यूनता द्रष्टव्या । अत्रायं संग्रहः ।

> 'क्रमाज्जातिगुणद्रव्यक्रियाणां तत्पदादिभिः ।
> विरोधे दश भेदाः स्युश्चतुस्त्रिद्व्येकभेदतः ॥' इति ।

पद्माकर इति । पद्माकरः सरोऽप्यजडाशय इति डलयोरभेदाज्जलाशयो जलस्थानं न भवतीति विरोधस्य लक्ष्मीनिवासोऽ[3]यममन्दबुद्धिरिति परिहारः । विमलतरा अतिनिर्मला वारिधारापि तापकरीति जातिक्रिययोर्विरोधस्य तरवारिरायुधविशेषस्तस्य धारा कोटिरिति परिहारः । सर्वत्रापिशब्दो विरोधद्योतकः । नायमौद्भटानामिव विरोधबाधकः श्लेषः किं तु श्लेषविरोधयोरङ्गाङ्गिभावेन संकर इत्यभिप्रायेणाह । अत्र श्लेषमूलो विरोध इति । उत्तरत्राप्येवंविधोदाहरणेष्वेवमेव [4]विरोध इति द्रष्टव्यम् ।

अमद इति । सार्वभौमो दिग्गजोऽप्यमदो मदरहित इति जातिगुणयोर्विरोधः सर्वभूमीश्वरोऽपि निरहंकार इति परिह्रियते । भास्वान् सूर्योऽपि कला-

---

१ कमला° P. २ संतापकारण° P. ३ यं मन्द° t. ४ t, drops विरोध इति.

निधिरिति जातिद्रव्ययोर्विरोधः । कलानिधेरेकत्वाद् द्रव्यत्वम् । अत्रापि श्लेषमूलता ।

क्रियायाः क्रियाविरोधो यथा ।

धर्मद्विषामर्थमुपां च भङ्ग-
मुत्पादयन् काकतिवीररुद्रः ।
त्रिवर्गसाधारणगोचरोऽपि
करोति कामद्विषि भावमार्द्रम् ॥ १२१ ॥

अत्र त्रिवर्गसाधारणवृत्तेर्धर्मार्थविरोधिषु भङ्गकरणं कामारौ स्नेहकरणं च विरुद्धम् ।

क्रियाया गुणद्रव्याभ्यां विरोधो यथा ।

एष जिष्णुविहारोऽपि गोत्रवात्सल्यलालसः ।
करोति कमलोल्लासं राजाप्यन्ध्रनरेश्वरः ॥ १२२ ॥

अत्र जिष्णुविहारस्य गोत्रवात्सल्यमिति क्रियागुणयोर्विरोधः । कमलोल्लासं कुर्वन्नपि राजेति क्रियाद्रव्ययोर्विरोधः । अत्रापि श्लेषमूलतैव ।

गुणस्य गुणेन विरोधो यथा ।

निधिश्चन्द्र इति जातिद्रव्ययोर्विरोधः तेजस्वी चतुःषष्टिकलाकुशल इति परिह्रियते ।

धर्मद्विषामिति । त्रयाणां धर्मार्थकामानां वर्गस्त्रिवर्गः । 'त्रिवर्गो धर्मकामार्थैः' इत्यमरः। त्रिवर्गः साधारणो वैषम्यरहितः गोचरः सेव्यत्वेन विषयो यस्य स तथोक्तः । 'न बाध्यतेऽस्य त्रिगुणः परस्परम्' इति भावः । कामद्विषि कामपुरुषार्थद्वेषिणि स्मरहरे च । अत एव क्रिययोर्विरोधः समाधीयत इत्याह । अत्र त्रिवर्गेति । पूर्वत्र द्वयोरपि विरोधिनोः श्लिष्टत्वमत्र पुनरेकस्यैवेति विशेषः ।

एष इति । जिष्णोरिन्द्रस्य विहार इव विहारो व्यापारो यस्य स तथोक्तः । तथापि गोत्रवात्सल्यलालसः पर्वतानुरक्त इति क्रियागुणौ विरुद्धौ । जयशीलव्यापारः कुलानुकूलश्चेति समाहितौ । राजा चन्द्रोऽपि कमलोल्लासं करोतीति विरोधस्य क्रियाद्रव्यगतस्य नृपतिर्लक्ष्मीविलासमिति परिहारः ।

---

१ °मापादयन् P., B. २ कामद्विषि M₁.

[1]रञ्जंतो भुवणमिणं राएत्ति जए सलाहणिज्जो सि ।
रुद्द णरिंद कहं सो [2]रत्ता वि अ [3]पंडुरा जाआ ॥ १२३ ॥

अत्र रक्तत्वपाण्डुरत्वयोर्विरोधः ।

गुणस्य द्रव्येन विरोधो यथा ।

ज्वलत्प्रतापरौद्रोऽपि काकतीयनरेश्वरः ।
भूत्वा जैवातृको भाति शश्वद्विश्वप्रियंकरः ॥ १२४ ॥

अत्र प्रतापरौद्रोऽपि जैवातृक इति गुणद्रव्ययोर्विरोधः ।

द्रव्यस्य द्रव्येन विरोधो यथा ।

विभाति काकतीन्द्रोऽयं रुद्रोऽपि चतुराननः ।
तथा च विष्णुरित्येष कथ्यते पुरुषोत्तमः ॥ १२५ ॥

एवं दश भेदा दर्शिताः ।

अयमश्लेषेणापि भवति यथा ।

रञ्जन्त इति । 'न्तमाणौ शतृशानचोः' इति शतन्तादेशः । 'सलाहणिज्जोसि—' इत्यत्र 'अः क्ष्माश्लाघयोः' इति श्लाघाशब्दे युक्तवर्णस्य विप्रकर्षः । पूर्वस्याकारयुक्तता चेति वेदितव्यम् ।

ज्वलदिति । प्रतापरुद्रोऽपि जैवातृकश्चन्द्र इति गुणद्रव्ययोर्विरोधः । जैवातृक आयुष्मानिति परिहारः ।

विभातीति । रुद्रोऽपि चतुराननो ब्रह्मेति जिष्णुरिन्द्रोऽपि पुरुषोत्तमो विष्णुरिति च द्रव्ययोर्विरोधो रुद्र इति नामादिभिः प्रसिद्धैरर्थान्तरैः परिह्रियते ।

छाया ।

1 रञ्जयन् भुवनमिदं राजेति यया श्लाघनीयोऽसि ।
रुद्र नरेन्द्र कथं सा रक्तापि च पाण्डुरा जाता ॥

१ सलाह° P. २ सा रता P. ३ पंडरा P. ४ t. has before this रञ्जयन् भुवनमिदं &c.

स्वभावशिशिरा दृष्टिरपि काकतिभूपतेः[1] ।
सर्वाङ्गतापिनी जाता प्रतिपक्षमहीभृताम्[2] ॥ १२६ ॥

अत्र स्वभावशिशिरापि तापिनीति विरोधः ।

विशेषालंकारः ।

अथ विरोधगर्भालंकारा निरूप्यन्ते ।

आधाररहिताधेयमेकं चानेकगोचरम्[3] ।
अशेषवस्तुकरणं विशेषालंकृतिस्त्रिधा ॥

यत्राधारमन्तरेणाधेयो निबध्यते स एको विशेषः । एकस्यानेकगोचरत्वे द्वितीयो विशेषः । प्रकृतादशक्यवस्त्वन्तरकरणे[4] तृतीयः ।

यथाक्रममुदाहरणानि ।

नलनहुषदिलीपधर्मपुत्र-
प्रभृतिनरेश्वरसंश्रिता[5] यशश्रीः ।
अद्यदिनमधुनाप्युपेत्य[6] मैत्रीं
विलसति काकतिवीररुद्रकीर्त्या ॥ १२७ ॥

अत्र प्राचां भूपतीनामाधारभूतानां तिरोधानेऽप्याश्रितायाः कीर्तेरवस्थानम्[7] ।

स्वभावेति । शैत्यसन्तापयोर्गुणयोरश्लिष्टयोर्विरोधो विषयभेदेन परिह्रियते । विरोधमूलेष्वनेकभेदं विशेषमाह । आधारेति । प्रसिद्धाधाररहितत्वाधेयमेकं परिमितं वस्तु युगपदेवानेकगोचरं तथा किंचिद् वस्त्वारभमाणस्तेनैव यत्नेनाशक्यवस्त्वन्तरमारभत इति त्रयो विशेषभेदाः । क्रमेणोदाहरति । नलेति । अधुनापि नलादीनामभावसमयेऽपीत्यर्थः । नलादिसदृशकीर्तिरयं राजेति भावः । योजयति । अत्रेति ।

---

१ °भूभुजः R., M. २ °महीक्षिताम् R. ३ चानेक° R. ४ प्रकृतस्याशक्य° R. ५ °संश्रिता R. ६ °मधुनाप्यपैति R. ७ कीर्त्या अवस्थानम् M.

[1] तथा च ।

> पश्यन्तो भयविह्वलाः प्रतिनृपाः पश्चात् पुरः पार्श्वयो-
> रप्यन्तर्बहिरन्ध्रपार्थिवपतिं प्रोत्क्षिप्तकौशेयकम्[2] ।
> निःसीमोल्बणधावनव्यतिकरभ्रश्यद्घोरायुधाः
> [3]शैलाच्छैलमटन्ति कम्पविगलद्गाम्भीर्यशौर्यश्रियः[4][5] ॥१२८॥

अत्र भयभ्रान्तानां शत्रुनृपतीनां[6] प्रतापरुद्रनृपतिरेकोऽप्यनेकत्र प्रतीयते ।

तथा च ।

> अपारकरुणानिधेः सदसि वीररुद्रप्रभोः
> प्रसादमधुरक्रमा लगति यत्र दृष्टिर्जने ।
> अतीन्द्रमतिकिंनराधिपमतीपलोकोन्नतं
> न किं किमधितिष्ठति त्रिभुवने स सर्वाधिकः ॥ १२९ ॥

अत्र साधारणो जनः प्रतापरुद्रदृष्टिप्रसादपात्रीकृतः किं किं न लभत इत्यत्रान्यवस्त्वन्तरकरणम् ।

अधिकालंकारः ।

आधाराधेयवैचित्र्यादधिकालंकारो निरूप्यते ।

आधाराधेययोरानुरूप्याभावोऽधिको[7] मतः ।

पश्यन्त इति । धावनव्यतिकरः पलायनसंबन्धः । कम्पेति । कम्पेन विगलन्त्यौ मूर्तद्रव्यवत् पतन्त्यौ गाम्भीर्यशौर्यश्रियौ येषां ते तथोक्ता इत्यतिशयोक्तिः । योजयति । अत्रेति ।

अपारेति । सदस्यास्थाने यत्र जने साधारणे प्रसादमधुरक्रमा प्रसन्नेत्यर्थः । दृष्टिर्लगति स जनः सर्वाधिको लोकोत्तरः सन्नलौकिकं वैभवमनुभवतीत्यर्थः । अत्र पृथग्जनेऽपि प्रसादमारभमाणा दृष्टिरैश्वर्यापिशिष्टतामारभते[8] किमु किमुत विशिष्टे जन इत्यर्थापत्तिर्व्यज्यते ।

संगतिपूर्वकमधिकं लक्षयति । आधारेत्यादिना । तस्य द्वेधा विभागमाह ।

---

१ यथा M.; तथा च R. २ °कौशेयके: T'. ३ शैलाः शैल° M. ४ °विलसद्° T'. ५ °शौर्यक्रियाः P., M. ६ P. drops शत्रुनृपतीनाम्. ७ °रूप्याभावेऽधिको° R. ८ °विशिष्टतां विधत्ते t.

यत्राश्रयाश्रयिणोरानुरूप्यं नास्ति सोऽधिकालंकारः । स द्विविधः । आश्रयस्याल्पत्वमहत्त्वाभ्याम् ।

प्रथमो यथा ।

> स्तोके ब्रह्माण्डखण्डे विपुलतरतया स्वैरसंचारहे[2]ला-
> संकोचादेकराशीर्भ[3]वदतुलरुचौ काकतीन्द्रस्य कीर्त्तौ ।
> एतैः प्रालेयपृथ्वीधररजतगिरिस्वर्णदीशीतभानु-
> क्षीराम्भोराशिमुख्यैः प्रकटितमधुना तद्घनीभावरूपम् ॥१३०॥

अत्राश्रयस्य [4]रोधःकुहरस्याल्पत्वम् । आश्रितस्य [5]प्रतापरुद्रयशसो वैपुल्यम् ।

द्वितीयो यथा ।

> क्वापि क्वापि कलिङ्गमालवमहाराष्ट्राङ्गवङ्गादयो
> भूपास्तादृशसैन्यवैभवसमाक्रान्ताखिलाशान्तराः ।
> लीनाः काकतिवीररुद्रनृपतेर्व्यूहप्रपञ्चश्रि[6]या
> निःसीमे बलवारिधौ विदधते पूर्त्तिं न कोणेऽप्यहो ॥ १३१ ॥

स इति । आद्यमुदाहरति । स्तोक इति । स्वैरसंचारस्य स्वेच्छाविहारस्य हेलाया विस्रम्भस्य संकोचात् । प्रालेयपृथ्वीधरादिभिस्तद्घनीभावरूपं प्रकटितम् । अत्राधारे ब्रह्माण्डेऽल्पतमे आधेयायाः कीर्त्तेराधिक्येन संचारसंकोचात् तत्र तत्र पिण्डीभूताः कीर्त्तिखण्डा एवामी न तु हिमाचलप्रभृतय इत्यनयोरानुरूप्याभावः ।

द्वितीयमुदाहरति । क्वापीति । व्यूहानां मकरादिसंज्ञितानां सेनासंनिवेशविशेषाणां प्रपञ्चस्य श्रिया समृद्ध्या निःसीमे उद्वेले बलवारिधौ कलिङ्गमालवादिसेनाः सेवार्थमागताः सरित इव समुद्रे यत्र कुत्रापि कोणे विलीयन्त इत्यर्थः ।

१ °पो T'. २ °लीला° R. ३ °भवदतनुरुचः M. ४ रोदःकुहरस्य M. ५ °रुद्रयशसो R. ६ °श्रियो M.; °श्रियाम् R.

येनाश्रयस्य प्रतापरूद्रसैन्याम्बुधेर्वैपुल्यम् । आश्रितानामङ्गवङ्गकेलिङ्गप्रभृतिराजकानीकिनीनामल्पत्वम् ।

अथ विभावनाविशेषोक्तिश्च ।

कारणेन विना कार्यस्योत्पत्तिः स्याद् विभावना ।
तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते ॥

यत्र प्रसिद्धकारणपरित्यागेन कार्यस्योत्पत्तिर्निगद्यते सा विभावना । यत्र कारणसाकल्ये सत्यपि कार्यस्यानुत्पत्तिः सा विशेषोक्तिः ।

यथा ।

प्रतापरुद्रेण पराजितानां
प्रत्यर्थिनां विन्ध्यगुहागतानाम् ।
तमांस्यरात्रीणि समुद्भवन्ति
तेजांसि घस्रेष्वपि नोद्भवन्ति ॥ १३२ ॥

अत्राधारस्याधिक्यमाधेयस्याल्पत्वं च न प्रमाणविरुद्धं किं तु महोदनमध्ये भिक्षाकवल इव नानुरूपम् । अत एवोक्तम् । आधाराधेययोरानुरूप्याभाव इति ।

अत्रानुरूप्यसारूप्यादधिकानन्तरं विभावनां तद्विपर्ययरूपां विशेषोक्तिं चोदाहरणलाघवार्थं युगपल्लक्षयति कारणेनेत्यादिना । यदि कारणमात्रेण विना कार्योत्पत्तिरुच्यते तदा विरोधो दुष्परिहारः स्यात् । कारणान्वयव्यतिरेकानुविधायित्वात् कार्यस्येत्यतस्तत्परिहारार्थमाह । प्रसिद्धेति । अत एव वैशिष्ट्येन कार्यस्य भावनाद् विभावना । साकल्य इति । कारणानामिति शेषः । अत्रापि विरोधपरिहारार्थं सामग्रीवैगुण्यमुन्नेयम् । विभावनायां कार्योत्पत्तौ विरोधः विशेषोक्तौ कारणसत्तायामित्युभयविरोधानुप्राणिताद्विरोधादेकैकविरोधानुप्राणितयोरनयोर्भेदः । उदाहरति । प्रतापेति । अविद्यमाना रात्रिः प्रसिद्धकारणं येषां तान्यरात्रीणि । तमांस्यन्धकारा मोहाश्च । घस्रेषु दिनेष्वपि । तेजांसि प्रकाशा

---

१ आश्रयस्य P. २ R. drops कलिङ्ग. ३ °प्रभृतीनाम् P. ४ °राजानीकिनी° R. ५ °स्योत्पत्तिस्तु P.; M. ६ यत्र च कारणे P., M. ७ नो भवन्ति M. ८ वृद्धिविरोधः t. ९ °सन्तानानामि° t.

अत्र तमःप्रादुर्भावस्य प्रसिद्धकारणं रात्रिः । तया विनापि तस्योत्पत्तिर्निबद्धा । अप्रसिद्धं कारणं शोकाद्यस्त्येव । तथाहस्सु कारणेषु सत्स्वपि तेजसोऽनुत्पत्तिरिति । निष्प्रतापत्वादिनिमित्तमस्त्येव ।

असंगत्यलंकारः ।

कार्यकारणविरोधप्रस्तावादसंगतिरुच्यते ।

कार्यकारणयोर्भिन्नदेशत्वे सत्यसङ्गतिः ।

यत्रैकदेशवर्तिनोरपि कार्यकारणयोर्भिन्नदेशस्थितिर्निबध्यतेऽसावसंगत्यलंकारः ।

यथा ।

बिभ्रत्युर्वीधुरां गुर्वीं वीररुद्रनरेश्वरे ।
भवन्त्यतितरां शश्वन्नम्राः सामन्तमौलयः ॥ १३२ ॥

अत्र रोदसि भूभारः शत्रुषु नमनमिति ।

विचित्रालंकारः ।

विरोधप्रस्तावाद्विचित्रं निरूप्यते ।

विचित्रं स्वविरुद्धस्य फलमाहर्तुमुद्यमः ।

विवेकाश्च । योजयति । अत्रेति । अत्र तमसां द्वैविध्येऽप्यभेदाध्यवसायादेकत्वमतिशयोक्त्या । सा चास्यामव्यभिचारिणीति न तद्बाधेनास्या उत्थानम् । अपि तु तदनुप्राणितत्वेनेत्यादिविशेषा अवान्तरभेदाश्च सर्वस्वे द्रष्टव्याः ।

असंगतेः संगतिपूर्वकं लक्षणमाह । कार्येत्यादिना । धूमाग्न्योरिव कार्यकारणयोः समानदेशत्वं न्यायसिद्धं तदन्यथाकृतं चेदुचितसंगतिनिवृत्तेरसंगतिनामालंकारः । उदाहरति । बिभ्रतीति । स्पष्टम् ।

विचित्रं संगमयन् लक्षयति । विरोधेत्यादि । स्वस्य हेतोर्विरुद्धस्य विपरीतस्य फलस्याहर्तुमुद्यम उत्साहो विचित्रालंकारः । न चेदं विषमाद्भे-

---

१ तथाहःसु रविकिरणेषु सत्स्वपि T'. २ अत्र निष्प्रताप° T'., M. ३ °र्निगद्यते R ४ पार्श्वे नम्राः T'. ५ राज्ञो T'. ६ अन्यत्र तु नमनम् R.; अन्यत्र शत्रुषु नमनमिति T'., M. ७ °मित्यतिशयोक्तिः t. ८ विपिनम् t. ९ भ्रायम् t.

यत्र स्वविरुद्धफलप्राप्त्यर्थमुद्योगः क्रियते स विचित्रालंकारः।

यथा।

प्रतापरुद्रनृपतेरग्रे दूरान्नरेश्वराः।
अवरोहन्ति हस्तिभ्यस्तानारोढुमनर्गलम्॥ १३४॥

अत्रारोढुमवरोहन्तीति विपरीतफलप्राप्त्यर्थं प्रयत्नः।

अन्योन्यालंकारः।

अथान्योन्यं निरूप्यते। तस्यापि विरोधमूलता।

तदन्योन्यं मिथो यत्रोत्पाद्योत्पादकता भवेत्।

यत्र परस्परं क्रियाद्वारकमुत्पाद्योत्पादकत्वं तदन्योन्यालंकारः।

यथा।

आरोहता रुद्रनरेश्वरेण
विराजते काकतिराजपीठम्।
आरुह्य तेनोज्ज्वलरत्नभाजा
राजापि लक्ष्मीमधिकां बिभर्ति॥ १३५॥

अत्र प्रतापरुद्रभद्रासनयोरन्योन्यालंकारालंकार्यत्वम्।

विषमालंकारः।

अथ विरोधमूलो विषमालंकारः कथ्यते।

वेऽन्तर्भवति। इह हि स्वनिषेधो वैपरीत्यं गमयति। विषमे तु व्यत्यय इति भेदस्य सूचकेनोक्तत्वात्। उदाहरति। प्रतापेति। योजयति। अत्रेति। अन्योन्यं निरूपयति। अथेत्यादिना। विरोधमूलतेति संगतिकथनम्। क्रियाद्वारकमिति साक्षात् परस्परजन्यजनकभावस्य विरुद्धत्वादिति भावः। आरोहतेति। अत्रालंकारद्वारा रुद्रभद्रासनयोर्जन्यजनकभाव इत्याह। अत्रेति।

१ °प्राप्त्यर्थः M. २ °लंकारः कथ्यते P. ३ राज्यपीठम् M. ४ °पीठः R. ५ M. omits कथ्यते.

विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् ।
विरूपघटना चासौ विषमालंकृतिस्त्रिधा ॥

यत्र कारणाद्विरुद्धकार्यस्योत्पत्तिस्तदेकं विषमम् । अकार्यभूतस्यानर्थस्योत्पत्तिर्द्वितीयम् । विरूपयोर्वस्तुनोः संघटने तृतीयम् ।

प्रथमं यथा ।

राज्ञः काकतिवीररुद्रनृपतेः खड्गात् तमालप्रभा-
दुद्भूतां शरदिन्दुकान्तिधवलां कीर्तिश्रियं पश्यताम् ।
लोकानां मुरवैरिपादकमलाज्जातां वियन्निम्नगां
श्रुत्वा संप्रति विस्मयाद्विरमति प्राप्तानुभावं मनः ॥ १३६ ॥

अत्र नीलवर्णात् खड्गादिन्दुधवलस्य यशसः समुत्पत्तिः ।

द्वितीयं यथा ।

आस्तां जयाशा रिपुभूपतीनां
संग्रामसीमानमुपागतानाम् ।
प्रतापरुद्रस्य विलोकनेन
भ्रश्यन्ति जीवैः सममायुधानि ॥ १३७ ॥

अत्र समरोद्योगफलस्य न केवलं जयस्यानुत्पत्तिर्यावज्जीवितभ्रशरूपानर्थोत्पत्तिरपि ।

संगतिपूर्वकं विषमं लक्षयति । विरुद्धेति । कारणविरुद्धकार्यस्येत्यर्थः । अनर्थस्य वेति । उत्पत्तिरिति शेषः । आद्यमुदाहरति । राज्ञ इति । अनुगतो भावो दार्ष्टान्तिकधर्मो यस्यासावनुभावो दृष्टान्तः प्राप्तानुभावमनुभूतदृष्टान्तं लोकानां मनो विस्मयात् विरमति । अद्वितीयमेव वस्तु विस्मयावहं न पुनः सद्वितीयमिति भावः । 'जुगुप्साविराम—' इत्यादिना विस्मयादिति पञ्चमी । योजयति । तत्रेति ।

द्वितीयोदाहरणं स्पष्टम् ।

---

१ सा P. २ °स्तथा R. ३ °स्योत्पत्ती R. ४ तृतीयं विषमम् M. ५ पश्यता R. ६ P. omits इन्दु. ७ °फलस्योत्पत्तौ न केवलं M.; समरोद्योगस्य फलस्य न केवलम् R.; समरोद्योगेन केवलम् P. ८ विजय° R.; M. ९ °नुत्पत्तिः किं त्वायुधाज्जीवभ्रंश° R.

तृतीयं यथा।

क भूपालास्तादृग्विभवमहनीयप्रकृतयः
क चेयं कान्तारस्थितिरशिववृत्त्येकनिलया।
इति प्रेक्षं प्रेक्षं बलभुवि रिपून् रुद्रनृपतेः
प्रतापं श्लाघन्ते शबरपुरवीराः प्रतिदिशम्॥ १३८॥

अत्र महानगरनिवासयोग्यानां राज्ञामशिवानां वनप्रदेशानां विरूपाणां संघटनम्।

एवं विरोधगर्भालंकारा निर्णीताः।

समालंकारः।

अधुना विषमवैधर्म्यात् समं निरूप्यते।

सा समालंकृतिर्योगो वस्तुनोरनुरूपयोः।

यत्रान्योन्यानुरूपपदार्थसंघट्टना क्रियते स समालंकारः।

यथा।

[1]वि[3]ज्जाओ स[4]अलाओ लच्छीए समं प[5]आवरुद्दम्मि।
संघटिऊण [6]सुसरिसं होइ [7]कअच्छो सअं बह्मा॥ १३९॥

तृतीयमुदाहरति। केति। अशिववृत्तानाममङ्गलचरितानामेकनिलयः। प्रेक्षं प्रेक्षं पुनः प्रेक्ष्य। आभीक्ष्ण्ये णमुलि द्विर्भावः। दिशि दिशि प्रतिदिशम्। यथार्थेऽव्ययीभावः। 'अव्ययीभावे शरत्प्रभृतिभ्यः' इति समासान्तः।

अथ विरोधगर्भालंकारान् निगमयन् समालंकारं संगतिपूर्वकं लक्षयति। एवमित्यादिना। विषमवैधर्म्यादिति। विषमतृतीयभेदवैधर्म्यादित्यर्थः। अयं चालंकारः संबन्ध्यमानवस्तुनोः श्लाघ्यत्वाश्लाघ्यत्वाभ्यां द्विविध इत्यनुसंधेयम्। विज्जाओ इति। 'स्त्रियां शस इदोतौ' इति स्त्रीलिङ्गे विद्याशब्दे वर्तमानस्य

छाया।

1 विद्याः सकला लक्ष्म्या समं प्रतापरुद्रे।
संघटय्य सुसदृशं भवति कृतार्थः स्वयं ब्रह्मा॥

१ यथा omitted in R. २ समालंकारो निरूप्यते T'. ३ विज्जाए P. ४ सअलाए P. ५ पआवरुद्देम्मि P. ६ सुसरिसं M. ७ कअथ्यो M. ८ निरूपयन् t.

अत्र प्रतापरुद्रे [2]सकलविद्यानां लक्ष्म्याश्च योगः ।

तुल्ययोगितालंकारः ।

अथ गम्यमानौपम्यालंकारवर्ग[3]प्रस्तावः ।

प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः ।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता ॥

यत्र केवलप्रस्तुतानां केवलाप्रस्तुतानां वा समानधर्मसंबन्धादौपम्यं गम्यं सा तुल्ययोगिता ।

प्रस्तुतानां यथा ।

भद्रासनाध्यासिनि वीररुद्रे
तत्कीर्त्तयश्च द्विपदङ्गनाश्च ।
अनारतं भ्रान्तिविशेषभाजः
प्रतिक्षणं पाण्डुरतां भजन्ते ॥ १४० ॥

अत्र कीर्त्तीनां द्विपदङ्गनानां च प्राकरणिकत्वम् । पाण्डुरतां भजन्त इति समानधर्मः ।

अप्राकरणिकानां यथा ।

शस ओदादेशः । अत्र श्लाघ्ययोः लक्ष्मीसरस्वत्योर्योगः । अश्लाघ्ययोस्तु ‘ धात्रा निम्बफलास्वादे काकलोको हि कल्पितः ’ इत्यादौ द्रष्टव्यः ।

गम्यौपम्यानलंकारान् प्रस्तौति । अथेति । तत्र प्रस्तुताप्रस्तुतव्यासाश्रयां तुल्ययोगितामाह । प्रस्तुतानामिति । केवलमित्युभयत्र संयोज्य व्याचष्टे । यत्रेति । तुल्यस्य योगोऽस्यां संजात इति तुल्ययोगितेत्यर्थः । सा च प्रस्तुतानामप्रस्तुतानां च प्रतिस्वं गुणेन क्रियया च संबन्धे चतुर्विधा । तत्र केवलप्रस्तुतविषयां गुणाश्रयामुदाहरति । भद्रासनेति ।

---

१ °रुद्रेण M. २ R. drops सकल. ३ °प्रस्तावना M. ४ प्रस्तुतानां केवलाप्रस्तुतानाम् M. ५ गम्यते T'. ६ तत्कीर्त्तयस्तु M. ७ अनारतभ्रान्ति° T'. ८ पाण्डरताम् M.

कूर्मेन्द्रपन्नगाधीशा हरित्करिकुलाद्रयः ।
मिथो निःसारतां प्राप्ताः काकतीन्द्रे महीभृति ॥ १४१ ॥

अत्र कूर्मेन्द्रप्रभृतीनामप्राकरणिकत्वम् । निःसारतां प्राप्ता इति समानधर्मः ।

अत्र गम्यमानौपम्यं [2]वैवक्षिकं न वास्तवम् ।

दीपकालंकारः ।

अथ दीपकम् ।

प्रस्तुताप्रस्तुतानां तु सामस्त्ये तुल्यधर्मतः ।
औपम्यं गम्यते यत्र दीपकं तन्निगद्यते ॥

यत्र प्रस्तुताप्रस्तुतानां समस्तानामेव समानधर्मसंबन्धेनौपम्यं गम्यते तद्दीपकम् । तस्य धर्मस्यादिमध्यान्तगतत्वेन त्रैविध्यम् ।

आदिदीपकं यथा ।

अन्योदाहरणमाह । कूर्मेन्द्रेति । हरित्करिणो दिग्गजाः । एवमुभयत्र क्रियाश्रयत्वेनाप्युदाहार्यम् । ननु प्रस्तुताप्रस्तुतविषयस्यौपम्यस्य कथमत्रोपपत्तिस्तत्राह । अत्रेति । केवलप्रस्तुतेषु कस्यचिदुपमानत्वस्य केवलाप्रस्तुतेषु कस्यचिदुपमेयत्वस्य कल्प्यमानत्वादिति भावः ।

अथ प्रस्तुताप्रस्तुतसमाश्रयं दीपकमाह । प्रस्तुतेति । अत्र प्रस्तुताप्रस्तुतानां सामस्त्यमत एवौपम्यं वास्तवमिति तुल्ययोगितातो विशेषः । गम्यत्वं पुनरस्य पूर्ववदत्रापि इवाद्यभावात् । प्राकरणिकाप्राकरणिकमध्ये कुत्रचिन्निविष्टः समानो धर्मः प्रधानोपयुक्तः प्रयाजादिः पुरोडाशस्येवेतरांशस्योपकरोति । अत एव दीपसादृश्यात् दीपकमित्युच्यते । 'संज्ञायां च' इतीवार्थे कन्प्रत्ययः । [3]तत्र विशेषमाह । तस्येति । आदिमध्यान्तगतत्वेन आदिमध्यान्तवाक्यगतत्वेनेत्यर्थः ।

---

१ °गाधीश P. २ न वास्तवं किं तु वैवक्षिकम् T. ३ p. drops तत्र.

[1]भाइ णलेण किअजुअं रहुउलदीवेण सोरिणा तेता[2] ।
दावारो तवजणिणा कलिजुअं[3] वीररुद्देण ॥ १४२ ॥

अत्र [4]नलरामधर्मसुतैः[5] कृतत्रेताद्वापाराः शोभन्ते तथा वीररुद्रेण कलियुगं शोभत इत्यौपम्यं गम्यते ।

मध्यदीपकं यथा ।

[6]भाईरहिए जलणिही राअइ जोण्हाइ पुण्णिमाअंदो ।
सुत्तीए कमलभवो कित्तीए पआवरुद्दो वि ॥ १४३ ॥

अत्र भागीरथ्यादिभिः समुद्रादयो यथा तथा कीर्त्या प्रतापरुद्रो [12]राजत इत्यौपम्यं गम्यते ।

[13]अन्तदीपकं यथा ।

भाइति । रघुकुलदीपेन रामेण । तपसो जनिरुत्पत्तिर्यस्य तेन तपोजनिना धर्मसुतेन । अत्र भातीति समानधर्मस्यादिवाक्यगतत्वादादिदीपकम् ।

भाईरहिए इति । अत्र राजत इत्यस्य द्वितीयवाक्यगतत्वान्मध्यदीपकम् ।

छाया ।

1 भाति नलेन कृतयुगं रघुकुलदीपेन शौरिणा त्रेता ।
द्वापारस्तपोजनिना कलियुगं वीररुद्रेण ॥
2 भागीरथ्या जलनिधी राजते ज्योत्स्नया पूर्णिमाचन्द्रः ।
श्रुत्या कमलभवः कीर्त्या प्रतापरुद्रोऽपि ॥

१ किअजुअओ M. २ तेदा M. ३ कलीजुअअं M. ४ यथा नल° R. ५ युधिष्ठिरैः R. ६ °रहीए M. ७ रेहई P. ८ जोण्हइ P. ९ °चंदो T′., M, १० °हवो T′. ११ कितीए P. १२ विराजत M. १३ अन्त्यदीपकम् T′. १४ t. has before this भाति नलेन &c. १५ Before this t. has भागीरथ्या जलनिधी &c.

[1]सुरलोअं सुरणाहो णरलोअं वीररुद्दणंरणाहो ।
फणिलोअं फणिणाहो रक्खइ णिरुपद्दवोञ्जेअं ॥ १४४ ॥

अत्र यथा सुरलोकफणिलोकौ सुरनाथफणिनाथाभ्यां रक्षितौ तथा वीररुद्रेण नरलोको रक्षित इत्यौपम्यं गम्यते ।

अथ पदार्थगतालंकारद्वयानन्तरं वाक्यार्थगतमलंकारद्वयं निरूप्यते ।

प्रतिवस्तूपमालंकारः ।

यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि ।
गम्यौपम्याश्रिता सा स्यात् प्रतिवस्तूपमा मता ॥

सुरेति । अत्र रक्षणस्यान्तवाक्यगतत्वादन्तदीपकम् । एपूदाहरणेष्वनेककारकगतत्वेनैकक्रियादीपकम् । एवमनेकक्रियागतत्वेनैककारकमपि दीपकमस्ति । यथा ।

'साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् ।
न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम् ॥' इति ।

अनन्तरालंकारयोः संगतिमाह । अथेति । समानधर्मस्य पदार्थगतत्वात् । दीपकतुल्ययोगिते पदार्थगते । तन्निरूपणानन्तरं तदारब्धवाक्यार्थमूलालंकारद्वयमुच्यत इत्यर्थः । तत्रापि पूर्वोक्तरीत्यान्तरङ्गवस्तुभावमूलां प्रतिवस्तूपमामाह । यत्रेति । क्रमतो व्याचष्टे । यत्र वस्त्विवेति । गम्यौपम्ये इवाद्यप्रयोगादिति भावः । अन्यथेयमुपमैव स्यादिति हृदयम् । तेन प्रतिवस्तु प्रतिवाक्यार्थमुपमा

छाया ।

1 सुरलोकं सुरनाथो नरलोकं वीररुद्रनरनाथः ।
फणिलोकं फणिनाथो रक्षति निरुपद्रवोद्वेगम् ॥

१ °नरनाथः P. २ णिरुवद्दुज्जोअं M. ३ T′. omits अत्र. ४ °फणिभ्याम् P. ५ रक्ष्यत T′. ६ रुद्रेण M. ७ °द्वयमुच्यते R. ८ Before this t. has सुरलोकं सुरनाथो &c.

[1]भाइ णलेण किअजुअं रहुउलदीवेण सोरिणा तेता[2]।
दावारो तवजणिणा कलिजुअं[3] वीररुद्देण ॥ १४२ ॥

अत्र [4]नलरामधर्मपुत्रैः[5] कृतत्रेताद्वापाराः शोभन्ते तथा वीररुद्रेण कलियुगं शोभत इत्यौपम्यं गम्यते।

मध्यदीपकं यथा।

[6]भाईरहिए जलणिही राँअइ[7] जोण्हाइ[8] पुण्णिमाअंदो[9]।
सुत्तीए कमलभँवो[10] किंत्तीए[11] पआवरुद्दो वि ॥ १४३ ॥

अत्र भागीरथ्यादिभिः समुद्रादयो यथा तथा कीर्त्या प्रतापरुद्रो [12]राजत इत्यौपम्यं गम्यते।

[13]अन्तदीपकं यथा।

भाइति। [14]रघुकुलदीपेन रामेण। तपसो जनिरुत्पत्तिर्यस्य तेन तपोजनिना धर्मसुत्रेण। अत्र भातीति समानधर्मस्यादिवाक्यगतत्वादादिदीपकम्।

भाईरहिए इति। [15]अत्र राजत इत्यस्य द्वितीयवाक्यगतत्वान्मध्यदीपकम्।

छाया।

1 भाति नलेन कृतयुगं रघुकुलदीपेन शौरिणा त्रेता।
द्वापारस्तपोजनिना कलियुगं वीररुद्रेण ॥
2 भागीरथ्या जलनिधी राजते ज्योत्स्नया पूर्णिमाचन्द्रः।
श्रुत्या कमलभवः कीर्त्या प्रतापरुद्रोऽपि ॥

१ किमजुअओ M. २ तेदा M. ३ कलीजुअअं M. ४ यथा नल° R. ५ युधिष्ठिरैः R. ६ °रहीए M. ७ रेहइ P. ८ जोण्हइ P. ९ °चंदो T'., M, १० °हवो T'. ११ कितीए P. १२ विराजत M. १३ अन्त्यदीपकम् T'. १४ t. has before this भाति नलेन &c. १५ Before this t. has भागीरथ्या जलनिधी &c.

[1]सुरलोअं सुरणाहो णरलोअं वीररुद्दणरणाहो।
फणिलोअं फणिणाहो रक्खइ णिरुपद्दवोळेअं ॥ १४४ ॥

[3]अत्र यथा सुरलोकफणिलोकौ सुरनाथफणिनाथाभ्यां रक्षितौ तथा [6]वीररुद्रेण नरलोको रक्षित इत्यौपम्यं गम्यते।

अथ पदार्थगतालंकारद्वयानन्तरं वाक्यार्थगतमलंकारद्वयं निरूप्यते।

प्रतिवस्तूपमालंकारः।

यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि।
गम्यौपम्याश्रिता सा स्यात् प्रतिवस्तूपमा मता ॥

सुरेति। अत्र रक्षणस्यान्तवाक्यगतत्वादन्तदीपकम्। एषूदाहरणेष्वनेककारकगतत्वेनैकक्रियादीपकम्। एवमनेकक्रियागतत्वेनैककारकमपि दीपकमस्ति। यथा।

'साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम्।
न कुतूहलि कस्य मनश्चरितं च महात्मनां श्रोतुम् ॥' इति।

अनन्तरालंकारयोः संगतिमाह। अथेति। समानधर्मस्य पदार्थगतत्वात्। दीपकतुल्ययोगिते पदार्थगते। तन्निरूपणानन्तरं तदारब्धवाक्यार्थमूलालंकारद्वयमुच्यत इत्यर्थः। तत्रापि पूर्वोक्तरीत्यान्तरङ्गवस्तुभावमूलां प्रतिवस्तूपमामाह। यत्रेति। फलतो व्याचष्टे। यत्र वस्त्विति। गम्यौपम्ये इवाद्यप्रयोगादिति भावः। अन्यथेयमुपमैव स्यादिति हृदयम्। तेन प्रतिवस्तु प्रतिवाक्यार्थमुपमा

छाया।

1 सुरलोकं सुरनाथो नरलोकं वीररुद्रनरनाथः।
फणिलोकं फणिनाथो रक्षति निरुपद्रवोद्वेगम् ॥

१ °नरनाथः P. २ णिरुवद्दवुव्वेअं M. ३ T′. omits अत्र. ४ °फणिभ्याम् P. ५ रक्ष्यत T′. ६ रुद्रेण M. ७ °द्वयमुच्यते R. ८ Before this t. has सुरलोकं सुरनाथो &c.

यत्र वस्तुप्रतिवस्तुभावेन सामान्यं वाक्यद्वये निर्दिश्यते तत्र गम्यौपम्या प्रतिवस्तूपमा । सा साधर्म्यवैधर्म्याभ्यां द्विविधा ।

प्रथमा यथा ।

मन्थनाचल एवैकः क्षमः सिन्धुविलोडने ।
प्रतापरुद्र एवैकः शक्तः शत्रुविलोडने ॥ १४५ ॥

अत्र यथा समुद्रविलोडने मन्थनाचलः क्षमस्तथा शत्रुविलोडने प्रतापरुद्रः शक्त इत्यौपम्यं गम्यते ।

द्वितीया यथा ।

प्रतापरुद्र एवैकः पटीयान् जनरञ्जने ।
चन्द्रादृते क्षमो नान्यश्चकोरपरितोषणे ॥ १४६ ॥

अत्र चन्द्रेण यथा चकोरपरितोषः क्रियते तथा वीररुद्रेण जनरञ्जनं क्रियत इति वैधर्म्येणौपम्यं गम्यते ।

दृष्टान्तालंकारः

अथ दृष्टान्तः ।

यत्र वाक्यद्वये बिम्बप्रतिबिम्बतयोच्यते ।
सामान्यधर्मो वाक्यज्ञैः स दृष्टान्तो निगद्यते ॥

यत्र बिम्बप्रतिबिम्बभावेन सामान्यं वाक्यद्वये निर्दिश्यते स दृष्टान्तालंकारः । सोऽपि साधर्म्यवैधर्म्याभ्यां द्विविधः ।

आद्यो यथा ।

सामान्यं यस्यां सा प्रतिवस्तूपमा इत्यन्वर्थेयमजनि । तस्या द्वैविध्यमाह । साधर्म्येति । साधर्म्येणोदाहरति । मन्थानेति । अत्र संबन्धिभेदेन क्षमशक्तशब्दाभ्यां समानधर्मस्य कथनाद्वस्तुप्रतिवस्तुभावः ।

वैधर्म्येणोदाहरति । प्रतापेति । पटीयानतिपटुः ।

दृष्टान्तं लक्षयति । यत्रेति । द्वयोः सदृशयोरर्थयोरुपादानं बिम्बप्रतिबिम्बभाव इत्युक्तम् । अत्रापीवाद्युपादाने पूर्ववदुपमैव स्यादिति द्रष्टव्यम् । दृष्टोऽन्तो

---

१ R. and T'. drops अत्र. २ यथा चन्द्रेण R., M. ३ °परितोषणम् T'. ४ दृष्टान्तालंकारः T'. ५ वाक्यद्वय° R. ६ साम्यम् M.

क्षोणीं बिभ्रतु भूभृतः कतिपये कापि प्रतिष्ठा पुनः
स्वर्णाद्रेर्दिगधीशपत्तनगरीसंदिग्धकुञ्जश्रियः ।
राजानो जनरञ्जनं विदधतां श्रीवीररुद्रप्रभोः
कोऽप्यन्यो महिमा जगत्त्रयधुराधौरेयदोःशालिनः ॥१४७॥

अत्र प्रतापरुद्रस्य मेरोश्च बिम्बप्रतिबिम्बभावादौपम्यं गम्यते ।

वैधर्म्येण यथा ।

काकतीन्द्रकृपादृष्टिभाजामाप्नोति संपदः ।
तावदब्जानि निद्रान्ति यावन्नोदेति भानुमान् ॥ १४८ ॥

अत्र यथा भानूदयाभावेन पद्मानि नोन्मिलन्ति तथा प्रतापरुद्र-कृपाविलोकनाभावेन संपदः संकुचन्तीति वैधर्म्येण बिम्बप्रतिबिम्बनम् ।

निदर्शनालंकारः ।

अथ गम्यमानौपम्यप्रस्तावान्निदर्शनालंकारो निरूप्यते ।

असंभवद्धर्मयोगादुपमानोपमेययोः ।
प्रतिबिम्बक्रिया गम्या यत्र सा स्यान्निदर्शना ॥

उपमानधर्मस्योपमेयगतत्वेन निबद्धस्यान्वयासंभवात् तत्संबन्धार्थं बिम्बप्रतिबिम्बकरणमाक्षिप्यते सैका निदर्शना । तद्विपर्यये द्वितीया निदर्शना ।

विषयो यत्र स तथोक्तः भूपर्यः । साधर्म्येणोदाहरति । क्षोणीमिति । भूभृतः पर्वताः । दिगधीशानामिन्द्रादीनां पत्तनगरीत्वेन संदिग्धाः संदेहविषयीकृताः कुञ्जश्रियो यस्य तस्य तथोक्तस्य । तत्र कुञ्जेष्वेव नगरबुद्धिरस्तीति भावः । संपूर्वको दिहिः संशयार्थकोऽपि दृश्यते । यथा 'नानुपलब्धेन निर्णीतेऽर्थे न्यायः प्रवर्तते किं तु संदिग्धे' इति । जगत्त्रयधुरायां धौरेयाभ्यां धुरन्धराभ्यां दोर्भ्यां शालते शालीत्वेन तथोक्तस्य । धौरेयशब्दो व्याख्यातः ।

वैधर्म्येणोदाहरति । काकतीन्द्रेति ।

निदर्शनायाः संगतिमाह । अथेति । अत्र बिम्बप्रतिबिम्बभावोऽनुवर्तते । लक्षणमाह । असंभवदिति । उपमानधर्मस्योपमेयगतत्वेनोपमेयधर्मस्योपमानगतत्वेन वा संबन्धासंभवादसंभवद्वाक्यार्थसंबन्धा निदर्शना द्विविधेत्यर्थः ।

---

१ प्रतापरुद्रप्रभावविलोकन° R.; प्रतापरुद्रावलोकन° M. २ वैधर्म्ये M. ३ अत्र P.
४ क्षोणीभृतः t.

प्रथमा यथा ।

रिपुतिमिरमुदस्यन् रत्नसिंहासनस्थ-
स्त्रिभुवनमहनीयः काकतीयक्षितीशः ।
वहति भुवनबिम्बोल्लासलीलामभिख्या-
मुदयशिखरिचूडाचुम्बिनस्तीव्रभानोः ॥ १४९ ॥

अत्र तीव्रभानोरभिख्यायाः प्रकृतेऽसंभवादभिख्यासदृशीमभिख्यां वहतीति प्रतिबिम्बकरणाक्षेपः ।

उपमेयधर्मस्योपमानेऽसंभवाद्यथा ।

वीररुद्रनरेन्द्रस्य यशोवैशद्यसंपदः ।
लक्ष्यन्ते क्षीरवाराशिलीलादर्पणमण्डले ॥ १५० ॥

अत्र यशोवैशद्यस्य दुग्धार्णवेऽसंभवात् तद्रूपोपगमेन बिम्बप्रतिबिम्बत्वं गम्यते ।

क्वचिन्निषेधवशादाक्षिप्तया प्राप्त्या बिम्बकरणाक्षेपो यथा ।

काकतीन्द्ररिपुकान्ता धावन्त्यः प्रतिकाननम् ।
पद्भ्यां मुञ्चन्त्यलक्ताभ्यां स्थले रक्तोत्पलश्रियम् ॥ १५१ ॥

अत्र मुञ्चतीति निषेधात् पूर्वं रक्तोत्पलश्रीप्राप्तिराक्षिप्ता ।

व्यतिरेकालंकारः

अथ व्यतिरेकः ।

व्याचष्टे । यत्रेति । तद्विपर्यय इति । उपमेयधर्मस्योपमानगतत्वेनेत्यर्थः । रिपुतिमिरमिति । उदयशिखरिचूडाचुम्बिनः प्राचीनपर्वताग्रवर्तिनस्तीव्रभानोर्बिम्बोल्लासलीलां लोकानन्दिस्वरूपामभिख्यां शोभां वहति । योजयति । अत्रेति ।

वीररुद्रेति । अत्रोपमेयधर्मस्योपमानेऽसंभवात् प्रतिबिम्बक्रियाक्षेप इत्याह । अत्र यश इति ।

अत्र च विशेषान्तरमाह । क्वचिदिति । काकतीन्द्रेति । अलक्ताभ्यामलक्तकरहिताभ्याम् । पूर्वं राज्यसमय इत्यर्थः । संभवद्वाक्यार्थसंबन्धापीयमन्यैरङ्गीकृता । तदुक्तम् ।

---

१ काकतीयः क्षितीशः P. २ °बिम्बोल्लासिलीला° T'. ३ °लम्बिन° R., T'. ४ दुग्धार्णवादावसंभवात् P. ५ तत्वादृश्यो° M. ६ निमुञ्चतीति R., M. ७ उपमानधर्मस्योपमेयगतत्वेनेत्यर्थः p. ८ स्वराजधान्यामित्यर्थः t.

भेदप्रधानसाधर्म्यमुपमानोपमेययोः ।
आधिक्याल्पत्वकथनाद् व्यतिरेकः स उच्यते ॥

यत्रोपमानादुपमेयस्याधिक्येन न्यूनत्वेन वा प्रतिपादनेन भेदप्रधानं साधर्म्यमवगम्यते स व्यतिरेकालंकारः ।

यथा ।

दिनकृति कुमुदैर्धृतो न रागः
शशिनि पराञ्चि परं सरोरुहाणि ।

'अभवन् वस्तुसंबन्धो भवन् वा यत्र कल्पयेत् ।
उपमानोपमेयत्वं कथ्यते सा निदर्शना ॥' इति ।

उदाहरणं तु

'चूडामणिपदे धत्ते यो देवं रविमागतम् ।
सतां कार्यातिथेयीति बोधयन् गृहमेधिनः ॥' इति ।

अत्र वामनवृत्तौ व्याचख्ये । 'बोधयतीति कारीषोऽग्निरध्यापयतीतिवद् गिरिगृहमेधिनो बोधनक्रियासमर्थान् करोतीति तत्समर्थाचरणे णिचः प्रयोगात् संभवति वस्तुसंबन्धः' इति । तत्राप्यसत्यबोधनादेशः । सैषा सर्वापि पदार्थवृत्तिः । वाक्यार्थवृत्तिर्यथा ।

'त्वत्पादनखरत्नानां यदलक्तकमार्जनम् ।
इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः ॥' इति ।

न चायं दृष्टान्तः । अत्र वाक्ययोः सापेक्षत्वात् । यत्र निरपेक्षवाक्यद्वये बिम्बप्रतिबिम्बभावः स दृष्टान्तः । यत्र सापेक्षवाक्यद्वये सोऽसौ निदर्शनेति महाननयोर्भेदः । अत्र गाढवैषम्यमपि द्रष्टव्यम् ।

अथ तन्मौपम्यप्रस्तावाद् व्यतिरेकं लक्षयति । भेदेति । भेदो वैलक्षण्यं तत्प्रधानं साधर्म्यं गम्यत इत्यध्याहृत्य व्याचष्टे । यत्रेति । उदाहरति । दिनकृतीति । रागोऽनुरागः । पराञ्चि प्रतिकूलानि । अयं तु कुवलयेन भूमण्डलेन

---

१ पदनिरपेक्ष M. २ व्याचष्टे t. ३ तत्पाद° t. ४ पाण्डरी° p. ५ इत्यभिप्रेत्य t.
६ भूमण्डलेन is dropped in t.

कुवलयकमलाहतप्रकाशः
प्रभवति विभ्राजन् प्रतापरुद्रः ॥ १५२ ॥

अत्र रविशशिनोरसंभवेन[1] सर्वाभिप्रियंकरत्वेनोपमेयभूतस्य प्रतापरुद्रस्याधिक्यं कुवलयकमलाहतप्रकाश इति श्लेषसमुत्थापितो व्यतिरेकः ।

श्लेषालंकारः ।

अथ श्लेषालंकारो निरूप्यते ।

प्रकृताप्रकृतोभयगतमुक्तं चेच्छब्दमात्रसाधर्म्यम् ।
श्लेषोऽयं श्लिष्टत्वं सर्वत्राद्यद्वये नान्त्ये ॥

यत्र केवलप्रकृतयोः केवलाप्रकृतयोर्वा श्लेषः कथ्यते तत्र प्रकारद्वये विशेषणविशेष्यश्लिष्टता । प्रकृताप्रकृतविषयेऽन्त्यभेदे विशेषणमात्रश्लिष्टता। विशेषणविशेष्ययोरपि श्लिष्टत्वे शब्दशक्तिमूलध्वनिप्रसङ्गात् । के-

---

कमलया लक्ष्म्या च शर्मेदाध्यवसितैः कुवलयकमलैराहतप्रकाश इत्युपमानादुपमेयस्याधिक्यकथनं श्लेषमूलम् । उपमानादुपमेयस्याल्पत्वपक्षे चन्द्रवदनविरोधादुदाहरणं नोक्तम् । भेदद्वयलक्षणं तु सर्वस्वकारानुसारादिति रहस्यम् । तयोरुदाहरणं तु काव्यप्रकाशकारः समचूचयत् । तत्प्रकारो व्यतिरेकः प्रपञ्चश्च तत्रैव द्रष्टव्यः । 'उपमानाद्यदन्यस्य व्यतिरेकः स एव सः' इति तल्लक्षणमेव साधीयः ।

व्यतिरेकस्य श्लेषगर्भत्वात् तत्प्रसङ्गानन्तरं श्लेषं प्रतिज्ञापूर्वकं लक्षयति । अथेति । यत्र केवलप्रकृतयोः केवलाप्रकृतयोः प्रकृताप्रकृतयोश्च शब्दमात्रसाधर्म्यमुक्तं चेच्छिन्नपदोपनिबन्धः कृतश्चेदित्यनेनोपमाव्यवच्छेदः । अयं श्लेषालंकारः । अत्राद्यद्वये केवलप्रकृतश्लेषे केवलाप्रकृतश्लेषे चेत्यर्थः । सर्वत्र श्लिष्टत्वं विशेषणेषु विशेष्येषु च श्लेष इत्यर्थः । अन्त्ये उभयश्लेषे न सर्वत्र श्लिष्टत्वं किं तु विशेषण एवेत्यर्थः । विशेष्ययोरपि श्लिष्टत्वे शब्दशक्तिमूलध्वनिप्रसंगः । तदेतदाह । अत्रेति । ननूभयश्लेष एव विशेष्यश्लिष्टत्वे ध्वनिशङ्का नेतरभेदद्वय इत्यत्र किं

---

१ °रसंभवि° P. २ इत्युक्तमिति P. ३ चच्छिन्नमात्र° P. ४ °नान्ते B., M. ५ R. drops च.

चाप्रकृतयोः केवलाप्रकृतयो[1]र्वैकशब्दगोचरत्वेन[2] न ध्वनिशङ्का । तत्रार्थ[3]-द्वयप्रतिपादने[4]ऽप्रस्तुतत्वेन प्रस्तुतत्वेन वा वैषम्याभावादभिधैव समर्था । प्रस्तुताप्रस्तुतविषये तु अभिधायाः प्रस्तुतैकपरत्वनियन्त्रणादप्रस्तुतार्थप्र-तिपत्तिर्व्यञ्जनव्यापारायत्तैव । तथा चोक्तं काव्यप्रकाशे ।

'अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते ।
संयोगाद्यैरवाच्यार्थधीकृद् व्यापृतिरञ्जनम् ॥' इति ।

तदेवं त्रिधा[5] श्लेषः ।

तत्र केवलप्राकरणिकयोर्यथा ।

नियामकमत आह । केवलप्रकृतयोरिति । आद्यभेदद्वये विशेष्ययोरपि श्लिष्टत्वे अर्थद्वयस्य प्रस्तुतत्वाविशेषादप्रस्तुतत्वाविशेषाद्वा[6] अभिधाया अकुण्ठितसंचा-रित्वात्[7] प्रस्तुताप्रस्तुतौ[8] द्वावप्यर्थौ वाच्यावेव । अतो आद्यभेदद्वये ध्वनिशङ्केति भावः । तृतीयश्लेषे कथं ध्वनेरवकाश इत्याकाङ्क्षायामाह । प्रस्तुताप्रस्तुत-विषये त्विति । प्रकरणादिकं[9] प्रस्तुतार्थ एवाभिधां नियच्छति नाप्रस्तुतार्थे । अतस्तस्य न वाच्यत्वमिति भावः । ननु मा भूद् वाच्यत्वं व्यङ्ग्यत्वं तु कुतो लभ्यते इत्यत आह । अप्रस्तुतेति । अर्थान्तरस्य व्यञ्जनैकव्यापारविषयत्वे[10] वृद्धसं-मतिमाह । अनेक इति । अनेकार्थस्यानादिशब्दस्य संयोगाद्यैः 'संयोगो विप्रयो-गश्च—' इत्यादि वाक्यपदीयोक्तैर्नियामकैर्वाच्यत्वे नियन्त्रिते प्रस्तुतपरत्वेन[11] नियमिते सति अवाच्यार्थधीकृदर्थान्तरप्रतीतिकृद् व्यापृतिरञ्जनं व्यञ्जनव्यापार इत्यर्थः । तदेवमिति । प्रकृताप्रकृतोभयगतत्वेनेत्यर्थः । अयं च श्लेषः प्रकारा-न्तरेणापि त्रिविधः । तथा हि जतुकाष्ठन्यायेन सभङ्गपदः शब्दश्लेषः । एकना-लगतफलद्वयन्यायेनाभङ्गपदोऽर्थश्लेषः । उभयमिलने तूभयश्लेष इति । काव्यप्रकाशकारः पुनरिममर्थश्लेषं शब्दश्लेषमेवोक्तवान्नार्थश्लेषमपोवाच ।

---

१ °र्वैकार्थशब्द° R. २ °गोचरत्वे तु न R., T'. ३ अत्रार्थ° T'. ४ °प्रतिपादनेन M. ५ त्रिविधः T'., M. ६ °त्वाविशेषात्र अभिधाया t. ७ °व्यापारत्वात् t. ८ प्रकृताप्रकृतौ t. ९ प्रकरणार्थम् t. १० °व्यापारैकविषयत्वे t. ११ प्रकृत° t.

राज्ञः पूजाविधिं धत्ते सकलोमाधवेतिथिः ।
नीलकण्ठकलापाङ्के[2] स्फुरदब्जमणित्विषि ॥ १५३ ॥

अत्र पूजाविषयतया हरिहरयोः प्राकरणिकत्वम् ।

अप्राकरणिकयोर्यथा ।

सदृशः काकतीन्द्रोऽयं महाकुलमहीभृताम् ।
चिरोद्गृहीतसन्मार्गस्फुरत्कटकसंपदाम् ॥ १५४ ॥

अत्र महाकुलानां हरिश्चन्द्रप्रभृतीनां कुलपर्वतानां चोपमानत्वेनाप्राकरणिकत्वम् ।

प्राकरणिकाप्राकरणिकयोर्यथा ।

तद्विवेकस्तु तत्रैव द्रष्टव्यः । केवलप्रकृतश्लेषमुदाहरति । राज्ञ इति । नीलकण्ठकलापाङ्के मयूरपिञ्छचिह्ने स्फुरन्ती अब्जमणेः कौस्तुभस्य त्विट् यस्य तस्मिन् माधवे सकलतिथिः प्रतिपदादिः राज्ञः पूजाविधिं धत्ते । नीलः कण्ठो यस्यासौ नीलकण्ठः । कलाः षोडश पातीति कलापश्चन्द्रोऽङ्कः शेखरो यस्य स तथोक्तः । उभयोर्विशेषणसमासः तस्मिन् स्फुरन्ती अब्जमणेश्चन्द्रकान्तस्य स्थितिरिव त्विट् यस्य तस्मिन्नुमाधवे सकलातिथिः पूजाविधिं धत्ते । ‘वधूज्यातिथ्ययोर्द्वयोः’ इत्यमरः । सर्वेष्वपि तिथिषु हरिहरौ पूजनीयावित्यर्थः । सकलोमाधवेतिथिरित्यत्र सभङ्गपदत्वाच्छब्दश्लेषत्वम् । अन्यत्राभङ्गपदत्वादर्थश्लेषत्वं च यथासंभवं द्रष्टव्यम् ।

केवलाप्रकृतश्लेषमुदाहरति । सदृश इति । चिरत्ना गृहीतो गौरवेण स्वीकृतः सन्मार्गः साधुमार्गो येषां ते तथोक्ताः । स्फुरन्त्यः कटकानामलंकाराणां संपदो येषां ते तथोक्ताः । उभयोर्विशेषणसमासः । महत् कुलं येषां ते महाकुलाः । ते च ते महीभृतो राजानो हरिश्चन्द्रादयः पर्वताश्च । चिरोभिः चिरत्नैर्गृहीतः सन्मार्गो नक्षत्रमार्गो येषां ते तथोक्ताः । स्फुरन्त्यः सानुसंपदो येषां तेषां महतां कुलमहीभृतां कुलपर्वतानां च सदृशः ॥

---

१ माधवो P. २ °कलापान्ते P.; °कलापाङ्के M_3.

विजितारिपुरो मूर्तौ विलसत्सर्वमङ्गलः ।
राजमौलिः प्रतापाङ्को रुद्र इव स्थितः ॥ १५५ ॥

अत्र प्रतापरुद्ररुद्रयोःप्राकरणिकाप्राकरणिकत्वम् ।

परिकरालंकारः ।

विशेषणमूलवैचित्र्यमूलत्वात् परिकर उच्यते ।

यत्राभिप्रायगर्भा स्याद्विशेषणपरम्परा ।
तत्राभिप्रायविदुषामसौ परिकरो मतः ।

यत्र विशेषणानि साभिप्रायाणि निबध्यन्ते स परिकरालंकारः ।

यथा ।

राज्ञो यादववंशपार्थिवमणेः प्रख्यातशौर्यश्रिय-
स्त्यक्तशत्रुचतुरङ्गसैन्यमहतो मानैकवित्तस्य च ।
सेवां रुद्रनरेन्द्रनायकचमूनाथेन केनाप्यधि-
ष्ठितस्याचरितानि सेवनपतेर्जानाति सा गौतमी ॥ १५६ ॥

अत्र राज्ञ इत्येवमादिविशेषणान्यभिप्रायगर्भाणि ।

उभयश्लेषमुदाहरति । विजितेति । विजितारिपुरो निर्जितशत्रुनगरस्त्रिपुरश्च मूर्तौ विलसन्ति सर्वाणि मङ्गलानि विलसन्ती सर्वमङ्गला पार्वती च यस्य सः । राजमौली राजश्रेष्ठश्चन्द्रशेखरश्च । अत्र रुद्रप्रतापरुद्रयोर्विशेष्ययोः पृथगुपादानमत उभयश्लेषः ।

संगतिपूर्वकं परिकरं लक्षयति । विशेषणेति । अभिप्रायगर्भा व्यङ्ग्यगर्भा । व्यङ्ग्यस्य वाच्योपस्कारकत्वेन वाच्यातिशायित्वाभावात् परिकर इत्यन्वर्थोऽलंकारः । उदाहरति । राज्ञ इति । राज्ञो न तु यस्य कस्यचित् । यादववंशपार्थिवमणेर्महाकुलीनस्य न म्लेच्छस्य । प्रख्यातशौर्यश्रियोऽनेकधा विहितपराक्रमस्य न स्वगृहमात्रशरणस्य । त्यक्तशत्रुचतुरङ्गसैन्यमहतो नैकाकिनः । मानैकवित्तस्य न तु यथा कथंचित् प्राणपरायणस्य । सेवनपतेः केनाप्यनिर्वाच्यगुणविशिष्टेन अधिष्ठितस्य ततः । आचरितान्यनुपलभ्यासादीनि । सा कथितसेवनपतिरर्थस्य गौतमी जानातीत्येवं साभिप्रायविशेषणत्वम् । उभयसगर्भाण्यभिप्रायगर्भाणीत्यर्थः ।

---

१ °वैचित्र्यात् R. २ P. drops निबध्यन्ते. ३ °न्युभाव° T'., M.

आक्षेपालंकारः ।

अथाक्षेपालंकारः[1] ।

विशेषबोधायोक्तस्य वक्ष्यमाणस्य वा भवेत् ।
निषेधाभासकथनमाक्षेपः स उदाहृतः ॥

यत्र विशेषप्रतिपत्त्यर्थमुक्तवक्ष्यमाणयोः प्राकरणिकयोर्निषेधाभासः कथ्यते स आक्षेपः । उक्तविषये वस्तु वा कथनं वा निषिध्यते । वक्ष्यमाणविषये कथनमेव निषिध्यते । तत्रापि सामान्यरूपेण [2]प्रतिज्ञा विशेषरूपेण निषेधः । अंशोक्तावंशान्तरस्य वा निषेधः । एवं चतुर्विधोऽयमाक्षेपः । [3]क्रमेणैषामुदाहरणानि ।

नरेन्द्रमौले[4] न वयं तव संदेशहारिणः ।
जगत्कुटुम्बिनः कश्चिन्न शत्रुरिति कथ्यते ॥ १५७ ॥

अत्र [5]राजसन्धिविग्रहकारिणा उक्तौ न वयं संदेशहारिण इति वस्तुनिषेधः । स चानुपपद्यमानः संधिविग्रहकालोचितकैतववचनपरिहारेण तत्त्ववादित्वे[6] पर्यवसितः[7] । सर्वजगत्पालकस्य तव शत्रुभावेन नालोकनीया राजानः किं तु भृत्यरूपेण संरक्षणीया इत्येवमादिविशेषमाक्षिपति ।

गम्यत्वप्रस्तावात् परिकरानन्तरं विशेषगम्यत्वादाक्षेपं लक्षयति । विशेषेति । यत्रोक्तस्य वक्ष्यमाणस्य वा प्राकरणिकत्वेन विवक्षितस्य अत एव निषेधानर्हस्य यो निषेधो विशेषबोधार्थमभिधीयमानः तदाभासो भवति स आक्षेप इत्यर्थः । तस्य चातुर्विध्यं विभागमाह । उक्तविषय इत्यादिना । तत्रोक्तवस्तुविषयनिषेधमुदाहरति । नरेन्द्रेति । अमात्यप्रभोः किमर्थं संधिविग्रहकारिण इति भावः । वस्तुनिषेधं योजयति । अत्रेति । तत्फलं विशेषमाह । स चेति । संदेशहारित्व तन्निषेधोऽनुपपद्यमानः सत्यवादिता राजानो भृत्यरूपेण भरणीया इत्यादिविशेषं बोधयतीत्यर्थः ।

---

१ आक्षेपालंकारः T'. २ P. drops प्रतिज्ञा विशेषरूपेण निषेधः. ३ क्रमेण यथा R. ४ °मौलेनं P. ५ राजसंदेश° T. ६ °वादित्वपर्य° M. ७ पर्यवस्थितः T'.

कथननिषेधो यथा ।

वयमशरणा इत्येषोक्तिः कथं घटते जगत्-
त्रितयशरणे त्रायस्वास्मानिति स्फुटमज्ञता ।
सकलजनतारक्षादक्षे त्वयि प्रणता इति
त्रिभुवननमस्कार्ये सिद्धं प्रतापमहीपते ॥ १५८ ॥

अत्र वयमशरणा [1]इत्येवमात्मोक्तिकथननिषेधादाभासरूपाद[2]वश्यं प[3]रिपालनीयत्वादिविशेषः प्रतीयते ।

वक्ष्यमाणविषये [4]सामान्यं प्रतिज्ञाय कथननिषेधो यथा ।

विज्ञापयामस्ते किंचित् काकतीयकु[5]लोद्वह ।
विज्ञाप्यते किमथवा सर्वज्ञे रक्षके त्वयि ॥ १५९ ॥

[6]विज्ञापयाम इति [7]सामान्यं प्रतिज्ञाय कथननिषेधाभासात् सर्वथा वयं रक्षणीया इति विशेष आक्षिप्यते ।

अंशोक्तावंशान्तरस्य निषेधो यथा ।

प्रतापरुद्रः स्वयमिद्धतेजा
दैवं च तद्विक्रमदत्तहस्तम् ।

कथननिषेधमुदाहरति । वयमिति । सर्वेषां नाथे रक्षके नमस्कार्ये च त्वयि दीप्यमाने सर्वान्तर्भूतानामस्माकमशरणा इत्यस्य प्रणता इत्यादीनि वचनानि व्यर्थानीत्यर्थः । योजयति । अत्रेति । वयमशरणा इत्येवमाद्युक्तिभिः यः कथननिषेधस्तस्मादाभासरूपादविषयप्रवृत्त्या निषेधस्य प्ररोहाभावादाभासत्वमिति भावः ।

वक्ष्यमाणविषये सामान्यं प्रतिज्ञाय विशेषनिषेधमुदाहरति । विज्ञापयाम इति । अत्र प्रथमार्धे सामान्येन प्रतिज्ञा यत् द्वितीयार्धे वयं रक्षणीया इति विशेषबोधार्थं विशेषकथननिषेधादाक्षेपः ।

अंशोक्तावंशान्तरनिषेधमुदाहरति । प्रतापेति । इद्धतेजाः सन्नद्धप्रतापः ।

---

१ इत्याद्युक्तिकथन° R. २ °दवश्यपरि° R. ३ परिपालकत्वादि° P. ४ सामान्यप्रतिज्ञया विशेषनिषेधो यथा R. ५ °कुलोद्भव R.; °महीपते M₅. ६ अत्र विज्ञापयाम R. ७ कथनसामान्यप्रतिज्ञया R.

यूयं च तूलोपमसारभाज-
स्तद्युक्तमेवं यदि वा किमुच्चैः ॥ १६० ॥

अत्र प्रतापरुद्रो महीयान् यूयमल्पा इत्यंशोक्त्या यदि वा किमु-च्चैरित्यंशान्तरनिषेधाभासेन सर्वथा प्रणामैः प्रसादनीयोऽयं न तु[1] प्रातिपक्ष्यमवलम्बनीयं[2] युष्माभिरिति शत्रुस्त्रीवचनभङ्ग्या विशेष आक्षिप्यते ।

समानार्थतया[3]ऽनिष्टविध्याभासोऽप्याक्षेप इत्यभ्युपगम्यते[4] ।

यथा चेष्टनिषेधस्यानुपपद्यमानतयाभासत्वं तथानिष्टविधेरप्यनुपप-द्यमानतयाभासत्वम्[5] ।

यथा ।

नाथ प्रतापरुद्रस्य सेवां त्यजसि चेत्त्यज ।
अरण्यगृहमेधिन्या रीतिरभ्यस्यते मया ॥ १६१ ॥

अत्रानिष्टभूतं प्रतापरुद्रसेवात्यजनं[6] तद्रिपुकामिन्या विधीयते । स[7] विधिरनुपपद्यमान आभासे पर्यवस्यति । अरण्यगृहमेधिन्या रीतिरभ्य-स्यत इत्यनेन विध्याभास एव उपबृंहितः ।

व्याजस्तुत्यलंकारः ।

अथ गम्यप्रस्तावाद् व्याजस्तुतिरुच्यते ।

दुःसहत्वमनुक्तम् । तूलोपमसारभाजो निःसारा इत्यर्थः । तदेवं युक्तमित्यंशोक्त्या किमुच्चैरित्यंशान्तरनिषेधः । तस्य व्यङ्ग्यं विशेषमाह । सर्वथेति ।

आक्षेपान्तरमुपपादयति । समानेति । समानार्थतया समानन्यायतयेत्यर्थः । तदेवाह । यथा चेति । अनुपपत्तिवशादिष्टनिषेधस्येवानिष्टविधेरप्याभासत्वा-दाक्षेपत्वमिति भावः । उदाहरति । नाथेति । अनिष्टविध्याभासं योजयति । अत्रेति ।

अथ गम्यत्वप्रस्तावाद्वाच्याभासत्वप्रसङ्गेनाक्षेपानन्तरं व्याजस्तुतिं लक्षयति ।

---

१ T′. omits तु. २ प्रातिपक्ष्येणावलम्बनीयः P., R. ३ समर्थतया R. ४ इत्युप-गम्यते P. ५ तथानिष्ट° M. ६ प्रतापरुद्रपादसेवा° M.; प्रतापरुद्रस्य पादसेवा° T′. ७ स च विधि° T′.

निन्दया वाच्यया यत्र स्तुतिरेवावगम्यते ।
स्तुत्या वा गम्यते निन्दा व्याजस्तुतिरसौ मता ॥

यत्र निन्दाकथनमुखेन स्तुतिर्गम्यते एका सा । यत्र स्तुतिमुखेन निन्दा गम्यते सा द्वितीया व्याजस्तुतिः ।

क्रमेण यथा ।

काकतीयविभोः कीर्त्यां किं वाद्य धवलीकृतम् ।
यत्तदीयारिवक्त्रेषु दृश्यते कालिमा महान् ॥ १६२ ॥

स्तुत्या निन्दा यथा ।

प्रतापरुद्रनृपतेरहो साहसिका द्विषः ।
यद्विशन्त्युदधीन् शैलानारोहन्ति समन्ततः ॥ १६३ ॥

अप्रस्तुतप्रशंसालंकारः ।

अथ गम्यत्वप्रस्तावादप्रस्तुतप्रशंसोच्यते ।

अप्रस्तुतस्य कथनात् प्रस्तुतं यत्र गम्यते ।
अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रिता ॥

यत्र सारूप्येण सामान्यविशेषभावेन कार्यकारणभावेन वाप्रस्तुतकथनात् प्रस्तुतप्रतीतिस्तत्राप्रस्तुतप्रशंसा । अप्रस्तुतात् प्रस्तुतप्रतीति-

---

निन्दयेति । यत्र निन्दया स्तुत्या वा वाच्यया प्रमाणान्तरबाधितस्वरूपया यथाक्रमं स्तुतिनिन्दावगम्यते सा व्याजेन व्याजरूपा वा स्तुतिरिति द्विविधाप्यन्वर्था व्याजस्तुतिरित्यर्थः । काकतीयेति । विशेषनिषेधे शेषाभ्यनुज्ञानमिति न्यायेनारिवक्त्रव्यतिरिक्तं विश्वं कीर्त्या धवलीकृतमिति निन्दया स्तुतिर्गम्यते ।

प्रतापेति । अत्र शत्रूणां साहसप्रशंसया भीरुत्वं व्यज्यते ।

स्तुतिप्रसङ्गाद्व्याजस्तुत्यनन्तरमप्रस्तुतप्रशंसामाह । अथेति । यद्यप्यप्रस्तुतमप्रस्तुतत्वादेव न कथनीयं तथापि प्रस्तुतार्थप्रतीत्यर्थत्वादविरोधः । तत्र गम्यागम्ययोः प्रस्तुताप्रस्तुतयोर्नियामकं संबन्धमाह । सारूप्येति । आदिग्रहणात् सामान्यविशेषभावः कार्यकारणभावश्च गृह्यते । तेषामेवार्थान्तरप्रतीतिहेतुत्वात् तेन सामान्यं विशेषः कार्यं कारणं सरूपं च प्रस्तुतं स्वस्वप्रतियोगिनोऽप्रस्तुतस्य

---

१ R. and M. drop वा. २ निन्दाप्रतीतिः सा M. ३ कीर्त्याम् P. ४ सारूप्यादे नियन्त्रिता R. ५ वा° M. ६ °प्रतीतेः समा° P. ७ गृह्यते t.

रित्यनेन समासोक्तेर्व्यावृत्तिः । न च कार्यात् कारणप्रतीतावनुमानाविर्भावशङ्का । अनुमानालंकारे प्रत्याय्यप्रत्यायकयोर्द्वयोरपि प्राकरणिकत्वाभ्युपगमात् । अनेन पर्यायोक्तस्य व्यावृत्तिरपि । न चायं ध्वनिः । प्रतीयमानस्य वाच्यसिद्ध्यङ्गत्वात् ।

तत्र सारूप्येण यथा ।

आशासु प्रशमितवासनोदयेभ्यः
किं लब्धं भ्रमरगणैर्जरत्तरुभ्यः ।
पुंनागो नवनवसौरभप्रसूनै-
रामोदं दिशति निवासमारभध्वम् ॥ १६४ ॥

अत्र भ्रमरवृत्तान्तेनाप्रस्तुतेन सर्वानसंपूर्णविभवानुर्वीश्वरान् विहाय सकलगुणपरिपूर्णः सर्वजनानन्दी प्रतापरुद्र एक एव सर्वेषां विदुषां सेव्य इति प्रस्तुतं प्रतीयते ।

सामान्याद्विशेषप्रतीतिर्यथा ।

कथनात् प्रतीयत इति पञ्चाप्रस्तुतप्रशंसाभेदाः । न चेयं समासोक्तिः । तद्विपर्ययेण प्रवृत्तेरित्याह । अप्रस्तुतादिति । कार्यात् कारणप्रतीतिभेदस्यानुमानेऽन्तर्भावं वारयति । न चेति । अत एव पर्यायोक्तव्यावृत्तिरपीत्याह । अनेनेति । तत्राप्युभयोः प्रकृतत्वादिति भावः । व्यङ्ग्यमत्रालंकार्यमत आह । न चेति । तत्र हेतुमाह । प्रतीयमानस्येति । वाच्यसिद्ध्यङ्गत्वादप्रस्तुतस्य वाच्यत्वमेवायुक्तमिति कृत्वा प्रस्तुतं प्रतीयमानं तत्साधनत्वेनोपकरोतीति वाच्यसिद्ध्यङ्गं नाम गुणीभूतव्यङ्ग्यं न प्रधानमतो न ध्वनिरिति भावः । तत्र सारूप्येणोदाहरति । आशास्विति । प्रशमितवासनोदयेभ्यो निवर्तितपरिमलप्रचारेभ्यो जरत्तरुभ्यो जीर्णवृक्षेभ्यः । अत्राप्रस्तुतभ्रमरवृत्तान्तेन प्रस्तुतप्रतापरुद्रवृत्तान्तः सारूप्येण प्रतीयते । साधर्म्येणेदमुदाहरणम् । वैधर्म्यादिनिबन्धनास्त्वन्यतो द्रष्टव्याः ।

---

१ P. drops द्वयोः. २ प्राकरणिकोपगमात् P. ३ पर्यायोक्तेर्व्यावृत्ति° M. ४ °नुर्वीश्वरान् M. ५ सर्वगुण° R. ६ प्रतापरुद्र एव सेव्य R. ७ °प्रतिपत्तिर्यथा P.

यशस्विनी पद्मभवस्य सृष्टि-
स्तत्पादथित्री नृपशेखराणाम्[1] ।
तत्पालनाह्लादनभाग्ययोग्यो
जातश्चिरान्मध्यमलोक एषः ॥ १६५ ॥

अत्र प्रतापरुद्रस्य गुणमहत्त्वे प्रस्तुते सामान्यमभिहितम् ।

विशेषात् सामान्यप्रतीतिर्यथा[2] ।

[1]दट्ठुमणा वि ण पेक्खइ[3] ण भणइ वत्तुं[4] सकोऊहला वि[5] ।
परिसासआ वि णे प्पसइ[6] वणिआए[7] कीरिसी सिट्ठी[8] ॥ १६६ ॥

अत्र मुग्धानां संगमे महती लज्जेति सामान्ये प्रस्तुते विशेषोऽभिहितः ।

कार्यात् कारणप्रतीतिर्यथा ।

गाधा इवार्णवा जाता नीचा इव महाद्रयः ।
मही मवतरत्यस्मिन् काकतीयकुलेश्वरे[9] ॥ १६७ ॥

अत्रार्णवादीनां गाधत्वादिभिः कार्यभूतैरप्रस्तुतैः कारणभूतं प्रतापरुद्रगाम्भीर्यादि प्रतीयते ।

यशस्विनीति । अत्राप्रस्तुतराजसामान्यवृत्तान्तवर्णनया प्रस्तुतराजविशेषप्रतापरुद्रगुणमहिमप्रतीतिः ।

दट्ठुमणावीति । अत्र दर्शनाद्युत्कण्ठायामप्यदर्शनादीनामप्रस्तुतानां लज्जाविशेषाणामुक्त्या प्रस्तुतलज्जासामान्यप्रतीतिः । लज्जाकार्याणां लज्जात्वमौपचारिकम् ।

गाधा इति । अत्राप्रस्तुतार्णवगाधादिकार्यवर्णनया प्रस्तुतप्रतापरुद्रगाम्भीर्यप्रतीतिः ।

छाया ।

1 द्रष्टुमना अपि न पश्यति न भणति वक्तुं सकुतूहलापि ।
स्पर्शाशयापि न स्पृशति वनितायाः कीदृशी सृष्टिः ॥

१ नृपशेखराणि R.; नृपशेखरस्य P. २ प्रतिपत्तिर्यथा P. ३ प्रक्खइ P. ४ वकुम् M. ५ सहोव्हला वि M. ६ णस्सुसआ वि ण छीवइ M. ७ णा च्छिवइ P. ८ सिट्ठि P. ९ °कुलोद्वहे M. १० Before this t. has द्रष्टुमना अपि &c.

कारणात् कार्यप्रतीतिर्यथा ।

> प्रतापरुद्रनृपतेर्धरित्रीकल्पशाखिनः ।
> जाता मयि कृपादृष्टिः किं वा विस्मयसे सखे ॥ १६८ ॥

अत्र कथमीदृशविभवभाजनमधुना भवसीति कार्यं पृच्छते सविस्मयाय सुहृदे कारणभूता प्रतापरुद्रकृपादृष्टिरभिहिता ।

वाच्यसंभवासंभवोभयरूपतया यथासंभवं भेदाः स्वयं द्रष्टव्याः ।

पर्यायोक्तालंकारः ।

गम्यत्वप्रस्तावात् पर्यायोक्तमुच्यते ।

> कारणं गम्यते यत्र प्रस्तुतात् कार्यवर्णनात् ।
> प्रस्तुतत्वेन संबद्धं तत् पर्यायोक्तमुच्यते ॥

यत्र प्रस्तुतस्यैव कार्यस्य वर्णनात् प्रस्तुतयैव कारणं गम्यते तत् पर्यायोक्तम् ।

यथा ।

> प्रतिभूपालशुद्धान्तदीर्घिकास्नाजिधूसराः ।
> प्रक्षालयन्ति गात्राणि काकतीयचमूचराः ॥ १६९ ॥

अत्र रिपुनगरीदीर्घिकावारिविहारेण प्रतापरुद्रचमूचरकर्तृकेन[1] कार्यभूतेन समरप्रारम्भ[2] एव स्वपुराणि[3] विहाय पलायिताः प्रतिनृपा इति कारणं प्रतीयते ।

प्रतापेति । अत्राप्रस्तुतकारणवर्णनात् प्रस्तुतकार्यप्रतीतिं योजयति । अत्रेति । अत्र वाच्यस्य संभवाद्युपाधिवशाद् भेदान्तराणि स्वयमूहनीयानीत्याह । वाच्येति । वाच्यस्य संभवे प्राचीनान्येवोदाहरणानि । असंभवे तु ‘ कस्त्वं भोः कथयामि दैवहतकं मां विद्धि शाखोटकम्—’ इत्यादावचेतनेन सह प्रश्नोत्तरिकानुपपन्नेति वाच्यस्यासंभवः । एवमन्यदप्युदाहार्यम् ।

कारणगम्यत्वप्रस्तावात् पर्यायोक्तं लक्षयति । कारणमिति । प्रस्तुतमित्येतदप्रस्तुतप्रशंसाव्यवच्छेदार्थम् । पर्यायेण कार्यादिद्वारा प्रतीयमानस्य कारणस्य वर्णनं पर्यायोक्तमित्यर्थः । उदाहरति । प्रतिभूपालेति । शुद्धान्तदीर्घिकास्वन्तःपुरक्रीडापुष्करिणीषु । अत्र प्रस्तुतकार्यकथनात् प्रस्तुतस्यैव कारणस्य प्रतीतिं योजयति । अत्रेति ।

---

१ प्रतापरुद्रस्य चमू° M_3. २ °प्रारम्भणेव M_3. ३ पुराणि for स्वपुराणि P.

प्रतीपालंकारः।

अथ प्रतीपम्[1]।

> आक्षेप उपमानस्य कैमर्थक्येन कथ्यते[2]।
> यत्रोपमेयभावः स्यात् तत्प्रतीपमुदाहृतम्[3] ॥

यत्रोपमेयस्य लोकोत्तरत्वादुपमानाक्षेपः क्रियते तदेकं प्रतीपम्। यत्रोपमेयस्योपमानत्वं कल्प्यते तद् द्वितीयम्।

आद्यं यथा।

> कीर्त्तौ प्रतापरुद्रस्य विलसन्त्यां दिगन्तरे।
> किमर्थमुदयत्येष निर्लज्जः शशलाञ्छनः ॥ १७० ॥

द्वितीयं यथा।

> काकतीयकुले लक्ष्मीपतिरेष न संशयः।
> अनेन कथमल्पज्ञैः सुमेरुरुपमीयते ॥ १७१ ॥

अनुमानालंकारः।

अथ तर्कन्यायमूलालंकाराः कथ्यन्ते[4]।

> साध्यसाधननिर्देशस्त्वनुमानमुदीर्यते।

स्फुटप्रतीयमानानन्तरमस्फुटप्रतीयमानं प्रतीपालंकारं लक्षयति। आक्षेप इति। उपमेयेनैवोपमानकार्ये सिद्धे किमर्थमुपमानमित्याक्षेपः एकं प्रतीपम्। यत्र सिद्धोपमानस्य निकर्षार्थमुपमेयत्वकल्पितस्तद् द्वितीयम्। उभयत्राप्युपमेयस्योपमानप्रातिकूल्यात् प्रतीपव्यपदेशः। कीर्त्ताविति। अत्र कीर्त्तेरेव चन्द्रकार्योदयलाद् व्यर्थश्चन्द्र इत्यर्थः।

काकतीयेति। अत्रोपमानत्वेन प्रसिद्धस्य सुमेरोर्निकर्षार्थमुपमेयत्वं कल्पितम्। काकतीन्द्रस्योपमानत्वे विवक्षा प्रयोजिका।

अथानुमानाद्यलंकारवर्गमधिकरोति। अथेति। तत्रापि प्राधान्यादनुमानमादौ लक्षयति। साध्येति। व्यापकस्य धर्मिण्ययोगव्यवच्छेदः साध्यम्। पक्ष-

---

१ प्रतीपः M. २ कैमुत्यक्येऽपि कथ्यते M.; कैमर्थ्याद्यादि P., M. ३ उपमेयोत्कर्षतोपास्योपमेयत्वकल्पनात् P.; यत्रोपमेयस्याप्यत्वं तत्प्रतीपमुदाहृतम् T'. ४ निरूप्यन्ते T'.

रूपकहेतुत्वेन तर्कानुमानवैलक्षण्यम् ।

यथा ।

> रजोधूमः सेनाव्यतिकरभवो यत् प्रसरति
> स्फुलिङ्गा दृश्यन्ते भटघटितकौक्षेयकभुवः ।
> ततो मन्ये यात्राशुचिसमयजो रुद्रनृपतेः
> प्रभूतः कोपाग्निर्दहति रिपुभूपालनगरीः ॥ १७२ ॥

काव्यलिङ्गालंकारः ।

अथ काव्यलिङ्गम् ।

हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम् ।

यत्र हेतुर्वाक्यगतत्वेन पदगतत्वेन वा प्रतिपाद्यते तत् काव्यलिङ्गम् ।

यथा ।

> प्रतापरुद्र इत्येषा कापि पञ्चाक्षरी शुभा ।
> हृदिस्थां बिभ्रतो भूपा वशीकुर्वन्ति संपदः ॥ १७३ ॥

अत्र वाक्यार्थगतो हेतुः ।

धर्मत्वं सपक्षे सत्वं विपक्षाद् व्यावृत्तिरित्येतद्रूपत्रयसहितो हेतुः साधनम् । यत्र साध्यप्रतीतये साध्यं निर्दिश्यते सोऽनुमानालंकार इत्यर्थः । तर्कानुमानवैलक्षण्यं दर्शयति । रूपकहेतुकत्वेनेति । उदाहरति । रजोधूम इति । यात्रैव शुचिसमय आषाढमासो ग्रीष्म इत्यर्थः । अत्र क्रोधाग्नौ साध्ये रजोधूमः खड्गभुवः स्फुलिङ्गाश्च लिङ्गम् । सर्वसंप्रतिपन्ना रूपत्रयसम्पन्नयोर्धूमाग्न्यो रूपकगर्भत्वादनुमानालंकारत्वम् ।

अनुमानप्रसङ्गादनन्तरं काव्यलिङ्गमाह । हेतोरिति । वाक्यार्थहेतुकं विशेषणगत्या पदार्थहेतुकं वा काव्यलिङ्गं द्विविधमित्यर्थः । काव्यग्रहणं तर्कवैलक्षण्यार्थम् । तेन व्याप्तिपक्षधर्मतादयो न क्रियन्त इति रुचकः । अत एवानुमानादस्य वैषम्यमिति लभ्यते । प्रतापेति । अत्र संपद्वशीकरणे वाक्यार्थे प्रतापरुद्रपञ्चाक्षरीमाहात्म्यलक्षणो वाक्यार्थो हेतुः ।

---

१ °हेतुकत्वेन R. २ भवोऽयं प्रस° P. ३ करकलितकोशे° M. ४ नगरीम् M. ५ तत्र R. ६ सन्ततम् M_r. ७ °संप्रतिपन्नरूपत्रय° t.

पदार्थगतो यथा ।

म्लानापि भूभृतां भाललिपिरुच्छ्वसिता पुनः ।
प्रतापरुद्रदेवाङ्घ्रिनखज्योत्स्नामृतोक्षिता ॥ १७४ ॥

अत्र पूर्वं परिम्लानाया भूपाललिपेः पुनरुच्छ्वासे प्रतापरुद्रनरेन्द्रचरणनखचन्द्रिकासेचनं हेतुः । तस्य विशेषणगतत्वात् पदार्थगतत्वोक्तिः ।

अर्थान्तरन्यासालंकारः ।

अथार्थान्तरन्यासः ।

कार्यकारणसामान्यविशेषाणां परस्परम् ।
समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृतः ॥

यत्र कार्यकारणभावेन सामान्यविशेषभावेन वा प्रकृतसमर्थनं क्रियते सोऽर्थान्तरन्यासः ।

म्लानेति । अत्र शत्रुभूपालभाललिपेः पुनरुच्छ्वासे नरेन्द्रनखज्योत्स्नामृतोक्षितत्वपदार्थो हेतुः । यत्र नखज्योत्स्नामृतोक्षितत्वादिति स्वकलादिविरस्कृतया पदार्थस्य हेतुत्वेनोपादाने वाक्यार्थहेतुके हेतुत्वप्रतिपादकपञ्चम्यादिप्रयोगे च नालंकारः । तथाहेतुहेतुमद्भावस्य लौकिकत्वेन विच्छित्तिविशेषाभावात् । यत्र तूपात्तस्य हेतुत्वं यथोदाहृते विषये तत्र न कश्चिद्विरोध इति सर्वस्वरहस्यम् । तदेतन्मनसि निधायाह । तस्य विशेषणगतत्वात् पदार्थगतत्वोक्तिरिति ।

कथितकाव्यलिङ्गसाम्यात् तदनन्तरमर्थान्तरन्यासं लक्षयति । कार्येति । व्याचष्टे । यत्रेति । प्रकृतसमर्थनमिति । समर्थनार्हत्वेनाभिहितस्य प्रकृतस्य यत् समर्थनमुपपादनं न त्वपूर्वत्वेन प्रतीतिरित्यनुमानव्यवच्छेदः । समर्थ्यसमर्थकभावे समानेऽपि ताटस्थ्येन हेतुत्वात् काव्यलिङ्गाद् भेदः । ननु ताटस्थ्येन हेतुत्वं सामान्यविशेषभाव एव न तु कार्यकारणभावे । अतस्तत्र का गतिरिति चेत् लक्षणान्तरमस्तु यथायोगमन्यत्र वान्तर्भवत्विति समाधेयम् । तदुक्तं चक्रवर्तिना ।

---

१ म्लाना महीभृताम् M_3. २ °मृताङ्किता R. ३ °नखज्योत्स्ना° T'. ४ °सेवना M. ५ विशेषणयोग्यत्वात् R. ६ पदार्थगतत्वम् P. ७ °मुपादानं t. ८ p. drops न तु कार्यकारणभावे.

कार्यकारणभावेन यथा ।

भूपाः प्रतापरुद्रस्य नता भवत नोन्नताः ।
उन्नतान् नमयत्येष नतानुन्नमयत्यसौ ॥ १७५ ॥

अत्र फलरूपेणौन्नत्येन नम्रत्वकारणं समर्थितम् ।

सामान्याद्विशेषसमर्थनं यथा ।

उद्वेजिता रुद्रनरेश्वरस्य
रणापदानैः प्रतिपक्षभूपाः ।
बिभ्रत्यमी चित्रमचेतनेभ्यो
भीतस्य सर्वं भयकारि नूनम् ॥ १७६ ॥

अत्र भीतस्य सर्वं भयकारीति सामान्यमचेतनेभ्यो रिपुभूपा बिभ्यतीति विशेषं समर्थयति ।

विशेषात् सामान्यसमर्थनं यथा ।

दुष्टोऽपि महतां संगाद्भवत्येव हि सज्जनः ।
प्रतापरुद्रमभ्येत्य कलिः कृतयुगायते ॥ १७७ ॥

अत्र प्रतापरुद्रसंगतिमहिम्ना कलिः कृतयुगसदृश इति विशेषेण सामान्यसमर्थनम् ।

'अप्रतीतप्रतीतौ स्यादनुमानव्यवस्थितिः ।
पदार्थाद्वाथ वाक्यार्थान्निर्देशे सति हेतुतः ॥
समर्थनं प्रतीतस्य काव्यलिङ्गद्वयं मतम् ।
भवेदर्थान्तरन्यासस्ताटस्थ्ये हेतुभावतः ।
कार्यकारणभावे तु तस्योक्तं लक्षणान्तरम् ॥'

इति । उदाहरति । भूपा इति । कार्येण कारणसमर्थनं योजयति । अत्रेति । उद्वेजिता इति । रणैरेवापदानैरद्भुतकर्मभिः । सामान्येन विशेषः समर्थ्यत इत्याह । अत्र भीतस्येति ।

दुष्टोऽपीति । अत्र विशेषेण सामान्यसमर्थनं योजयति । अत्र प्रतापेति

---

१ °न्नुन्नमयत्यपि P. २ रिपुभूपाला M.

कार्यकारणभावेऽपि कारणात् कार्यसमर्थनं काव्यलिङ्गेऽन्तर्भूतमिति तन्नोक्तम् । अतः प्रकारत्रयमर्थान्तरन्यासस्य ।

तर्कन्यायमूलालंकारानन्तरं वाक्यन्यायमूलालंकारा निरूप्यन्ते ।

यथासंख्यालंकारः ।

उद्दिष्टानां पदार्थानां पूर्वं पश्चाद्यथाक्रमम् ।
अनूद्देशो भवेद्यत्र तद्यथासंख्यमिष्यते ॥

यत्र येन क्रमेणोद्दिष्टाः पदार्थास्तेनैव क्रमेणानूद्दिश्यन्ते तत्र यथासंख्यालंकारः ।

यथा ।

गाम्भीर्यमौन्नत्यमनर्गलत्वं
प्रतापवह्नेः समवेक्ष्य धाता ।
अम्भोनिधिष्वद्रिषु दिग्गजेषु
सृष्टिं प्रयासैकफलामर्मस्त ॥ १७८ ॥

अर्थापत्त्यलंकारः ।

अथार्थापत्तिः ।

कारणेन कार्यसमर्थनं काव्यलिङ्गेऽन्तर्भूतत्वान्नोदाहृतमित्याह । कार्येति । वैधर्म्याश्रयणे षड् भेदा द्रष्टव्याः ।

तर्कपरिशुद्धबुद्धेरेव मीमांसायामधिकारात् तन्मूलानन्तरमेतन्मूलानां प्रस्ताव इत्याह । तर्केति । यथासंख्यं लक्षयति । उद्दिष्टानामिति । पूर्वं निर्दिष्टा उद्दिष्टाः । पश्चान्निर्देशोऽनूद्देशः । तेनात्र पूर्वपश्चात्पदे स्फुटार्थे । व्याचष्टे । यत्रेति । आग्नेयादीनामग्नेरहं देव यज्ययेत्याद्यनुमन्त्रणमन्त्रवद्यत्रोद्दिष्टक्रमेणानूद्देशः स यथासंख्यालंकार इत्यर्थः ।

गाम्भीर्यमिति । समुद्रादिभ्योऽधिकमस्य गाम्भीर्यादिकमिति भावः । गाम्भीर्याद्युद्दिष्टक्रमेण समुद्रादीनामनूद्देशाद्यथासंख्यालंकारः । क्रमालंकारोऽयमिति केचित् ।

---

१ 'मुच्यते

एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यदापतेत् ।
कैमुत्यन्यायतः सा स्यादर्थापत्तिरलंक्रिया ॥

यत्र कस्यचिदर्थस्य निष्पत्तौ तत्समानन्यायात् कैमुत्येनार्थान्तरमापतति सोऽर्थापत्तिरलंकारः । न चात्रानुमानशङ्का । कैमुत्यन्यायसंबन्धरूपत्वात् ।

यथा ।

समन्तादुद्वेलैर्विविधहयधाटीकलकलै-
र्जगत्यां क्रामत्स्वप्यजनि विधुरः सेवणपतिः ।
मनाक् क्रोधोद्भ्रान्तभ्रुकुटिकुटिले रुद्रनृपतौ
नृपाणामन्येषां विफलितरुषां कैव गणना ॥ १७९ ॥

अपि च ।

त्रैलोक्यसारोऽपि सुवर्णशैलः
प्रतापरुद्रेण नृपेण तुल्यम् ।
तुलां समारोढुमपूर्ण एव
महीभृतां का गणनेतरेषाम् ॥ १८० ॥

वाक्यविदामर्थापत्तिश्च न्याय इति कृत्वा संप्रत्यर्थापत्तिं लक्षयति । एकस्येति । यत्रैकस्य वस्तुनः कस्यचिदर्थस्य भावान्निष्पत्तेः । किमुतैव कैमुत्यम् । चातुर्वर्ण्यादित्वात् स्वार्थे ष्यञ्प्रत्ययः । तन्न्यायतोऽन्यद्वस्तु वस्त्वन्तरमापतेत् सार्थापत्तिः स्यादित्यर्थः । व्याचष्टे । यत्रेति । यथा दण्डभक्षणादपूपभक्षणमर्थादापतितं तद्वत् कस्यचिदर्थस्य निष्पत्तौ तत्सामर्थ्यरूपात् समानन्यायादर्थान्तरमापतति सोऽर्थापत्त्यलंकार इत्यर्थः । अत एव सर्वस्वसूत्रं 'दण्डापूपिकयार्थान्तरापतनमर्थापत्तिः' इति । अनुमानान्तर्भावं वारयति । न चेति । उदाहरति । समन्तादिति । अत्र प्राकरणिकः सेवणपतिवृत्तान्तो नृपान्तरवृत्तान्तमप्राकरणिकमाक्षिपति ।

त्रैलोक्येति । तुलां सादृश्यम् । महीभृतां राज्ञामद्रीणां च । अनादेश्यादोपक-

---

१ यत्रान्यथा T'. २ °संबन्धि° P. ३ तुल्यः R. ४ °दापत t.

अथ प्रतापवत्त्वापेक्षया मेरावप्यसारेऽन्येषां महीभृतामर्थादसारत्वं कैमुत्यादापतति ।

परिसंख्यालंकारः ।

अथ परिसङ्ख्या ।

> एकस्य वस्तुनः भासावनेकत्रैकदा यदि ।
> एकत्र नियमः सा हि परिसङ्ख्या निगद्यते ॥

यदेकं वस्तु युगपदनेकत्र संभाव्यमानमेकत्रैव नियम्यते सा परिसंख्या । सा प्रथमं प्रश्नपूर्विका तदन्यथा चेति । तयोर्द्वयोर्वर्जनीयस्य शाब्दत्वार्थत्वाभ्यां द्वैविध्ये चातुर्विध्यम् ।

तत्र ।

शाब्दवर्जनीया प्रश्नपूर्विका यथा ।

> किं मण्डनं त्रैलोक्याः काकतितिलको न हाटकक्षितिभृत्[1] ।
> स्तोतव्यः कः सुधियां रघुनरेन्द्रो न मन्दारः[2] ॥ १८१ ॥

आर्थवर्जनीया[3] प्रश्नपूर्विका यथा ।

योरुभयमहीभृत्कृतान्तयोरप्राकरणिकत्वम् । महीभृतामित्यत्र श्लेषो विशेषः । एवमप्राकरणिकस्य प्राकरणिकादेपेऽप्युदाहार्यम् ।

परिसङ्ख्यां लक्षयति । एकस्येति । एकस्य वस्तुनोऽनेकत्रैकदा युगपत्प्राप्तावन्यतो निवृत्त्यर्थमेकत्र नियमनं परिसङ्ख्येत्यर्थः । एतेन

> 'विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
> तत्र चान्यत्र च प्राप्ते परिसङ्ख्येति गीयते ॥'

इति मीमांसोक्तनियमपरिसङ्ख्ययोर्भेदो नालंकारिकैरङ्गीकृत इति द्रष्टव्यम् । परिवर्जनेन कस्यचिद्वर्जनेन कुत्रचित् सङ्ख्यानं वर्णनीयत्वेन गणनं परिसङ्ख्येत्यन्वर्थेयम् । तस्या विभागमाह । सेति । तयोरिति प्रश्नपूर्विकाप्रश्नपूर्विकयोरित्यर्थः । क्रमेणोदाहरति । किमिति । अत्र मण्डनत्वेन प्राप्तयोः काकतीन्द्रकनकाचलयोः कनकाचलं कण्ठोक्त्या वर्जयित्वा काकतीन्द्रे नियमनात् शाब्दवर्जनीया प्रश्नपूर्विका परिसङ्ख्येत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ।

---

१ °क्षितिभृतः B. २ मन्दरः क्षितिभृत् P. ३ आर्थ° T.; अर्थ° M., M_2.

किं वा क्षौमवितानं लोकानां काकतीयकुलकीर्तिः ।
किं सौख्यं वसुमत्या रुद्रनरेन्द्रस्य भुजवासः ॥ १८२ ॥

अप्रश्नपूर्विका शाब्दवर्जनीया यथा ।

रागो धर्मे न विषयसुखे संगतिः सत्सभायां
न स्त्रीगोष्ठ्यां व्यसनमनिशं नीतिशास्त्रे न चाक्षे[1] ।
[3]कीर्त्यौ नित्यार्जनचतुरता नार्थजाते विनोदो
विद्याभ्यासे न च परिजने रुद्रदेवस्य राज्ञः ॥ १८३ ॥

[3]आर्थवर्जनीया अप्रश्नपूर्विका यथा ।

भूरेव भुवनं देवः स्वयंभूरेव पार्थिवः ।
प्रतापरुद्र एवैकशिलैव नगरी शुभा ॥ १८४ ॥
क्षोणीं रुद्रनराधीशे[4] [5]रक्षति [6]क्षतविद्विषि ।
बलिसद्मन्यहिभयं त्रिदिवे गोत्रभित्कथा ॥ १८५ ॥

अलंकारस्यास्य श्लेषेण चारुत्वातिशयः ।

उत्तरालंकारः ।

उत्तरात् प्रश्न उन्नेयो यत्र प्रश्नोत्तरे तथा ।
बहुधा च निबध्येते[7] तदुत्तरमुदीर्यते ॥

किं वेति । अत्र वर्जनीयस्य चन्द्रिकादेरार्थत्वम् ।

राग इति । अक्षे द्यूते । अत्र विषयसुखादि वर्जनीयं शाब्दम् । प्रश्नस्तु नास्ति ।

भूरेवेति । न स्वर्गादिरित्यार्थवर्जनीया प्रश्नरहिता परिसङ्ख्या ।

क्षोणीमिति । बलिसद्मनि पाताले । अहिभयं सर्पभयं । स्वपक्षप्रभवं भयं च । 'महीभुजामहिभयं स्वपक्षप्रभवं भयम्' इत्यमरः । त्रिदिवे गोत्रभित्कथा इन्द्रप्रसङ्गः कुलघातुकप्रसङ्गश्च । अत्राभ्युच्चयमाह । अलंकारस्येति ।

परिसङ्ख्यायां प्रश्नप्रसङ्गात् तदनन्तरमुत्तरं लक्षयति । उत्तरादिति । यत्रोत्तरादुपनिबध्यमानः प्रश्न उन्नीयते तदेकमुत्तरम् । न चेदमनुमानम् । पक्षधर्मत्वादिनिर्देशाभावात् । तथा प्रश्नपूर्वकं लोकोत्तरमुत्तरं बहुधा निबध्यते तदप-

---

१ न चाक्षे R.; न कामे M₃. २ धर्मे M₃. ३ आर्थि° T., अर्थ° M., M₃.
४ राधिरुद्र° P. ५ रक्षके P., M. ६ जितविद्विषि P. ७ निवर्त्तेते M.

यत्रोत्तरान्निबध्यमानात् प्रश्न उन्नीयते तदेकमुत्तरम् । चारुत्वार्थमसकृल्लोकोत्तरं प्रश्नप्रतिपादनपूर्वमुत्तरं द्वितीयमुत्तरम् ।

क्रमेण यथा ।

किमद्य व्युत्पत्तिस्तव सुजनलोकव्यवहृता
यदद्य ज्ञातव्यं प्रभवति यदा रुद्रनृपतिः ।
तदारभ्योन्मूर्धा जयति विशदो धर्मविभवो
महीदेवाश्चोच्चैर्विविधवि[2]भवारम्भमुदिताः ॥ १८६ ॥

अत्र प्रतापरुद्रो यदा भवति तदारभ्य पूर्णा धर्मप्रतिष्ठा महीदेवा अपि तथाविधसंतोषभाजः । किमधुना पृच्छसीत्युत्तरात् प्रतापरुद्रराज्ये किं धर्मप्रतिपालनमस्ति किं सुखिनो भूसुरा इत्युन्नीयते प्रश्नः ।

द्वितीयो यथा ।

[1]किं णु धणं कुलविज्जा को लाहो सज्जणेण सहवासो ।
का णअरी एअसिला को राआ वीररुद्दणरणाहो ॥ १८७ ॥

रम् । सकृत्प्रश्नं नास्तीति बहुधा ग्रहणम् । नेयं परिसंख्या । तद्वदत्र व्यवच्छेद्यव्यवच्छेदकभावस्याविवक्षितत्वात् । क्रमेणोदाहरति । किमद्येति । सुजनलोकव्यवहृता साधुजनप्रसिद्धा व्युत्पत्तिर्धार्मिकत्वादिज्ञानं तथाच किं यदद्य तव च ज्ञातव्यं भवतीति शेषः । किं तदित्याकाङ्क्षायामाह । प्रभवतीति । प्रभुर्भवतीत्यर्थः । उन्मूर्धा परिपूर्णः । विशदो निर्मलो निरुपाधिक इत्यर्थः । महीदेवा ब्राह्मणाश्च उच्चैर्विविधैर्विभवारम्भैरैश्वर्यविजृम्भणैर्मुदिताः । अत्रोत्तरात् प्रश्नोन्नयनं योजयति । अत्रेति ।

द्वितीयमुदाहरति । किं णिवति । अत्र व्यवच्छेद्यव्यवच्छेदकभावस्याविवक्षितत्वाद्बहुधा प्रश्नोत्तरनिबन्धनादुत्तरालंकारः ।

छाया ।

1 किं नु धनं कुलविद्या को लाभः सज्जनेन सहवासः ।
का नगरी एकशिला को राजा वीररुद्रनरनाथः ॥

१ व्युत्पाद्य तव P. २ °विविधारम्भ° M.. ३ तदाप्रभृति M.. ४ धर्मप्रतिष्ठा पूर्णा P., M. ५ किम् is droppd in T'. ६ इति प्रश्नद्वयमुन्नीयते R., इति प्रश्न उन्नीयते M. ७ राओ M.

विकल्पालंकारः ।

वाक्यन्यायप्रस्तावाद्विकल्प उच्यते ।

विरोधस्तुल्यबलयोर्विकल्पालंकृतिर्मता ।

यत्र तुल्यप्रमाणानुशिष्टयोर्विरुद्धयोर्द्वयोर्युगपत्प्राप्तौ एकस्यासंभव-स्तत्र विकल्पः । औपम्याच्चारुत्वम् ।

यथा ।

भूपालाः क्रियतां मूर्ध्नी धनुषां वा विनम्रता ।
पादच्छायाऽन्ध्रनाथस्य विन्ध्याद्रेर्वा निषेव्यताम् ॥ १८८ ॥

अत्र प्रतापरुद्रे प्रभवति राज्ञां संधिविग्रहाभ्यां तुल्यप्रमाणाभ्यां शिरो नमनधनुर्नमने युगपदेव प्राप्ते तयोर्विरुद्धत्वाद्यौगपद्यासंभवे विकल्पः ।

समुच्चयालंकारः ।

विकल्पप्रतिपक्षभूतः समुच्चयो निरूप्यते ।

गुणक्रियायौगपद्यं समुच्चय उदाहृतः ।

यत्र गुणानां वैमल्यादीनां क्रियाणां च दर्शनादीनां युगपदवस्थानं तत्र समुच्चयालंकारः ।

विकल्पं संगतिपूर्वकं लक्षयति । वाक्यन्यायेत्यादिना । तुल्यप्रमाणविशिष्-ष्टयोस्तुल्यबलयोरेकत्र युगपत्प्राप्तौ विरुद्धत्वाद्यौगपद्यासंभवे विकल्प इत्यर्थः । लौकिकविकल्पाद्वैलक्षण्यं दर्शयति । औपम्याच्चारुत्वमिति । भूपाला इति । पदच्छाया चरणच्छाया । अन्यत्र प्रत्यन्तपर्वतच्छाया । अत्र श्लेषो विशेषः । लक्षणं योजयति । अत्रेति ।

समुच्चयस्य संगतिमाह । विकल्पेति । लक्षणमाह । गुणेति । व्याचष्टे । यत्रेति । यत्र गुणानां क्रियाणां च व्यस्तानां समस्तानां वा युगपदवस्थानं समु-

---

१ काव्यन्यायमूलप्रस्तावात् R.; वाक्यन्यायमूलप्रस्तावात् M. २ विरोधे तुल्य° T′. ३ औपम्यगर्भत्वा° M. ४ भूपालैः M. ५ चापि वा नतिः R. ६ संधिविग्रहवाक्याभ्याम् M., P. ७ P. drops तुल्यप्रमाणाभ्याम्; T′. has तुल्यबलप्रमाणाभ्याम् ८ संभवेन P. ९ स समु T′.

यथा ।

प्रतापरुद्रनृपतौ महासनमुपेयुषि ।
सतां प्रसन्नं हृदयमसतां कलुषं मनः ॥ १८९ ॥

क्रियासमुच्चयो यथा ।

[1]पेच्छइ इमं[2] णरिन्दो पविसइ मअणो अ[3] गलइ माणो अ ।
घुम्मइ मणो अ[4] सुण्णं किं एदं उवह सहिआओ ॥ १९० ॥

एते भिन्नविषये उदाहरणे ।

एकविषयत्वे यथा ।

त्रैलोक्याभयमानमूर्तिर्महितश्रीवीररुद्रप्रभोः
सेवार्थं चिरयत्सु काकतिपुरे भूपेषु तद्योषितः ।
द्वारं यान्ति विलोकयन्ति पुरतो निश्वसमातन्वते
शुष्यन्ति प्रलपन्ति यान्ति जडतां मुह्यन्ति मूर्च्छन्ति च ॥१९१॥

चयालंकार इत्यर्थः विषयभेदेन गुणसमुच्चयमुदाहरति । प्रतापेति । तथैव क्रियासमुच्चयमुदाहरति । पेच्छईति[7] ।

विषयभेदाभावेन क्रियासमुच्चयमुदाहरति । त्रैलोक्येति । तद्योषितः प्रोषितभर्तृकाः उत्कण्ठया द्वारं यान्ति पुरतो विलोकयन्ति यावद्दृष्टिः प्रसरतीति भावः । निश्वासमातन्वते प्रियसक्त्या चिन्तयेति भावः । ज्वरेण शुष्यन्ति मुह्यन्ति जडीभवन्ति इतिकर्तव्यतामूढमनसो भवन्तीत्यर्थः । यद्वा मोहमूर्च्छयोः संचार्यवस्थाभेदेन भेदः । अत्रावस्थानामविवक्षितः क्रमः ।

छाया ।

1 प्रेक्षते इमां नरेन्द्रः प्रविशति मदनश्च गलति मानश्च ।
घूर्णति मनश्च शून्यं किमेतत् पश्यत सख्यः ॥

१ पेच्छइ P.; पेक्खइ R. २ इमं T.; इमं M. ३ P. drops अ. ४ असुण P. ५ °प्रथिमान° R. ६ °रुद्रतः M. ७ t. After this t. has प्रेक्षते इमां नरेन्द्रः &c. ८ विशसन° t.

गुणक्रियासामस्त्येन यथा ।

देवे काकतिवीररुद्रनृपतौ जैत्रप्रयाणोन्मुखे
माद्यद्दन्तिचलत्पदातिविचलद्वाजिप्रधावद्रथम् ।
विच्छायाननमाकुलाक्षमुदयत्कार्पण्यमाविर्भवत्-
कम्पं धास्यति सर्वतः प्रतिपदं प्रत्यर्थिभूभृद्गणः ॥ १९२ ॥

द्वितीयः समुच्चयः ।

खलेकपोतन्यायेन बहूनां कार्यसाधने ।
कारणानां समुद्योगः स द्वितीयः समुच्चयः ॥

यत्रैकं कार्यं साधयितुमहमहमिकया बहूनां कारणानामुद्यमः सोऽपि समुच्चय एव । युगपदनेकेषामवस्थानात् ।

यथा ।

गुणक्रिययोः सामस्त्येन समुच्चयमाह । देव इति । माद्यद्दन्तीत्यादीनि चत्वारि प्रयाणक्रियाविशेषणानि । अत्र कम्पः क्रिया । अन्ये गुणाः ।

समुच्चयत्वसाम्याद् द्वितीयसमुच्चयं लक्षयति । खलेकपोतेति । पुरा किल कुत्र खले लुब्धकेन प्रसारिते जाले चित्रग्रीवो नाम कश्चित् कपोतराजः सपरिवारो धान्यलोभादागत्य बद्धः परस्परं मन्त्रयित्वा सर्वेऽपि संभूय जालेन सहोत्पत्य लुब्धकादृश्यतां गत्वा कुत्रचित् प्रदेशे हिरण्यकनाम्नो मूषिकराजान्मित्रात् पाशच्छेदं लब्ध्वा सपरिवारः स्वगृहं प्रविष्ट इति पञ्चतन्त्रकथां मनसि निधायाह । खलेकपोतन्यायेनेति । यथा पाशच्छेदं प्रति सर्वेषां कपोतानामुद्यमः एवं कस्यचित् कार्यस्य साधने बहूनां कारणानामुद्यमे सोऽपि समुच्चय एवेति । व्याचष्टे । यत्रेति । अहमहमिका व्याख्याता । समुच्चयत्वे हेतुमाह । युगपदिति । अस्यैव तत्करमिति संज्ञान्तरम् । तदुक्तम् ।

---

१ °सामस्त्ये R. २ °प्रणामो° R; °प्रमाणो° P. ३ °पतत्पदाति° M. ४ M. drops एव. ५ t. omits कारणानाम्.

शुभ्रं यशः शौर्यमहश्च वृत्तं
विद्यानवद्या विमलं कुलं च।
प्रतापरुद्रस्य नरेश्वरस्य
लोकोत्तरां रीतिमुदञ्चयन्ति ॥ १९३ ॥

अत्र यशःप्रभृतीनां लोकोत्तरकीर्तिसंपादने[1] प्रत्येकं हेतुत्वेऽपि युगपत्खलेकपोतन्यायसंबन्धः[3]।

समाध्यलंकारः।

अथ समाधिरुच्यते[4]।

एकस्मिन् कारणे कार्यसाधनेऽन्यत् परापतेत्।
काकतालीयनियेतः[5] स समाधिरुदीर्यते ॥

यत्रैकस्मिन् कार्यसाधनाय प्रवृत्ते काकतालीयतयान्यत् कारणमागत्य तत्कार्यं सुकरं करोति स समाध्यलंकारः।

यथा।

'तत्सिद्धिहेतावेकस्मिन् यत्रान्यत् तत्करं भवेत्।' इति। उदाहरति। शुभ्रमिति। सद्योगे चेदमुदाहरणम्। शुभ्रत्वेन शोभनस्य यशसो लोकोत्तररीतिसंपादने[2] शौर्यमहस्त्वादिना शोभनैरन्यादिभिः समुच्चयात्। 'दुर्वाराः स्मरमार्गणाः प्रियतमो दूरे मनोऽप्युत्सुकम्—' इत्यादौ स्मरमार्गणानां दुर्वारत्वेनाशोभनानां तादृशैरेव प्रियतमादिभिः समुच्चय इत्यसद्योगः। प्रियतमादीनां स्वतः शोभनत्वेऽपि विरहिविषयत्वेनात्राशोभनत्वं ज्ञेयम्। 'शशी दिवसधूसरो गलितयौवना कामिनी' इत्यादौ शशिनः शोभनस्यापि दिवसधूसरत्वादशोभनत्वेन सदसत्त्वात्तैरेव कामिनीप्रभृतिभिः समुच्चय इति सदसद्योगोऽत्र द्रष्टव्य इति त्रिविधोऽयं समुच्चयः।

तत्करसाम्यात् तदनन्तरं समाधिं कथयति। एकस्मिन्निति। व्याचष्टे। यत्रेति। केनचिदारब्धस्य कार्यस्य काकतालीयन्यायेन कारणान्तरेण समाधानात् समाधिरित्यर्थः। काकतालीयेति वृत्तिविषये काकतालशब्दौ काकतालसमवेतक्रियावाचिनौ। तेन काकागमनमिव तालपतनमिव काकतालमितीवार्थे 'समा-

---

१ कीर्तिषु° M.; २ °नीतिसंपा° T. ३ °कपोतिकया संरम्भः M.; °कपोतन्यायेन संरम्भः R. ४ सति कार्यस्य R. ५ °नियतम् P.

रणाङ्गणे रुद्रनरेन्द्ररोष-
　　शमाय राज्ञां विहितस्तुतीनाम् ।
वक्त्रेषु यद्वायुवशात् पतन्ति
　　तृणानि देवस्य स पक्षपातः ॥ १९४ ॥

अत्र प्रतापरुद्रनरेन्द्रक्रोधशान्त्यर्थं[1] रणाग्रे प्रक्रान्तस्तुतीनां राज्ञां वक्त्रेषु वायुवशात् काकतालीयतया पतितैस्तृणैः क्रोपशान्तिलक्षणकार्य[2]सुकरत्वम् ।

अथ लोकन्यायमूलालंकारा निरूप्यन्ते ।

भाविकालंकारः ।

अ[3]तीतानागते यत्र प्र[4]त्यक्षे इव लक्षिते ।
असद्भुतार्थकथनाद्भाविकं तदुदाहृतम् ॥

साच्च तद्विषयात्' इति ज्ञापनात् सुप्सुपेति समासः । उभयत्रोपमेयं क्र[5]मेणोभयत्र देवदत्तागमनं दस्यूपनिपातश्च तेन देवदत्तदस्युसमागमः काकतालसमागमसदृश इति लभ्यते । ततः काकतालमिव काकतालीयमिति द्वितीयाद्यर्थे 'समासाच्च तद्विषयात्' इति छप्रत्ययः । यथा पतता तालफलेन काकवधस्तद्वदुपनिपतितैर्दस्युभिर्देवदत्तस्य वध इत्यर्थः । यदाह भगवान् भाष्यकारः । 'एवं तर्हि द्वाविवार्थौ काकगमनमिव तालपतनमिव काकतालं काकतालमिव काकतालीयम्' इति । तच्च व्याख्यातं कैयटेन । 'तत्र काकागमनं देवदत्तागमनस्योपमानं तालपतनं दस्यूपनिपातस्य । तालेन तु यः काकस्य वधः स देवदत्तस्य दस्युना वधस्योपमानमिति वधादिः काकतालीयादिशब्दवाच्यः संपद्यते' इति । तेन काकतालीयं नामातर्कितोपनतं चित्रीकरणमुच्यत इति वृत्तिकारः । एवं चानुषङ्गिककारणान्तरस्य समाधेः समप्रधानसर्वकारणात् समुच्चयाद् भेद इति द्रष्टव्यम् । उदाहरति । रणाङ्गण इति । अत्र क्रोधशान्तौ स्तुतिः प्रधानकारणम् । वक्त्रे वायुवशात् तृणपतनं काकतालीयमिति समाधिः ।

लोकन्यायमूलेषु चमत्कारातिशयनिदानं भाविकं लक्षयति । अतीतेति । अत्यद्भुतार्थकथनादिति । तथाविधशब्दसंदर्भेणेति शेषः । व्याचष्टे । यत्रेति ।

---

१ °कोपशान्त्यर्थम् M.　२ °कार्यस्य सुकरत्वम् R.　३ अतीतानागतं यत्र R.　४ प्रत्यक्षमिव लक्ष्यते R.　५ क्रमेण देवदत्ता° t.

यत्राद्भुतचरितोपवर्णनेन[1] भूतभाविनोर्वस्तुनोः प्रत्यक्षायमाणत्वं भवति स भाविकालंकारः । न च भूतभाविनोः प्रत्यक्षवदवभासो विरुद्धः । अत्यद्भुतवस्तुवर्णनया भाविकानां[2] हृदि भावनोदयात् । तथा[3] च भावनया पुनश्चेतसि[4] निदर्शनात् प्रत्यक्षायमाणत्वं घटत एव[9] । यथा पान्थस्य[5] कामिनीभावनया[6] तस्याः प्रत्यक्षायमाणत्वम् । न चेयं स्वभावोक्तिः । तस्यां वस्तुस्वभावस्य यथावद्वर्णनया प्रत्यक्षायमाणता । इह त्वत्यद्भुतत्वेन । नापि रसवदाद्यलंकारः । तत्र विभावानुभावाद्यनुसंधानेन रसादेर्भाव्यत्वम्[7] । न त्वत्यद्भुतत्वेन । न चेयमुत्प्रेक्षा । अतीतानागतयोः प्रत्यक्षत्वेनाध्यवसायाभावात् । न[8] चायं भ्रान्तिमदलंकारः । भावनाया अभ्रान्तिरूपत्वात् । अतः सर्वोत्तीर्णोऽयमलंकारः ।

भावः कवेरभिप्रायः श्रोतरि प्रतिबिम्बितत्वेनास्तीति भाविकम् । ननु संबन्धो वर्तमानं च गृह्यते चक्षुरादिना इति न्यायेन भूतभाविनोः प्रत्यक्षवदवभासो विरुद्ध इत्याशङ्क्य परिहरति । न चेति । तत्र हेतुमाह । अत्यद्भुतेति । भाविकानां सहृदयानां भावनोदयात् संस्कारोद्बोधात् । न चेदमयुक्तमित्याह । तथा चेति । भावनायाः पुनरिति भावनाविषयाणामत्यद्भुतवस्तूनामित्यर्थः । चेतसि सहृदयहृदये निदर्शनान्नितरां दर्शनात् आदरप्रत्ययेन धार्यमाणत्वादित्यर्थः । प्रत्यक्षायमाणत्वं घटत एवेति । यथा लौकिकानामिन्द्रियैर्वर्तमानसंबन्धार्थसाक्षात्कारः यथा वियोगिनामैकाग्र्यलक्षणया भावनयातीन्द्रियार्थसाक्षात्कारः तथा काव्यतत्त्वविदां काव्यतत्त्वगतात्यद्भुतत्वानुसंधानप्रयुक्तया भावनयातीतानागतार्थसाक्षात्कारो युज्यत एवेत्यर्थः । अत्र दृष्टान्तमाह । यथेति । पान्थस्य पथिकस्य विरहिण इत्यर्थः । 'पथोऽण् नित्यम्' इति णप्रत्ययः । कामिनीभावनया कामिनीध्यानेन तस्याः कामिन्याः प्रत्यक्षायमाणत्वम् । तदुक्तम् । 'सांद्रिगतस्साक्लिकोऽयमद्वैतवाद' इति । न चेयं स्वभावोक्तावन्तर्भवतीत्याह । न चेति । कुत इत्याकाङ्क्षायामुभयोर्वैलक्षण्यमाह । तस्यामिति । वस्तुस्वभावस्य लौकिकवस्तुगतसूक्ष्मधर्मस्येत्यर्थः । यथावदन्यूनातिरिक्तत्वेन वर्णनया प्रत्यक्षायमाणता साधारण्येन हृदयसंवादिप्रतीतिविषयत्वमित्यर्थः । इह भाविके त्वत्यद्भुतत्वेन

---

१ °चरितोपवर्णनाद्भुत° P. २ भाविकहृदि P. ३ अथ R. ४ पुनः पुनश्चेतसि P. ५ विटस्य M. ६ भामिनी° T. ७ °भावाद्युपाधित एव P. ८ न च भ्रान्ति° P; न चेयं भ्रान्तिमदलंकाररीतिः M. ९ R. omits एव.

यथा ।

ध्वजाग्रे काकतीन्द्रस्य भाति क्रोडाकृतिर्हरिः ।
मृद्बिन्दुरिव दंष्ट्राग्रे यस्यालक्ष्यत मेदिनी ॥ १९५ ॥

अत्राष्टादशद्वीपयुक्ताया मेदिन्या दंष्ट्राग्रे मृद्बिन्दुरूपतेति भूत्यद्भुतवर्णनया तथाविधभावनया प्रत्यक्षवत् प्रतीतिसंभवः ।

प्रत्यनीकालंकारः ।

अथ प्रत्यनीकालंकारः प्रतिपाद्यते ।

बलिनः प्रतिपक्षस्य प्रतीकारे सुदुष्करे ।
यस्तदीयतिरस्कारः प्रत्यनीकं तदुच्यते ॥

लोकोत्तराणां वस्तूनां स्फुटतया ताटस्थ्येन प्रतीतिरिति भेद इत्यर्थः । अत एव रसवदादौ नान्तर्भाव इत्याह । नापीति । तत्र हेतुमाह । तत्रेति । विभावानुभावाद्यनुसंधानेन परमाद्वैतज्ञानवन्ममैवैते शत्रोरेवैते तटस्थस्यैवेत इत्यादिविशेषपरिहारात् साधारण्येन सहृदयसंवादिप्रत्ययेनेत्यर्थः । रसादेर्भाव्यत्वं स्वाद्यत्वमित्यर्थः । न त्वत्यद्भुतत्वेनेति । यथा भाविके भूतभाविनोरत्यद्भुतार्थयोः सर्वज्ञवत् ताटस्थ्येन प्रतीतिर्न साधारण्येन तद्वदत्र न भवतीत्यर्थः । नन्वत्र भूतभाविनोरप्रत्यक्षयोः प्रत्यक्षत्वेनाध्यवसायादिवादेरभावाच्च प्रतीयमानोत्प्रेक्षा कुतो न स्यादत आह । न चेयमुत्प्रेक्षेति । तत्र हेतुमाह । अतीतेति । न ह्यप्रत्यक्षं प्रत्यक्षत्वेनाध्यवसीयते । किं तर्हि काव्यार्थविद्भिः प्रत्यक्षं दृश्यत इति नोत्प्रेक्षेति भावः । ननु भूतभाविनोः प्रत्यक्षत्वे भ्रान्तिमदलंकारः किं न स्यादत आह । न चायमिति । तत्र हेतुमाह । भावनाया इति । काव्यतत्त्वविदां भूतभाविवस्तुसाक्षात्कारसामग्री भावना तस्या अभ्रान्तरूपत्वात् । भ्रान्तिं रूपयति । अतथेति । भ्रान्तिरूपा तस्या भावस्तत्त्वम् । तदभावाद् भ्रान्तिजनकत्वाभावादित्यर्थः । भूतभाविविषयत्वेऽपि भावनामहिम्ना न प्रत्यक्षत्वहानिरिति भावः कण्टकशोधनमुपसंहरति । अत इति । यदन्यदवशिष्टं तत्सर्वमलंकारसर्वस्वे द्रष्टव्यम् । उदाहरति । ध्वजाग्र इति । क्रोडाकृतिर्वराहाकृतिः । योजयति । अत्रेति ।

लोकन्यायमूलप्रस्तावात् प्रत्यनीकं लक्षयति । बलिन इति । प्रतीकार इति । 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इति दीर्घः । व्याचष्टे । यत्रेति । अनीकस्य

---

१ P. drops दंष्ट्राग्रे. २ अद्भुत° T', M. ३ °भ्रान्ति° T.

प्रबलस्य यत्र प्रतिपक्षस्य प्रतीकारासामर्थ्यात् तदीयतिरस्कारो भवति तत् प्रत्यनीकम् ।

यथा ।

काकतीयपतिशौर्यमहोष्म-
न्यग्कृतस्वमहिमा वडवाग्निः ।
तद्गभीरिमसनाभिमजस्रं
बाधते निधिमपां बहिरन्तः ॥ १९६ ॥

अत्र सादृश्यहेतुकं तदीयत्वमित्यलंकारत्वम् ।

व्याघातालंकारः ।

अथ व्याघातः[2] ।

येन यत् साधितं वस्तु तेनैव क्रियतेऽन्यथा ।
अन्येन तदलंकारो व्याघात इति कथ्यते ॥

यद्वस्तु येन केनचित् कर्त्रा येन साधनेन साधितं तद्वस्तु तेनैव साधनेनान्येन कर्त्रा यदन्यथानियते स व्याघातः ।

यथा ।

काकतीयाभिजातोऽयं नाभिजातोऽधिकस्थितिः[3] ।
दोर्भ्यां कल्पोलयान् भूपांस्ताभ्यामनुदयान्[4] सृजन् ॥ १९७ ॥

सैन्यस्य प्रतिनिधिः प्रत्यनीकं तत्तुल्यत्वादिदमपि प्रत्यनीकमित्यर्थः । प्रतिपक्षप्राबल्यप्रख्यापनमत्र प्रयोजनम् । काकतीयेति । तस्य काकतीयस्य गभीरिम्णा गाम्भीर्येण सनाभिं सदृशं 'ज्योतिर्जनपद—' इत्यादिना समानशब्दस्य सभावः । अस्या अलंकारत्वमाह अत्रेति ।

पूर्वयैव संगत्या व्याघातं लक्षयति । येनेति । येनोपायेन यद्वस्तु साधितं केनचित् कर्त्रेति शेषः । तेनैवोपायेनान्येन कर्त्रा तद्वस्त्वन्यथा क्रियते चेत् स व्याघातोऽलंकार इत्यर्थः । काकतीयेति । काकतीयाभिजातः काकतीयकुलोद्भूतो नाभिजातो ब्रह्मा ततोऽधिका स्थितिर्यस्य स तथोक्तः । दोर्भ्यामीश्वरबाहुभ्यां कल्पोदयान् भूपान् राजन्यान् 'बाहू राजन्यः कृतः' इति श्रुतेः । ताभ्यां दोर्भ्या-

---

१ बलिनः P; प्रबलप्रतिपक्षप्रतीकारा° R, M. २ व्याघातालंकारः T. ३ °ताधिका ।स्थितिः P. ४ °मनुदयं यद्रम् P.

अथ लोकन्यायमूलालंकारनिरूपणप्रस्तावात् पर्यायालंकारो निरूप्यते[1]।

पर्यायालंकारः।

क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि।
एकस्मिन्नथवानेकं पर्यायालंकृतिर्मता[2]॥

यत्र क्रमादेकमनेकस्मिन्नाधारे वर्तते स एकः पर्यायः। न[4] चात्र विशेषालंकारः। तत्रैकस्यानेकत्र युगपद्वर्तनम्। अत्र क्रमेण। तथैकस्मिन्नाधारेऽनेकमाधेयं[5] स द्वितीयः पर्यायः। न चात्र समुच्चयालंकारः। तत्राप्येकत्रानेकेषां[6] युगपद्वर्तनम्[7]।

क्रमेण यथा।

दंष्ट्रायां कुहनाकिटेर्भगवतो देवस्य शौरेः पुरा
पश्चान्मस्तकमण्डले फणभृतः पाताललोकेशितुः।
आखोर्वीपतिशेखरस्य महतः श्रीकाकतीयप्रभो-
र्बाहौ विश्वधुरीणसारमहिते बद्धोत्सवा मेदिनी ॥ १९१ ॥

अत्रैकस्या मेदिन्याः क्रमादनेकत्र[8] वर्तनम्।

द्वितीयः।

मनुदयानुदयरहितान् सृजन्निति निष्पादकस्य निष्पादितवस्तुव्याहतिहेतुत्वाद् व्याघातः।

व्याघाते वस्तुसाधनान्यथाकरणयोः क्रमिकत्वात् तत्प्रसङ्गेन पर्यायं लक्षयति। क्रमेणेति। एकस्यानेकत्र वर्तनमनेकस्यैकत्र वर्तनं चेति द्विधा पर्यायालंकारः। उभयस्य क्रमिकत्वाद्विशेषसमुच्चययोः क्रमेण व्यवच्छेदः। दंष्ट्रायामिति। कुहनाकिटेर्मायावराहस्य पाताललोकेशितुः फणभृतः शेषस्य। सर्वधुरां वहतीति सर्वधुरीणः। ‘खः सर्वधुरात्’ इति खप्रत्ययः। विश्वधुरीणेति पाठे अत्रैव ‘खः’ इति योगविभागात् खप्रत्ययः। एकस्यानेकत्र वर्तनं योजयति। अत्रेति।

---

१ °मूलालंकारा निरूप्यन्ते M.; २ °प्रस्तावे पर्याय उच्यते B. ३ °कृतिर्द्विधा B. ४ नात्रालंकारे P. ५ °नेकाधेयम् P. ६ °प्यनेकस्यैकत्र P. ७ °वर्णनम् M.; द्वर्तनमत्र क्रमेण। यथा T′. ८ क्रमेणानकेत्र R.

येषां मुखे निजवधूसविधे नृपाणां
शौर्योक्तयः समभवन्नभिमानगर्भाः ।
तेषां प्रतापनृपवीक्षणकातराणां
तत्रैव दीनवचनानि समुद्भवन्ति ॥ १९९ ॥

सूक्ष्मालंकारः ।

अथ सूक्ष्मालंकारो निरूप्यते ।

असंलक्षितसूक्ष्मार्थप्रकाशः सूक्ष्म उच्यते ।

विदग्धमात्रवेद्यस्यार्थस्य यत्राकारेङ्गिताभ्यां[1] प्रकाशनं स सूक्ष्मालंकारः ।

[2]दृष्ट्या पश्यसि केवलं न मनसा वाचा प्रियं भाषसे
नो भावेन भुजान्तरं प्रकटयस्यग्रे न चाभ्यन्तरम् ।
ज्ञातं काकतिनाथ भूस्तव परं प्राणेश्वरी ध्यायतो
मादृक्षेषु विडम्बनैव तदलं व्यर्थैर्बहिःसंभ्रमैः ॥ २०० ॥

[3]यथा वा ।

येषामिति । निजवधूसविधे योषिन्मध्ये । अभिमानगर्भा गर्वगुम्फिताः । तत्रैव मुखे दीनवचनानि त्रायस्वेत्यादिवाक्यानि समुद्भवन्ति । अत्रैकस्मिन् मुखे शौर्योक्तीनां दीनवचनानां च क्रमेण वृत्तिः ।

एकत्रानेकवृत्तिप्रसङ्गेनैकस्य संलक्षितत्वासंलक्षितत्वसंबन्धात् पर्यायानन्तरं सूक्ष्मं लक्षयति । असंलक्षितेति । असंलक्षितस्य स्थूलबुद्धीनामवेद्यस्य[4] सूक्ष्मस्येङ्गिताकाराभ्यां तीक्ष्णबुद्धिसंवेद्यस्यार्थस्य प्रकाशो विदग्धं प्रति प्रकाशनं यत्र स सूक्ष्मालंकार इत्यर्थः । व्याचष्टे । विदग्धेति । इङ्गिताकारयोर्लक्षणमाह चक्रवर्ती ।

'आकृतिर्व्यञ्जिताश्चेष्टा इङ्गितं बुद्धिकारिताः ।
आकारः पुनराम्नातस्ता एवाबुद्धिकारिताः ॥'

---

१ P. drops आकारेङ्गिताभ्याम्. २ दृष्ट्या पश्यसि up to यथा वा is dropped in B. T'., M. and M_3. ३ M. drops from यथा वा to इति प्रकाशितम्. ४ °मसंवेद्यस्य t..

'गुरुअणसविहम्मि वहू दट्ठूण णरिंदपेसिअं दूइं ।
सव्वंगेसु सहासं कत्थूरिविलेवणं कुणइ ॥ २०१ ॥

अत्र कस्तूरीविलेपनेन तिमिरसमयः संकेतकाल इति प्रकाशितम् ।

उदात्तालंकारः ।

अथोदात्तालंकारः ।

तस्यापि लोकन्यायमूलतैवानन्तर्यकारणम् ।

तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते ।

यत्र महासमृद्धिशालिनो वस्तुनो वर्णनं क्रियते तत्रोदात्तालंकारः ।

यथा ।

तथा

'तारापुटभ्रूहस्त्यादेर्विकारानिङ्गितं विदुः ।
आकाराः सत्त्वजा भावा बाह्या बुद्ध्यापरेऽन्यथा ॥'

इति । उदाहरति । गुर्विति । अत्र दूत्याः संकेतसमयजिज्ञासायां तदीयेन भ्रूभङ्गादिनेङ्गितेनोपलभ्य प्रगल्भवध्वा रात्रिसमयः संकेतकाल इति कस्तूरीविलेपनेन प्रकाश्यते ।

'वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धै-
र्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या
स्मित्वा पाणौ खड्गलेखां लिलेख ॥'

इत्यत्र स्वेदबिन्दुनिमित्तकुङ्कुमभेदलक्षणाकारसूचितं पुरुषायितं पाणौ कृपाणलेखनेन पुरुषैकयोग्येन प्रकाश्यत इत्याकारनिबन्धनः सूक्ष्मः ।

उदात्तमाह । अथेति । तस्य संगतिमाह । तस्येति । लक्षणमाह । तदिति । व्याचष्टे । यत्रेति । महासमृद्धिशालिनः कविप्रतिभाप्राप्तैश्वर्यशालिन इत्यलौकि-

---

छाया ।

1 गुरुजनसविधे वधूर्दृष्ट्वा नरेन्द्रप्रेषितां दूतीम् ।
सर्वाङ्गेषु सहासं कस्तूरीविलेपनं करोति ॥

१ णरिंदं T'. २ कत्थुरि° P. ३ °विलेपण P. ३ °कालः R. ४ °कारः कथ्यते T'. ४ लोकन्याय एव कारणम् P.; लोकन्यायमूलतैव कारणम् M. ५ t. drops इङ्गितेन.

रम्यामेकशिलाभिधाननगरीमासेदिवांसो बुधाः
सौवर्णेषु गृहेषु रत्न[1]रचितद्वास्तोरणेषु स्थिताः ।
आरुह्याङ्गणमेदिनीषु [2]कलभान् क्रीडोत्सुकानर्भकान्
मोदन्ते यदवेक्ष्य रुद्रनृपतेस्तत्त्यागलीलायितम् ॥ २०२ ॥

त्वकथनादलंकारत्वमिति । रम्यामिति । आसेदिवांसः प्राप्ताः । कलभान् बालगजान् । मोदन्त इति यत् तत् त्यागलीलायितं त्यागलीला । लोहितादि-क्यषन्ताद् भावे क्तः । अङ्गभूतमहापुरुषचरितं चोदात्तम् । यथा ।

'तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी ।
निवसन् बाहुसहायश्चकार रक्षःक्षयं रामः ॥'

अत्रारण्ये वर्णनीये रामचरितमङ्गत्वेन वर्णितमिति मतान्तरानुसारेण सर्वस्वकारः । तथा हि यत्र रसादयो वाक्यार्थीभूतास्तत्र रसवदादयोऽलंकारा इत्यलंकारमात्ररसिका भामहादयः । तन्मते यथा वाक्यार्थीभावादङ्गभूतो रसादिः तथाङ्गभूतमहापुरुषचरितवर्णनात्मको द्वितीयोदात्त उपपद्यते । ध्वनिदर्शने तु काव्यात्मनो रसादेः प्राधान्यदशायामलंकार्यत्वादलंकारभावो नोपपद्यते । तदुक्तं ध्वन्याचार्यैः ।

'रसभावतदाभासभावशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥' इति ।

यत्र रसस्वरूपे वस्तुमात्रेऽलंकार[3]तायोग्ये वाक्यार्थीभावेन प्रधानेऽङ्गभूता रसादयस्तत्र रसवदाद्यलंकारा एव । तदपि तैरेवोक्तम् ।

'प्रधानेऽन्यत्र वाक्यार्थे यत्राङ्गत्वं रसादयः ।
काव्ये तस्मिन्नलंकारो रसादिरिति मे मतिः ॥' इति ।

[4]तदा द्वितीयोदात्तस्य विषय एव नास्तीति सर्वस्वलक्षणम् । अत एव ध्वनिदर्शनानुसारी विद्यानाथोऽपि द्वितीयमुदात्तं नाङ्गीचकारेति रहस्यम् । नन्वेवं तर्हि रसवदादयः किमिति नाङ्गीक्रियन्त इति चेन्नैवम् । रसप्रकरण एव तत्स्वरूपनिरूपणात् । किं तूदाहरणमलंकारप्रकरणे भविष्यतीति प्रतिज्ञाय केन वाभिप्रायेणेह नोदाहृतम् । अस्माभिस्तु तत्रैव दिङ्मात्रमुदाहृतमिति नेह पुनः प्रयत्यते ।

---

१ °चित° M. २ कलभ° P. ३ योग्यवाक्या° t. ४ तद्द t.

परिवृत्त्यलंकारः।

अथ समानन्यायात् परिवृत्तिर्निरूप्यते।

समन्यूनाधिकानां च यदा विनिमयो भवेत्।
साकं समाधिकन्यूनैः परिवृत्तिरसौ मता॥

समन्यूनाधिकानां समाधिकन्यूनैर्विनिमयः परिवृत्तिः। समेन समपरिवृत्तिर्न्यूनेनाधिकपरिवृत्तिरधिकेन न्यूनपरिवृत्तिश्चेति।

समेन समपरिवृत्तिर्यथा।

सुधारसमुचो वाचो दत्त्वा काकतिभूभुजे।
अतो लभन्ते कवयः सहस्रं गन्धसिन्धुरान्॥ २०३॥

अत्र वचसां सिन्धुराणां च समत्वम्।

न्यूनेनाधिकपरिवृत्तिर्यथा।

उपायनं गजाश्वादि कृत्वा सर्वेऽपि भूभुजः।
प्रतापरुद्रदेवस्य लभन्ते सुस्थिरां कृपाम्॥ २०४॥

अत्र त्यज्यमानादुपायनादेर्दीयमानस्य प्रतापरुद्रकृपाविलसितस्यैवाधिक्यम्।

अधिकेन न्यूनपरिवृत्तिर्यथा।

प्रतापरुद्रस्य रणे जिताः प्रत्यर्थिभूभुजः।
दत्त्वा भूपां किरातेभ्यो लभन्ते वल्कलादिकम्॥ २०५॥

समृद्धिकार्यत्वात् विनिमयस्य तद्रूपां परिवृत्तिमुदात्तानन्तरं निरूपयति। अथेति। समानन्यायात् लोकव्यवहाररूपात्। समेति। किंचित् दत्त्वा कस्यचिदादानं विनिमयः। समस्य समेन न्यूनस्याधिकेनाधिकस्य न्यूनेन विनिमय इति त्रेधा परिवृत्तिः। समेन समपरिवृत्तिमुदाहरति। सुधेति। अतः काकतीन्द्रात्। गन्धसिन्धुरान् गन्धगजान्। लक्षणमुक्तं नाटकप्रकरणे।

न्यूनेनाधिकपरिवृत्तिमुदाहरति। उपायनमिति।

अधिकेन न्यूनपरिवृत्तिमुदाहरति। प्रतापेति।

---

१ समान्यन्यायमूला P. २ ददत् M. ३ न्यूनाधिक° R. ४ विलसितस्याधिक्यम् T. ५ °न्यायलोक° t.

अत्र त्यज्यमानादाभरणजातादादीयमानस्य वल्कलादेर्न्यूनत्वम् ।

कारणमालालंकारः ।

अथ शृङ्खलान्यायमूलालंकारा निरूप्यन्ते ।

पूर्वं पूर्वं प्रति यदा हेतुः स्यादुत्तरोत्तरम् ।
तदा कारणमालाख्यमलंकरणमुच्यते ॥

यदा पूर्वं पूर्वं क्रमेणोत्तरोत्तरं प्रति हेतुतां भजते स कारणमालाख्योऽलंकारः ।

यथा ।

विद्यया विनयोत्कर्षो विनयेन गुणार्जनम् ।
गुणैः प्रजानुरागश्च क्रमोऽयं काकतीश्वरे ॥ २०६ ॥

यत्रोत्तरोत्तरेषां स्यात् पूर्वं पूर्वं प्रति क्रमात् ।
विशेषणत्वकथनमसावेकावली मता ॥

यत्र पूर्वं पूर्वं प्रति क्रमेणोत्तरोत्तरं विशेषणत्वं भजते स एकावल्यलंकारः ।

यथा ।

अनन्तरालंकारचतुष्टयस्य संगतिमाह । अथेति । कारणमालां लक्षयति । पूर्वपूर्वमिति । प्रतिशब्दो भिन्नक्रमः । तेन पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमालेत्यर्थः । तथा व्याचष्टे । यदिति । विद्ययेति । विद्यादयो विनयादीन् प्रति हेतवः ।

ईषदेतद्वैपरीत्यादेकावलीं लक्षयति । यत्रेति । पूर्वपूर्वं प्रत्युत्तरोत्तरस्य विशेषणत्वं स्थापनेनापोहनेन च द्वैविध्यमनुभवतीत्येकावलीं द्विधा करोति । आद्यमु-

---

१ °जाताद् दीयमानस्य P. २ वल्कलादेरल्पत्वम् T'. ३ यदा यदा T'. ४ गुणार्जितम् M. ५ पूर्वपूर्वपरिक्रमाद्युत्तरो° M.

प्रतापरुद्रनगरी सुजनैरुपशोभिता ।
सुजनाः स्फीतविभवैर्विभवाः स्थैर्यशालिनः ॥ २०७ ॥

एतत्स्थापनेनोदाहरणम् ।

अपोहनेनापि भवति ।

यथा ।

न तद्राज्यं प्रजा यत्र न भवन्त्यूर्जितश्रियः ।
न ताः प्रजाः प्रभुर्यासां न स्वयं काकतीश्वरः ॥ २०८ ॥

मालादीपकालंकारः ।

यदा तु पूर्वपूर्वस्य संभवेदुत्तरोत्तरम् ।
अत्युत्कर्षावहत्वं तन्मालादीपकमुच्यते ॥

यत्र पूर्वपूर्वस्योत्तरोत्तरगुणावहत्वं स मालादीपकालंकारः ।
यथा ।

भाग्यभूमा महीं प्राप्तः काकतीन्द्रभुजं मही ।
भुजः प्रतापमतुलं प्रतापश्च जगत्त्रयम् ॥ २०९ ॥

सारालंकारः ।

उत्तरोत्तरमुत्कर्षः सारालंकार उच्यते ।

यथा ।

जगत्सु वसुधा भाति तस्यामेकशिलापुरी ।
काकतीयान्वयस्तत्र तस्मिन् रुद्रनरेश्वरः ॥ २१० ॥

दाहरति । प्रतापेति । अत्र नगर्यादेः पूर्वपूर्वस्य सुजनादुत्तरोत्तरं स्थापनेन विशेषणत्वं भजते ।

द्वितीयमुदाहरति न तद्राज्यमिति । अत्र राज्यादेः पूर्वपूर्वस्य प्रजादुत्तरोत्तरमपोहनेन विशेषणत्वं भजते ।

पूर्वं पूर्वं प्रत्युत्तरोत्तरस्योत्कर्षहेतुत्वेनैकावलीमुक्त्वोत्तरोत्तरं प्रति पूर्वपूर्वस्योत्कर्षहेतुत्वे मालादीपकमाह । यदेति । भाग्येति । अत्र भाग्यातिशयादिभिर्महयादीनामुत्कर्षः क्रमेण विधीयते ।

परिशेषात् सारं लक्षयति । उत्तरोत्तरमिति । जगत्स्विति । अत्र जगद्-

---

१ ¹भखिलम् M.

सकलभुवनसारभूतं प्रतापरुद्रं विषयीकुर्वतश्चिरादस्यालंकारस्य सारत्वमित्यन्वर्थाभिधानम्।

[1]इति [2]श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रेऽर्थालंकारप्रकरणं समाप्तम्।

पेक्षया वसुधाया उत्कर्षः। तदपेक्षया एकशिलाया इत्यादिक्रमेणोत्कर्षो रुद्रनरेश्वरे विश्राम्यति।

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लि-
नाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्दयार्यस्या-
नुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्री-
यव्याख्याने रत्नापणाख्याने अर्थालंकारनिरूपणं
नाम अष्टमं प्रकरणम्।

---

१ इत्यर्थालंकाराः R. २ T'. drops श्री.

अथ मिश्रालंकारप्रकरणम् ।

अथ संसृष्टिसंकरौ निरूप्येते ।

यथा लौकिकानामलंकाराणां हिरण्मयानां मणिमयानां च पृथक् सौन्दर्यहेतूनामन्योन्यसंबन्धेन चारुत्वातिशयो दृश्यते तथैव काव्यालंकाराणां रूपकादीनां मिथः संबन्धेन सौन्दर्यातिशयः प्रतीयते । स च संबन्धो द्विविधः । संयोगरूपः समवायरूपश्चेति । संयोगे तिलतण्डुलन्यायः ।[2]समवाये क्षीरनीरन्यायः । तिलतण्डुलन्यायेन [3]संसृष्टिः । क्षीरनीरन्यायेन संकरः । अनयोः पृथक्चारुत्वातिशयहेतुत्वादलंकारधुरन्धरत्वम् । न तु पूर्वोक्तालंकारशेषता[4] । तत्र प्रथमं संसृष्टिर्निगद्यते[5] ।

संसृष्टिः ।

तिलतण्डुलसंश्लेषन्यायाद्यत्र परस्परम्[6] ।
संश्लिष्येयुरलंकाराः सा संसृष्टिर्निरूप्यते ॥

यत्र तिलतण्डुलन्यायेन [7]परस्परसंबद्धा रूपकादयो भवन्ति सा संसृष्टिः । सा त्रिविधा । शब्दालंकारगतत्वेनार्थालंकारगतत्वेनोभयालंकारगतत्वेन च ।

एकैकालंकारनिरूपणानन्तरं मिश्रालंकारनिरूपणं प्रतिजानीते । अथेति । उक्तानामलंकाराणां क्वचित् सहभावे किं पार्थक्येन पर्यवसानमुतालंकारान्तरत्वमिति विचार्य लौकिकालंकारन्यायेनालंकारान्तरत्वं सिद्धान्तयति । यथेति । हिरण्मयानां सौवर्णानाम् । 'दाण्डिनायन—' आदिसूत्रेण निपातनात् साधुः । पृथक् मिथः संबन्धाभावेऽपि सौन्दर्यहेतूनां मिथः संबन्धे चारुत्वातिशयस्तथैव रूपकादीनामित्यर्थः । सौन्दर्यातिशयहेतोरसंबन्धस्य द्वैविध्यमाह । स चेति । उत्कटभेदः संयोगरूपः । अनुत्कटभेदः समवायरूप इत्यर्थः । आद्ये तिलतण्डुलन्यायेन संसृष्टिः । द्वितीये क्षीरनीरन्यायेन संकरः । अनयोः पृथगुपादानं न पूर्वशेषत्वमित्यर्थः । तत्र प्रथममुत्कटभेदनिबन्धनां संसृष्टिं लक्षयति । तिलेति ।

---

१ संयोगो मिश्रतिलतण्डुलन्यायेन P. २ समवायस्तु मिश्रक्षीरनीरन्यायेन P. ३ P. has संबन्धे before संसृष्टिः and संकरः ४ °रूपता T'. ५ °र्निगद्यते P. ६ परस्परम् R. ७ p. drops it.

शब्दालंकारसंसृष्टिर्यथा।

शुम्भत्संभ्रमगन्धसिन्धुरधुरानिर्दारितोर्वीतला-
स्त्वङ्गत्तुङ्गतुरङ्गमप्रतिभया द्राक्स्यन्दनस्यन्दनाः।
तीव्रारम्भसमुद्यदुद्भटभटाटोपस्फुरद्दिक्तटा
निःसीमाः प्रसरन्ति रुद्रनृपतेर्जैत्रप्रयाणोद्यमाः॥ २११॥

अत्र च्छेकानुप्रासवृत्त्यनुप्रासयोः संसृष्टिः।

अर्थालंकारसंसृष्टिर्यथा।

काकतीयचमूर्धत्ते महिमानमुदन्वतः।
ग्रसते या द्विषद्भूपध्वजिनीस्तटिनीरिव॥ २१२॥

अत्र निदर्शनोपमयोः संसृष्टिः।

उभयसंसृष्टिर्यथा।

प्रतापरुद्रदोर्दण्डो मण्डलाग्रेण मण्डितः।
दृश्यते समरे वीरैरुत्फणः फणवानिव॥ २१३॥

अत्र वृत्त्यनुप्रासोपमयोः संसृष्टिः।

तस्यास्त्रेधा विभागमाह। सेति। शब्दालंकारसंसृष्टिमुदाहरति। शुम्भदिति। शुम्भत्संभ्रमा दीप्यमानसंरम्भा ये गन्धसिंधुरा गन्धगजाः तद्धुरया तद्भरेण निर्दारितं निर्भिन्नमुर्वीतलं येषु ते तथोक्ताः। त्वङ्गद्भिः प्लवमानैस्तुङ्गतुरङ्गमैः प्रतिभया भयंकराः द्राक्स्यन्दना शीघ्रधावनाः स्यन्दना रथा येषु ते तथोक्ताः। अत्र धुरधुरा भटभटेत्यत्र च्छेकानुप्रासोऽन्यत्र वृत्त्यनुप्रासश्च संसृज्यते।

अर्थालंकारसंसृष्टिमुदाहरति। काकतीन्द्रेति। उदन्वतो महिमानं धत्त इत्यत्रासंभवद्धर्मयोगेन प्रतिबिम्बकरणाक्षेपान्निदर्शना। तस्यास्तटिनीरिवेत्युपमायाश्च परस्परनैरपेक्ष्यात् संसृष्टिः।

उभयसंसृष्टिमुदाहरति। प्रतापेति।

---

१ °दोर्दारितो° P. २ तीव्रारम्भभवत् R., M. ३ काकतीन्द्र T', M. ४ °दोर्दण्डमण्ड° R.

अथ संकरो निरूप्यते ।

क्षीरनीरनयार्यत्र संबन्धः स्याद् परस्परम् ।
अलंकृतीनामेतासां संकरः स उदाहृतः ॥

यत्र नीरक्षीरन्यायेनालंकाराणां मिथः संबन्धो भवति स संकरः । तस्याङ्गाङ्गिभावेन संदेहेनैकवाचकानुप्रवेशेन च त्रैविध्यम् ।

तत्राङ्गाङ्गिभावसंकरो यथा ।

उद्यद्बृंहितगर्जितैर्द्विपघटाकादम्बिनीसंभ्रमैः
क्षोणीभृत्कटकोपरोधपटुभिः प्रावृड्विहारा इव ।
शत्रुस्त्रीविहलाश्रुवृष्टिशमितक्ष्माचक्रतापोदया
यात्राः काकतिवल्लभस्य जगतामानन्दमातन्वते ॥ २१४ ॥

अत्र यात्राः प्रावृड्विहारा इवेत्युपमालंकारेण गजघटाकादम्बिनीत्य-

---

संकरं लक्षयति । क्षीरेति । यत्रालंकाराणां क्षीरनीरन्यायादनुत्कटभेदः सम्बन्धः स संकर इत्यर्थः । तस्य त्रेधा विभागमाह । तस्येति । क्रमेणोदाहरति । उद्यदिति । क्षोणीभृत्कटकानां वैरिभूपालराजधानीनामन्यत्र पर्वतनितम्बानामु-परोधपटुभिर्निरोधनसमर्थैः । 'कटकं वलये सानौ राजधानीनितम्बयोः' इति विश्वः । शत्रुस्त्रीबहुलाश्रुवृष्ट्येव शमितः क्ष्माचक्रतापोदयो भूमण्डलसंतापाति-शयो यासु तास्तथोक्ताः । दुष्टनिग्रहेण भूभारोऽवतरतीति भावः । सजातीय-संकरं योजयति । अत्रेति । उपमा प्रसाध्यत इति । रूपकत्वे द्विपघटारूपवि-षयस्थगने कादम्बिनीरूपोपमानं सैवास्य विशेषणत्वं नोपमेयस्य । अतोऽधिको-पमं नाम दोषः स्यात् । तस्मादुपमा प्रसाध्यत इति भावः । यात्राः प्रावृड्विहारा इवेत्यस्यानुग्राह्यत्वादङ्गित्वम् । द्विपघटाकादम्बिनीत्यस्या अनुग्राहकत्वादङ्गत्वम् । अतोऽङ्गाङ्गिभावेन संकरः । अन्योन्यं चमत्कारहेतुत्वाश्रयणेऽतिरामणीयकं द्रष्ट-व्यम् । तर्हि द्विपघटाकादम्बिनीत्यत्र केन समासेनोपमा लभ्यत इत्याकाङ्क्षा-

---

१ °बहुला° M.

ङ्गोपमा प्रसाध्यत इति सजातीययोरङ्गाङ्गिभावः । कादाम्बिनीवाद्विपघटेति समासाश्रयणात् । क्षोणीभृत्कटकोपरोधेत्यत्र श्लेषमूलातिशयोक्तिः ।

विजातीयसंकरो यथा ।

प्रतापरुद्रस्य कृपाणधारा
प्रत्यर्थिभालेषु पतन्त्यमन्दम् ।
प्रक्षालनायेव कृतस्य धात्रा
तद्वर्तिनो दुर्लिपिकल्मषस्य ॥ २१५ ॥

अत्र प्रक्षालनायेवेत्युत्प्रेक्षया दुर्लिपिकल्मषस्येत्यत्र रूपकं प्रसाध्यत इति विजातीययोरङ्गाङ्गिभावः ।

एकवचनानुप्रविष्टसंकरो यथा ।

विजितारिपुरो मूर्त्तौ विलसत्सर्वमङ्गलः ।
भुवि शंभुरिवाभाति काकतीयनरेश्वरः ॥ २१६ ॥

यामाह । कादम्बिनीव द्विपघटेति । 'उपमितं व्याघ्रादिभिः' इति समासः । अभ्युच्चयमाह । क्षोणीभृदिति । क्षोणीभृत्कटकशब्देन शत्रुराजधानीपर्वतनितम्बयोरभिधानाच्छ्लेषमूलातिशयोक्तिरित्यर्थः । इयं च द्विपघटाकादम्बिनीत्यत्रोपमाया अङ्गं तेनातिशयोक्त्यनुगृहीतया तया यात्राः प्रावृड्विहारा इवेत्युपमानुआप्यत इति फलितम् ।

विजातीयसंकरमुदाहरति । प्रतापेति । कृपाणस्य धारा कोटिरुदकधारा च । अमन्दमनल्पम् । तद्वर्त्तिनः प्रत्यर्थिभालवर्त्तिनो दुर्लिपेरेव कल्मषं पङ्कं तस्य क्षालनायेवेति फलोत्प्रेक्षा । अत्र क्षालनयोग्यस्य कल्मषस्य प्राधान्यं रूपकेणैव लभ्यते नान्यथेत्युत्प्रेक्षया रूपकं प्रसाध्यत इति रूपकोत्प्रेक्षयोर्विजातीययोरन्योन्यसापेक्षत्वादङ्गाङ्गिभावेन संकरः ।

एकवाचकानुप्रविष्टं संकरमुदाहरति । विजितेति । योजयति । अत्रेति ।

---

४ °च्छ्लेषः उभयोरभेदाध्यवसायाच्छ्लेषमूला° t.

अत्र विजितारीत्याद्यर्थसाम्यादुपमा विलसत्सर्वमङ्गल इति शब्दसाम्यात् श्लेषश्च शम्भुरिवेत्येकस्मिन्निवशब्देऽनुप्रविष्टौ ।

संदेहसंकरो यथा ।

जातः प्रतापरुद्रेन्दुः काकतीयान्वयाम्बुधौ ।
धत्ते जनचकोराणां प्रसादज्योत्स्नयामृतम्[1] ॥ २१७ ॥

अत्र काकतीयकुलाम्बुधौ इत्यादौ रूपकोपमयोः संदेहसंकरः । अन्वय एवाम्बुधिः काकतीयान्वयोऽम्बुधिरिवेति[2] समासद्वयसंभवात् । न चात्र साधकं बाधकं वा प्रमाणमन्यतरस्यास्तीति संदेह एव पर्यवस्यति[3] । साधकबाधकसंभवे तु संदेहनिवृत्तिः । अत्र साधकं यथा ।

प्रतापरुद्रनृपतेः पारिजातात् समुद्भवाः[4] ।
वतंसयन्ति दिङ्नार्यो मधुरा कीर्तिमञ्जरीः ॥ २१८ ॥

विजितारिपुर इत्यत्र शब्दपरिवृत्तिसहिष्णुत्वादर्थसाम्यम् । विलसत्सर्वमङ्गल इत्यत्र तदभावाच्छब्दसाम्यम् । तावुपमाश्लेषावेकस्मिन्निवशब्देऽनुप्रविष्टौ । तस्योभयोपकारित्वादिति भावः ।

संदेहसंकरमुदाहरति । जात इति । योजयति । अत्र कुलाम्बुधावित्यादौ समासद्वयसंभवादिति । मयूरव्यंसकादीनां चाकृतिगणत्वाद्रूपकोपमितसमासद्वयसंभवादित्यर्थः । नन्वत्रामृतदानस्य चन्द्र एव प्रसिद्धत्वात् प्रतापरुद्र एवेन्दुरिति रूपकमेव नोपमेति चेन्मैवम् । औपचारिकस्यामृतदानस्य प्रतापरुद्रेऽपि संभवात् । उपमाया बाधकाभावात् । तेनात्र रूपकोपमयोः संदेह एव पर्यवस्यतीत्याह । न चेति । साधकमनुकूलं बाधकं प्रतिकूलम् । तत्सद्भावे संदेह एव निवर्तत इत्यर्थः । तर्हि कुत्र साधकं कुत्र वा बाधकमित्याकाङ्क्षायां क्रमेण दर्शयति । प्रतापेति । प्रतापरुद्रनृपतिरूपात् पारिजातात् । वतंसयन्तीत्यत्र 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः' इत्यकारलोपः । अत्र वतंसीकरणं मञ्जी-

---

१ ज्योत्स्नया मुदम् R., M.; ज्योत्स्निकामृतम् P. २ काकतीयान्वय M. ३ साधकबाधकप्रमाणयोर्हि संदेह एव पर्य° M, तत्र T'. ४ °नृपतिपारिजातसमु° M.

अत्र कीर्त्तय एव मञ्जर्य इति रूपकालंकारे वतंसयन्तीति साधकं प्रमाणम् । अवतंसीकरणेनाभेदप्रतीतिः ।

बाधकं यथा ।

काकतीन्द्रस्य निःसाणध्वनौ दिक्षु विजृम्भिते ।
व्याकुलीकृतसत्त्वोऽभूत् प्रतिपक्षबलार्णवः ॥ २१९ ॥

अत्र प्रतिपक्षबलार्णव इत्युपमाया व्याकुलीकृतसत्त्व इति बाधकं प्रमाणम् । 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इत्यनुशासनेन सामान्यप्रयोगस्योपमाबाधकत्वात् । अतः पारिशेष्याद्रूपकालंकारः ।

एवं यथासंभवमन्येषामलंकाराणां संसृष्टिसंकरौ बोद्धव्यौ तत्र तत्र प्रबन्धेषु ।

रेष्वेवानुगुणमिति रूपकपरिग्रहे साधकमित्याह । अत्रेति । तत्रोपद्दलकमाह । वतंसीकरणेनाभेदप्रतीतिरिति । न पुनरुपमायामिव भेदाभेदप्रतीतिरिति भावः ।

बाधकं दर्शयति । काकतीन्द्रस्येति । दिक्षु निस्साणध्वनौ विजृम्भिते व्याप्ते सति प्रतिपक्षबलमेवार्णवो व्याकुलीकृतानि कलुषीकृतानि सत्त्वान्यन्तःकरणानि प्राणिनश्च यस्य स तथोक्तः । बाधकं योजयति । अत्रेति । प्रतिपक्षबलमर्णव इवेत्युपमितसमासस्य व्याकुलीकृतसत्त्व इति सामान्यप्रयोगत्वस्य बाधकत्वात् परिशेषाद् रूपकमेवेत्यर्थः । अलंकारान्तरसंकरसंसृष्टिप्रपञ्चः प्रबन्धान्तरेषु द्रष्टव्य इत्याह । एवमिति । विवेकिनामेतावतैवेतरदपि सुबोधमिति विस्तरभीरुभिर्रे-साभिरुपरम्यत इति सर्वमवदातम् ।

जगति निखिलविद्यासिंधुसृष्टिधयानां
परभणितिपरीक्षा युज्यते सज्जनानाम् ।
तदिह मम निबन्धे दूषणं भूषणं वा
भवति यदि विदग्धैस्तद्ध्यवश्यं विमृश्यम् ।

---

१ वतंसीकरणकर्माभेदप्रतीतिः P. २ प्रतिपत्तिः R. ३ अलंकारेषु T. ४ R. has at the end विद्यानाथकृतो वीररुद्रसत्कीर्त्तिमण्डनः । अलंकारप्रबन्धोऽयं द्रष्टव्यः सर्वसूरिभिः । ४ p. drops अस्माभिः ५ °विवक्षा T. ६ रूपणं T.

इति श्रीविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे मिश्रालंकारप्रकरणं समाप्तम् । प्रतापरुद्रीयं नामालंकारशास्त्रं समाप्तम् ।[1]

इति पदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायकोलचलमल्लिनाथसूरिसूनुना विश्वजनीनविद्यस्य विद्वन्मणेः पेद्द्यार्यस्यानुजेन कुमारस्वामिसोमपीथिना विरचिते प्रतापरुद्रीयव्याख्याने रत्नापणाख्याने मिश्रालंकारनिरूपणं नाम नवमं प्रकरणम् ॥

---

1 व्याख्यातं साकल्येनेदं काव्यलक्षणम् ।
तच्च परिष्कुर्वन्तु सहृदयधुरीणाः ॥ P.

१ महोपाध्यायविद्यानाथ° R.; विद्यानाथमहोपाध्यायकृतौ T'. २ संपूर्णम् R.

प्रतापरुद्रीयव्याख्या रत्नशाणः ।

वन्दे हयग्रीवमहं वलक्षं
  यन्नावदुग्धोऽम्बुसटाभिषेण ।
अन्योन्यमन्तर्मिलितावशिष्टः
  प्रालम्बते शुभ्रकलाकलापः ॥ १ ॥

वलक्षवर्णोज्ज्वलितस्वरूपो
  विज्ञानदानैकनिदानभूतः ।
संदेहनाशौघ इवाभ्रवक्रः
  सारस्वतं मे दिशतु प्रबोधम् ॥ २ ॥

आचार्यमभिवाद्याहमातनिष्ये यथामति ।
विद्यानाथकृतेर्व्याख्यां सन्तस्तन्वन्त्वनुग्रहम् ॥ ३ ॥

न शब्दशास्त्रे न च तर्कशास्त्रे
  न चान्यशास्त्रेष्वपि विश्रुतोऽहम् ।
प्रतापरुद्रीयमनोज्ञपद्य-
  व्याख्यां तु कुर्यामतिसाहसेन ॥ ४ ॥

रत्नापणे विस्तरसाध्वसेन
  मुक्त्वा पदं कोमलमन्यदेव ।
व्याख्याथ शङ्कापरिहारमार्गः
  प्रदर्शितः प्राक्तनपण्डितेन ॥ ५ ॥

ततो मया बालविबोधनाय
  प्रतापरुद्रीयसुपद्यपङ्क्तेः ।
प्रकाश्यते सर्वपदान्वयोऽत्र
  न संभ्रमोऽन्यत्र ततः पृथक् मे ॥ ६ ॥

विद्यानाथः कथमपि महोदाकराच्छास्त्रजालात्
  संजग्राह प्रकृतिकठिने रत्नजालं करण्डे ।
विद्वद्गोष्ठीहृदयरमणे रत्नशाणेऽधुनास्मि-
  न्नन्तर्गूढद्युतिविलसितं तत् समुत्तेजयामि ॥ ७ ॥

अथ तत्रभवान् विद्यानाथकविः प्रतापरुद्रयशोभूषणं नामालंकारशास्त्रं चिकीर्षुश्चिकीर्षितावितविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदरूपफलसाधनत्वात् 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते' इत्यादि भाष्यकारवचनाच्चेष्टदेवतानमस्काररूपमङ्गलमादौ निबध्नाति । विद्येति । विद्याः सकलशास्त्राण्येव कैरवाणि कुमुदानि तेषां कौमुदीं चन्द्रिकां कौमुदीमिव विद्यानां प्रकाशिकामित्यर्थः। श्रुतीनां वेदानां शिरांस्युपनिषद एव शीर्षाणीति श्लिष्टरूपकम् । तेषु सीमन्तमुक्तामणिं सीमन्ते केशवीथ्यां यो मुक्तामणिर्मुक्तामय आभरणविशेषः । 'सीमन्तमस्त्रियां मस्तकेशवीथ्याम्' इत्यमरः । ललन्तिकाभरणायमानामित्यर्थः । पद्मात्राभिकमलाद्भवतीति पद्मभूः । तस्य ब्रह्मणो दारान् जायाम् । 'दाराः पुंसि च भूम्न्येव' इत्यमरः । त्रयवयवो लोकस्त्रिलोकस्तस्य जननीं गिरां वाचां देवतां सरस्वतीं देवीं वन्दे नमस्करोमि । स्वनमस्कारस्य साफल्यं सूचयितुं देवीनमस्कारान् विशिनष्टि । यदिति । पादावब्जे इवेत्युपमितसमासः । रूपकसमासे तु अब्जयोर्नमस्कारानुपयोगात् । यस्या वाग्देवतायाः पादाब्जयोर्नमस्क्रिया नमस्काराः सुकृतिनां पुण्यकृतां पुंसाम् । प्रकर्षेण क्रियन्त इति प्रक्रिया रचनाः । सरस्वतीनां वाचां संबन्धिन्यः सारस्वत्यः । ताश्च ताः प्रक्रियाश्च सारस्वतप्रक्रियाः । 'गीर्वाग्वाणी सरस्वती' इत्यमरः । तासां वाग्रचनानां बीजं कारणं प्रतिभापरपर्यायो बुद्धिविशेष इत्यर्थः । तदेव बीजमङ्कुरकारणं तस्य न्यासभुवो निक्षेपस्थानभूताः । सारवद्भूमौ निक्षिप्तं बीजं यथाङ्कुरयति तद्वद्देवीनमस्कारात् कविताकारणीभूतप्रतिभा जायत इत्यर्थः । कवितायाः नाट्यं नटनं प्रवृत्तिरिति यावत् । तस्यैकजीवातवो मुख्यजीवनौषधानि । 'जीवातुर्जीवनौषधम्' इत्यमरः । अस्मान्नमस्कारादेव जीवनौषधादिव सम्प्रदायाविच्छेदश्च भवतीत्यर्थः । भवन्तीत्यन्वयः । अत्रोत्तरवाक्ये यच्छब्दप्रयोगात्त तच्छब्दप्रयोगनिर्बन्धः । विद्याकैरवेत्यादिरूपकविशेषणम् । पादाब्जेत्युपमायाश्च परस्परापेक्षाभावात् संसृष्टिः । लक्षणानि त्वलंकारप्रकरणे स्पष्टीभविष्यन्ति ।

इत्थमिष्टदेवतां नमस्कृत्य प्राचीनमहाकविनमस्कारपूर्वकं प्रारिप्सितग्रन्थारम्भं प्रतिजानीते । पूर्वेभ्य इति । भामहो नामालंकारशास्त्रप्रणेता । स आदिर्येषां ते तेभ्यः प्राचीनेभ्य इति चतुर्थी । सादरं यथा तथा विहितोऽञ्जलिर्येन सः ।

'तौ युवावञ्जलिः पुमान्' इत्यमरः। अहमिति शेषः। अलंकारशास्त्रसर्वस्वं सर्वधनभूतं रसादिप्रमेयं तत् संगृह्यते संक्षिप्यते येन स तथोक्तः। अलंकारशास्त्रप्रतिपाद्यमानं रसादिप्रमेयं संक्षिप्य प्रतिपादको ग्रन्थस्तं सम्यक् वक्ष्ये।

ननु रसादीनामप्येतच्छास्त्रविषयत्वात् कथमस्यालंकारशास्त्रत्वमिति न शङ्कनीयम्। छत्रिन्यायेनालंकारत्वव्यपदेशात्। यद्वा प्रमाणादिपदार्थप्रतिपादकशास्त्रस्य न्यायप्राधान्याद्यथा न्यायशास्त्रत्वं तथालंकारप्राधान्यादलंकारशास्त्रत्वमिति बोध्यम्।

शास्त्रसर्वस्वसंग्रह इत्यत्रोक्तं रसादिप्रमेयं विभजते। रसेति। रसः शृङ्गारादिः प्रधानं येषां ते रसजीविता इत्यर्थः। शब्दार्थाः शब्दा वाचकादिरूपेण त्रिविधाः। ततो द्वन्द्वः। गुणाः प्रसादादयः। अलंकारा उपमादयः। वृत्तयः कैशिक्यादयश्च। त्रयाणां द्वन्द्वः। रीतयो वैदर्भ्यादयश्च। इयती एतावती। काव्यपद्धतिः रामायणादिकाव्यमार्गः। शास्त्रस्यालंकारशास्त्रस्य प्रमेयं विषयः प्रतिपाद्यमित्यर्थः। काव्योपयोगिरसादिकमनेन ग्रन्थेन निरूप्यत इति तात्पर्यार्थः।

संप्रति स्वग्रन्थस्य लोकोत्तरनायकलाभेनातिशयमाह। चिरेणेति। काव्यस्य ये अलंकारास्तेषां संग्रहः संग्राहको ग्रन्थः। चिरेण चिरस्य चरित आचरितोऽर्थः फलं यस्य स तथोक्तः सफलोऽभूत्। चरितार्थतामेव व्यनक्ति। प्रतापेति। येनालंकारसंग्रहेण प्रतापरुद्रदेवस्य प्रतापरुद्रस्य कीर्तिर्यशः प्रकाश्यते प्रकटीक्रियते। प्रतापरुद्रकीर्तिप्रकाशनादस्य सफलतेति भावः।

पूर्वग्रन्थानामपकर्षमाह। यद्यपीति। प्राचां पूर्वमहाकवीनां प्रबन्धेष्वलंकारशास्त्रेष्वसौ काव्यपद्धतिः साधु सम्यक् निरूपिता यद्यपि निरूपितैव। यद्यपि ते शङ्कानुत्पाद इति संप्रदायः। किं तु परं तु तथापीत्यर्थः। एतस्याः काव्यपद्धतेः प्रबन्धस्येत्यर्थः। सदृशमुदाहरणं नादृतमनादृतम्। काव्यानुरूपोदाहरणाभावात् पूर्वप्रबन्धेष्वपकर्ष इति भावः। तर्हि कीदृशमुदाहर्तव्यमित्याकाङ्क्षां जनयति। किं त्विति।

उदाहार्यमाह। पुण्येति। पुण्येन सुकृतेन श्लोक्यते श्लाघ्यत इति पुण्यश्लोकः। सकलविद्यासुकृतशाली महापुरुषस्तस्य चरितं व्यापारः। उदाहरणमुद्घाटनमुद्दिश्यार्हतीति। स इव दृश्यत इति तादृशः सुकृती कश्चन पुमान् पूर्वैः

प्राचीनकविभिः प्रबन्धस्य स्वग्रन्थस्याभरणीकृतो न । अभूदिति शेषः । एतेन प्रबन्धॄणामपकर्ष उक्त इति न पौनरुक्त्यम् ।

सच्चरितनिबन्धने प्रबन्धप्रबन्धॄणामुत्कर्षमाह । प्रबन्धेति । विषयभूतस्य प्रतिपादनीयस्य नेतुर्नायकस्य गुणनिरूपणं दानदाक्षिण्यादिगुणोदाहरणं प्रबन्धानां ग्रन्थानां प्रबन्धॄणामपि तन्निर्मातॄणां कवीनां च कीर्त्तिर्यशः प्रतिष्ठा चिरावस्थानं तयोर्मूलं कारणम् ।

अत्र दृष्टान्तमाह । यथेति । रामस्य दाशरथेर्गुणानां वर्णनम् । रामायणं काव्यम् । वल्मीकाज्जन्म यस्येति वल्मीकजन्मा वाल्मीकिः । तयोर्महाप्रतिष्ठाया कारणं यथा भवति तथैव मूलमिति पूर्वेणान्वयः । 'काव्यालापांश्च वर्जयेत्' इति प्रतिषेधपरिजिहीर्षयाह । महापुरुषस्योत्तमनायकस्य गुणवर्णने प्रबन्धस्थितिः प्रबन्धनिर्माणं श्रेयांसि करोतीति श्रेयस्करी । 'काव्यं यशसेऽर्थकृते' इत्याद्यालंकारिकवचनप्रामाण्यादस्य श्रेयःसाधनत्वम् । निषेधस्त्वसत्काव्यविषय इति तात्पर्यम् । काव्यस्य पुरुषार्थसाधनत्वं सदृष्टान्तमाह । यथेति । वेदः श्रुतिः । शास्त्रेति । शास्त्रं स्मृतिः पुराणानि चादिर्यस्य प्रबन्धस्य तस्मात् । आदिशब्देन गुरूपदेशादिर्विवक्ष्यते । हिते कर्त्तव्ये प्रवृत्तिरुद्वेगोऽहितान्निवृत्तिश्चानुद्वेगश्च यथा तथा सद्वृत्तमनायक आश्रयो वर्ण्यत्वेन यस्य तस्मात् काव्यादपि हितप्रवृत्तिरहितनिवृत्तिश्च भवतीत्यर्थः । ननु वेदादेरेव पुरुषार्थसिद्धिः किं काव्येनेत्याशङ्क्य काव्यस्य विशेषमाह । काव्य इति । काव्ये इयान् एतावान् विशेषो भेदः । अस्तीति शेषः । काव्यादिति हेतौ पञ्चमी । कर्त्तव्यतायां कर्त्तव्यत्वे धीर्बुद्धिः सरसा रससहिता भवति । कर्त्तव्यार्थे काव्यादिच्छया प्रवर्त्तते । अन्यत्र वेदादौ तथा न सरसा भवतीत्यर्थः । अकरणे प्रत्यवायभिया प्रवर्त्तते न तु संतुष्टः प्रवर्त्तते । अयमेव विशेष इत्यर्थः । तथा हि । अयमेवार्थः प्रतिपाद्यत इत्यर्थः ।

यदिति । प्रभुणा राज्ञा संमितः समः । 'सम्मितं समम्' इत्यमरः । तस्माच्छब्दः प्रधानं प्रवर्त्तकं यस्य तस्माद्वेदात् । यदिष्टं कर्त्तव्याकर्त्तव्यरूपमभीष्टम् । अधिगतं ज्ञातम् । ये गत्यर्थास्ते ज्ञानार्था इति नियमात् । वाङ्मात्रेण प्रभुरिव वेदोऽपि विधिनिषेधबलेन हितेषु पुंसः प्रवर्त्तयति निवर्त्तयति चाकर्त्तव्येभ्यः । विपक्षे राजा दण्डमिव वेदः प्रत्यवायं जनयति । अतः शब्दप्राधान्यमिति भावः ।

अत्रार्थस्य प्राधान्यमात्रत्यागो न स्वरूपतः । तथात्वे तून्मत्तवाक्यवद्वेदस्याप्रवर्त्तकतैव स्यात् । अतोऽध्ययनं फलवदर्थावबोधनपर्यन्तमिति वेदितव्यम् । अर्थः प्रवणः प्रधानं प्रवर्त्तकं यस्य तस्मात् । अत एव सुहृत्संमितात् मित्रतुल्यात् पुराणवचनाच्च चिरं विचारापेक्षिततया कृच्छ्रेणेत्यर्थः । यदिष्टमधिगतम् । अर्थप्रधानं पुराणम् । एवं कुर्यान्नैवं कुर्यादिति विधिनिषेधबलेन प्रवर्त्तकं वा न भवति । किं तु पूर्वपुरुषचरितस्तुतिनिन्दामुखेन रागद्वेषावुत्पाद्य मित्रवत्प्रवृत्तिनिवृत्तिहेतुभूतम् । अतः पुराणमर्थप्रधानं सुहृत्संमितं चेति वेदितव्यम् । यत्तदोर्नित्यसंबन्धात् तस्मिन्नित्यध्याहारः । तस्मिन् कर्त्तव्ये कार्ये कान्तासंमिततया कामिनीतुल्यया यया काव्यश्रिया काव्यसंपदा सरसतां सरसत्वमुत्कण्ठामित्यर्थः । आपाद्य उत्पाद्य । बुधो विद्वान् पुमान् कुतुकी कौतुकवान् विरचितः । अकर्त्तव्येऽकुतुकी च च्छेदः । अकर्त्तव्ये अहिते अकुतुकी विरचितः । कर्त्तव्ये कुतुकीत्यनेन हितप्रवृत्तिः । अकर्त्तव्य इत्यनेनाहितनिवृत्तिश्चोक्तेति बोध्यम् । यथा कामिनी कटाक्षवीक्षणादिविलासैरेव कामिनमावर्जयन्ती सर्वं कार्यं कारयत्येवं काव्यश्रीरपि व्यञ्जनाव्यापारेणैव रामादिवद्वर्त्तितव्यं न रावणादिवदित्यर्थं द्योतयन्ती पुंसः कर्त्तव्ये प्रवर्त्तयति निवर्त्तयति चाकर्त्तव्यादितीदं काव्यं कान्तासम्मितम् । अतोऽस्याः सरसतापादनेन प्रवर्त्तकत्वाद्धयानुनयपूर्वकं प्रवर्त्तकाभ्यां वेदपुराणाभ्यां विशेषोऽस्तीति बोध्यम् । अतः काव्यनिर्माणाय प्रयतामह इत्याह । तस्यै काव्यश्रियै स्पृहामिच्छां कुर्महे । वयमिति शेषः ।

तत इति । वेदाद्युपदेशाद्विशिष्टत्वाद्धेतोः काव्यं दृष्टस्यार्थादेरदृष्टस्य कीर्त्यादेः फलस्य प्रयोजनस्य जनकतयोत्पादकतया बह्वधिकं यथा तथोपयुक्तमुपयोग्युपादेयमित्यर्थः । अत्र वृद्धसंवादमाह । काव्यप्रकाशे ग्रन्थे । तथा च तथैवोक्तम् । अस्माभिर्यथोक्तं तथोक्तमित्यर्थः । काव्यं यशसे कीर्त्यै । अर्थकृते अर्थप्रयोजनाय । अर्थार्थमित्यर्थः । व्यवहारस्य विदे ज्ञानाय । शिवेतराणामशुभानां क्षतये नाशाय सद्यस्तदानीं परनिर्वृतये उत्कृष्टसुखाय । कान्तासंमिततया कान्तातुल्यत्वेनोपदेशयुजे योगाय । उपदेशार्थमित्यर्थः । भवतीति शेषः ।

प्रसिद्धमिति । महाप्रबन्धेषु प्राचीनोत्कृष्टग्रन्थेषु । एतत् काव्यस्य कीर्त्यादिसाधकत्वं प्रसिद्धं च प्रसिद्धमेव । परिवर्द्धतेति । छाया । विज्ञानं परिवर्धते

बहुशास्त्राद्यवलोकनादिति भावः। यशः कीर्त्तिः संभाव्यत उत्पद्यते। गुणाः सौशील्यादयोऽर्ज्यन्ते संपाद्यन्ते। सुपुरुषस्य पुण्यश्लोकस्य चरितं व्यापारः श्रूयते येन कारणेन काव्यस्यालापा रचना न हरन्ति। मन इति शेषः। मनोहरा न भवन्ति। तत्कारणं किं किमस्ति। नास्तीत्यर्थः। पूर्वोक्तफलसाधनत्वात् काव्यालापा मनोहरा एवेत्यर्थः। अतः काव्यमुपादेयमिति तात्पर्यार्थः।

'काव्यालापांश्च वर्जयेत्' इति निषेधस्मृतेर्गतिमाह। यत्रेति। यत्र पुनः यस्मिन् काव्ये तूत्तमः श्लोक्यत इत्युत्तमश्लोकस्तस्योत्तमोत्तमस्य चरितं न निबध्यते नोदाह्रियते तत्काव्यं परित्याज्यं परित्यक्तुं योग्यमेव। अत्र स्मृतिरस्तीत्याह। तदिति। स्मृतिश्च मुनिवचनमपि तदसत्काव्यं मूलं कारणं विषयो यस्याः सा। असत्काव्यविषयां स्मृतिमनुवदति। 'काव्यालापांश्च वर्जयेत्' इति। अन्यथा रामायणादेरप्युच्छित्तिः स्यादिति भावः। काव्ये कैमुत्यन्यायेनोत्तमपुरुषगुणवर्णनस्यावश्यकत्वं प्रतिपादयितुं शास्त्रेष्वपि सत्पुरुषगुणवर्णनमेवावश्यकमित्याह। केवलमिति। काव्यजातस्य केवलं काव्यसमूहस्यैवायं पन्थाः सत्पुरुषगुणवर्णनरूपमार्गो न भवत्यपि तु किं तु शास्त्रजातस्यापि सकलशास्त्राणामपीत्यर्थः। सतां सद्गुणानामाश्रयेणावलम्बनेन प्रतिपादनेन महानुत्कृष्टो लोकानां जनानामादरो यथोक्तार्थो यथा स्पष्टो भवेत् तथोच्यत इत्यर्थः। वैशेषिकादेर्विशेषपदार्थवादिनो वैशेषिकास्तेषां शास्त्रं वैशेषिकं तदादिर्यस्य तस्य। ईश्वरस्य ब्रह्मणः प्रतिष्ठापकतया साधकतया। जगति लोके पूज्यता पूज्यत्वम्। अङ्कुरादिकं सकर्तृकं कार्यत्वाद् घटवदित्यादि नवानुमानैरिति भावः। महाभारतमादिर्येषां तेषामितिहासानामपि। महापुरुषस्य धर्मराजादेर्गुणानां वर्णनं परं प्रधानं येषां तेषां भावस्तत्ता तयैव हेतुना विश्वातिशायित्वम्। बहुना किम्। बहूक्तिभिः प्रयोजनं नास्तीत्यर्थः। वेदान्ता अप्युपनिषदर्थप्रतिपादका ग्रन्था अपि ब्रह्मणः सत्यं ज्ञानमनन्तं ब्रह्मेति ज्ञानादिगुणविशिष्टस्य ब्रह्मणः प्रतिपादकतयैव हेतुना परमत्यन्तमुत्कृष्यन्त उत्कृष्टा भवन्ति।

अथेति। अथातो धर्मजिज्ञासेति सूत्रमिति शेषः। उपक्रममाणेनोपक्रमं कुर्वता सूत्रकृता सूत्रकारेण महर्षिणा जैमिनिनापि पुरुषं महापुरुषमाश्रितस्य गुणश्रेष्ठस्य गुणोत्तमस्य धर्मस्य धर्मगुणस्य ज्ञातुमिच्छा जिज्ञासा तद्द्वारेण महापुरुषस्य पुरु-

थोक्तमस्य गुणवर्णनमेव शास्त्रस्य प्रामाण्यात् प्रमाणत्वादावश्यकत्वादित्यर्थः ।
तत्त्वादिति । नीयते प्रतिपाद्यत इति न्यायः स स न्यायस्तत्तन्न्यायस्तत्त्वद्विषयः ।
तस्य निरूपणं परं प्रधानं यस्य तत्कथाप्रतिपादकस्यापीत्यर्थः । प्रबन्धराशेः काव्य-
जातस्य महापुरुषगुणवर्णनं हेम्नः सुवर्णस्य परमामोद इवोत्कृष्टगन्ध इव । ततश्च
महापुरुषगुणवर्णनस्यावश्यकत्वादेवेत्यर्थः ।

प्रतापेति । प्रतापरुद्रदेवस्य गुणान् शौर्यादीनाश्रित्यावलम्ब्यायमलंकारप्र-
बन्धो निर्मितो रचितः । हे सन्तः सज्जना वो युष्माकं कर्णोत्सवः श्रोत्रयो-
रुत्सवोऽस्तु । आनन्दकरो भूयादित्यर्थः ।

इयता ग्रन्थेन प्रतिपाद्यमहिम्ना प्रबन्धस्योत्कर्षमुक्त्वा स्वग्रन्थस्य विशेषमाह ।
काकतीयेति । काकतिर्नाम दुर्गांशाधिरेकशिलानगरेश्वराणां कुलदेवता सा
भक्तिभजनीया अस्येति काकतीयः । स चासौ नरेन्द्रश्च तस्य यशः कीर्तिं भूष-
यितुमलंकर्तुमियं चिकीर्षिता विद्यानाथस्य कवेः कृतिः काव्यं स्वयं च स्वयमेव
तेन यशसा विभूष्यत अलंक्रियते । अत्र कीर्तिग्रन्थयोरन्योन्यं भूष्यभूषणभाव-
सद्भावादुत्कर्ष इति भावः ।

प्रबन्धमहिम्ना प्रतिपाद्यातिशये वृद्धसंवादमाह । दण्डिनेति । दण्डिना
कविनापि प्रतिपादितम् । प्रबन्धमहिम्ना प्रतिपाद्यमहत्त्वमिति शेषः । तदेवाह ।
आदीति । आदिराजानां नलनहुषादिपूर्वपुरुषाणां यशोबिम्बं कीर्तिमण्डलं
वाङ्मयं वाक्प्रपञ्चमेवादर्शं दर्पणम् । व्यस्तरूपकम् । कर्म प्राप्य तेषां नृपाणाम-
सन्निधानेऽपि स्वयं न नश्यति । वाक्यार्थः कर्म । अत्र नलाद्यसंनिधानेऽपि तद्य-
शोबिम्बावस्थितेः प्रबन्धाधीनत्वोक्तेः प्रबन्धमहिम्ना प्रतिपाद्योत्कर्ष इति भावः ।
अतः कीर्तिभूषणं स्वग्रन्थ इति तात्पर्यम् ।

इतः परं प्रतिपाद्यमहिम्ना प्रबन्धमहत्तामाह । सूक्तैवेति । प्रतिपाद्यस्य वर्ण्यस्य
महिम्ना सामर्थ्येन प्रबन्धस्य काव्यस्य महत्तोत्कर्षः सूक्ता सुष्ठूक्तैव । प्राचा
प्राचीनेन भामहेन । तत् पूर्वोक्तं प्रबन्धमहत्त्वमुक्तम् । उपश्लोक्यस्य वर्ण्यस्य
माहात्म्यादतिशयात् काव्यसंपत् काव्यसंपत्तिरुज्ज्वला अतिशयिता । इत्येवमुक्त-
मिति पूर्वेणान्वयः ।

उद्भटेन च तन्नामकेन काव्यकृता च प्रतिपादितम्। गुणेति। गुणाः प्रसादादयः। अलंकारा उपमादयः। तैश्चारुत्वं रुचिरत्वं तेन युक्तमपि काव्यम्। आश्रीयत इत्याश्रयस्तस्य वर्ण्यस्य संपत्त्या माहात्म्येनेत्यर्थः। अमरद्रुमः कल्पवृक्षः मेरुणा सुमेरुणेवाधिकोज्ज्वलमत्युज्ज्वलम्।

रुद्रदेवेनापि केनचित् कविना कथितम्। उदारेति। उदारस्य महतः। 'उदारोदातृमहतोः' इत्यमरः। तस्य चरितस्य निबन्धनाद्वर्णनात् प्रबन्धस्य प्रतिष्ठा स्थितिरतिशयो वा कथितेति पूर्वेणान्वयः। साहित्यमीमांसायां च तन्नामकग्रन्थे च प्रपञ्चितमुक्तम्। नायकेति। नायकस्य गुणाः शौर्यादयः। अत एव गुणाः सूत्राणीति श्लिष्टरूपकं तैर्ग्रथिता गुम्फिताः सूक्तय एव निर्दोषवचनान्येव स्रजो मालिकाः। सुकृतमेषामस्तीति सुकृतिनस्तेषां सुभगानाम्। आकल्पं कल्पपर्यन्तम्। आकल्पन्ते वेषायन्त अलंकारायन्ते। 'आकल्पवेषो नेपथ्ये' इत्यमरः।

निरूपितं च भोजराजेन। भोजराजेन निरूपितं च प्रतिपादितं च। कवेरिति। लोकोत्तरैः लोकश्रेष्ठैरनन्यसुलभैर्गुणैरुत्तरः श्रेष्ठो नायको वर्ण्येत यदि प्रतिपाद्येत चेत्। अल्पापि गुणालंकारादिभिर्न्यूनापि वाग्वृत्तिर्वाग्व्यापारः प्रबन्ध इति यावत्। विदुषां बुधानां कर्णावतंसति श्रोत्रालंकारो भवति। अतः स्वयं तेन विभूष्यते इति तात्पर्यम्। एवमवश्यं काव्ये लोकोत्तरगुणो नायको वर्ण्य इत्युक्तम्।

ते गुणाः क इत्याकाङ्क्षायामाह। तत्रेति। तत्र लोकोत्तरगुणेष्वेत अग्रत एव वक्ष्यमाणलक्षणा नायकस्य वर्ण्यस्य गुणाः। तन्नामान्येवाह। महाकुलीनतेति। स्वग्रन्थे प्रतिपाद्यमानानां प्रतापरुद्रगुणानां विशेषमाह। पूर्वेति। पूर्वशास्त्राणां साहित्यमीमांसादिशास्त्राणां अनुसारेण कतिचित् कियन्त एवेमे गुणाः कथिता उक्ताः। प्रतापरुद्रदेवस्य गुणाः शौर्यादयो वाचां वचनानामगोचरा अविषया वक्तुमशक्या इत्यर्थः।

अथेति। अथ गुणोद्देशानन्तरं तेषां गुणानां स्वरूपं लक्षणमुदाहरणं च लक्ष्यं च। उच्यते इति शेषः। तत्राद्यं लक्षयति। महाकुलीनतेति। महत्युत्कृष्टे कुले वंशे संभव उत्पत्तिर्महाकुलीनता। नामेति प्रसिद्धा। उदाहरति। यथा।

यथा स्पष्टं भवति तथोच्यत इत्यर्थः। तादृगिति। स एव दृश्यत इति तादृक्। अनिर्वाच्यमित्यर्थः। मध्यमलोकस्य भूलोकस्य यद्भाग्यं तस्य विभवादतिशयाद्धेतोः। 'भाग्यं कर्म शुभाशुभम्' इत्यमरः। क्षोण्यां भूमौ क्रीडितुमिच्छुभिरिन्द्र आदिर्येषां तैर्वृन्दारकैर्देवैः। 'वृन्दारका दैवतानि' इत्यमरः। चिरतरं बहुकालं यथा तथा संप्रार्थितः पद्मभूर्ब्रह्मा। अर्केन्द्वोः सूर्यचन्द्रमसोः कुलयोर्वंशयोः प्रशस्तिं प्रशंसां प्रतिष्ठामतिक्रान्त इति तथोक्तम्। यं काकतीयानामन्वयं वंशमसृजत् सृष्टवान्। तस्मिन्नन्वये लक्ष्मीपतिर्विष्णुः संप्रतीदानीं वीररुद्रवपुषा प्रतापरुद्ररूपेण जागर्ति जागरूको भवति। अवतरतीत्यर्थः। सूर्येन्दुकुलातिशायित्वादस्य कुलस्य महत्त्वम्। तत्रावतीर्णत्वात् प्रतापरुद्रस्य ना विष्णुः पृथिवीपतिरिति न्यायात् लक्ष्मीपतिरेवासावित्युक्तमिति वेदितव्यम्। नन्वत्र क्षोणीविहरणेच्छुभिर्देवैर्याचितो ब्रह्मा सत्कुलं सृष्टवान्। तत्र प्रतापरुद्रेण विष्णुरवतीर्ण इत्युक्तम्। तथा च देवानां क्षोणीविहरणेच्छा कथं घटत इति चेदुच्यते। विष्ण्वतारं विना तेषामवलम्बाभावात् क्षोणीविहरणं न संभवति। तदवतारे तु यथेष्टविहरणं संभवतीति तदवतारो वर्णित इति। तथा च प्रतापरुद्रसंबन्धिनां देवांशसंभूतत्वं व्यज्यते। अत्र पद्मभुव इन्द्रादिप्रार्थनासंबन्धेऽपि तत्संबन्धोक्तेरतिशयोक्तिः।

अथ महाकुलीनतानिरूपणानन्तरमौज्ज्वल्यं नाम गुणः। निरूप्यत इति शेषः। एवमेवाथ महाभाग्यमित्यादावप्यन्वयो बोध्यः। रूपेति। रूपेणाकारविशेषेण संपन्नः संपूर्णो देहो यस्य स तस्य भावस्तत्त्वम्। लावण्यमिति यावत्। तदौज्ज्वल्यं नाम गुण इति परिकीर्त्यते। उदाहरति। मुरारेरिति। यः कामो मन्मथः पूर्वं पूर्वकाले मुरारेः श्रीकृष्णात् जलनिधिसुतायां रुक्मिणीरूपश्रीदेव्यामुदभवदुत्पन्नः।

'राघवत्वेऽभवत् सीता रुक्मिणी कृष्णजन्मनि'

इति विष्णुपुराणाद् रुक्मिण्या जलनिधिसुतात्वम्। स कामो जगत्या भूमेर्भाग्यविभवाद् भाग्यातिशयात् पुनर्भूयो महादेवात्तन्नामकान्महाराजात्। अवनीभृद्दुहितरि राजपुत्र्याम्। ईश्वरात् पार्वत्यामिति च ध्वन्यते। जात उत्पन्नः। अत एव वपुष्मान् प्रशस्तशरीरः सन् स्वयं साक्षादयं प्रतापश्रीरुद्रः प्रतापश्रीविशिष्टरुद्रः प्रतापरुद्रः। मध्यमपदलोपे समासः। प्रतापरुद्रो भूत्वा जयति

सर्वोत्कर्षेण वर्त्तेत इति । एवं मृगदृशां स्त्रीणां मनीषा बुद्धिः । भवतीति शेषः । अत्र साक्षात् काम एवायमित्युत्प्रेक्षया रूपसंपत्तिरुक्ता ।

अथ महाभाग्यम् । महच्च तद्भाग्यं च महाभाग्यम् । लक्षणमाह । यद्विश्वंभराया भूमेराधिपत्यमधिपतित्वं तद् महाभाग्यमिति विशेषः । उच्यते । यथा सेवेति । सेवायां नम्राणां प्रणतानां नरेन्द्राणां राज्ञां मौलिषु किरीटेषु विलसद्भिः स्फुरद्भी रत्नांशुभी रत्नकान्तिभिर्नीराजितं नीराजनां प्रापितम् । राज्यश्रियो राज्यलक्ष्म्याः प्रथमावतारस्य प्रथमप्रवेशस्य पदवीं मार्गभूतम् । सिंहासनस्य राज्यलक्ष्मीप्रथमचिह्नत्वादिति भावः । भद्रासनं सिंहासनमारुह्य । तत्र स्थित्वेत्यर्थः । गुणानां दानदाक्षिण्यादीनां निधिराकरः श्रीवीररुद्रो नृपः प्रतापरुद्रनृपतिः । प्रत्यर्थिपृथ्वीपतीनां शत्रुभूपालानां श्लाघाया उत्कर्षस्य लङ्घने जाङ्घिकैर्जङ्घया चरन्तीति जाङ्घिकाः शीघ्रगामिनस्तैः समर्थैरित्यर्थः । अत एवानुपमैः सादृश्यरहितैर्विक्रमैः पराक्रमैः क्षोणीं भुवं रक्षति । दुष्टनिग्रहशिष्टपरिपालनाभ्यां निखिलभूमण्डलसंरक्षणादस्य महाभाग्यमिति भावः ।

अथौदार्यम् । लक्षणमाह । यदिति । तस्मिन् शीलं स्वभावो यस्य स तच्छीलस्तत्परस्तस्य भावस्ताच्छील्यं तत्परत्वमासक्तिरिति यावत् । विश्राणने वितरणे ताच्छील्यमिति शिवभागवतवत् समासः । यत् तदौदार्यं निगद्यत उच्यते । यथा । वदान्य इति । गुणश्रेणीनां गुणगणानां श्लाघयोत्कर्षेण पिहितमाच्छादितं तिरस्कृतं हरिदीशानामिन्द्रादिदिक्पतीनां यशः कीर्तिर्येन स तस्य रुद्रनृपतेः समस्तुल्यः । अन्यो वदान्योऽपरो दाता त्रिजगति त्रिलोके । लोकत्रयेऽपीत्यर्थः । नास्ति । अत्र हेतुमाह । यद्यस्मात् कारणाद् विद्वांस इति जनो विद्वज्जनस्तस्य मणिगृहाणां मणिमयमन्दिराणां प्राङ्गणभुवोऽङ्गणभूमयः । समन्तात् सर्वत्रोद्भूतैरुल्लसितैर्द्विरदानां गजानां मदगन्धैर्दानगन्धैः सुरभयो वासिताः क्रियन्ते । अत्रोत्तरवाक्यार्थेन पूर्ववाक्यार्थसमर्थनात् काव्यलिङ्गालङ्कारः ।

अथ तेजस्विता । लक्षणमाह । जगदिति । यज्जगतां प्रकाशकत्वं प्रकाशकारित्वं तत् तेजस्वित्वमुच्यते । उदाहरति । सदेति । जयिनो जयशीलस्य काकतिविभोः काकतिदेवतोपासकविभोः । मध्यमपदलोपी समासः । प्रतापरुद्रस्यारिक्ष्माभृत्कान्तानां शत्रुभूपाङ्गनानां चिकुरः कुन्तला एव तिमिरं तस्याहंकृतिमहंकारं मुष्णातीति तन्मुषि तस्मिन् तथोक्ते । तेजः प्रताप एव भानुः

सूर्यस्तस्मिन् सदा सर्वदा स्फुरति सति । चरन्ति जीर्णान्युद्दामान्युत्कटानि तमांसि यासां तासाम् । कुतः । न सूर्यं पश्यन्तीत्यसूर्यंपश्यास्तासां सूर्यप्रकाशरहितानामवधिगिरेश्चक्रवाळस्य पश्चात् भवाः पाश्चात्यास्तासां दृषदां शिलानां प्रकाशस्यालोकस्य व्युत्पत्तिर्विशेषेणोत्पत्तिः संभवो भवति । अत्र सूर्यप्रकाशरहितयोरपि देशकालयोरतिवेलप्रकाशजननादस्य तेजस्वित्वं लोकोत्तरमिति भावः । रूपकालंकारः ।

अथ वैदग्ध्यम् । लक्षणमाह । कृत्येति । कृत्यवस्तुषु कर्तव्यार्थेषु चातुर्यं चतुरत्वं वैदग्ध्यं परिकीर्त्यते । यथा । उदाहरति । चातुर्यमिति । गुणनिधेः श्रीवीररुद्रप्रभोश्चातुर्यं किमु वर्ण्यते । अशक्यत्वात् किमपि न वर्ण्यत इत्यर्थः । अशक्यत्वमेव विशदयति । यत्रेति । यत्र विद्या न तत्र श्रीर्यत्र श्रीर्न तत्र विद्येति न्यायादन्योन्यं परस्परं विरुद्धयोरपि वाणीश्रियोः सरस्वतीलक्ष्म्योर्यत्र प्रतापरुद्रे महदार्जवमृजुत्वमेकत्रावस्थापनशक्तिरिति यावत् । अस्तीति शेषः । पूर्वोक्तन्यायस्तु निर्गुणजनविषय इति भावः । किं याभ्यां सह श्रीवाणीभ्यां सदृशैः स्वोचितैरुपचारैः सत्कारविशेषैर्लालितां हृष्टामित्यर्थः । इमां भुवं ते तादृशा अनुपमास्तैरुत्सवैर्हर्षोत्पादकव्यापारैः । 'उत्सूते हर्षमित्येष उत्सवः परिकीर्त्यते' इति भावप्रकाशे । दिशां जित्वरो जयशीलः स नृपतिः । समानः पतिर्यस्याः सा सपत्नी तस्या भावः सापत्न्यं विरोध इति यावत् । निःसापत्न्यमविरोधं यथा तथा धत्ते दधाति । आभ्यामित्यत्राप्रधाने तृतीयाविधानेऽपि शाब्द एवोपसर्जनभावो न त्वार्थः । सह शाखाप्रस्तरं प्रहरतीत्यत्रेव समप्रधानभावोपपत्तेः । अन्यथानौचित्यादिति बोध्यम् । अत्र मिथो विरुद्धानामेत्रासामन्योन्यानुरागजननेन वशीकरणाद्वैदग्ध्यमुक्तम् । वितरणविद्वद्गोष्ठीप्रजानुरञ्जनाभिः श्रीवाणीधरणीर्निर्विरोधं पोषयतीति भावः ।

अथ धार्मिकत्वम् । लक्षणमाह । धर्मस्यैकं मुख्यं यथा तथा आयत्तमधीनं चित्तं यस्य तस्य भावस्तत्त्वं धार्मिकत्वमुदीर्यत उच्यते । उदाहरति । यथा । परिहास इति । काकतीन्द्रः परिहासेऽपि विहस्य वचनेऽप्यनौचित्यमौचित्याभावं स्वप्नेऽप्यन्यवध्वाः कथां गोष्ठीं शत्रौ रिपावप्यगुणस्य दुर्गुणस्यारोपं न मृष्यति न सहते । आरोपो नामासतो धर्मस्य स्थापनम् । परिहासादावप्यनौचित्यादिकमसहमानस्यास्य धार्मिकत्वं किमु वक्तव्यमिति भावः ।

महाकुलीनतेत्यादि गुणोद्देशश्लोके आदिशब्दग्रहणादादिशब्दस्वीकारान्महामहिमा पाण्डित्यं च प्रभृतिरादिर्येषां गुणानां ते तथोक्ताः । निरूप्यन्त इति शेषः ।

तत्र महामहिमलक्षणमाह । तदिति । देवता आत्मा अधिष्ठानं यस्य तस्य भावो देवतात्मता या देवांशसंभूतत्वं तन्महामहिमत्वम् । उच्यते इति शेषः । उदाहरति । कौसल्येति । विष्णोः प्रथमजनन्यादिमाता कौसल्यासीत् । देवकी द्वितीया मातासीत् । किं चेति चार्थः । तदनु पश्चान्माहिता पूज्यमाना मुम्मडिम्या इति राजज्ञी सैव प्रतापरुद्रमाता तृतीया माताभूत् । तमेवार्थं विशदयति । य इति । यो विष्णुस्त्रेतायां त्रेतायुगे रघुपतिः श्रीरामोऽभूद् द्वापरे युगे शौरिः श्रीकृष्ण आसीत् । स विष्णुः कलौ युगे वीररुद्रस्यावतारो यस्य स रुद्ररूपेणावतीर्णः सन् जयति । अतो विष्णोर्मातृत्रयं सिद्धम् । महामहिमत्वं स्वयमेव विशदयति । अत्रेति श्लोके गरुडध्वजात्मकतया विष्ण्ववतारत्वेन महामहिमतोक्ता ।

सर्वेति । सर्वाभिर्विद्याभिरधिकत्वं यत्तत्पाण्डित्यमुदाहृतमुक्तम् । उदाहरति । यथा गोष्ठीभिरिति । श्रीवीररुद्रो नृपः षण्णां दर्शनानां समाहारः षड्दर्शनी ।

> ‘पाणिनेर्जैमिनेश्चैव व्यासस्य कपिलस्य च ।
> कणादस्याक्षपादस्य दर्शनानि षडेव हि ॥’

इत्याहुः । सा सीमा गोचरो यासां ताभिस्तथोक्ताभिर्गोष्ठीभिः शास्त्रप्रसंगैर्बुधगणान् विद्वत्समूहान् संसदि सभायां परितोषयन् सतः श्रेष्ठस्य सारस्वतमार्गस्य कवितामार्गस्य दर्शनेन विस्तैर्दर्शनचणैर्दर्शनसमर्थैः सूक्तैः सुभाषितैः कवीन् प्रीणयन् संतोषयन् । संगीतोपनिषदः नाट्यवेदान्तस्य रहस्यपिशुनैर्मर्मसूचकैरातोद्यस्य ततादिचतुर्विधवाद्यस्य योग्यैरुचितैः क्रमैः परिपाटिभिः । ‘ततं वीणादिकं वाद्यमानद्धं मुरजादिकम् । वंशादिकं तु सुषिरं कांस्यतालादिकं घनम् । चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ॥’ इत्यमरः । वैणिकान् वीणावादकान् धिन्वन् प्रीणयन् सन् विहरति । तत्र विभोः सर्वविद्याविशारदत्वादखण्डं पाण्डित्यमिति भावः ।

अथेति । अथेत्यारम्भे । ‘मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ’ इत्यमरः । प्रथममेव नायकगुणनिरूपणानन्तरं नायकस्वरूपं निरूप्यते । लक्षणोदाहरणाभ्यामिति शेषः । महापुरुषगुणवर्णनेत्यादिना गुणवर्णनस्यैव प्रबन्धोत्कर्षावहत्वेनोक्त-

स्यात् प्रथमतो गुणनिरूपणमिति वेदितव्यम् । लक्षणमाह । यशः कीर्त्तिः । कोशदण्डजं तेजः प्रतापस्ताभ्यां सुभगो धर्मकामार्थेषु तत्पर आसक्तो धुरन्धुरः समर्थो गुणैः कुलीनत्वादिभिराढ्यः पूर्णश्च । पुमानिति शेषः । नायकः परिकीर्त्तितः । यद्यपि गुणाढ्य इत्यनेनैव यशःप्रतापधर्मादीनामुपादानं भवति तथापि पुनरुपादानं तेषामावश्यकत्वद्योतनाय । उदाहरति । यशःप्रतापाभ्यां सुभगत्वं यथा । धर्मेति । काकतिवीररुद्रनृपतेः स्फारं प्रभूतं यशोमण्डलं कीर्त्तिमण्डलं त्रिभुवनस्य त्रिलोकस्य धर्म एवाकल्पो दण्डस्तेन समुच्छ्रितमुद्धतमेकातपत्रस्याद्वितीयच्छत्रस्य श्रियं शोभां धत्त इति निदर्शना । प्रतापमाह । छायेति । कुवलयश्यामेन्दीवरनीलेयं परिदृश्यमाना नभस्तस्याकाशस्वरूपस्य छत्रस्यातपत्रस्य छायानातप इव लोक्यते दृश्यते । अत्र यदिति शेषः । उत्तरवाक्ये तच्छब्दप्रयोगात् । यस्मात् कारणादालोक्यते तस्मात् कारणात् तस्य छत्रस्योपरि भागे प्रताप एव तपनः सूर्यो नियतं यथा तथा द्योतते प्रकाशत इति मन्ये त्रिभुवनोपरि कीर्त्तिस्तदुपरि प्रताप इति महती यशःप्रतापसंपच्चिरुक्ता । धर्मकामार्थतत्परत्वं यथा । धर्म इति । रुद्रनरेश्वरे धर्मः पुण्यसंपादको गुणः सोऽर्थ इव ब्रह्मरूपपुरुषार्थ इव पूर्णः श्रीर्यस्य स तथोक्तः स्थितः । अर्थो धर्म इव पूर्णश्रीः स्थितः कामो विषयेष्वभिलाषस्ताविव धर्मार्थाविव पूर्णश्रीः समृद्धः । तौ धर्मार्थौ काम इव कामः पुरुषार्थ इव पूर्णश्रियौ स्थिताविनन्वयः । अत्र धर्मार्थकामानां त्रयाणामपि समृद्धत्ववर्णनेन तुल्यवृत्तित्वं द्योतितम् । अत्र त्रयाणां परस्परसादृश्यवर्णनेनोपमेयोपमालंकारः । धुरीणता धुरन्धरत्वम् । यथा गायन्तीरिति । काकतिवीररुद्रनृपतौ दोष्णा बाहुना विश्वंभरां भुवं बिभ्रति वहति सति शेषोऽनन्तो गायन्तीः स्वभर्तृभारावतरणात् । प्रतापरुद्रकीर्त्तिमिति शेषः । अथेदानीमेवेति भावः । निजवधूः स्वजायाः शिरसां कम्पनैः श्लाघनैरनुमोदत अनुसृत्य तुष्यति । कच्छपपतिरादिकूर्मावतारो हरिरपि वक्षस्स्थल्या दर्शनात् । आलिङ्गनार्थमिति भावः । लक्ष्मीं श्रियं प्रीणयते संतोषयति । दिङ्नागाश्च दिग्गजाश्चानुमज्जया सुरतार्थमनुधावनेन करेणूनामिभीनां शुचं विरहजं दुःखम् । 'मन्युशोकौ तु शुक् स्त्रियाम्' इत्यमरः । अपाकुर्वन्ति परिहरन्ति । शेषादिभिर्भरणीयां विश्वंभरामयमेक एव बिभर्त्तीति विश्वविश्वाधिधुरन्धरत्वमस्योक्तम् । भुजैरिति । फणीति सामान्यवाचकस्य विशेषपर्यवसानात् शेष इत्यर्थः । सहस्रेण भुजैः सहस्रसंख्यापेतैः

रित्यर्थः । सहस्रेणेत्यत्र 'विंशत्याद्याः सदैकत्वे संख्याः संख्येयसंख्ययोः' इत्यमरवचनादेकवचनत्वम् । एवमुत्तरत्रापि द्रष्टव्यम् । काकतिदेवताको वंशः काकतिवंशः । तद्भर्तुर्गुणान् शौर्यादीनिति सर्वत्र संबध्यते । ब्रदेचेद्ब्रूयाद्यदि । तथा विवस्वान् सूर्यः सहस्रेण करैरंशुभिरेव हस्तैरिति श्लिष्टरूपकमस्य लेखनसाधनत्वायोगाद्विलिखेचेत् । हरिरिन्द्रश्च । 'इन्द्रो दुश्च्यवनो हरिः' इत्यमरः । सहस्रेण नेत्रैः पश्येचेत् । स्थाने युक्तम् । 'युक्ते द्वे सांप्रतं स्थाने' इत्यमरः । शेषादय एव प्रतापरुद्रगुणस्तुत्यादिकं कुर्युश्चेद्युक्तम् । समर्थत्वात् । अन्ये तु कर्तुमुद्युक्ताश्चेद्युक्तमिति वाक्यार्थः ।

अथ नायकसामान्यनिरूपणानन्तरम् । उदात्तेति । उदात्त उद्धतो ललितः शान्त इति चत्वारः । धीरो धीरशब्दः पूर्व आदिर्येषां ते तथोक्ताः । इम उदात्तादयो नायकाः स्मृता उक्ताः । अत्र धीरशब्दपूर्वत्वमुदात्तादिशब्दानामेव न तु नायकानाम् । तथापि शब्दपरेणाप्यर्थलक्षणेति 'देवपूर्वं गिरिम्' 'धनुरुपपदमस्मै वेदम्' 'हिरण्यपूर्वं कशिपुम्' इत्यादौ मल्लिनाथेन व्याख्यातम् । चैवादीनां पादपूरणादपूरणार्थत्वं द्रष्टव्यम् । श्लोकार्थं कविः स्वयमेव व्याकरोति । तत्रेति । तत्र नायकस्वरूपप्रकटनप्रस्तावे । सर्वरसानां शृङ्गारादिनवरसानां साधारणाः समाना धीरोदात्तादीनां सकलरसानुगुणत्वमनुकूलादीनां चतुर्णां तु नास्तीत्याशयेनोक्तम् ।

क्रमेण चतुर्णां लक्षणान्याह । महदधिकं सत्त्वं सत्त्वगुणो यस्य स तथोक्तः क्रोधाद्यनभिभूतान्तःकरणोऽतिगम्भीरोऽगाधचित्तः कृपावान् परदुःखप्रहरणेच्छुरविकत्थन आत्मस्तुतिरहितो धियं शास्त्रादधातीति धीरो वत्सल एवंगुणको यः प्रतापरुद्रवत् प्रतापरुद्रतुल्यं वर्तते स धीरोदात्तो धीरोदात्तनामको नायकः संमतः । संदिग्ध इति । त्रैलोक्यमातिशयेन कीर्त्या सुभगः सुन्दरः श्रीवीररुद्रो नृपः । धृतोऽसिः खड्गं येन सः । कृपया मृदुः न कातर्येणेत्यनेन महासत्त्वतोक्ता । क्षणमल्पकालमेवारीन् । पुरः स्थितानिति शेषः । हन्तुं संदिग्धे संदेहं गच्छति । क्षणमित्यनेन धैर्यमुक्तम् । पुर इत्यनेन न तु पलायितानिति धार्मिकत्वमुक्तम् । बन्दिषु स्तावकेषु शौर्यश्रियां शौर्यसंपत्तौ प्रणयं प्रेमाणं प्रतापरुद्रसंबन्धिनं प्रशंसन्त इति तथोक्तेषु सत्सु । नमन्ती भ्रूर्यस्य स तथोक्तः सन्निति लज्जानुभावः । लज्जते लज्जितो भवति । स्तावकस्तुतावेव लज्जितस्यात्मस्तुतिदूं-

शापास्तेत्यविकत्थनत्वमुक्तम् । सुखस्येष्टानुभवजन्यानन्दस्य रोषस्यामर्षस्य हर्षस्येष्टलाभजन्यमनःप्रसादस्य च पिशुनान् सूचकान्। 'पिशुनौ खलसूचकौ' इत्यमरः। आकारान् अक्षिनिमीलनादीन् वक्त्रे मनागीषदपि न धत्ते न बिभर्ति। एतेनातिगम्भीरतोक्ता।

दर्पेति। यो नायको दर्पः शौर्यादिमदो मात्सर्यमसहनं ताभ्यां भूयिष्ठः प्रचुरः। चण्डा तीक्ष्णा वृत्तिर्व्यापारो यस्य स विकत्थन आत्मश्लाघापरः। मायावी केवलवञ्चकः। सुलभः क्रोधो यस्य सः। स नायको धीरोद्धत उच्यते। रे इति। रे रे इति हीनसंबोधनम्। 'हीनसंबोधने तु रे' इत्यमरः। रे रे इति सर्वत्र संबध्यते। रे रे गूर्जरदेशाधिपते। एवं देशवाचकलम्पाकादीनामपि तदधिपतयो वाच्याः। समरे युद्धे जर्जरः शिथिलगात्रोऽसि। हे लम्पाक किं किमर्थं कम्पसे वेपसे। हे वङ्ग मुधा किं किमर्थं त्वङ्गसि त्वङ्गनमूर्ध्वोच्चलनं करोषि। हे कोङ्कण बलस्य चतुरङ्गस्य रजसा परागेण काणोऽन्धोऽसि किम्। हे हूण प्राणाः परायणं प्रधानं यस्य तथोक्तो भव। महाराष्ट्र अपगतं राष्ट्रं यस्य स तथोक्तोऽसि। एतत् सर्वं कथमित्याकाङ्क्षायामाहुः। अमीति हस्तनिर्देशेनात्मदर्शनेन दुर्जयत्वं सूचितम्। वयं योद्धारो युद्धकारिण इत्युक्तरीत्यान्ध्रक्ष्माभृत आन्ध्रदेशनायकस्य प्रतापरुद्रस्य भटा योधा अरीन् परिभवन्ति तिरस्कुर्वन्ति। अत्र रे रे इत्यादिना दर्पादिगुणप्रकाशनाद् भटानां धीरोद्धतत्वम्।

निश्चिन्त इति। कलासु गीतादिष्वासक्तः सुखी भोगप्रवणो मृदुः सुकुमाराकारो निश्चिन्तः सुतादिनिहितयोगक्षेमतया चिन्तारहितो नायको धीरललित उच्यते। शौर्येति। शूरस्य युधि निर्भीकस्य भावः शौर्यं तस्योष्मा तापः। प्रताप इति यावत्। निर्गतोऽवग्रहः प्रतिबन्धको यस्मात् सः। यद्यपि 'वृष्टिर्वर्षं तद्विघातेऽवग्राहावग्रहौ समौ' इत्यमरकोशादवग्रहस्य वर्षप्रतिबन्धकवाचकत्वं तथापि 'विश्वोकैर्वकसहवासिनां परोक्षैः' इत्यादिमाघव्याख्याने विशेषवाचकस्यापि सामान्यवाचकत्वमिति निर्णीतं मल्लिनाथेन। तथैवात्रापि विशेषवाचकस्य सामान्यवाचकत्वं ध्येयम्। प्रतिनृपाः शत्रवः सर्वेऽपि नम्रीकृता वशीकृताः। इयं भूर्भूमिः पातिव्रत्यं पतिव्रतात्वं पत्युर्वशंवदत्वमुपैति प्राप्नोति। सर्वापि भूमिर्वशीकृतेत्यर्थः। अयं स्वयंभूः स्वयंभूनामकः शिवो नाथः परिपालक एकशिलायां कश्चन शिवालयोऽस्ति। तत्र शिवस्य नाम स्वयंभूरिति। स एव रक्षक इति।

धीरः धैर्यवानयं युवराजः श्रीवीररुद्र एव सर्वां धुरं राज्यभारं वहति । नान्य इत्येवकारार्थः । इत्येवं विभुः समर्थः श्रीकाकतीन्द्रः काकतिकुलज्येष्ठः प्रतिकलं प्रतिक्षणमनुमोदते संतुष्यति । अत्र शौर्यादिभिर्दैवानुकूल्येन युवराजधुरंधरत्वेन च निश्चिन्तः सदा सुखमनुभवतीति काकतिकुलज्येष्ठो धीरललितः ।

धीरो विवेचकः क्लेशसहिष्णुर्वा धीरः । शान्तः शान्तिप्रधानः । अतः प्रसन्न आत्मान्तःकरणं यस्य सः । द्विजादिकः पुमान् धीरशान्त इत्युच्यते । आदिशब्देन वणिक्सचिवौ विवक्षितौ । धीरामिति । एव संख्यावतां पण्डितानां गणः समूहो धीरं प्रत्यग्रं यथा तथा प्राप्त उदयोऽभिवृद्धिरुदयाचलश्च येन तम् । नृपालरत्नमभितः प्रतापरुद्राभिमुखं यथा तथेत्यर्थः । अब्जाकरः कमलाकरस्तासरसम् । पूषा सूर्यः । 'विकर्तनार्कमार्तण्डमिहिरारुणपूषणः' इत्यमरः । तमिव निजैः स्वीयैर्विकासैरुत्सवादिभिर्दलविश्लेषैश्चोन्मीलन्त्याः कमलायाः संपत्तेः । अन्यत्र लक्ष्म्याः । विहारवसतिः केलिस्थानं भूत्वा विश्वस्य प्रपञ्चस्यामोदं संतोषं गन्धविशेषं चोदञ्चयन् वर्धयन् दोषाणां पापानामवसान अन्ते नाशे । उत्सुकोऽन्यत्र दोषाया रात्रेरवसान अन्ते प्रभात उत्सुकः सन् मोदते । अब्जाकरस्यान्तःसंज्ञासद्भावादौत्सुक्यं वर्तते चेतनत्वादन्यथा वृद्धिक्षयासंभवादिति । 'अन्तःसंज्ञा भवन्त्येते सुखदुःखसमन्विताः' इति मनुवचनं च । अत्र प्राप्तोदयमित्यादिश्लेषानुप्राणितः पूषणमिवेत्युपमालंकारः । एकस्यैव नायकस्य धीरोदात्तादिशब्दवाच्यत्वं मारावस्थाभेदेनेति वेद्यम् ।

अथ सर्वरससाधारणनायकनिरूपणानन्तरं शृङ्गारस्य प्रथमरसस्य विषया गोचराः । उद्दिशति । अनुकूल इति । स्मृत इति प्रत्येकं संबन्धः । अन्यथा बहुवचनापत्तेः ।

उद्देशक्रमेण चतुर्णां लक्षणान्याह । एकायत्त एकस्यां नायिकायामासक्तोऽधीनः । एकासक्त इति वा पाठः । अमुमेवार्थमाह । एकस्यामिति । नायिकान्तरसद्भावेऽपीति भावः । किमिति । नायिका सखीमाह । हे सखि किं नाम किमभिधानं तपः भुवा भूदेव्या नायिकया चाचरितं कृतम् । भूतपःप्रश्ने हेतुमाह । धीरो रुद्रनृपो यस्या भुवः पतिर्भर्ता । इतीति शेषः । गीयते उच्यते । भूतपोनामग्रहणे तत्तपोऽहं करिष्यामीति तात्पर्यम् । इदानीं तत्र भाग्यातस्य पत्नी भवेत्याकाङ्क्षायामाह । केति । तत् सुचरितं सुकृतं क कुत्रास्ति । नाती-

त्यर्थः । यतः सुचरितात् तस्य प्रतापरुद्रस्य प्रिया त्वां भवेयं तत् केत्यन्वयः । तत्राह । जाने । प्रियसंघटनोपायमिति शेषः । हे मानिनि मा विषीद विषादं मा गच्छ । त्वां रत्नानामाकरः खनिस्तथाभूता मेखला काञ्ची यस्यास्ताम् । भूपक्षे तु रत्नाकरः समुद्र एव मेखला यस्यास्ताम् । स्थिरां स्थैर्यवतीं भुवं च । पुरतः । यस्येति शेषः । प्रत्याप्याख्याय नृपं सदा त्वयि रक्तमनुरक्तं विधास्ये करिष्ये । 'रसा विश्वंभरा स्थिरा' । 'भूतधात्र्यब्धिमेखला' इति चामरः । लक्ष्ये लक्षणानुगतिं दर्शयति । अत्रेति ।

द्वितीयलक्षणमाह । तुल्येति । अनेकत्रानेकासु नायिकासु तुल्यस्तुल्यवृत्तिर्दक्षिणः । अमुमेवार्थमाह । अनेकास्विति । उदाहरति । नर्मेति । मया काचित् प्रिया स्मरकला मन्मथविद्यास्ता एव केल्यः सुरतक्रीडेत्यर्थः । तासु विषये । अग्राम्य इष्टजनावर्जनरूपः परिहासो नर्म तत्सहितमुक्तं वचनम् । भावे क्तः । तेन निमन्त्रिता आहूता स्वाकूतेन स्वाभिप्रायेण तत्सूचकेनेत्यर्थः । विलोकनेन कस्यैचित् नायिकायै हृदयं मम अभिलाष इत्यर्थः । आविष्कृतं प्रकटितम् । दूत्याः करेण साधनेन प्रसाधनविधिः प्रतिकर्मविधानमाभरणजातमिति यावत् । 'प्रतिकर्म प्रसाधनम्' इत्यमरः । कस्याश्चिन्नायिकायाः प्रहितः प्रेषितः । क वा नु कुत्र वा गच्छाम्यविलम्बेन गमिष्यामि । वर्तमानसामीप्ये वर्तमानवत्प्रत्ययः । तदनुचितव्यापारेणानेकत्र भावप्रकाशनेनैकत्र गमनमनुचितमित्यनुचिन्तयैव विचारेणैव न तु गमनेनेत्येवकारार्थः । नृपते राज्ञो निशा रात्रिः प्रभाता प्रभातप्रायेत्यर्थः । आसीदित्यन्वयः । वीररुद्रस्यापि दक्षिणनायकत्वं वक्तुमुदाहरणान्तरमाह । वाणीमिति । वाणीं सरस्वतीं नायिकां च । मुखेन वक्त्रेण लक्षणया सल्लापेन । अन्यत्र नेत्राभ्यां श्रियं लक्ष्मीं नायिकां च । दोष्णा बाहुना । मेदिनीं भुवं प्रियां च । मानयन् बहु मानयन् रुद्रनरेश्वरस्तासु वाणीश्रीमेदिनीषु तिसृषु नायिकासु च तुल्यतां तुल्यवृत्तित्वं धत्ते । अत्र महाभाग्यवतोऽस्य स्वमुखादिषु वाण्यादिसद्भाववर्णनेन वाण्यादिगतस्त्रीलिङ्गाक्षिप्तनायिकासु तिसृषु सल्लापावलोकनहस्तावलम्बनैस्तुल्यानुरागप्रकाशनादस्य दक्षिणत्वम् ।

धृष्टलक्षणमाह । व्यक्तेति । यो व्यक्तोऽपराधो यस्य सः । गतभीर्निर्भीकश्च स नायको धृष्ट इति कथ्यते । राज्येति । राज्यश्रियो राज्यलक्ष्म्यास्तदाख्याया नायिकायाश्च परिभोगमुपभोगं संभोगं च शंसतीति तथोक्तम् । हे राजन् भव-

तस्तव सर्वाङ्गं सप्ताङ्गानि समस्तशरीरं च । ‘ स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि च । राज्याङ्गानि ’ इत्यमरः । आलोक्यते दृश्यते । तत्र दर्शनेऽविनयो दौष्ट्यं कः कीदृशो । नास्तीत्यर्थः । तस्या राज्यश्रियः सपत्न्या नाम नयदर्प्यते निक्षिप्यत इति । यत इदमर्पणं साहसं न केवलं तत्संभोगसूचकावयवदर्शनं प्रत्युत तत्राङ्गा ममाङ्गानं क्रियत इत्यतिसाहसमित्यर्थः । अहं त्वां बह्व्यो वल्लभाः प्रियतमा यस्य तं तथोक्तं जाने । बहुवल्लभत्वमेव व्यनक्ति । किमित्यादिना । ततोऽपरमन्यद्वक्तव्यं वाच्यं किं किमस्ति । नास्तीत्यर्थः । वयमल्पा दरिद्राः । या वसुमती नाम वसुमतीति प्रसिद्धा भूः । ‘वसुमती वसुधोर्वी वसुन्धरा’ इत्याद्यमरकोशादिना । नायिका तु वसुमती धनवतीति प्रसिद्धा तस्यां तव प्रेम स्नेहः । अधिकजल्पितैर्वाक्यैः किम् । भाषितसाध्यं नास्तीत्यर्थः । प्रतापरुद्रस्यैकपत्नीव्रतस्य नायिकान्तरसंभोगवर्णनानौचित्यात् राज्यलक्ष्म्यादिषु स्त्रीलिङ्गमहिम्ना नायिकान्तरत्वं परिकल्प्योह्रियत इति बोध्यम् । अत्र परिभोगप्रकाशनात् गोत्रस्खलनाचापराधाभिव्यक्तौ तत्सकाशगमनाभिर्भीकत्वमित्यस्य द्रष्टव्यम् ।

शठलक्षणमाह । गूढेति । गूढमन्यैरविज्ञातं यथा तथा विप्रियमपराधं करोतीति गूढविप्रियकृत् यः स शठः शठनायकः । दृष्ट्येति । दृष्ट्या केवलं दृष्ट्यैव पश्यसि मनसान्तःकरणेन न पश्यसि वाचा प्रियं मनोहरं वचनं भाषसे । भावेनाभिप्रायेण नो भाषसे न वदसि । किं भुजान्तरं वक्षस्थलमग्रे पुरतः प्रकटयसि । आभ्यन्तरमन्तस्थितचित्तव्यापारं न च प्रकटयसि । हे काकतिनाथ ज्ञातम् । तव हृदयमिति शेषः । ध्यायतोऽन्तरालोचयतस्तव प्राणेश्वरी प्रेयसी भूः परं भूरेव मादृशेषु । जनेष्विति शेषः । विडम्बनैव अनुकरणमेव । तत् तस्मात् कारणाद् व्यर्थैर्निरर्थकैर्बहिःसंभ्रमैर्बाह्यसंरम्भैरलं पर्याप्तम् । बाह्यसंभ्रमान् मा कार्षीरित्यर्थः । अत्र दर्शनभाषणयोश्चक्षुर्वागिन्द्रिययोरभावे असंभवादेव पश्यसि भाषस इत्यनेन चारितार्थ्ये दृष्ट्या वाचेति पुनरुपादाने तात्पर्यनिषेधार्थमिति न पौनरुक्त्यम् । अत्र नायिकामात्रविदितभावशून्यदर्शनादिविधानादयं शठः । वीररुद्रगुणवर्णनप्रतिज्ञाभङ्गं परिहरति । अत्रेति । रे रे घूर्जर शौर्योष्मा नर्मोक्तेनेत्यादिषु धीरोद्धतत्वात् तन्नायकविशेषत्वेन काकतीश्वराद्युदाहरणे वीररुद्रस्यैव वर्णनम् । तेषामन्योत्कर्षावहत्वादिति भावः ।

पीठमर्दादिनायकानुकूलनसहायलक्षणान्याह। किंचिदूनो न्यूनः पीठमर्दः। एका विद्या यस्य स एकविद्यो विटः। सन्धाने नायिकानायकयोः संघटने कुशलश्चेटः। हास्यकार्यङ्गवाक्यवेषविकारादिना परिहासको विदूषकः। स्मृत इति सर्वत्र संबन्धः।

शृङ्गारप्रधाना नायिकाः शृङ्गारनायिकाः। ता उद्दिशति। स्वाधीनपतिकेत्यादि। तथाभिसारिका चेत्यन्तेन। क्रमादुद्देशक्रमाल्लक्षणं तासामिति शेषः। उच्यते। प्रियेति। नित्यं प्रियेणोपलालिता या सा नायिका स्वस्मिन्नधीन आयत्तः पतिर्यस्याः सा स्वाधीनपतिका भवेत्यन्वयः। उदाहरति। प्रियामिति। सर्वं सहत इति सर्वसहा तां प्रियां नायिकां प्रियामिष्टां भुवं च तैस्तैर्विशेषैर्वासोऽङ्गरागादिभिः सारकरणादिभिश्चोपलालयन् लालनं कुर्वन् प्रतापरुद्रनृपतिः प्रतिक्षणं क्षणे क्षणे अवेक्षते। अवेक्षत इत्यनेनासन्नायत्तरमणत्वप्रतीतेः सर्वसहायाः स्वाधीनपतिकात्वम्।

प्रियेति। प्रियस्यागमनवेलायामागमनसमये मुहुर्मुहुः केलिगृहं तथात्मानं स्वशरीरं च मण्डयन्त्यलंकुर्वती या सा नायिका वासकसज्जिका। वासके निवासस्थाने सज्जा सन्नद्धा सैव वासकसज्जिकेत्यन्वर्थसंज्ञा। 'स्त्रीणां वासस्तु वासकः' इति वचनात्। वासके वारे दिवसे सज्जयति सज्जीकरोति केलिगृहमिति वा। अमुमेव पक्षमवलम्ब्योदाहरति। स्वेति। प्रधानागारं प्रधानगृहं स्वतेजसा स्वप्रकाशेन परिष्कृत्यालंकृत्योत्कयोन्मनसोत्कण्ठितया श्रिया राज्यलक्ष्म्या नायिकया चाभिषेकवेलायां पट्टाभिषेकसमये वीररुद्रः प्रतीक्ष्यते निरीक्ष्यते। अत्र क्रीडागारपरिष्कारादिभिरियं राज्यलक्ष्मीर्वासकसज्जिका।

चिरयतीति। अव्यलीक इति शेषः। अनपराधे प्रिये कान्ते अधिकमत्यन्तं चिरयति सत्युन्मना उत्कण्ठिता। नेति। तादृग्गुणानामनिर्वचनीयगुणानां परिभवः प्रकाशो यस्य तस्मिन् रुद्रनृपतावन्या शङ्कान्याङ्गनासक्तिरूपो वितर्कः। नास्तीति शेषः। कया वा गोष्ठ्या केनचित् संगीतादिप्रसङ्गेन चिरयति। अतोऽसौ धीरललित इति बोध्यम्। सखीभिर्वयस्याभिः सुखेन लभ्यत इति सुलभः सुखेन लभ्यः। न हि। मदन स्मर त्वं समानेतुं व्रज। अहं बद्धोऽञ्जलिर्यया सा। नमस्करोमीत्यर्थः। अत्र हेतुमाह। यतो यस्मात् कारणात् तव प्रियसखश्चन्द्रो विष्वक् समन्ततोऽञ्चन्ति गच्छन्तीति विष्वगञ्चः। तान् सर्वतो-

63

शङ्कयाह। महीपती राजा प्रेयान् कान्तोऽस्तु। अभिसारिकां करेणुस्थां गजारोहिणीं न पश्यामि न शृणोमि च। कान्तमाहात्म्येनाभिसारिकायाः प्रकटगमनमुचितमिति भावः। दूत्य इति। दासी कर्मकरी। सखी स्नेहनिबन्धना। कारू रजक्यादिः। धात्रेयी उपमातृसुता। प्रातिवेशिनी प्रतिवेशोऽभिगृहं तत्रत्या। लिङ्गिनी परिव्राजिका कापालिका। शिल्पिनी चित्रकारस्त्री। स्वा स्वीया बान्धवस्त्रीत्यर्थः।

'भगिनी स्यालिका वापि मातुलस्याथवा सुता।
एता भवन्ति दूत्यस्तु बान्धवस्त्रीति संज्ञिताः॥'

इति सोमेश्वरेणोक्तत्वात्। दूत्यः संधानकारिण्यः सहायाः परिकीर्त्तिताः। एतल्लक्षणोदाहरणादिकं पद्मिन्यादिजातिभेदश्च विस्तरभयान्नोच्यत इत्याशयेनाह। एतासामित्यादि जातिविशेषा इत्यन्तेन।

संक्षेपो नाम विविच्य वक्तव्यार्थस्य संकोचेनोक्तिः। तेन नायिकानां त्रैविध्यम्। तदेवाह। मुग्धेत्यादिना क्रमेण लक्षणोदाहरणानि। उदयदुद्यद् यौवनं यस्याः सा लज्जया त्रपया विजितोऽभिभूतो मन्मथो यस्याः सा। या सा नायिका मुग्धेति यत्तच्छब्दाध्याहारेण योजना। अथवोदययौवना लज्जाविजितमन्मथा च स्त्री मुग्धेति लज्जामन्मथयोर्मध्यस्त्रीति तथोक्ता तुल्यलज्जास्मरेत्यर्थः। उदितमुत्पन्नं यौवनं यस्याः सा नायिका मध्यमा। स्मरेण मन्दीकृता व्रीडा यस्याः सा। संपूर्णं यौवनं यस्याः सा नायिका प्रौढा।

क्रमेणोदाहरणानि। मुग्ध इति। हे मुग्धे यदिदं मनसोऽपि किमुतान्यस्येत्यपिशब्दार्थः। गोप्यं गोप्तुं योग्यं तन्मन्मथमावेधते। एतावत्पर्यन्तमिति शेषः। अहं या काचिदनाप्ता किम्। नेत्यर्थः। वद ब्रूहि। इदिस्थामिति शेषः। हे प्रियसखि प्रच्छाद्यानुक्त्वा किं किमर्थं ताम्यसि दूयसे। आच्छादने परितापं विना न किञ्चित् फलमस्तीति भावः। तत्रासक्तिर्वीररुद्रनृपतौ प्रतापरुद्र आशास्यत अभिलष्यत जल्पत इत्यर्थः। मयेति शेषः। पुनस्तदभिप्रायं ज्ञातुं पृच्छति। किं भवेदित्यस्यां सख्यां प्रणयेन विस्रम्भेणैका मुख्या वाक् यस्यां तस्यां सत्याम्। शोभनं तनुर्यस्याः सा मुग्धा व्रीडया दत्तमुत्तरं प्रतिवाक्यं यया सा तथोक्ता। अभूदिति शेषः। प्रतापरुद्रगताभिलापप्रश्नेन व्रीडोत्पत्तौ प्रत्युत्तरेणैव व्रीडयैव तदासक्तिर्ज्ञातेत्यर्थः।

लीलेति । पूर्वरङ्गो नाम रङ्गप्रसाधनाख्यः नाट्यादौ कर्तव्यः कर्मविशेषः । तदुक्तम् ।

> ‘ यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
> कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स कीर्तितः ॥ ’

इति । लीलानायासस्तया विभ्रमा विलासा अयत्नसिद्धविलासा इत्यर्थः । ता एव पूर्वरङ्गो यस्य तत् । उदितमुत्पन्नं तारुण्यं तदेव रङ्गस्थलमिति गम्यते । अत एवैकदेशवर्ति रूपकम् । एत्य प्राप्य त्रपैव नेपथ्यं विहारसदृशयवनिका तस्यान्तर आभ्यन्तरे बिम्बिताः प्रतिफलिताः प्रकाशमानाः स्मरकला मन्मथविकारास्ता एव लास्यप्रपञ्चस्य नृत्तविस्तारस्य श्रियः संपदो यस्यास्तस्याः । अस्या इति हस्तनिर्देशेनोक्तेः । तरले भ्रुवौ यस्यास्तस्याः स्त्रियः काकतीयनृपतौ भावस्य रत्याख्यस्यानुबन्धेनाविच्छेदेनोज्ज्वलः । भावानुबन्धेन व्यापारविशेषानुबन्धेनेत्यन्यत्र ।

> ‘ वागङ्गसत्त्वाभिनयैर्मुखरागोपशोभितैः ।
> भावयन्नान्तरं भावं व्यापारो भाव इष्यते ॥ ’

इति । अत एव कोऽप्यनिर्वचनीयः शृङ्गार एव नाट्यं तस्य क्रमो विजयते । हे सख्यः पश्यतेति वाक्यार्थः । अयमर्थः । यथा रङ्गप्रसाधनपूर्वकं रङ्गस्थलं गत्वा यवनिकान्तरे दृश्यमाननृत्तायाः पात्र्या अभिनयोज्ज्वलः साध्यक्रमः प्रकाशते तथा विलासपूर्वं यौवनमेत्य व्रीडामिश्रितमन्मथविकारवत्यां प्रेमोज्ज्वलः शृङ्गारक्रमो विजयत इति ।

सहेलमिति । प्रकृत्या स्वभावेन न त्वलंकारैः सुभगं रुद्रनृपतिम् । हेला नाम व्यक्तशृङ्गारसूचकोऽन्तःकरणविकारः । तत्सहितं यथा तथा पश्यन्त्या मृगाक्ष्यास्तारुण्ये यौवने । तदात्वे तत्काले । प्रियदर्शनसमय इत्यर्थः । प्रत्युद्यन्त्युत्पद्यमानानि विविधानि ललितानि कर्णकण्डूयनकुचविमर्दनादिकोमलाङ्गविन्यासाः ।

> ‘ सुकुमाराङ्गविन्यासो ललितः परिकीर्तितः ’

इति लक्षणात् । तेषामाटोपेनाडम्बरेणेति स्मरमन्दीकृतव्रीडत्वमुक्तम् । रसस्य शृङ्गारस्य प्रादुर्भावादुदयाद् युगपदेकदैवोदयन्तः सात्त्विका यस्मिंस्तत् कुसुमशरस्य मन्मथस्य शिल्पं कलाकौशलं विजयते । अहो इत्याश्चर्ये । सुभगदर्श-

भादेव मृगाक्ष्या ललितसात्त्विकादिजननेन स्मरकौशलमत्याश्चर्यकरमिति भावः । भेदान्तरं स्वीयात्वादिकं यथायोग्यमुदाहार्यम् । ग्रन्थान्तरेष्विति शेषः ।

इत्थं प्रसक्तानुप्रसक्तं नायकादिस्वरूपनिरूपणं परिसमाप्य प्रकृतं पुण्यश्लोकगुणवर्णनमुपपट्टवमुपसंहरति । गुणेति । रसैः शृङ्गारादिभिर्महत्युज्ज्वले काव्ये गुणानां प्रसादादीनामलंकाराणामुपमादीनां विलसितं विलासः । भावे क्तः । विजयते । तदपि गुणादिविलसितमपि स्फुरद्भ्यां शब्दार्थाभ्यां हृदयमानन्दयतीति तथोक्तं मनोहरं भवति । स्रवदमृतमाधुर्यवत् सुभगो मनोहरः स्रवन्मधुरामृतसुभग इत्यर्थः । भावानयने द्रव्यानयनमिति न्यायात् । तयोः शब्दार्थयोरुन्मेषो विकासोऽपि परमुत्कृष्टम् । पुण्यः श्लोको यशो यस्य तच्चरितं चरित्रमनुबध्नन् वर्धते विजयते । उत्तमनायकचरितस्यैवोदाहर्तव्यत्वेन नायकस्वरूपनिरूपणम् । तत्प्रसक्त्या नायिकास्वरूपनिरूपणं च कृतम् । ततः स्वचिकीर्षितवशात्तद्विषयाणामलंकाराणामाश्रयभूतकाव्यस्वरूपनिरूपणमिति सर्वमवदातम् ॥

इति श्रीप्रतापरुद्रीयव्याख्याने रत्नशाणाख्याने
नायकप्रकरणम् ॥

अथ काव्यप्रकरणम् ।

अथ काव्यप्रकरणं व्याख्यायते । अथेति । अथ नायकस्वरूपनिरूपणानन्तरं काव्यस्य कविकर्मणः शब्दार्थसंदर्भरूपस्य स्वरूपं निरूप्यते । लक्षणोदाहरणाभ्यां स्पष्टीक्रियते । काव्यलक्षणमाह । गुणेति । गुणैः प्रसादादिभिरलंकारैरुपमादिभिः सहितौ दोषवर्जितौ शब्दार्थौ दोषरहितौ शब्दार्थौ कर्म काव्यविदो विद्वांसः काव्यं विदुः । तदिति शेषः । तत् काव्यं गद्यपद्योभयमयम् । गद्यमयं पद्यमयमुभयमयं गद्यपद्यात्मकं चेत्यन्वयः । एककारिकायां काव्यसामान्यविशेषलक्षणसद्भावात् । तत्र सामान्यलक्षणं अन्यरूपेण व्याख्यातयदोषावित्यादिना ।

काव्यसामग्र्याः कामिनीसाम्यं वर्णयति । शब्दार्थाविति । काव्यसंपदः काव्यलक्ष्म्याः शब्दार्थौ मूर्तिः शरीरमाख्याताबुक्तौ । व्यङ्ग्यवैभवं व्यङ्ग्यातिशयो जीवितमात्मा आख्यातम् । एवमुत्तरत्रापि लिङ्गादिविपरिणामेनान्वयः । अलंकारा उपमादयो हारादिवद् मुक्ताहारादिप्रायाः । तत्र शब्दार्थशरीरे श्लेषः श्लेषाख्यो गुण आदिर्येषां ते तथोक्ताः । गुणाः शौर्यादय इव शौर्यादितुल्याः स्मृताः । आत्मनः काव्यस्य जीवितस्य चोत्कर्षावहा अतिशयसंपादका रीतयः रीत्याख्याः शब्दसङ्घटनाधर्माः स्वभावाः प्रकृत्यपरनामका आत्मधर्मास्तत्तुल्याः । आहार्यकीं कृत्रिमां शोभां प्राप्ता वृत्तयः कैशिक्यादयो वृत्तयो यथा वर्त्तनानीव । शौर्यादिशोभायाः कृत्रिमत्वमर्थविशेषोत्पाद्यत्वम् । लोकवर्त्तनशोभायाः कृत्रिमत्वं स्वजात्युपयोगि यागादिजन्यत्वमिति बोध्यम् । पदानां शब्दानामानुगुण्ये विनिमयासहिष्णुत्वे विश्रान्तिः विश्रमो यस्याः सा पदविनिमयासहिष्णुस्वरूपा । शय्या नाम शब्दधर्मः । अन्यत्र पदानां व्यवसितानां संभोगादिव्यापाराणामानुगुण्येनानुकूलत्वेन हेतुना विश्रान्ति सौख्यं यस्याः सा शय्येव शयनीयमिव संमता । रसस्य शृङ्गारादेरर्थस्य । आस्वाद्यते अनेनेत्यास्वादो गम्भीरिमा तस्य प्रभेदा विशेषरूपाः पाकाः । अन्यत्र रसस्य मधुरादेरास्वादो रुचिस्तस्य प्रभेदा येषु ते । पच्यन्त इति पाका अन्नानीव स्थिताः । एवं काव्यसंपद् इयं सामग्री शब्दार्थादिसाधनसामग्री लोकवल्लोकस्येव कामिन्या इवेत्यर्थः ।

स्तस्या एव हारशय्यादयश्चमत्कारकारकाः । अत एव काव्यसंपद इति स्त्रीलिङ्गत्वेन निर्देशः कृतः कविना । प्रख्याता प्रसिद्धा ।

आदौ काव्यशरीरभूतशब्दार्थयोर्मध्ये शब्दं विभजते । वाचकेति । शब्दानां जातं समूहः । वाचकलक्षकव्यञ्जकत्वेन वाचकत्वेन लक्षकत्वेन व्यञ्जकत्वेन च । त्रिविधं त्रिप्रकारम् । अर्थं विभजते । अर्थानां जातमपि वाच्यलक्ष्यव्यङ्ग्यत्वेन वाच्यत्वेन लक्ष्यत्वेन व्यङ्ग्यत्वेन च त्रिविधम् । द्वन्द्वान्ते श्रूयमाणो भावशब्दः प्रत्येकमभिसंधीयत इत्यत्र भावशब्दो भावार्थकशब्द इति संप्रदायः । ननु तात्पर्यार्थ इति चतुर्थेऽर्थे स्थितेऽर्थस्य कथं त्रैविध्यं तत्राह । तात्पर्येणाभिप्रायविशेषेण गम्योऽर्थस्तात्पर्यार्थः । स च व्यङ्ग्यान्तर्गत एव । व्यङ्ग्यान्तर्भूत एव । एवकारेण लब्धमेवार्थं कण्ठतो निषेधति । न पृथग्भूत इति । पृथग्भूतो न भवति । तात्पर्यमिति व्यञ्जनाया अपर नाम । तदर्थो...त्यर्थः । नान्य इति ध्वन्याचार्यैरुक्तम् । 'यस्त्वभिप्रायविशेषरूपं व्यङ्ग्यं शब्दार्थाभ्यां प्रकाश्यते तद्भवति विवक्षितं तात्पर्येण प्रकाश्यमानम्' इति । यथा चक्षुरादीन्द्रियेण घटाद्यर्थज्ञाने संयोगादिसंबन्धोऽपेक्षितस्तथा शब्देन त्रिविधेनार्थबोधने संबन्धोऽपेक्षितः । स च संबन्धोऽभिधादिरूपः । अतस्तद्विभजनं करोति अभिधा लक्षणा व्यञ्जनेत्याख्याः यासां ताः शब्दवृत्तयः शब्दधर्मास्तिस्रस्त्रिप्रकारा इत्यर्थः । अभिधादीनां शब्दधर्मत्वं वाक्यानामाकाङ्क्षादिमत्त्वमिति वेदितव्यम् । वाचकशब्दोऽभिधावृत्त्या वाच्यार्थबोधकः । लक्षकशब्दो लक्षणावृत्त्या लक्ष्यार्थबोधकः । व्यञ्जकशब्दो व्यञ्जनावृत्त्या व्यङ्ग्यार्थबोधक इति विवेकः । गौणी वृत्तिरिति वृत्त्यन्तरवादिनां मतम् । निराकरोति । गौणवृत्तिर्गुणनिमित्ता पैङ्गल्यादिगुणनिमित्ता वृत्तिर्लक्षणायाः प्रभेदविशेष एव न वृत्त्यन्तरमित्येवकारार्थः । तत्र हेतुमाह । संबन्धेति । संबन्धोऽनुपपत्तिश्च मूलं कारणं निमित्तं यस्यास्तस्या भावस्तत्त्वं तस्माल्लक्षणाया अपि तथात्वात् तत्रैवान्तर्भाव इति भावः । उभयोः संबन्धानुपपत्तिरग्निरित्यत्रास्ति । गौणवृत्तिमूलत्वमुदाहृत्य दर्शयति । यथेत्यादिना । माणवको बटुरित्युदाहरणे सादृश्येनाग्निगतपैङ्गल्यादिसाम्येन विशिष्टस्य माणवकस्य प्रतिपत्तिर्विवक्षिता वक्तुमिष्टा । तथैव गङ्गायां गङ्गाप्रवाहे घोषः पल्ली प्रतिवसति तिष्ठतीत्यत्रास्मिन् लक्षणावृत्त्युदाहरणे गङ्गासंबन्धस्य विशेषणभूतस्योपलक्षणत्वे यथाकथंचिद्विद्यमानत्वे घोषगतस्य पवित्रत्वादेर्धर्मस्यासिद्धेः ।

तथा घोषकर्तृकार्यं नाडीकार्यम् । नाडीकारे तूभयोर्भेदः स्फुटमेव । यथा हि
काकवद्देवदत्तगृहं पश्येत्यत्र गृहविशेषणस्य काकस्य यथाकथंचिद्विद्यमानत्वं
तथा गङ्गासंबन्धस्य यथाकथंचिद्विद्यमानत्वे गौण्यां विशेषणस्याविशेषणस्य
यथाकथंचिद्विद्यमानत्वसंभवात् । संबन्धस्य तथा विद्यमानत्वे गौणी । यथाकथं-
चिद्विद्यमानत्वे लक्षणा च संभवति । अनुपपत्त्यापत्तेरेवं व्यवहारो भाष्यके गौ-
त्यादेर्बोधे पचितत्वादेः सिद्ध्यर्थं तदलिङ्गिरेव बाधिकेत्यलमनया शाब्दिकोक्तप्र-
क्रियया । अत एव उभयोरभेदादेव हेतोः । सादृश्यं निमित्तं यस्याः सा सादृश्य-
निबन्धना । संबन्धान्तरमन्यसंबन्धनिबन्धनं यस्याः सा चेत्येवंरीत्या लक्षणा द्वे
विधे प्रकारौ यस्याः सा द्विविधा । गौर्वाहीक इत्यादौ सादृश्यनिबन्धना ।
गङ्गायां घोष इत्यादौ संबन्धान्तरनिबन्धना इत्यवगन्तव्यम् । द्वितीयां विभजते ।
संबन्धान्तरनिबन्धना जहत् परित्यजत् वाच्यमर्थो यस्याः सा जहल्लक्षणा । अजह-
दपरित्यजत् वाच्यं यस्याः सा अजहल्लक्षणा चेति द्विधेत्यर्थः । सादृश्यनिबन्धना
सारोपनिबन्धना आरोपसहिता साध्यवसाना अध्यवसानसहिता चेति द्विविधा ।
एवंरीत्या लक्षणा चतुर्विधा । आरोपाध्यवसानयोर्लक्षणे कथित एव वक्ष्यति ।

एवं शब्दार्थावुक्त्वा ततः शब्दवृत्तीरभिधादीस्तद्व्यापारवृत्तीनां कैशिक्यादी-
नामुद्देशं करोति । कैशिक्यारभटी भारती सात्वती चेति चतस्रो वृत्तयो रसानु-
गुणत्वेनोचिता अर्थव्यापारा रचना पदसन्दर्भमाश्रिताः । कर्तरि चः । तत्रैव
हेतुना रसावस्थानस्य शृङ्गाराद्यवस्थानस्य सूचका ज्ञापकाः । कोमलवर्णशब्द-
रचनायां शृङ्गारो वर्णितः । परुषवर्णपदरचनायां रौद्रो वर्ण्यत इत्यनुलोमत
इत्यर्थः । ग्रन्थान्तरसंवादमाह । तदुक्तमिति । कारिकार्थस्तु स्पष्ट एव । रसव्य-
ञ्जकत्वं कुतो भवतीत्याकाङ्क्षायामाह । रचनाया अपि सन्दर्भस्यैव रसव्यञ्जकत्वं
प्रसिद्धम् । प्राचीनग्रन्थेष्विति शेषः । रसस्यावगुणा अननुकूला वर्णा येषां
शब्दानां तेषां शब्दानां रचनाया दोषकत्वं दुष्टत्वमुक्तम् । एवमन्वयव्यतिरे-
काभ्यां रचनाया रसव्यञ्जकत्वमिति बोध्यम् । वैदर्भी प्रभृतिरादिर्यासां ता
रीतिभेदाः वृत्तिषु कैशिक्यादिषु नान्तर्भूताः ।

अथाभिधादीनां लक्षणोदाहरणे दर्शयति । अत्राभिधादिमध्ये संकेतोऽस्मा-
च्छब्दादयमर्थो बोद्धव्य इतीश्वरनिर्मिता शक्तिः सोऽस्य संजातः स चासावर्थ-
स्तद्बोधकः तत्प्रतिपादकः प्रकृतार्थपर्यवसायीत्यर्थः । शब्दव्यापारः शब्दधर्मोऽभिधा

अभिधेत्युच्यते । तां विभजते । रूढिरश्वकर्णादिपदे अवयवार्थाभावेन समुदाय-सिद्धिः पूर्विका प्रधानं यस्याः सा रूढिपूर्विका । योगः पीताम्बर इत्यादिपदेऽवयवार्थसिद्धिः पूर्विका यस्याः सा चेति साभिधा द्विविधेत्यन्वयः । आद्यामुदाहरति । तप इति । प्रजानां प्रथितैः प्रसिद्धैस्तपोविशेषैः कृच्छ्रचान्द्रायणादिभिर्जगतीमहिष्याः भूकान्तायाः शुभैर्भव्यैश्चरित्रैः पुरन्ध्रीसाध्यैर्गौरीव्रतादिभिरस्य भुवनस्य मध्यमलोकस्य प्रभूतैः प्रचुरैर्भाग्यैरदृष्टपरिपाकैश्च वरवीररुद्रो राज्यं बिभर्तीति । अत्रास्मिन् श्लोके सर्वे प्रजादिशब्दा रूढाः । अवयवार्थाभावेन समुदायार्थवाचिनः । यद्यप्यत्र प्रजायन्त इति प्रजा इत्यवयवार्थो लभ्यते तथापि पङ्कजादिपदानामिवात्र रूढिरेवेति बोध्यम् । द्वितीयामुदाहरति । राज्ञीति । रञ्जयतीति राजा तस्मिन् रुद्रनराधीशेऽखिलाः प्रजा रञ्जयति सति भूर्वसुरस्यास्तीति वसुमती । रत्नानि गर्भे यस्याः सा रत्नगर्भा । स्थिरा शाश्वतीत्यादिव्युत्पत्त्यान्वर्था सार्थनाम्नी । अभूदिति शेषः। लक्ष्ये लक्षणसंगतिं दर्शयति। अत्रेत्यादिना । इत्थेवं पदमेवमादिर्येषां ते शब्दा यौगिका योगेनावयवार्थलाभेनार्थबोधकाः ।

लक्षणालक्षणमाह । वाच्येति । वाच्यार्थस्य मुख्यार्थस्य स्वसंबन्धिनि संबन्धवत्यारोपितो निवेशितः शब्दव्यापारो लक्षणा। गङ्गायां घोष इत्यत्र लक्षकं गङ्गापदम् । लक्ष्यार्थस्तीरम् । गङ्गाशब्दनिष्ठव्यापारो लक्षणेति ज्ञातव्यम् ।

अत्र लक्षणासु जहल्लक्षणामुदाहरति । जेतुरिति । जेतुर्जयशीलस्य काकतिभूभर्तुः पटहध्वनिं भेरीध्वनिमाकर्ण्य सामन्तानां शत्रूणां नगराणि पुराणि समन्तन्त उच्चैस्तरमाक्रोशन्ति । अत्रोदाहरणे नगराण्याक्रोशन्तीत्येतद्रूपस्य वाच्यार्थस्याचेतनानां नगराणामाक्रोशासंभवादन्वयानुपपत्तिः । नगरशब्देन तत्रत्यजना नगरस्थजना आक्रोशन्तीत्यर्थः। संबन्धस्त्वाधाराधेयभावः । प्रयोजनं प्राणिमात्रस्य भयप्रतीतिः । पुररूपमुख्यार्थस्यात्यन्तं विसृष्टत्वादियं जहल्लक्षणा ।

द्वितीयामुदाहरति । पत्युरिति । मौलयः किरीटाः पत्युर्नाथस्य काकतिनाथस्य पादपीठं सिंहासनान्तिकस्थितमल्पपीठं स्फुरन्ती रत्नप्रभाणां जालैः समूहैरजस्रं सदालंकुर्वन्ति । 'सततानारताश्रान्तसन्ततविरतानिशम्' इत्यमरः। अत्र श्लोकेऽलंकरणसिद्ध्यर्थं मौलिभिराश्रयभूताः किरीटाधारभूता नृपतयो लक्ष्यन्ते लक्षणयोच्यन्ते । अत्र श्लोके मौलिशब्दो नगरवन्न स्वार्थं हित्वा स्वाधारमभ्-

तिबोधकः । किं तु स्वार्थेन सहैव तदर्थबोधकः । परस्परं विना परस्परस्याकं-करणासक्तत्वात् । तस्मादियमजहद्वाच्या । अत्रापि संबन्धादिकमूह्यम् ।

अथ सादृश्यनिबन्धनां सारोपां लक्षणामुदाहरति । मन्थानेति । मन्थानाचलो मन्थदण्डभूताचलो मन्दराद्रिः । 'मन्थानं मन्दरं कृत्वा योक्त्रं कृत्वा च वासुकिम्' इति विष्णुपुराणात् । तस्य मूलेषु या मेचकशिलाः श्यामलशिलाः । 'कालश्यामलमेचकाः' इत्यमरः । तासां संघट्टनं चन्द्रोत्पत्तिसमये तन्मण्डलसंघर्षणं तेन श्यामिका नैल्यं तदाकारं तद्रूपम् । मन्थदण्डमूले नवनीतवन्मन्दराद्रिमूले चन्द्रमण्डलस्य कमलत्वाद्विनिष्टशिलासंघर्षणं संभवतीति भावः । यत्रैस्यमिति शेषः । तुहिनं हिमं द्युतिर्यस्य तस्मिन् चन्द्रे । 'तुषारस्तुहिनं हिमम्' इत्यमरः । स्फुरति प्रकाशते तन्नैल्यं सारङ्गं कुरङ्गमाचक्षते वदन्ति । बुधेति शेषः । इहास्य वीररुद्रनृपतेः कीर्तिश्रिया यशःसम्पदा निर्जित इन्दुस्तस्य नृपतेर्मुद्रा अङ्कं लक्षणं यस्य स चासौ वराहश्च तं तन्मुद्राङ्कवराहमुरसा वक्षस्थलेन बिभ्रद् दधत् सन् समुज्जृम्भते । समुज्जृम्भणं प्राप्नोति खलु । इति वाक्यार्थः कर्म । मन्ये तर्कयामीति संबन्धः । अत्र श्लोके कुरङ्गस्येव रूपं यस्य स कलङ्कस्तस्मिन् वराहत्वमारोप्यते निर्धार्यते । लोके निर्जितो जेतुश्चिह्नं बिभर्ति । प्रस्तुतयशसा जितश्चन्द्रः केतुभूतरुद्रवराहं बिभर्तीत्युत्प्रेक्षा । मन्य इति तद्वाचकशब्दः । कुरङ्गरूपे कलङ्क इति । कलङ्कस्य वराहस्य च सादृश्योक्तिः । अतः सादृश्यनिबन्धना सारोपलक्षणेति भावः ।

आरोपाध्यवसानयोर्लक्षणे आह । विषयविषयिणोः प्रकृताप्रकृतयोरभिहितयोः स्वशब्दाभ्यामुल्लसितयोरभेदप्रतिपत्तिरभेदबुद्धिरारोपः । अत्र कलङ्कवराहौ विषयविषयिणावभिहितावित्यारोपलक्षणसंपत्तिरस्तीति बोध्यम् । अनुपदमेवाध्यवसायप्रसक्त्या तल्लक्षणमाह । विषयस्य प्रकृतस्य निगरणेन परित्यागेन स्वशब्देनानुक्त्यैवेत्यर्थः । अभेदप्रतिपत्तिर्विषयिण इत्यर्थः । विषयिणोऽभेदबुद्धिरध्यवसायः । प्रकृतं विहायाप्रकृतमात्रमुक्त्वोभयोरभेदे वर्ण्यमानेऽध्यवसाय इत्यर्थः । साध्यवसाना अध्यवसानसहिता च सा लक्षणा च । सा यथा । काकतीयेति । काकतीयानां कुलमेवाम्भोधिस्तस्मादयं चन्द्रमाः प्रभवति जायते । उदयं वृद्धिमुदयपर्वतं चोपेयुषा प्राप्तवता । येन चन्द्रमसा कोः भवम् । 'गोत्रा कुः पृथिवी पृथ्वी' इत्यमरः । वलयं मण्डलं तस्योल्लासो विकासः कृतः । कुवल-

नानामुत्पलानामुल्लासः कृत इत्यन्वयः । अत्रोदाहरणे प्रतापरुद्रश्चन्द्रतयाऽध्यवसीयतेऽध्यवसायमभेदं प्राप्यते । नन्वेष इत्यस्य पुरोवर्तिवाचकत्वेनैतच्छब्देन प्रतापरुद्र एवोच्यते । अतो विषयनिगरणं कथमिति चेदुच्यते । सर्वनामशब्दानां सामान्यवाचकत्वेन विशेषणत्वमेव न तु विशेष्यत्वम् । तथा च प्रकृतविशेष्यभूतप्रतापरुद्रवाचकपदाभावात् विशेषणभूताया एतत्तायाः प्रकृतविशेष्ये चन्द्रमस्येवान्वयोऽगत्याङ्गीकरणीयः । ततश्चैतच्छब्दस्य प्रतापरुद्रवाचकत्वाभावाद् विषयनिगरणं संभवति । अत एवोक्तं साहित्यरत्नाकरे—'सिंहोऽयमित्यत्राध्यवसायः सिंहो देवदत्त इत्यत्रारोपश्च' इति । काकतीयकुलाम्भोधेरित्यत्रारोपस्तल्लक्षणसद्भावादिति भावः ।

अथ व्यञ्जनावृत्तेर्लक्षणमाह । अन्वितेषु इति । पदानां शब्दानामर्थेषु वाच्यार्थेष्वन्वितेषु निर्बाधमन्वयं प्राप्तेषु सत्सु वाक्यार्थस्य काव्यरूपस्योपकारार्थम् । अन्योऽर्थोऽर्थान्तरं वाच्यलक्ष्याभ्यामन्योऽर्थो व्यङ्ग्य इत्यर्थः । तद्विषयः शब्दव्यापारो व्यञ्जनावृत्तिः । अभिधया प्रकृतार्थे नियमिते यया व्यङ्ग्यरूपोऽप्रकृतार्थः प्रतीयते सा व्यञ्जनेत्यर्थः । अत्र शब्दव्यापार इत्यर्थस्याप्युपलक्षणम् । अर्थस्यापि व्यञ्जकत्वाङ्गीकारेण व्यञ्जनायास्तस्यापि धर्मत्वात् । शब्दव्यञ्जकत्वेऽर्थस्य सहकारित्वम् । तस्य व्यञ्जकत्वे शब्दस्य सहकारित्वमिति ज्ञेयम् । तां विभजते । शब्दार्थोभयशक्तिमूलत्वेन । शब्दशक्तिमूलत्वेनार्थशक्तिमूलत्वेनोभयशक्तिमूलत्वेन च सा व्यञ्जना त्रिविधा । तत्र त्रिविधायां वृत्तौ शब्दशक्तिमूला यथा । वाहिन्य इति । सर्वतोमुखः सर्वस्याप्यप्रतिहत इति यावत् । तादृशः संभ्रम उद्योगो यासां ताः । काकतीन्द्रस्य वाहिन्यो ध्वजिन्यः । प्रतिपक्षबलमेवार्णव इति रूपकसमासः । उद्यद्भिर्नदद्भिः कबन्धैरपमूर्धकलेवरैराढ्यं प्रभुं कुर्वन्तीति प्रकृतार्थः । अप्रकृतार्थस्तु सर्वतोमुखमुदकम् । 'कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम्' इत्यमरः । तत्र संभ्रमो यासां ता वाहिन्यः सद्यः प्रतिपक्षबलार्णवमुद्यता कबन्धेनोदकेनाढ्यं पूर्णं कुर्वन्तीति । लक्षणानुगतिं दर्शयति । अत्रेति । अत्रोदाहरणे अर्थः प्रयोजनम् । प्रकरणं प्रस्तुतत्वं तदादिर्यस्यार्थनिर्णायकस्य तेन सैन्यसर्वव्यापित्वतज्जनमस्तकदेहः परं प्रधानमर्थो येषां तेषां वाहिन्यादिशब्दानां वाचकत्वे नियन्त्रिते निबद्धे निर्णीते सति शब्दशक्तिर्मूलं यस्याः सा । नदीजलयोः प्रतिपत्तिर्बोधो यया वृत्त्या जायते सा वृत्तिर्व्यञ्जना । अर्थप्रकरणादीनां लक्षणो-

दाहरणादिकं काव्यप्रकाशादौ द्रष्टव्यम् । विस्तरभयादुपरम्यते । नन्वभिधा-लक्षणयोरन्यतरैवात्र वृत्तिरस्तु किं व्यञ्जनाख्येण व्यापारान्तरेणेत्याशङ्क्य तदु-भयदूषणद्वारा व्यञ्जनां स्थापयति । प्राकरणिकेति । प्राकरणिकेऽर्थे प्रकृतार्थे पर्यव-सिता पर्यवसानं प्रापिताभिधाप्राकरणिकार्थस्याप्रकृतार्थस्य प्रमितिं प्रतीतिं कर्तुं न शक्ता । नन्वप्रकृतार्थप्रतीतिर्मास्तु यदर्थं व्यापारान्तरकल्पनमित्याशङ्क्य तस्यावश्यकत्वे युक्तिं वदति । अप्राकरणिकार्थस्यापि वाक्यार्थोऽप्रकृतार्थस्तस्य शोभार्थं वक्तुः कवेर्विवक्षितत्वाद् वक्तुमिष्टत्वात् । अन्यतोऽन्यस्माच्छब्दव्यति-रिक्तात् प्रमाणात् प्रमितिकरणात् प्रतीतिसाधनात् तस्य प्रकृतार्थस्याप्रतीतेरस्फूर्तेः शब्दस्यैव व्यञ्जनाख्यं व्यापारान्तरं कल्प्यते । लक्षणां च निषेधति । नेति । अत्राप्रकृतार्थप्रतीतौ लक्षणा च वाच्यार्थानुपपत्त्यभावान्न संभवति । लौकिक-वाक्यानां वेदव्यतिरिक्तपौरुषेयवाक्यानाम् । प्रयोक्तुः कवेः । वक्तुमिच्छा विवक्षा । तत्परतन्त्रत्वात्तदधीनत्वात् । अत्र वाहिन्य इत्याद्युदाहरणे व्यापारद्वयेनार्थस्य प्रतिपादन उक्तो वाक्यभेदः । अभिधया प्रकृतार्थप्रतिपादकमेकं वाक्यम् । व्यञ्ज-नयाप्रकृतार्थप्रतिपादकमेकं वाक्यमिति भेदो न भवति । एवं च दोषाभावा-दितरव्यापारासंभवाच्च व्यञ्जनाङ्गीकर्तव्येति भावः ।

अर्थशक्तिर्मूलं यस्याः सा व्यञ्जनावृत्तिर्यथा । श्रुत्वेति । काकतिभूभर्तुः क्षोण्याः पाणिग्रहो विवाहः पट्टाभिषेक इत्यर्थः । तमेवोत्सवं श्रुत्वा भूपा नता-ननाः सन्तः पादपीठीमङ्गुष्ठेनालिखन् । अत्रोदाहरणेऽर्थशक्त्या मुखनमनरूपया भूपा विषण्णाः खिन्ना इत्यर्थो व्यज्यते । पर्वतो वह्निमान् धूमादित्यनुमाने धूम-रूपहेतुना वह्निर्व्यज्यते एवमत्र नम्राननत्वरूपहेतुना तत्कारणभूतो विषादो व्यज्यते । तदत्रानुमानमेवेत्याशङ्क्य निषेधयति । नेति । अर्थशक्तिर्मूलं यस्य तस्मिन् व्यञ्जने प्रतीतावनुमानशङ्कानुमानं प्रमाणमिति संदेहः । न च कार्येति । व्यङ्ग्यं विषादो व्यञ्जको नम्राननत्वरूपार्थः । तयोरविनाभावः साहचर्यं तस्या-भावात् न कार्येति पूर्वेणान्वयः । धूमानुमाने व्यङ्ग्यव्यञ्जकयोर्यत्र धूमस्तत्रा-ग्निरिति साहचर्यमस्ति । प्रकृते तन्नास्ति । अत्र हेतुमाह । नम्राननत्वमादिर्यस्य तस्य कार्यस्य । अनेकानि कारणानि यस्य तदनेककारणकं तस्मात् नम्राननत्वं न विषादमात्रकार्यं किन्तु लज्जादेरपीति भावः । तर्हि विषादरूपविवक्षितकारण-प्रतीतिः कथमिति । अत्राह । नियतस्य विवक्षितस्य कारणस्य प्रतीतिर्वक्तुमिच्छा

विवक्षा शब्देनार्थप्रकाशनेच्छा । अनेन शब्देनायमर्थः सिध्येदितीच्छेत्यर्थः । तयानुगृहीतात् तत्सहायकत्वात् शब्दादेव भवति । दूषणान्तरमाह । किं चेत्यादिना । एकस्मादेव व्यञ्जकात् शब्दादर्थाद्वा तेषां तेषां व्यङ्ग्यार्थानामित्यर्थः । प्रतीतिर्वक्तुर्वाक्यप्रयोक्तुर्विवक्षाया अर्थप्रकाशनेच्छाया अनुसारेणानुवृत्त्या भवति । अत्रायं भावः । अस्तमेति गभस्तिमानिति केनचिदुक्ते तच्छ्रुत्वा मुनीनां सन्ध्यावन्दनकाल इत्यर्थः प्रतीतः । स्त्रीणां संभोगायालंकारकाल इत्यर्थः प्रतीत इति चोराणां चौर्यादेरिति चार्थः प्रतीतः । तदेतत् सर्वं व्यङ्ग्यजातं वक्तुस्तात्पर्यानुसारेण जातमिति चेत् किमित्यत्राह । एकेन हेतुनेति शेषः । अनेकव्यङ्ग्यार्थप्रतीतिरनुमानस्य प्रमाणस्य परिपाट्या मर्यादाया विरुद्धा विरोधिनी । एकेन हेतुनैकव्यङ्ग्यार्थप्रतीतिरनुमानमर्यादा शास्त्रे । काव्ये त्वेकस्माद्व्यञ्जकादनेकार्थप्रतीतिरङ्गीकृता हेतोरनैकान्तिकतायामपि स्वापेक्षितार्थप्रतीतिः स्वविवक्षानुसारेणैव भवति । अतो नानुमानशङ्केति भावः । व्यङ्ग्यार्थेऽप्यभिधैव प्रवर्त्तत इति मीमांसकमतम् । तन्निराकरोति । न चेति । अभिधावृत्तिर्न च व्यङ्ग्यार्थे प्रवर्त्तते । कुत इत्युक्ते तस्याभिधायाः संकेतितार्थः एव प्रकृतार्थ एव परिचयः प्रवृत्तिर्न व्यङ्ग्यार्थ इत्येवकारार्थः । गम्यत ज्ञायतेऽनयेति गमनिका । इयत्येतावतीति । अभिधादिज्ञानसाधनभूतोऽल्पो ग्रन्थः संक्षेपरूप एतावानित्यर्थः ।

उभयोः शब्दार्थयोः शक्तिर्मूलं यस्याः सोभयशक्तिमूला । तामुदाहरति । विजितेति । विजितान्यरिपुराणि शत्रुपुराणि त्रिपुराणि च येन सः । मूर्त्तौ शरीरे । 'मूर्त्तिः काठिन्यकाययोः' इत्यमरः । विलसन्ति सर्वमङ्गलानि शुभानि शुभकरसामग्रीकचिह्नानि वा यस्य सः । अन्यत्र मूर्त्तौ विलसती सर्वमङ्गला पार्वती यस्य सः । 'शर्वाणी सर्वमङ्गला' इत्यमरः । राज्ञां मौलिः किरीटः किरीटभूतो मुख्य इत्यर्थः । राजा चन्द्रो मौलौ जटाजूटे यस्य स इत्यन्यत्र । 'राजा प्रभौ नृपे चन्द्रे ।' 'मौलिः किरीटधम्मिल्लौ' इति चामरः । जगतां पतिरसौ रुद्रदेवः प्रतापरुद्रः शिवश्च भाति । अत्र श्लोके विजितारिपुर इत्यत्रार्थशक्तिमूलत्वम् । शत्रुपुर इत्यपि प्रयोग उभयार्थसिद्धेरिति भावः । विलसत्सर्वमङ्गलो राजा मौलिरित्यत्र शब्दशक्तिमूलत्वम् । सर्वमङ्गलादिपदाप्रयोगेन सर्वथा पुर इत्याद्यन्यपदप्रयोग उभयार्थसिद्ध्यभावादिति भावः । इत्येवमुभयशक्तिमूलः ।

प्रतापरुद्रशंकरयोः प्रकृताप्रकृतयोरुपमालंकारस्य ध्वनेः प्रतीतिर्भवति । नन्वर्थशक्तिमूलोदाहरणे नतानना इत्यत्राभिधया वाच्यार्थबोधः । व्यञ्जनया विषण्णा इति व्यङ्ग्यार्थबोधः तदुक्तमुभयशक्तिमूलोदाहरणेऽभिधया विशिष्टप्रतापरुद्रबोधः । व्यञ्जनयोपमालंकारादिव्यङ्ग्यार्थप्रतीतिः । विशिष्टशिवरूपाप्रकृतार्थः कया वृत्त्या स्फुरतीति चेदुच्यते । अप्रकृतार्थस्योपमालंकारादिव्यङ्ग्यार्थस्य व्यञ्जनावृत्त्या सहैव स्फुरणम् । तथा चोभयोरपि व्यङ्ग्यत्वम् । तदुक्तं काव्यप्रकाशे । 'शब्दशक्तिमूले तु निमन्त्रणेनाभिधेयस्यार्थान्तरस्य तेन सहोपमादेरलंकारस्य च निर्विकारं व्यङ्ग्यत्वम्' इति ।

अभिधादिनिरूपणानन्तरं कैशिक्यादीनां स्वरूपं निरूप्यते । अत्यन्तसुकुमारस्यातिमृदोरर्थस्य शृङ्गारादेः संदर्भो रचना यस्याः सा वृत्तिरिति शेषः । केशिमतेष्टा कैशिकी । कैशिकीवृत्तेरत्यन्तसुकुमारार्थसंदर्भत्वं लक्षणम् । अत्युद्धतेति । अत्युद्धतस्यात्युग्रस्यार्थस्य रौद्रादेः संदर्भो यस्याः सा वृत्तिरारभटी स्मृता । ईषन्मृदोरल्पमृदोरर्थस्य हास्यादेः संदर्भो यस्याः सा वृत्तिर्भारतीष्यते । ईषत्प्रौढस्य किञ्चिदुद्धतस्यार्थस्य वीररसादेः सन्दर्भो यस्याः सा वृत्तिः सात्वतीष्यते ।

अत्यन्तसुकुमाराद्यर्थान् विशदयति । अत्रेत्यादिना । शृङ्गारकरुणौ द्वौ रसावत्यन्तसुकुमारौ मतौ । रौद्रबीभत्सावत्युद्धतरसौ परिकीर्तितौ । हास्यशान्ताद्भुतरसाः किञ्चित्सुकुमाराः शृङ्गारादिवन्नात्यन्तसुकुमाराः किं त्वीषन्मृदवः । वीरभयानकावीषत्प्रौढौ समाख्यातौ । वृत्तीनां रसावस्थानसूचकत्वात् शृङ्गाराद्यत्यन्तसुकुमाराद्यर्थानुगुणेनात्यन्तसुकुमारादिना संदर्भेण भवितव्यम् । तथा च रचनाभेदेनार्थः सूच्यत इत्याशयेनाह । यत्रेत्यादिना । यत्र श्लोके शृङ्गारकरुणावतिकोमलेन संदर्भेण रचनया वर्ण्येते तत्र कैशिकी कैशिक्याख्या वृत्तिः । यत्र श्लोके रौद्रबीभत्सावतिप्रौढेन संदर्भेण प्रतिपाद्येते तत्रारभटी वृत्तिः । यत्र नातिसुकुमारा अनतिसुकुमारा हास्यादयो नातिसुकुमारेण संदर्भेण वर्ण्यन्ते तत्र भारती वृत्तिः । यत्र वीरभयानकावनतिप्रौढेन संदर्भेण प्रतिपाद्येते तत्र सात्वती । तथा च रसानुगुणसंदर्भेण रससूचका वृत्तिरिति बोध्यम् ।

कैशिकीमुदाहरति । जितेति । जितो मदनस्य विलासः सौन्दर्यातिशयो येन तं काकतीयानामन्वयस्तस्येन्दुं चन्द्रं नरपतिं प्रतापरुद्रम् । अनिमेषं निमेषरहितं यथा तथा द्रष्टुमाशंसिनीनामाशंसावतीनां प्रार्थयमानानामङ्गनानां वधू-

विशेषाणाम् । 'विशेषास्त्वङ्गना भीरुः कामिनी वामलोचना' इत्यमरः । अपाङ्गैः कटाक्षैः कुवलयदामवन्नीलोत्पलस्रगिव श्यामला तोरणस्य श्रीः शोभा दिव्याकाशे विरचिता कृतासीत् । अत्र शृङ्गाररसोऽतिकोमलसंदर्भेण वर्णितोऽतः कैशिकी वृत्तिः ।

आरभटीमुदाहरति । खड्गेति । आयोधने युद्धे । 'युद्धमायोधनं जन्यम्' इत्यमरः । चलानां रणभीतानां मर्त्यानां गण्डः स्थूलोपलस्तद्वन्नाशकः । यत्र कुत्राप्यस्य पराजयाभावात् चलमर्त्यगण्ड इत्यभीरुतोपलब्धिः । तदुपलक्षितस्य नृपतेः प्रतापरुद्रस्येति मध्यपदलोपः । क्रोध एवाग्निः खड्गघातेन खड्गप्रहारेण निकृत्तेभ्यः शात्रवशिरोभ्यो निष्ठ्यूता निर्गता रक्तच्छटा रक्तधारा एव ज्वाला येषां तैः । अत्र निष्ठ्यूतेत्यत्र गौणार्थत्वान्न ग्राम्यतादोषः । तदुक्तं दण्डिना ।

'निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥' इति ।

उद्भटा उद्धताः शस्त्रघट्टनभवाः परस्परशस्त्राघातजाताः स्फाराः स्फीताः स्फुलिङ्गोत्करा अग्निकणसमूहा येषां तैः । असृजोपलक्षितं पिशितं मांसमसृक्पिशितम् । स्त्यानं घनीभूतमसृक्पिशितं येषां तान्यस्थिखण्डानि शल्यशकलान्येव विकटा वक्राः स्थूलाः पृथुला उज्ज्वला जाज्वल्यमाना अङ्गारका अग्निखण्डास्तैश्चण्डः प्रचण्डस्तीक्ष्णः । भवतीति शेषः । अत्र क्रोधस्थायिको रौद्रोऽत्युद्धतसंदर्भेण वर्णित इत्यारभटी ।

भारतीमुदाहरति । औन्नत्यमिति । रुद्रनृपतेर्महदौन्नत्यमन्यदेव । लोकनिर्माणकारणसामग्रीजन्यौन्नत्यं भिन्नमेव । महितः पूज्योऽत एव कोऽप्यनिर्वाच्य एष प्रतापरुद्रसंबन्धी गम्भीरिमा गाम्भीर्यम् । अन्य इति लिङ्गभेदेन योजना । प्रतापयशसोः काप्यनिर्वाच्या सरणिर्मार्गोऽन्या । वह्नी प्रथा प्रसिद्धिरन्यैव न तत्र संदेह इत्येवकारार्थः । अतः सर्वमेवौन्नत्यादिकार्यजातं नूतनमेव नवीनमेव । कारणसामग्रीनूतनत्वनिमित्तकमेवेदमौन्नत्यादिकार्यनूतनत्वमित्याशयेनाह । जाने इति । तन्निर्मितौ प्रतापरुद्रनिर्माणे चतुराननेन ब्रह्मणा कियती कियत्परिमाणा कीदृशी क्रमो यस्याः सा तथोक्ता । सामग्री कारणसामग्री कल्पिता संपादितेति वाक्यार्थः कर्म । न जाने । अत्राद्भुतरसोऽनतिसुकुमारेण संदर्भेण वर्णित इति भारती ।

सात्वतीमुदाहरति । दूरादिति । विश्वे प्रपञ्चे प्रसमरं व्यापनशीलं महः प्रतापो यस्य तस्य वीरवरस्य प्रस्थानारम्भे जैत्रयात्रारम्भे यो भेरीनिनदस्तं दूरादेवाकर्ण्य पूर्णेन कर्णज्वरेण कर्णपीडयार्त्ता अरिनृपा अद्रीनात्स्वातिमहद् गहनं काननं विशन्तोऽत एव कण्टकैराकृष्टाः केशा येषां ते तथोक्ताः सन्तः प्रतिनृपतिधिया शत्रुराजबुद्धया प्रतापरूपभटा एवागत्य केशेष्वाकर्षन्तीति आत्मेत्यर्थः । त्रायध्वं नो रक्षत गुप्तोति पादपान् प्रार्थयन्ते । अत्र भयानकरसोऽनतिप्रौढसंदर्भेण वर्णित इति सात्वती ।

अथ मतान्तरसिद्धमखिलरससमानं वृत्तिद्वयमाह । मध्यमेति । मध्यमारभटीति । अन्या पूर्वोक्तारभटीभिन्ना वृत्तिस्तथा यथा मध्यमारभटी तथा मध्यमकैशिकी वृत्तिः । अस्तीति शेषः । उभे इमे पूर्वोक्ते वृत्ती मध्यमारभटीमध्यमकैशिक्यौ सर्वरसानां नवरसानां च साधारणे समाने मते । एतद्वृत्तिद्वयेन सर्वेऽपि रसा वर्णनीया इत्यर्थः ।

मध्यमकैशिक्या लक्षणमाह । मृद्विति । मृद्वर्थे अतिसुकुमारशृङ्गाराद्यर्थे विषयेऽप्यनतिप्रौढः बन्धः संदर्भो यस्याः सा मध्यमकैशिकी । सुकुमारार्थस्य प्रौढसंदर्भेण वर्णनं दोष इत्याशङ्क्य वारयति । नेति । अतिसुकुमारयोः शृङ्गारकरुणयोः बन्धोऽल्पं यथा तथा प्रौढः संदर्भो न दुष्यति दुष्टो न भवति । तर्हि कीदृशो दुष्यतीत्याकाङ्क्षां जनयति । किं त्विति । अतिप्रौढः संदर्भः प्रतिकूलमर्थाननुगुणं वर्णनं संदर्भस्तद्रूपस्य दोषस्यापत्तेर्हेतोर्नेष्यते नेष्टः ।

मध्यमारभटीलक्षणमाह । प्रौढार्थे विषये नातिमृदुरनतिमृदुः क्रमो यस्याः सा वृत्तिर्मध्यमारभटी । अतिप्रौढयोरपि रौद्रबीभत्सयोरीषन्मृदुरनतिमृदुर्बन्धो न दुष्यति । तत् किं त्वित्यर्थः । अतिमृदुसंदर्भो विरुद्धः । अत्रापि पूर्वोक्तयैव प्रतिकूलेत्यादियुक्तिविवक्षितं भवति ।

मध्यमकैशिकीमुदाहरति । आसन्न इति । महोत्सव आसन्ने सत्यपि त्यक्त्वा । महोत्सवमिति शेषः । इतः सकलसौभाग्यनिधेर्निवासात् प्रवासं प्रयाणं कथं प्रजेर्गच्छेः । साहसं हठादुत्सवपरित्यागरूपसाहसं धिक् । धिगिति निन्दायाम् । 'धिङ्निर्भर्त्सननिन्दयोः' इत्यमरः । आभीक्ष्ण्यं निन्दार्हमित्यर्थः । आभीक्ष्ण्ये द्विरुक्तिः । आवयोस्तव मम च विघटनं वियोगं को वा विधिः किं वा दैवं काङ्क्षतीच्छति । न कोऽपीत्यर्थः । इत्थमेवं प्रकारेण हे काकतीयनृपते स्वप्ने सुत-

विज्ञाने निवारितस्य प्रियतमप्रस्थानस्य बुद्धिर्मतिर्यस्य तस्य । त्वद्वैरिनारीजनस्तव शत्रुस्त्रीजनः । त्वया वियोजितभर्तृक इति शेषः । ततः पश्चाद् बुद्धा प्रबोधं प्राप्य मूर्च्छति । अत्रेषत्प्रौढसंदर्भेण शृङ्गारसंकीर्णः करुणरसः प्रतिपादित इति मध्यमकैशिकी ।

मध्यमारभटीमुदाहरति । मांसेति । देशवाचिनान्ध्रशब्देन तदधिपतिः प्रतापरुद्रो लक्ष्यते । तस्य सुभटैर्योधैर्युद्धभुवः समरभूमयो मांसैः कीकसैरस्थिभिः । 'कीकसं कुल्यमस्थि च' इत्यमरः । संकीर्णो व्याप्तः प्रसरन्त्यो रुधिरापगा रक्तनद्यो यासु तास्तथोक्ता वसया हृन्मेदसा कर्दमिताः संजातकर्दमाः कृताः । अत्रेषन्मृदुसंदर्भेण बीभत्सरसः प्रतिपाद्यत इतीयं मध्यमारभटी । एवं रीत्या मध्यमकैशिकी मध्यमारभट्यो रसान्तरेष्वप्युदाहरणं द्रष्टव्यम् ।

अथ रीतीनां स्वरूपोदाहरणे प्रदर्शयिष्यंस्तासां वृत्तिभ्यो भेदं निरूपयति । वैदर्भ्यादिरीतीनां शब्दगुणा माधुर्यादयस्तानाश्रितानां तत्परतन्त्राणामित्यर्थः । ननु माधुर्यं नाम सहृदयहृदयाह्लादकशृङ्गारादिधर्मं ओजश्चित्तविस्ताररूपो दीप्तिजनको रौद्रादिधर्मः प्रसादः शुष्केन्धनानलवदमलजलवद्वा यथायोगं सहसा सहृदयहृदयव्यापी सर्वरसधर्मः । कथमेतेषां शब्दगुणत्वमिति चेत् सत्यम् । आत्मधर्मस्य शौर्यादेराकारधर्मत्वमिव रसधर्मस्य माधुर्यादेः शब्दधर्मत्वमौपचारिकम् । तदुक्तं ध्वन्याचार्यैः । 'शब्दधर्मत्वं चैषामन्याश्रितशरीराश्रितत्वमिव शौर्यादीनामिव' इति । रीतीनां माधुर्याद्याश्रितत्वं काव्यप्रकाशे कथितम् ।

'माधुर्यव्यञ्जकैर्वर्णैरुपनागरिकोच्यते ।
ओजःप्रसादकैस्तैस्तु परुषा कोमला परैः ॥
केषांचिदेषा वैदर्भीप्रमुखा रीतयो मताः' ॥ इति ।

तासां वैदर्भ्यादीनां वैदर्भीप्रभृतीनामर्थविशेषे शृङ्गारादौ निरपेक्षतया अपेक्षारहिततया केवलमेकं संदर्भस्य सौकुमार्यं प्रौढत्वं च यत् तद्विषयत्वात् कैशिक्यादिभ्यो वृत्तिभ्यो भेदः । वैदर्भ्यादीनां रसाश्रितमाधुर्यादिशब्दधर्मपरत्वम् । कैशिक्यादीनां तु साक्षादेव रसव्यञ्जकत्वमिति महान् भेद इति भावः । तदुक्तं ध्वन्याचार्यैः ।

'शब्दतत्त्वाश्रयाः काश्चिदर्थतत्त्वाश्रयाः पराः' । इति ।

संदर्भसौकुमार्यादिकं विशदयति । संदर्भस्येति । संदर्भस्यातिमृदुत्वं नामार्ध-

युक्तानां संयुक्तव्यतिरिक्तानां कोमलानां वर्णानां बन्धः संबन्धो यस्य तस्य भावस्तत्त्वम् । असंयुक्तकोमलवर्णपदसंदर्भोऽतिमृदुरित्यर्थः । अतिप्रौढत्वं नाम परुषवर्णानां विकटो बन्धो यस्य तस्य भावस्तत्त्वम् । विकटपरुषवर्णपदसंदर्भोऽतिप्रौढ इत्यर्थः । संयुक्तमृदुवर्णेष्वीषन्मृदुत्वं भवति । अविकटपरुषवर्णबन्धेष्वीषत्प्रौढत्वम् । संयुक्तत्वं नाम स्वररहितव्यञ्जनानां संयोगः वर्णानां । कोमलत्वपरुषत्वे तु

'टवर्गवर्जिताः स्पर्शाः स्वस्ववर्गान्त्यशेखराः ।
लघुरेफणकारौ च कोमलाः परिकीर्तिताः ॥
रेफेण यस्य कस्यापि योग आद्यतृतीययोः ।
स्वोत्तराभ्यां तुल्ययोर्वा परुषाक्षरकौ शषौ ॥' इति ।

कोमलपरुषवर्णपदसंग्रहोक्तरीत्या ज्ञातव्ये ।

अथ रीतिनिरूपणं प्रतिजानीते । अथेति । अथ कैशिक्यादिनिरूपणानन्तरं रीतीनां स्वरूपं लक्षणमुदाहरणं चोच्यत इति शेषः । रीतिसामान्यलक्षणमाह । रीतिरिति । रीतिर्नाम गुणाश्लिष्टा माधुर्यादिगुणविशिष्टा पदसंघटना पदरचना मवेदा । तां विभजते । सेति । वैदर्भी विदर्भदेशीया विदर्भजनपरिगृहीता रीतिः । गौडदेशीयपरिगृहीता गौडी । पाञ्चालदेशीयपरिगृहीता पाञ्चाली । इत्येवं सा रीतिस्त्रिविधा ।

वैदर्भीलक्षणमाह । बन्धेति । बन्धस्य पारुष्यं दुःसन्धिकृतपरुषत्वं तद्रहिता शब्दस्य काठिन्यं परुषवर्णारब्धत्वं तद्वर्जिता नातिदीर्घा अनतिदीर्घाः समासा यस्याः सा चासौ रीतिर्वैदर्भीष्यते ।

उदाहरति । काकतीयेति । काकतीयनरेन्द्रस्य कीर्त्तिरेव चन्दनं मलयजं तस्य चर्चितमालेपनम् । भावे क्तः । दिश एवाङ्गना वतंसीकृता अवतंसीकृतास्तस्य नृपतेर्गुणाः शौर्यादयो यासां ताः सत्यो वितन्वन्ति कुर्वन्ति ।

तथा च यथा पूर्वोदाहरणं तथैवोदाहरणान्तरमित्यर्थः । वितरणेति । वितरणं दानं तदेव गुणः स एव लीला क्रीडा तया तोषितोऽशेषलोको येन सः । एतेन वितरणं लीलामात्रत्वान्निर्बन्धपूर्वकं न भवतीति व्यज्यते । काकतीयानामन्वयसेन्दौ चन्द्रे नरनाथे विभवति प्रभौ सतीयं क्षितिसुरा ब्राह्मणास्त एव जनता

जनसमूहः सुरतरुगणनायां कल्पतरुकथायां कामधेनोः प्रसङ्गे गोष्ठ्यां वीतमपगतं कौतूहलं यस्याः सा आसीत् । प्रतापरुद्रे सकलाभीष्टप्रदातरि सति वैयर्थ्यात् कल्पवृक्षादावासक्तिर्नाभूदित्यर्थः । अत्रोदाहरणद्वयेऽपि कोमलवर्णैरल्पसमासैर्मृदुबन्धेन च कीर्त्यौदार्योद्दीपनविभावनव्यङ्ग्यशृङ्गारगतोद्दीपकत्वलक्षणमाधुर्यप्रतिपादनाद्वैदर्भी रीतिः । ननु कीर्त्तिचर्चेत्यादौ रेफसंयोगस्तोपिताशेषेत्यादौ शवर्णषकारौ चेत्यनेकपरुषवर्णसंभवात् कथं कोमलवर्णत्वमिति चेन्न ।

'शषौ च रेफसंयोगः टवर्गश्चापि भूयसा ।
विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युताः ॥' इति ।

ध्वन्याचार्योक्तेर्भूयसेत्युक्तत्वान्न कोमलत्वभङ्गः । एवमुत्तरत्राप्यूहनीयम् ।

गौडीमुदाहरति । ओजः समासभूयस्त्वं कान्तिरुद्भटपदत्वं त एव गुणौ ताभ्यामुपेता या रीतिः । सेति शेषः । गौडीष्यते । उदाहरति । प्रचण्डेति । प्रचण्डतरेण दोर्दण्डेन बाहुदण्डेन खण्डितमरातीनां शत्रूणां मण्डलं येन स समर्थः । आन्ध्रभूपतिर्गुर्वीमलघ्वीमुर्वीधुरां भूभारं बिभर्त्ति । धुरेति समासान्त आकारः ।

तथा च । उदाहरति । उद्यता दोःस्तम्भे यः खड्गस्तेन निमित्तेन त्रुटतां दलतामरिमुकुटानां शत्रुकिरीटानामाटोपेनाडम्बरेण संजाता या राहुरिति भ्रान्तिस्तया त्रश्यतो भयात् पलायमानस्य पतङ्गस्य सूर्यस्याभयस्य करणेन वित्तोऽभयकरणचणः स्फारो नासीरस्य सेनामुखस्य संबन्धी रेणुः परागो यस्याः सा तथोक्ता । आन्ध्रक्ष्माभर्तुरधिका विस्तृता रणधरा युद्धभूमिर्भिन्नेभ्यो दलितेभ्यो मत्तेभकुम्भेभ्यः प्रोद्यद्भिरुत्प्लवद्भिर्मुक्तौघा एव तारानिकरास्तैः परिवृता परिवेष्टिता स्वर्वधूवक्त्राण्येव चन्द्रा यस्याः सा आसीत् । अत्र खड्गनिकृन्तनोत्पतदरिमुकुटेषु राहुभ्रमेण कान्दिशीकस्य भानोः नासीररेणुकर्तृकाभयप्रदानसामर्थ्योत्प्रेक्षया सूर्यास्तमयप्रतीतिजनकसूर्यावरणं व्यज्यते । विदलितमत्तेभकुम्भोद्यतमुक्तानां तारात्वेन विवरणोत्सुकतया समागतस्वर्वधूवक्त्राणां चन्द्रत्वेन च रूपणाद् रणधराया रजनीत्वं च गम्यते । गजानां मुक्ताकरत्वं गजायुर्वेदे । 'करीन्द्रजीमूतवराह' इत्यादिना । न चात्रानेकनिशाकरकथनं दोषावहम् । प्रसिद्धचन्द्रस्यानेकत्वासंभवेऽपि वधूमुखचन्द्राणामनेकत्वसंभवात् । अत्र परुषवर्णसंदर्भेण समासभूयस्त्वेन च रौद्ररसगतोद्दीपकत्वलक्षणौजःप्रतिपादनात् गौडी ।

माञ्चालीमाह । पाञ्चालीति । वैदर्भी गौडीति च ये पूर्वोक्ते रीती तदुभयमात्मा स्वरूपं यस्याः सा । पाञ्चालानां संबन्धिनी रीतिः पाञ्चालीत्यर्थः । पूर्वोक्तोभयरीत्यात्मकत्वं पाञ्चाल्या लक्षणमित्यर्थः । उदाहरति । जेतुरिति । जेतुः काकतिवीररुद्रनृपतेर्जैत्रप्रयाणेषूत्थिते क्षोणीरेणुभरे भूपरागपुञ्जे नभस्याकाशेऽतिशुभ्रमत्यन्तं भ्रूविभ्रमं भ्रूविलासं बिभ्रति सति वियद्दीर्घिकाकाशगङ्गा । विसंकटाभ्यां पृथुलाभ्यां तटाभ्यां दीर्घातिदीर्घा सती मर्त्यनदी भागीरथी जाता । गाढं दृढं गूढतमा पराच्छादनादप्रकाशमाना गौतमनद्यपि गोदावरी तु पातालगङ्गायते भोगवतीव भासत इत्यर्थः । अत्र नभसि स्वर्नद्यां सत्यां भागीरथी पातालगङ्गेति कथनं युक्तम् । तद्विहाय गौतमनदीत्युक्तं किं तु गाढं गूढतमापि जह्नुतनयेति पाठपरिकल्पने जह्नुतनया भागीरथीत्युक्तिः समञ्जसेति प्रतिभाति ।

स्थाने इति । हे चलमर्त्यगण्डनृपते त्वत्खड्ग एव भोगी सर्पो द्विषतां प्राणैः प्राणवायुभिः सततं परितोषमेति प्राप्नोतीति यत् तत् संतोषोपगमनं स्थाने युक्तम् । 'युक्ते द्वे सांप्रतं स्थाने' इत्यमरः । सर्पस्य वायुना तृप्त्युपगमनं नाश्चर्यकरं वाताशनत्वादिति भावः । तर्हि किमाश्चर्यमित्याकाङ्क्षां जनयति । किं तु परं तु त्वत्खड्गभोगिपतिनाभ्यवहृतेन पीतवर्णेन च प्रतिपक्षपार्थिवानां शत्रुनृपाणां यश एव क्षीरं पयस्तेन गौरत्विषं शुभ्रकान्ति त्रिलोकभरितां लोकत्रयपूर्णां त्वत्कीर्तिलक्ष्मीरेव सुधा तां संवर्धयतीति यदेतत् सुधासंवर्धनमत्यद्भुतं महच्चित्रम् । 'पयःपानं भुजङ्गानां केवलं विषवृद्धये' इति लोकप्रसिद्धिः । खड्गभोगी त्वरियशःक्षीरं पीत्वा कीर्तिसुधां वर्धयति । कीर्तिसुधाजननरूपकार्ये प्रत्युपादानकारणीभूतपीतवर्णारियशःक्षीरेण साधनेन गौरवर्णकीर्तिसुधारूपं कार्यं जनयतीति च महदद्भुतमिति भावः । अत्रोदाहरणद्वये पूर्वोक्तरीतिद्वयसाङ्कर्येणाद्भुतरसप्रतिपादनात् पाञ्चाली ।

अथ रीतयश्चेपतीत्यत्र चकारसंग्रहयोः शय्यापाकयोर्मध्ये शब्दधर्मत्वसाम्यात् शय्यां निरूपयति । येति । परमुत्कृष्टा पदानां सुप्तिङन्तानां यान्योन्यमैत्री । अत्र मैत्री नाम संहितासमये यत्समीपे स्थितस्य पदस्य तेनैवान्वयः सेति शेषः । सा मैत्री शय्येति कथ्यते । उदाहरति । दातुः काकतिवंशस्य मण्डनमणेर्निःसीमविश्राणनस्य निर्मर्यादं वितरणस्य श्लाघयोत्कर्षेण लङ्घितातिक्रान्ता कल्पपादपस्य गुणानां दानादीनां प्रौढिः प्रौढिमा येन तस्यागाधं गम्भीरमोजः प्रतापो

यस्य तस्य वीररुद्रस्य संबन्धि शारदकौमुद्याः शरत्कालचन्द्रिकायाः परिमलं सौभाग्यं बिभ्रद्यशः प्रायशः प्राचुर्येण सामन्तसीमन्तिनीनां पतिवियोजितारिस्त्रीणां गण्डाभोगेषु यः पाण्डिमा तद्धुरां पाण्डिमभारं धत्ते तद्वद् भातीत्यर्थः ।

अवशिष्टस्य पाकस्य लक्षणमाह । अर्थेति । अर्थस्य शृङ्गारादेर्गम्भीरिमास्वायता पाकः । इत्युच्यत इति शेषः । स पाको द्विधा द्विप्रकारेण हृदयंगमो मनोहरो द्राक्षापाको नारिकेलपाकश्चेति प्रस्फुटमन्तरं भेदो ययोस्तौ । भवत इति शेषः । 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये' इत्यमरः ।

तत्र प्रथमोद्दिष्टस्य द्राक्षापाकस्य लक्षणमाह । द्राक्षापाक इति । यः पाको बहिः पठनसमयेऽन्तरर्थविचारसमये च स्फुरन् स्फुरमाणो रस आस्वादो मनोहरत्वं यस्य स द्राक्षापाक इत्यन्वयः ।

उदाहरति । स्मरेति । विषयमात्रविश्रान्तिविरहेण विशृङ्खलवृत्तित्वमन्दमन्थरत्वादिगुणशीलाः स्मेराः । तदुक्तं भावप्रकाशे ।

'अपरिच्छिन्नविषयं मदमन्थरमीलितम् ।
स्फुरद्भ्रूपक्ष्मतायुक्तं तत् स्मेरमिति कथ्यते ॥'

स्मरप्रधानाश्च ते स्मेराश्च स्मरस्मेरास्तान् मन्दं स्मितं येषां ते । मधुराः संतापहराः सौरभ्येण पद्मिनीजातित्वादस्य स्मितनिमित्तेन परिमलेन सुभगास्तान् तथोक्तान् ।

'कटाक्षैर्हासगर्भैस्तु सुभगैरसुक्यभावना ।
शीतलीक्रियते तापो येन तन्मधुरं स्मृतम् ॥' इति ।

प्रोक्तेर्नायिकायाः प्रौढत्वात् मनागल्पं व्रीडाजाड्यं येषां ते तथोक्ताः । अत एव स्वानुकूल्यप्रकाशकाः । तदुक्तम् ।

'सव्रीडालोकनेनैव स्वानुकूल्यप्रकाशनम्' इति ।

'विस्रम्भे परमां काष्ठामारूढे दर्शनादिभिः ।
येनान्तरङ्गं द्रवति स स्नेह इति कथ्यते ॥'

इत्युक्तलक्षणः स्नेहः प्रणयशब्देन विवक्षितः स एव रसो द्रवद्रव्यं तस्यान्तरङ्गे वाःसव्यस्य कल्लोलैर्महातरङ्गैः 'महत्सूल्लोलकल्लोलानि' इत्यमरः । सरिताः प्रेमदायिन इत्यर्थः ।

'द्रवीभूतं मनो यत्र दर्शने प्रेमदायिनः ।' इति ।

लक्षणात् । कृतानेकस्कन्धाः प्रकाण्डास्तरङ्गा यैस्ते प्रियदृष्टिप्रतिघातेनौत्सुक्यभरे- णौत्सुक्यभरेण च यथाक्रमसासारप्रसाराभ्यामङ्गीकृततरङ्गभङ्गीका इत्यर्थः । अत एवैते तरङ्गिताः सोत्सुकाश्च । तदुक्तम् ।

'सोत्सुकं तद्यदालोक्य भूयो भूयोऽवलोकनम् ।
कल्लोल इव यत् कान्तेर्विच्छेदस्तत्तरङ्गितम् ॥'

मनसिजानां शराणां सहस्राणि सृजतो विरक्तस्यापीति भावः ।

'यद्दर्शने विरक्तोऽपि क्षुभ्यते तत्समन्मथम् ।' इति

लक्षणात् । कटाक्षान् वामे रम्ये अक्षिणी यस्याः सा वामलोचना रुद्रनृपतिं परितः सर्वतः किरति क्षिपति । कटाक्षलक्षणं तु

'यद्गतागतविश्रान्तिवैचित्र्येण विवर्तनम् ।
तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते ॥' इति ।

अत्रैवं सम्मर्दसहिष्णोः शृङ्गारस्य पाठसमयेऽप्यास्वाद्यमानत्वात्तदन्तर्बहिश्च स्फुरणं द्रष्टव्यम् ।

नारिकेलपाकलक्षणमाह । य इति शेषः । अन्तर्गूढः अन्तर्लीनः रसोदयो यस्य स पाको नारिकेलपाकः । उदाहरति । लीलेति । नायकप्रकरणे मध्यमा- प्रस्तावे श्लोकोऽयं व्याख्यातः । अत्रास्मिन् श्लोके द्राक् शीघ्रमर्थस्य शृङ्गारस्य प्रतीतिः स्फुरणं न भवति । अतोऽत्र नारिकेलपाक इति बोध्यम् । द्राक्षापाके शीघ्रमर्थप्रतीतिर्नारिकेलपाके विलम्बेनार्थप्रतीतिः । तदुभयमुदाहृतमनतिद्रुता- नतिविलम्बितार्थप्रतीतिभाजः कदलीरसालादिपाकाः स्वयमेवोह्या इत्याह । एवं प्रकारेण वस्तुनोऽलंकारस्य प्रतीतावप्युदाहरणं द्रष्टव्यम् । पाकान्तराणि कदल्या- द्यन्यपाकाश्च यथासंभवमुदाहार्याणि ।

एवं काव्यसामग्रीं निरूप्य काव्यविशेषनिरूपणं प्रतिजानीते । अथेत्यादि । अथ वृत्त्यादिनिरूपणानन्तरं काव्यविशेषाः । निरूप्यन्त इति शेषः । व्यङ्ग्यस्य व्यङ्ग्यार्थस्य प्राधान्यं वाच्यार्थमतिशय्य चमत्कारकारित्वम् । अप्राधान्यं वाच्या- र्थानतिशयेन वाच्यपरं चमत्कारकारित्वं ताभ्यामस्फुटत्वेनास्फुरणेन च काव्यं त्रिविधम् । त्रैविध्यमेवाह । व्यङ्ग्यस्य प्राधान्य उत्तमं काव्यम् । यत्र वाच्या-

तिशायि व्यङ्ग्यं तदुत्तमं काव्यमित्यर्थः । ध्वनिर्ध्वनिकाव्यमिति व्यपदिश्यते व्यवह्रियते । अप्राधान्येन मध्यमं काव्यं गुणीभूतं वाच्यानतिशायित्वादप्रधानभूतो व्यङ्ग्यो व्यङ्ग्यार्थो यस्मिन् तत्तथोक्तमिति गीयते । अस्फुटत्वेऽनभिव्यक्तौ अधमं काव्यं चित्रमिति कथ्यते । शब्दार्थवैचित्र्याद्व्यङ्ग्यानभिव्यक्तौ चित्रप्रायत्वात् चित्रमिति तात्पर्यम् ।

ध्वनिनामकमुत्तमं काव्यमुदाहरति । स्वामिन्निति । स्वामिन् ब्रह्मन् अधुना गोत्रमहीधरान् नीचैरनुन्नतान् ह्रस्वान् विधत्से किम् । अम्बुनिधीन् गाधानुत्तानान् कुतो हेतोः करोषि । दिक्पतीन् दिगीशानल्पकानत्यल्पान् कुरुषे किम् । इत्थमखिलं पार्श्वचराणामनुजीविनामनुलापं मुहुर्भाषाम् । असकृत्कथनमिति यावत् । न्यक्कृत्य धिक्कृत्य धर्मैषिणा केवलपरेण पद्मभुवा ब्रह्मणा गुणानामौन्नत्यादीनामेकवसतिरेकालयः श्रीवीररुद्रो नृपः सृष्ट उत्पादितः । अत्र व्यङ्ग्यस्य वाच्यातिशायित्वं स्वयं विशदयति । अत्रेति । अत्रोदाहरणे कुलशैलानतिशेत इति तथोक्तम् । समुन्नतत्वमौन्नत्यम् । अतिसमुद्रं समुद्रातिशायि गाम्भीर्यम् । लोकपालेभ्योऽप्यधिकमैश्वर्यं च व्यज्यते । तथा कुलशिखरिलोकपालानां निर्माणे यः संरम्भः साधनसामग्रीसंपादनारम्भस्तदतिशायी काकतीयस्य निर्माणसामग्र्या विभवः सर्वविलक्षण इति व्यज्यते । तथा च वाच्यार्थापेक्षया व्यङ्ग्यार्थस्यैव चमत्कारकारित्वात् वाच्यातिशायित्वमितीदं ध्वनिकाव्यमित्यर्थः ।

मध्यमकाव्यमुदाहरति । प्रत्यग्रेति । प्रत्यग्रमभिनवं यथा तथा प्रसरता व्याप्नुवता प्रतापविभवेन व्याप्तमाक्रान्तमखिलाशानां सकलदिशामन्तरं येन तस्मिन् विश्वस्य त्रातरि रक्षके वीररुद्रनृपतौ सिंहासनमध्यास्त इति तस्मिन् तथोक्ते सत्यास्थानं पट्टाभिषेकशालां समागतैर्नृपतिभिस्तास्ता नानाविधा इत्यर्थः । चेष्टा व्यापारा इत्यर्थः । तथा तेन प्रकारेणानिर्वाच्यमित्यर्थः । दर्शिताः प्रकाशिता याभिश्चेष्टाभिरमुष्य काकतिविभोर्दृष्टिः कृपया आर्द्रीकृता रसवती । अत्रोदाहरणे प्राप्ताभिषेकमहोत्सवस्य प्रतापरुद्रस्याग्रे पुरोभागे शरणार्थिनां शरणं प्रार्थयमानानां पार्थिवानां तथाविधकार्पण्येन कृपणत्वेनोपलक्षितोक्तिः कार्पण्योक्तिः पुनः पुनः प्रणामः प्रार्थनं चादिर्यस्य तच्च व्यङ्ग्यं तास्ताश्चेष्टा इति वाच्याद् वाच्यार्थादनतिशायीति हेतोर्गुणीभूतं व्यङ्ग्यं यस्य तस्य भावस्तत्ता तथा चेदं मध्यमं काव्यमिति भावः ।

अवशिष्टं चित्रं विभजते । चित्रमिति । चित्रं काव्यं त्रिविधम् । त्रैविध्यमेवाह । शब्देति । शब्दचित्रमर्थचित्रमुभयचित्रमिति । त्रिविधमिति पूर्वेणान्वयः ।

शब्दचित्रमुदाहरति । क्षोणीति । क्षोणीरक्षणे दक्षिणा उदाराः । समर्था इति यावत् । 'दक्षिणे सरलोदारौ' इत्यमरः । क्षतो जगतां क्षोभो याभिस्ता दुरीक्ष्योऽभ्यासलाघवातिशयेन दुरवबोधः क्रम आयुधप्रयोगपरिपाटी यासु ताः क्षुद्रक्षत्रियाणां पक्षस्य बलस्य शिक्षणस्य विधौ विधाने प्रोत्क्षिप्त उद्धृतः कौक्षेयकः करवालो यासु ताः । युद्धायोद्दामोद्यमनस्योच्छृङ्खलाटोपस्य रुद्रनृपतेश्चण्डयोर्दोर्दण्डयोः केलयः क्रीडा गर्जतां दुर्जनानां गर्व एव पर्वतः तस्य भिदायां भेदने दम्भोलयोऽशनयो भवन्ति । 'दम्भोलिरशनिर्द्वयोः' इत्यमरः । अत्र केलिषु दम्भोलित्वरूपणं गर्वे पर्वतत्वारोपणे हेतुरिति परम्परितरूपकम् । अत्रानुप्रासेन शब्दचित्रता । यद्यप्यत्रार्थालंकारस्य रूपकस्य सद्भावादुभयचित्रत्वं तथापि कविविवक्षायाः केवलानुप्रास एव पर्यवसानात् शब्दचित्रत्वमिति भावः । शुद्धशब्दचित्रं तु मदीये हेमन्ततिलकभाणे । 'चाद्वारावमपास्य चाखिलदिशा अध्यास्य वाद्यावलीभेद्याकाश...कौशिसुरराद्दपद्यालिसंमोदितः । पद्यालीः क्षणयन् प्रसर्पदबलावद्याति भूपारवैः स्वाद्यानेकफलागमै रघुपतिः स्वोद्यानवाटीकुटीः ॥' इति ।

अर्थचित्रमुदाहरति । खड्ग इति । युद्धविजृम्भिते खड्गे विस्मितं रिपुमहीनाथानामञ्जलिं युतकरद्वयम् । 'तौ युतावञ्जलिः पुमान्' इत्यमरः । पश्यन्तो विज्ञानिनो विद्वांसो मन्यन्ते मन्वते । अहं तु पूर्वोक्तिविशिष्टाञ्जलिं वीरप्रतापरुद्रविभोर्जन्येषु युद्धेषु पुनः पुनरपि सृष्ट्यै सर्जनाय रिपुजीविनानि ग्रहीतुं संग्रहीतुं यातस्य समागतस्य विधेर्विश्वसृजः पीठाम्बुजं मन्ये । 'विरिञ्चिः कमलासनः' । 'लक्ष्मीः पद्मालया पद्मा' इति चामरः । अत्रोत्तरार्धे छन्दोभङ्गस्तु प्राकृतानुसारिच्छायात्वप्रयुक्त इति न दोषः । पाठान्तरकल्पनं साहसमिति बोध्यम् । अत्रापि यथाकथंचिदनुप्राससंभवेऽपि कवेरर्थचित्र एव तात्पर्यात् तस्यैवोदाहरणम् । शब्दचित्रं त्वप्रधानमिति भावः ।

उभयचित्रमुदाहरति । विद्येति । शुद्धमर्थचित्रं तु मदीये हेमन्ततिलकभाणे ।

'आहृतवसुः प्रतीच्या भानुः क्षिप्तोऽपराब्धिजलमध्ये ।
कथमपि पूर्वाब्धिगतो ध्रु...मुद्रो भुवनानाम् ॥'

एकभद्रे मुख्यशुभे । जितानि वैरिणां भद्राणि येन तस्मिन् । धृता शौर्यमुद्रा येन तस्मिन् । रक्षायां विनिद्रे निद्रारहिते । अनलस इति यावत् । गुणैर्धर्मादिभिरार्द्रे प्रतापरुद्रे पृथ्वी कान्ता जाया रमते रज्यति इव । अत्रानुप्रासोपमाभ्यां शब्दार्थधर्माभ्यां चित्रता काव्यस्येति शेषः । नन्वत्रोदाहरणेषु यथायोगं विभावानुभावविशेषकथने वीरशृङ्गारयोः पर्यवसानात् कथमधमत्वमिति चेत् सत्यं शब्दार्थालंकारयोरेव कविविवक्षाविषयत्वाद्विद्यमानोऽपि रसो दिवा चन्द्रप्रकाशवन्न प्रतीयते । तदुक्तं काव्यलोचने ।

'रसभावादिविषयविवक्षाविरहे सति ।
अलंकारनिबन्धो यः स चित्रविषयो मतः ॥' इति ।

एवं त्रिविधमपि काव्यं सामान्यतो निरूप्य तत्रोत्तमं काव्यं प्रपञ्चयितुं प्रतिजानीते । अथेति । अथ काव्यसामान्यनिरूपणानन्तरं ध्वनिविशेषा उत्तमकाव्यभेदा निरूप्यन्ते । तानेव विभजते । अत्रेत्यादिना । अत्र ध्वनिप्रस्तावे ध्वनेरुत्तमकाव्यस्य लक्षणा चाभिधा च ते मूले कारणे यस्य तस्य भावस्तत्त्वेन हेतुना प्रथममविवक्षितं व्यङ्ग्येन न्यग्भूतं वाच्यं यस्य सोऽविवक्षितवाच्यः । अन्यत् वाच्यादन्यत् व्यङ्ग्यं परं प्रधानं यस्य तदन्यपरं विवक्षितमन्यपरं सत् वाच्यं यस्य स विवक्षितान्यपरवाच्योऽन्यपरत्वेन विवक्षितवाच्य इत्यर्थः । तौ इत्याख्या ययोस्तौ द्वौ भेदौ । अविवक्षितवाच्यध्वनिर्लक्षणामूलः । विवक्षितान्यपरवाच्यध्वनिरभिधामूल इति बोध्यम् । अविवक्षितवाच्यध्वनेरर्थान्तरसंक्रमितं चात्यन्ततिरस्कृतं च वाच्यं यस्य तस्य भावस्तत्ता तयार्थान्तरसंक्रमितवाच्यतयात्यन्त तिरस्कृतवाच्यतया चेत्यर्थः । अर्थान्तरे लक्ष्यार्थे संक्रमितं प्रवेशितं वाच्यं यस्येति व्युत्पत्त्यायमजहल्लक्षणामूलः । अत्यन्ततिरस्कृतं भृशं न्यग्भूतं वाच्यं यस्येति व्युत्पत्त्यायं जहल्लक्षणामूलः । एवं द्विविधस्य ध्वनेर्वाक्यपदगतत्वेन वाक्यगतत्वेन पदगतत्वेन च द्वैविध्ये सति चतस्रो विधा यस्य तस्य भावश्चातुर्विध्यम् । तेषां संख्याक्रमस्त्वग्रे कविनैव प्रक्लृप्यत इत्युपरम्यते । अभिधामूलध्वनिं विभजते । विवक्षितान्यपरवाच्यस्य ध्वनेः संलक्ष्यः स्फुटसंवेद्यः क्रमो व्यङ्ग्यव्यञ्जकयोः परिपाटी यस्य तत् तथाभूतं व्यङ्ग्यं यस्य स संलक्ष्यक्रमव्यङ्ग्यः । असंलक्ष्योऽस्फुटवेद्यः क्रमो यस्य तदसंलक्ष्यक्रमं व्यङ्ग्यं यस्य सोऽसंलक्ष्यक्रमव्यङ्ग्यः । यत्र व्यञ्जकस्य विभावादेर्व्यङ्ग्यस्य रसादेर्विद्यमानोऽपि क्रमो निशितसूच्या शतपत्र-

पत्रवेधवदाशुभावित्वान्न संलक्ष्यते सोऽसंलक्ष्यक्रम इत्यर्थः। संलक्ष्यक्रमव्यङ्ग्यासलंक्ष्यक्रमव्यङ्ग्यतया तत्त्वेन हेतुना द्वौ भेदौ। संलक्ष्यक्रमव्यङ्ग्यध्वनिरसंलक्ष्यक्रमव्यङ्ग्यध्वनिश्चेत्युभौ भेदौ । संलक्ष्यक्रमव्यङ्ग्ये शब्दार्थोभयशक्तिमूलत्वेन त्रैविध्यं सिद्धवत्कृत्याह । संलक्ष्येति । शब्दशक्तिमूले संलक्ष्यक्रमव्यङ्ग्ये वस्त्वलंकाररूपतया वस्तुजातिगुणाद्यर्थस्तद्रूपत्वेनालंकार उपमादिस्तद्रूपत्वेन च वस्तुध्वनिरलंकारध्वनिरिति च द्वैविध्ये सति वाक्यपदगतत्वेन चातुर्विध्यम् । अर्थशक्तिमूले संलक्ष्यक्रमव्यङ्ग्येऽर्थस्य मूलभूतस्य व्यञ्जकस्येत्यर्थः । स्वतो लोकतः संभवतीति स्वतःसंभवी तत्त्वेन लोकसिद्धत्वेन कवेः प्रौढोक्त्या प्रतिभाजन्योक्त्या सिद्धत्वेन कविनिबद्धेषु कविसमयसिद्धेष्वर्थेषु वक्तुर्विरच्यमानप्रकृतकृतिकर्तुः प्रौढोक्त्या सिद्धत्वेन च त्रैविध्यम् । त्रिविधस्यार्थशक्तिमूलस्य प्रबन्धवाक्यपदगतत्वेन प्रबन्धगतत्वेन वाक्यगतत्वेन पदगतत्वेन त्रैविध्ये सति षडुत्तरा त्रिंशत् षट्त्रिंशत् तावत्संख्याका प्रकारा यस्य स तथोक्तोऽर्थशक्तिमूलोऽनुरणनं घण्टादेः प्रथमस्वरानन्तरभाविस्वनोऽनुरणनं तत्सादृश्यात् संलक्ष्यक्रमव्यङ्ग्यस्त्रिविधोऽप्यनुरणनध्वनिर्घण्टादेः स्वरानुसारी स्वनोऽनुरणनम् । व्यञ्जकानुसारि व्यङ्ग्यम् । तथा च साम्येन हेतुनास्य ध्वनेरप्यनुरणत्वमिति बोध्यम् । तृतीयमाह । उभयस्य शब्दार्थरूपस्य शक्तिर्मूलं यस्य स संलक्ष्यक्रमव्यङ्ग्यध्वनिर्वाक्यगतत्वेन हेतुनैकविध एव । एवमुक्तरीत्या संलक्ष्यक्रमव्यङ्ग्यध्वनेरेकोत्तरचत्वारिंशत्संख्याका भेदाः । एवमुत्तरत्र समासो द्रष्टव्यः । असंलक्ष्यक्रमव्यङ्ग्यो रसादिः । आदिशब्देन भावादिर्विवक्षितः । तस्य ध्वनिस्तत्प्रधानं ध्वनिकाव्यमित्यर्थः । प्रबन्धगतत्वेन वाक्यगतत्वेन पदगतत्वेन पदैकदेशगतत्वेन रचनागतत्वेन वर्णगतत्वेन च षड्विधः । प्रबन्धादिपदानां गतपदेन प्रत्येकं संबन्धः । एवमुक्तरीत्या विवक्षितान्यपरवाच्यध्वनेरभिधामूलध्वनेः सप्तचत्वारिंशद्भेदाः । चतुर्भिरविवक्षितवाच्यस्य लक्षणामूलध्वनेर्भेदैः सह संख्याने प्रथममादौ शुद्धा मिश्रणव्यतिरिक्ता एकपञ्चाशद्भेदाः । तेषां शुद्धानां प्रत्येकमेकैकस्य पदगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वन्यादेरेकैकेन वाक्यगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वन्यादिना सह संबन्धे सति प्रथमभेदस्य पदगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनेः पञ्चाशद्भेदाः । अथ स्वस्य स्वेनापि संबन्धे एकपञ्चाशद्भेदा इति बोध्यम् । द्वितीयस्य वाक्यगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनेः पञ्चाशद्भेदाः । तृतीयस्य

वाक्यगतात्यन्ततिरस्कृताविवक्षितवाच्यध्वनेरेकोनपञ्चाशद्भेदाः । अनेन क्रमेण पूर्वोक्तरीत्योत्तरस्य प्रथमभेदाद्द्वितीयमुत्तरं तस्मादुत्तरं तृतीयम् । एवं द्वितीयादेरेकैको भेदः । द्वितीयस्य पञ्चाशदित्युक्तरीतिको भेदस्तस्य परित्यागे सति षडुत्तरा विंशतिः षड्विंशतिस्तदुत्तरं शतत्रयं तदधिकं सहस्रमिति संख्या येषां ते तथोक्ता मिश्रभेदा भवन्ति । ननु वाच्यगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनेः पदगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनेः संबन्धे यथैको मिश्रभेदस्तेनैव पदगतार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनिसंबन्धे अन्यो मिश्रभेदस्तथा चैकपञ्चाशतो भेदानां विचार्यमाण एकोत्तरशतषडधिकसहस्रद्वयसंख्याकमिश्रभेदसंभवे एकन्यूनताक्रमेण न्यूनसंख्याकमिश्रभेदकल्पनमनुचितमिति चेत् सत्यम् । भेदद्वयेऽपि प्रथमस्य द्वितीयेन संबन्धो द्वितीयस्य प्रथमेन संबन्ध इति संबन्धिप्रतिबन्धिनोच्चारणव्यत्यासमात्रं न पुनश्चमत्कारविशेषः । अतस्तेषां यथायोगं मिथोऽन्तर्भाव एवेति युक्तम् । अमुमेवाभिप्रायं व्यनक्ति । अविवक्षितान्यपरवाच्यध्वनिसंबन्धे यो भेदस्तस्मिन् भेद एव विवक्षितान्यपरवाच्यस्याविवक्षितवाच्येन संबन्धोऽन्तर्भूतः । पृथग्भूतो न भवति । अनेनैव क्रमेणोक्तरीत्या वस्तुध्वनेरलंकारध्वनिना संबन्धेन भेदोऽपि । अपिशब्दः समुच्चयार्थः । अलंकारध्वनेर्वस्तुध्वनिसंबन्धान्न पृथग्भूतः किं तु तत्रान्तर्भूत इत्यर्थः । विषयव्याप्त्यर्थमुक्तत्वान्न पुनरुक्तार्थता । इत्युक्तरीत्या पूर्वपूर्वस्य वाक्यगतार्थान्तरसंक्रमितवाच्यादेरुत्तरोत्तरसंबन्धे पदगतात्यन्ततिरस्कृतविवक्षितवाच्यादिसंबन्धे एकैकभेदस्य द्वितीयध्वन्यादेर्न्यूनता न्यूनसंख्याकृता ज्ञेया । तस्य पूर्वोक्तस्यापि मिश्रणस्य संकीर्णध्वनेस्त्रीणि रूपाणि यस्य तेन संकरेणैकरूपया संकरवदुपाधिभेदाभावादेकविधया संसृष्टया च पुनर्भूयश्चतुर्धा चतुर्विधं योजने संबन्धे सति चतुरुत्तरं यच्छतत्रयं तदधिकानि पञ्चसहस्राणि भेदाः । संकरस्य त्रिरूपत्वं कथमित्याकाङ्क्षायामाह । अनुगृह्यत इत्यनुग्राह्यमनुप्राण्यम् । अनुगृह्णातीत्यनुग्राहकमनुप्राणकं तयोर्भावोऽङ्गाङ्गिभावः । संदेह इति लक्षणं नाम यस्य संकरस्य स च । 'लक्षणं नाम्नि चिह्ने च' इति विश्वः । एकव्यञ्जकेऽनुप्रवेशश्च । एते पूर्वोक्तास्तु संकरस्य भेदाः ।

न्यूनाधिकसंख्याव्यवच्छेदार्थमुक्तामेव संख्यां गणितमर्यादया क्रोडीकृत्याह । शुद्धा इति । अङ्कानां वक्रतो गतिरिति गणितशास्त्रम् । पुस्तके विलेखनस्य व्यत्यासेन अङ्का निक्षेपणीयाः । उच्चारणं तु लौकिकरीत्या शुद्धा असंकीर्णा ध्वनि-

भेदाश्चन्द्र (१) शराः (५)। तथा च प्रथममेकं पङ्क्तिं लिखित्वा पश्चात् पञ्च पङ्क्तिं विलिख्य ऋजुरीत्योच्चारण एकपञ्चाशद्भेदा इति सिद्धं भवति। एवमुत्तरत्रापि द्रष्टव्यम्। मिश्राः संकीर्णा ऋतु (६) नेत्र (२) अनल (३) इन्दु (१) १३२६। संसृष्टेः संकरस्य चायत्तास्तु तदधीनास्तु तत्प्रयुक्तभेदवन्त इत्यर्थः। ध्वनयस्तु अब्धिः (४) खं शून्यं विन्दुरित्यर्थः अग्निः (३) शराः (५) ५३०४ एतत्संख्याका भेदाः सिद्धा इत्यर्थः। तत्र ध्वनिभेदेषु शुद्धानामसंकीर्णानामेकपञ्चाशतो भेदानां नामधेयानि कथ्यन्ते। प्रतिपत्तिसौकर्यार्थमित्यर्थः। पदगतेत्यादिना ध्वनिरित्यन्तेन। तत्रार्थविचारो नास्तीति सर्वं विस्पष्टम्। नाम्नामप्येकपञ्चाशद्भेदानां मध्ये कतिपयोदाहरणप्रदर्शनेऽपीह कुशलानां भेदान्तराणि सुबोधानीत्यभिप्रायेणाह। तत्र ध्वनिषु दिङ्मात्रमल्पमात्रमुदाह्रियते न त्वेकपञ्चाशद्भेदा इति भावः।

चतुर्विधेष्वविवक्षितवाच्यध्वनिषु पदवाक्यगतत्वादिभेदान् विहायार्थान्तरसंक्रमिताविवक्षितवाच्यध्वनिमुदाहरति। मूर्धान इति। हे मूर्धानो यूयमास्माका अस्माकं संबन्धिनः। किमिति केन हेतुना। औद्धत्यमुन्नतत्वमिच्छथ इति। मनसि वदन्त इति शेषः। प्रतिपार्थिवाः प्रतापरुद्रस्य प्रणताः प्रणाममकुर्वन्। अत्रास्माका इत्यस्मत्संबन्धित्वं वाच्यम्। तत्प्रकृत्या सिद्धतयानुपपन्नं सदस्मदर्थेन सहैव राजसु सर्वदैन्यविश्रान्तिभूमित्वरूपार्थान्तरे संक्रमति। तस्मादजहल्लक्षणामूलोऽर्थान्तरसंक्रमितवाच्यध्वनिः। व्यङ्ग्यं तु प्रतापरुद्रवैरिणां तदग्रे गरुडाग्रे पन्नगानामिव युद्धवैमुख्यम्। तत् सर्वं मनसि निधायाह। अत्रेति। अत्रोदाहरणे सर्वदैन्यस्य विश्रान्तिभूमयो विश्रामस्थानभूता दीनतयेत्यर्थः। वयमीदृशानां दीनतमानामस्माकं संबन्धिन इति रीत्या। अर्थान्तरे दैन्यरूपान्यार्थे संक्रमितं वाच्यमस्माकत्वरूपं यस्य तस्य भावस्तत्ता।

द्वितीयमुदाहरति। विशदिम्नेति। विशदिम्ना धावल्येन विलिप्तं कृतलेपनं व्याप्तमित्यर्थः। वियदाकाशं यैस्ते तथोक्ताः। धवलिम्ना परिपूरिता अखिला आशान्ता दिगन्ता यैस्ते। गौराः शुभ्राः काकतीन्द्रस्य यशसां पूराः परम्परा विहरन्ति विजृम्भन्ते। अत्र विलिप्तेत्यत्र मूर्तद्रव्योचितस्य विलेपनस्यामूर्ते वियत्यसंभवात् स्वार्थपरित्यागेनोपरञ्जनातिशयस्याकाशे लक्षितत्वादत्यन्ततिरस्कृतवाच्यत्वमिति मनसि निधायाह। अत्रेति। अत्र विशदिमविलिप्तवियदिति-

स्थल अत्यन्ततिरस्कृतमतिन्यग्भूतं वाच्यं विलेपनरूपं यस्य तत्त्वम्। विषयभेदाद्विशदिमधवलिम्नोर्न पौनरुक्त्यम्। अनेन पूर्वोक्तेनैव क्रमेण वाक्यगतत्वेनाप्युदाहार्यम्। एतेनोदाहृतं पदगतमिति सूचितम्।

अर्थशक्तिमूलानां ध्वनीनां बाहुल्यात् तानेवादावुदाहरति। अब्दानिति। काकतीयस्य रिपुस्त्रिय ऋतून् विनाब्दान् संवत्सरान्। 'संवत्सरो वत्सरोऽब्दो हायनः' इत्यमरः। शुक्लपक्षान् विना मासान् रात्रीर्विना तिथीन् दिवसांश्चेत्यर्थः। आकाङ्क्षन्ते। अत्र वाच्यार्थस्य व्यङ्ग्यातिशायित्वं विशदयति। अत्र ऋतुप्रभृतीनां मदनस्योद्दीपकत्वात् तेषामृतुप्रभृतीनामभावो रिपुस्त्रीभिराकाङ्क्ष्यते प्रार्थ्यत इति प्रतीयते। अत्र ऋत्वभावाकाङ्क्षाया वाच्यत्वम्। ऋतूनामुद्दीपकत्वं व्यङ्ग्यम्। तेन व्यङ्ग्येन तासां स्त्रीणां प्रियवियोगरूपं वस्तु व्यज्यते। अत्र वस्तुशब्दो वाच्याद्यर्थयोरन्यतमार्थवाचकः। अनेन प्रियवियोगरूपवस्तुना प्रतापरुद्रस्य सर्वे शत्रवो निहता इति प्रतीयते इति वाच्याद्वाच्यार्थादतिशयः। व्यङ्ग्यार्थस्येति शेषः। इदमेव वस्तूद्दीपकवस्तुभेदेन भिन्नमित्यभिप्रायेणाह। तथेति। तथा प्रियविरहेण विधुराः कष्टाः शत्रुस्त्रियः कतिपयेषु वत्सरेषु जीविताशया प्रथममादौ ऋतूनामभावं वाञ्छन्ति। अनन्तरं तान् संवत्सरान् गमयितुं नेतुमशक्ताः कतिपयमासेषु प्राणान् धारयितुमुद्युक्ताः सत्यो ज्योत्स्नावतां पक्षाणां विनाशं वाञ्छन्ति। अनन्तरं मासानप्यपनेतुमपारयन्त्योऽसमर्थाः कतिपयतिथिषु जीविताशया रात्रीणामप्यभावमेव समभिलषन्तीति रीत्या बहुवस्तुना ऋत्वाद्युद्दीपकबहुवस्तुना बहुवस्तुभेदप्रयुक्तत्वाद्बहुविधं त्रिविधमिति यावत्। ज्योत्स्नारात्रिरूपोद्दीपकसामग्र्यास्त्रिविधत्वादिति भावः। वस्तु शत्रुनिहतिरूपं व्यज्यते। ऋत्वाद्यभावाकाङ्क्षारूपेण वस्तुना वाच्यार्थेन वस्तुना वस्तुध्वनिरितीदमुत्तमं काव्यम्।

दृष्ट्वेति। काकतिवीररुद्रनृपतेर्जगन्ति व्याप्नोतीति तथोक्तां कीर्तिं दृष्ट्वा शंभुः शिवः। अत्र कीर्तौ वस्तुं स्थातुं वाञ्छति। अत्रेति सर्वत्र संबध्यते। लक्ष्मीपतिः श्रियः पतिः शयितुं शयनं कर्तुं काङ्क्षति। दिव्यानां नारदादिमुनीनां गणः स्नातुं स्नानं कर्तुं धावति त्वरया गच्छति। वार्धयः सागराः संवर्धितुं वृद्धिं गन्तुं चेष्टन्ते यतन्ते। अभ्रमुरैरावतभार्यापि सविलासं यथा तथा शनैः स्प्रष्टुमीहते इच्छति। 'इच्छाकाङ्क्षास्पृहेहातृड्वाञ्छालिप्सा' इत्यमरः। अत्र शिवादीनां

क्रमेण कैलासक्षीराब्धिमन्दाकिनीचन्द्राभ्रमातङ्गभ्रान्तिरिति भ्रान्तिमदलंकारो व्यज्यत इत्याह । अत्रेति । अत्र हरस्य कैलासभ्रान्तिर्हरेः क्षीरार्णवभ्रान्तिरिति रीत्या भ्रान्तिमदलंकारो व्यज्यते । नन्वत्रालंकारस्य व्यङ्ग्यत्वं तस्य प्राधान्ये सत्यलंकार्यत्वमेव न ध्वनिकाव्यत्वमिति चेन्न । ब्राह्मणस्य श्रमणत्वे तस्य श्रमण इति व्यवहारे ब्राह्मणत्वहानिर्यथा न संभवति तथा प्रधानभूतव्यङ्ग्यार्थस्यालंकारव्यपदेशे न ध्वनिकाव्यत्वभङ्ग इति । एवमन्यत्राप्यलंकारध्वनौ द्रष्टव्यम् ।

प्रतापेति । रणे सद्यः समुद्यता स्रवता रुधिरेणारुणश्रीर्यस्य स प्रतापरुद्रस्य कृपाणः खड्गो रोषेण कषायितस्यारुणीकृतस्य काल्याः काल्याख्यदेवतायाः कटाक्षस्य दृष्टेर्विजृम्भितानि विजृम्भमाणानि । भावे क्तः । आलम्बते प्राप्नोति । अत्रालम्बत इति वाच्येन निदर्शनालंकारेण सकलरिपूणां क्षयो नाशः क्षणात् कृत इति वस्तु व्यज्यत इत्यलंकारेण वस्तुध्वनिः ।

काकतीयेति । काकतीयविभोः कीर्त्तिरेव पुण्डरीकं सिताम्भोजं तस्मिन् विजृम्भिते विकसिते सति तमालवच्छ्यामलं नभो मधुकरस्य क्रीडां शोभां धत्ते । अत्र कीर्त्तिपुण्डरीकं मधुकरक्रीडां धत्त इति निदर्शनालंकारेण वाच्येनाश्रयाश्रयिणोराधाराधेययोरनानुगुण्यमानुगुण्याभावस्तदेव रूपं यस्य सोऽधिकालंकारो व्यज्यते । आनुगुण्याभावः कथमित्यत्राह । आश्रयस्य कीर्त्तिपुण्डरीकस्य वैपुल्यं भ्रमरेण सह सादृश्यप्रतिपादनात् नभसोऽल्पत्वं प्रतीयते । अत आनुगुण्याभावादधिकालंकारप्रतीतिरिति भावः । एपूदाहृतध्वनिपु स्वतःसिद्धार्थस्य शक्तिर्मूलं यस्येति तत्त्वम् ।

अथ कविप्रौढोक्तिसिद्धार्थशक्तिमूलेपु वस्तुना वस्तुध्वनिमुदाहरति । श्रावं श्रावमिति । खुरलिर्मल्लादिसाधनशाला । भाषान्तरे सा मुगरली । तत्र विहरतः कार्त्तिकेयस्य स्कन्दस्य इषुणा शरेण जातं यच्छिद्रं रन्ध्रं तस्य छद्म कपटं यस्य तस्य श्रवणस्य श्रोत्रस्य पदव्यां मार्गे चरतीति तथोक्ताम् । कुतः । चारणानाञ्चौघैर्वृन्दैः शश्वद्गीतां भुवनानां सहितां पूज्यमानाम्। वर्त्तमाने क्तः। काकतीयस्य कीर्त्तिं श्रावं श्रावं पुनः पुनः श्रुत्वा क्रौञ्चक्ष्माभृत् चक्रवालाचलो महतो विपुलात् विस्मयान्निश्चलं निभृतमङ्गं यस्य स तथोक्तो भवति । पुरा किल परशुरामस्पर्धया स्कन्दो बाणेन क्रौञ्चाद्रिं ददारेति प्रसिद्धिः । अत्र क्रौञ्चाद्रेर्निश्चलाङ्गत्वे विस्मयादिति हेतोरुत्प्रेक्षणादुत्प्रेक्षाव्यञ्जकाप्रयोगाद्गम्यता । एवमलंकारप्रतीतावपि क्रौञ्च-

क्ष्माभृदिति वस्त्वेव कीर्तिस्थावरविस्मयकारित्वरूपं वस्तु व्यनक्तीति वस्तुना वस्तुध्वनिरेवेति तात्पर्येणाह । अत्रेति ।

वीररुद्रेति । रणे जयलक्ष्म्या जयश्रिया कान्तया च वृतान् वीररुद्रस्य भटान् योधान् दृष्ट्वा कानने कण्टकिद्रुमाः कण्टकयुक्तद्रुमा अरिवधूनां केशान् । प्रतापरुद्रस्येति शेषः । कर्षन्ति । आलिङ्गनार्थमिति भावः । अत्र जयश्रिया समालिङ्गितान् वीररुद्रभटान् दृष्ट्वा समदना इव मदनयुक्ता इव कण्टकिद्रुमाः शत्रुवधूकेशान् कर्षन्तीति वाच्येन वस्तुना समदनत्वोत्प्रेक्षा व्यज्यत इत्यलंकारध्वनिः ।

अपसरतीति । शिथिलो नष्टो मानः । 'स्त्रीणामीर्ष्याकृतः कोपो मान इत्यभिधीयते ' इत्युक्तलक्षणो यस्यास्तस्या वध्वा लज्जाया मनो हरतीति तथोक्ते दयिते पत्यौ सविधे समीपं गते सति आत्मनः स्वस्य ग्रहणे यद्भयं तेनेव सखीभिः समं सहापसरति । सख्यो लज्जा च गतेत्यर्थ । अत्रोत्प्रेक्षया भयेनेवेति हेतूत्प्रेक्षयालिङ्गनमादिर्यस्य तत्तथोक्तं वस्तु व्यज्यत इत्यलंकारेण वस्तुध्वनिः ।

अभयमिति । वनमरण्यम् । अभयं रक्षणं याचमानानां काकतीयेन्द्रस्य विद्विषां रिपूणां संबन्धि संरक्षां शाखानां प्रकम्पनैर्नाङ्गीकरोतीव । यथा शिरःकम्पनरूपसंज्ञया नाङ्गीकारं प्रकटयति तद्वदिति भावः । अत्र नाङ्गीकरोतीवेत्युत्प्रेक्षया प्रतापरुद्रशत्रुभ्यो रक्षणं कर्तुं वनमपि बिभेतीवेत्युत्प्रेक्षा व्यज्यते इत्यलंकारेणालंकारध्वनिः । यद्यप्यभयमिति श्लोको वस्तुनालंकारध्वन्युदाहरणानन्तरमेवोद्देशक्रमेण व्याख्येयस्तथापि दृश्यमानमूलपुस्तकलेखनक्रमेण व्याख्यातो रत्नापणे व्यक्त एवेति वेदितव्यम् ।

कविनिबद्धवक्तृप्रौढोक्तिसिद्धार्थशक्तिमूलामुदाहरति । यथा तथेति । नायकं प्रति दूतीवाक्यमेतत् । आर्या मत्स्वामिनी यथा तथा वा मादृशावस्था वा भवतु । तदवस्थाया अल्पत्वानल्पत्वविचारो मा भवत्वित्यर्थः । हे नरनाथ शशिनश्चन्द्रस्य रक्षणं कुरु । तस्य का बाधेत्यत्राह । यद्यस्मात् कारणात् तयार्यया तं चन्द्रं मषीकर्तुं दग्धुं कटाक्षा एवोल्का निर्गतज्वाला आशुगाः प्रेषिता इत्यर्थः । चन्द्रमषीकरणात् पूर्वमेव त्वयागन्तव्यमित्यर्थः । अत्र विरहेणार्ता पीडिता आर्या चन्द्रिकामसहमाना सती रोषज्वलितया कटाक्षोल्कया चन्द्रं मषीकरोति स रक्षणीय इत्यनेन वस्तुना वाच्येनेतः परं संजीवितुं प्राणान् धारयितुमशक्ता अधुनैव त्वया समागन्तव्यमिति व्यज्यत इति वस्तुना वस्तुध्वनिः ।

क इति । इदं पद्यं चक्रवालप्रतापरुद्रयशसोः प्रश्नोत्तररूपम् । तत्रादौ चक्रवालस्य प्रश्नः । त्वं कः शुभ्रं धवलमखिलाङ्गं यस्य स सन् चरसि । ततः कीर्तेरुत्तरम् । ननु हे चक्रवाल । 'प्रश्नावधारणानुज्ञानुनयामन्त्रणे ननु' इत्यमरः । अहमिति शेषः । वीररुद्रस्य संबन्धि यशो वर्ते संचरामि । दीप्तः प्रकाशमानो देहो यस्य स ते तव परिसरे स्फुरति प्रकाशते । प्रकाशमानः क इति गिरिप्रश्नः । मम सुहृत् मित्रम् । एकजन्यत्वादिति भावः । तस्य राज्ञः प्रतापः प्रभावः । 'स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्' इत्यमरः । अवशिष्टं वाक्यं प्रच्छाद्य स्वस्वरूपमिति शेषः। अलं प्रच्छादनं न कर्तव्यमित्यर्थः। स्फुरद्भिर्विकसद्भिः कुमुदैः सरसिजैश्च । वो युष्माकम् । पूज्यत्वबुद्ध्या बहुवचनमिति ज्ञेयम् । स्वरूपं ख्यापितमनुमितमित्यर्थः । हे सोमार्कौ चन्द्रसूर्याविति संबोधनम् । वां युवयोः स्वागतं शोभनागमनमिति काकुः । स्वागतं किमित्यर्थः। स्वस्वरूपं कथयति । अवधीति । वामवधिगिरिश्चक्रवालाचलो निर्गतं तमो यस्मात् स निस्तमस्को विहितः कल्पितः कृतः । सूर्यप्रकाशरहितो बहिर्भागेऽपीतिभावः । अनेन प्रश्नोत्तररूपेण वस्तुना वाच्येनात्र प्रतापरुद्रयशःप्रतापयोः सोमार्कसादृश्यप्रतीतेरुपमालंकारो व्यज्यत इति वस्तुनालंकारध्वनिः ।

पत्रयतेति । इदं वधूमुद्दिश्य सखीनां सल्लापवचनम् । हलेति सखीसंबोधनम् । 'हञ्जे हण्डे हलाह्वाने नीचां चेटीं सखीं प्रति' इत्यमरः । तथारूढस्तेन प्रकारेणोत्पन्नोऽत एव निर्भरो बध्वा नायिकाया मानो नृपतेः समागमेन यः संभ्रमस्तन्द्रा तेन संजातं भयं यस्य स तथोक्त इवापसरति निर्गच्छतीति । अत्र संजातभय इवेत्युत्प्रेक्षया प्रियप्रार्थनं विनैव मानिन्या मनः प्रसन्नं कोपरहितमिति विभावनालंकारः कारणं विना कार्योत्पत्तिरूपो व्यज्यत इत्यलंकारेणालंकारध्वनिः।

अप्राप्येति । इदं नायकं प्रति सखीवचनम् । हे नाथ नायक कान्ताभिर्वृतस्य ते तव सेवायामवसरमप्राप्य अनेकत्रासक्तत्वात् तवेति भावः । श्यामा नीला यौवनवती च । वधूस्तव कीर्तिं सेवमानेव सर्वेष्वङ्गेष्ववयवेषु पाण्डुरा धवला भवतीति शेषः । धवलकीर्तिसेवनादङ्गधावल्यमिति भावः । अत्र सेवमानेवेत्युत्प्रेक्षया सर्वथा स्वीकार्यत्वमङ्गीकार्यत्वमादिर्यस्य तद्रूपं वस्तु व्यज्यते इत्यलंकारेण वस्तुध्वनिः । एवं प्रबन्धादिगतत्वेन यथासंभवमुदाहरणानि द्रष्टव्यानि । ग्रन्थान्तरेष्विति भावः । कुतोऽवशिष्टा ध्वनयो नोदाह्रियन्त इत्यत्राह । विस्तरेति ।

'स तु शब्दस्य विस्तरः' इति भावः। इति कोशात् शब्दप्रपञ्चात् भयं तस्माद्धेतोरिह प्रबन्धे नोदाहृतानि । उक्तोदाहरणेषु सावधानचित्तानामुदाहरणान्तरगम्यत्वस्य सुलभत्वात् पुनस्तदुपादानं ग्रन्थगौरवमेवावहेदिति विस्तरशब्दप्रयोक्तुस्तात्पर्यम्।

तथार्थशक्तिमूलध्वनिर्निरूप्यते । स च स तु शब्दशक्तिमूलध्वनिर्वस्तुगतत्वेनालंकारगतत्वेन च द्विविधः । स्वोक्तौ वृद्धसंवादमाह तथा । यथास्माभिरुक्तं च पूर्वैरिति शेषः । यत्र श्लोके शब्दालंकारोऽथ अथवा वस्त्वेव वस्तुना अवभासते व्यज्यते प्रधानत्वेन शब्दप्रधानत्वेन । एतेनार्थस्याप्राधान्यम् । शब्दशक्त्या उद्भव उत्पन्नः स ध्वनिर्द्विधा वस्तुध्वनिरलंकारध्वनिरिति द्विविधो भवतीत्यर्थः ।

अलंकारध्वनिमुदाहरति । एष इति । नायिकां प्रति सखीवाक्यम् । एष प्रकृतः प्रतापरुद्रः पुरोवर्ती राजा नृपतिश्चन्द्रश्च । त्वं श्यामा खलु यौवनमध्यस्था खलु रात्रिश्च । चेत् किमित्याकाङ्क्षायामाह । द्वयोर्युवयोः समागमः संगतिः । युज्यत इति शेषः । तर्हि किं न युज्यत इत्याकाङ्क्षायामाह । किं पुनः किं तु प्रकृष्टो दोषो मानादिस्तस्य कथा वार्त्तापि न दृश्यते प्रदोषो रजनीमुखं तस्य कथा प्रसक्तिरपीत्यन्यत्र । एतत् खलु प्रदोषादर्शनमेव आश्चर्यं चित्रम् । चन्द्ररात्र्योः समागमे रजनीमुखरूपप्रदोषप्रसक्तिरस्ति । राजश्यामयोर्युवयोः समागमे प्रदोषप्रसक्तिर्नास्तीति चित्रमिति भावः । अत्र श्यामराजशब्दवाच्ययोः कान्तानृपयोरप्रकृतनिशाचन्द्राभेदाध्यवसायेन प्राप्तस्य प्रदोषस्य रजनीमुखरूपस्य प्रतिषेधेन विरोधः प्रतीयते। तद्द्योतकमाश्चर्यपदं परिहारस्तु दोषनिषेधादिति। विरोधाभासः। अत्र करणेन प्रकृतत्वेन कान्तानृपवाचकाभ्यां श्यामाराजशब्दाभ्यां निशाचन्द्रप्रतीतेर्हेतोरुपमा व्यज्यते । अनेकार्थपदगुम्फनमहिम्ना कवेर्विवक्षितमेवार्थान्तरं प्रतीयते। तस्यासंबन्धत्वव्यवहाराय प्रकृतेनौपम्यं कल्पनीयम् । तेन व्यङ्ग्यस्योपमालंकारस्य श्लिष्टशब्दसद्भावे प्रतीतिस्तदभावे त्वप्रतीतिरिति हेतोरयं ध्वनिः शब्दशक्तिमूल इति भावः ।

वस्तुध्वनिमुदाहरति । कान्तारेति । हे नरेश्वराः कान्तारवासेनारण्यवासेन संतप्ताः संतापं गताः । यूयमिति शेषः । हितादाप्तात् इत मत्त इत्यर्थः । संशृणुध्वं हितोपदेशमिति शेषः । अधुना राजपादसेवां प्रतापरुद्राङ्घ्रिसेवां चन्द्रकिरणसेवां चेत्यन्यत्र । कुरुध्वं चन्द्रकिरणसेवायाः संतापनिवारकत्वात् सा कर्तव्या इत्यन्यो भावः । प्रतापरुद्रं शरणं प्राप्य वनवासजनितसंतापं त्यजतेत्येको भावः ।

अत्र राजपादसेवामिति शब्दशक्त्या प्रकृतस्य प्रतापरुद्रस्य प्रतीतिः प्रकरणात् प्रकृतत्वाज्जायते। अनेनार्थेन प्रतापरुद्रसेवा कर्त्तव्या। अरण्यवासेन किं किमर्थं संताप इति वस्तु व्यज्यते।

उभयशक्तिमूलध्वनिमुदाहरति। जिष्णुरिति। भुजस्तम्भे जृम्भमाणमद्भुतं तारतम्यादिना विचित्रं पर्वतेष्वप्यकुण्ठितत्वाद्विचित्रमित्यन्यत्र। आयुधं खड्गादि वज्रायुधं च यस्य स एष प्रतापरुद्रो जयशील इन्द्रश्च। अतो हे क्ष्माभृतो राजानः पर्वताश्च निजपक्षस्य युद्धमेव कुर्म इति स्वगतस्य स्वगरुतां चेत्यन्यत्र। विजृम्भितं जृम्भणं मुञ्चत त्यजत। वज्रिणः पुरतः पर्वतगरुद्विजृम्भणवत् प्रतापरुद्रस्य पुरतो भवतां विजृम्भणं व्यर्थमिति भावः। तथा चोपमा व्यङ्ग्यम्। तदुभयशक्तिमूलमित्याह। अत्रेति। क्ष्माभृत इत्यादिषु शब्दशक्तिमूलता। क्ष्माभृदादिशब्दान् विहाय नृपादिपदप्रयोगे अन्यार्थप्रतीतिर्न भवति। एवं चौपम्यं न प्रतीयते तत्प्रयोगे प्रतीयते। तस्माच्छब्दशक्तिमूलत्वमिति भावः। भुजस्तम्भे विजृम्भमाणे त्वित्यत्र तत्सर्वं विहाय 'करस्तम्भविलसच्चित्रहेतिकः' इति प्रयोगेऽप्यन्यार्थप्रतीतेरर्थस्यैव शक्तित्वादर्थशक्तिमूलत्वमिति भावः।

एवं संलक्ष्यक्रममुदाहृत्यावशिष्टमसंलक्ष्यक्रमव्यङ्ग्यमुदाहरति। असंलक्ष्येत्यादिना। असंलक्ष्यक्रमं व्यङ्ग्यं यस्य स रसादे रसभावादेर्ध्वनिः। वृद्धसंवादमाह। तथा चेति। शृङ्गारतिलके तथा अस्मदुक्तरीत्या। उक्तं च रसादी रसभावादिर्योऽलंकारस्तस्माद्भिन्नः। अक्रमोऽसंलक्ष्यक्रमो रसाः शृङ्गारादयः। भावास्तदाभासाः रसाभासा भावाभासाश्च भावशान्तिश्चादिर्यस्य ध्वनेः स ध्वनिः। आदिशब्देन भावोदयादि गृह्यते। अलंकार्यमलंकारार्हं काव्यमित्यर्थः। तत्तया कायस्वरूपेण स्थितः। रसादीनामङ्गत्वे अलंकारत्वं प्रधानत्वे काव्यत्वमिति भावः। रसभावानामुदाहरणस्य प्रपञ्चो विस्तरो रसप्रकरणे भविष्यति। तत्रावश्यकत्वादत्र विसृष्टमिति भावः। एवं चोत्तमकाव्यं व्यङ्ग्यप्रधानं चतुरुत्तरशतत्रयाधिकपञ्चसहस्रभेदभिन्नमिति बोध्यम्।

अथ मध्यमकाव्यनिरूपणं प्रतिजानीते। गुणीभूतेति। गुणीभूतमप्रधानं वाच्यानतिशायि व्यङ्ग्यं यत्र तद्गुणीभूतव्यङ्ग्यं काव्यं मध्यमम्। तन्मध्यमकाव्यम्। अष्टौ विधा यस्य तदष्टविधम्। पूर्वशास्त्रमनुवदति काव्यप्रकाशे तथा

उक्तं च । अगूढमिति । अगूढं यत्र व्यङ्ग्यं शीघ्रं प्रतीयते तत् काव्यमगूढम् । यत्रापरस्य रसादे रसादिरङ्गं भवति तदपरस्याङ्गम् । वाच्यस्य वस्त्वादेर्या सिद्धिस्तस्या यदङ्गं तद्वाच्यसिद्ध्यङ्गम् । यत्र व्यङ्ग्यं विलम्बेन प्रतीयते तदस्फुटम् । यत्र वाच्यार्थे व्यङ्ग्यार्थे च वाक्यविश्रान्तौ संदेहस्तत् संदिग्धम् । वाच्यार्थव्यङ्ग्यार्थयोर्यत्र तुल्यता तत्तुल्यप्राधान्यम् । काक्वा काकुस्वरेण यत्र व्यङ्ग्यमाक्षिप्यते तत् काक्वाक्षिप्तम् । यत्र वाच्यस्यैव चारुतातिशयो न व्यङ्ग्यस्य तदसुन्दरम् । एवमष्टविधम् । व्यङ्ग्यस्य द्रुतविलम्बितप्रतीतौ मध्यमकाव्यम् । मध्यप्रतीतावुत्तमकाव्यमिति तात्पर्यम् । अगूढस्य मध्यमकाव्यत्वं सहेतुकमाह । कामिनीति । कामिनीकुचकलशवदुत्तरीयावृतस्त्रीस्तनवत् गूढस्यैव चमत्कारित्वादिति । मनोविकारजन्योऽनुकारवाचकश्चमदेव चमत्कारस्तत्कारित्वाद्धेतोरगूढे व्यङ्ग्ये मध्यमकाव्यमिति ।

उदाहरति । औन्नत्यमिति । औन्नत्यं त्वदुन्नतत्वं वर्ण्यते यदि मयेति शेषः । शिखरिणो गिरयो नीचैः कृता वामनीकृताः । पराजिता इत्यर्थः । त्वदौन्नत्यस्य ततोऽप्यधिकत्वादिति भावः । गाम्भीर्यं कीर्त्यते यदि जलधयो गाधीकृता उत्तानीकृताः सन्तः क्षुभ्यन्ति क्षोभं यान्ति तत् तस्मात् गिरिक्रोधाद्विक्षोभरूपाद्धेतोस्त्वां वर्णयितुं बिभेमि । भीतिपक्षं विहाय तदभावपक्षमवलम्बते । यदि वेति । यद्वा गुणा एव रत्नानि तेषां रोहणगिरे उत्पत्तिस्थानभूतपर्वत श्रीवीररुद्रप्रभो त्वत्पार्श्वे अगस्त्यो जातः कुम्भसंभवो भवन् स्थितोऽस्मि । अत्रागस्त्यो वामनीकृतविन्ध्यः परिपीतसमुद्र इति प्रसिद्धिः । तथा च तज्जेतृत्वादगस्त्यस्य कुम्भसंभवो भूत्वा स्थितोऽस्मि । तत्रापि त्वत्पार्श्वे इत्यनेन तेभ्यो न बिभेमीति व्यङ्ग्यार्थो वाच्यार्थप्राय इत्यगूढमित्याह । अत्रेति । नन्वत्र कवेर्विन्ध्यमात्राभिभाविनः कुम्भसंभवस्य स्वरूपप्राप्तावपि सकलपर्वतेभ्यो भयनिवृत्तिः कथमिति चेत् सत्यम् । अखिलपर्वतशायिविम्जृभणस्य विन्ध्यस्याभिभवेनैव सर्वेऽपि पर्वता अभिभूता एवेति कवेरगस्त्यत्वे तन्निवृत्तेरावश्यकत्वादिति ।

द्वितीयमुद्दिशति । अपरस्याङ्गमिति । तल्लक्षणमाह । यत्रेति । यत्र काव्ये रसादेर्भयानकादे रसादिः शृङ्गारादिरङ्गं साधनं भवति तदपि गुणीभूतव्यङ्ग्यमेव । उदाहरति । वीतेति । काकतिमहीनाथ एव स्मरो मन्मथस्तेनोद्वेजिताः पीडिताः 'उद्वेगस्तिमिते क्लेशे भये मन्थरगामिनि' इति विश्वः । भूपाः शत्रुभूपा व्रीडा त्रपा यस्मिन् तत् । एकत्र वैस्वर्यादन्यत्र प्रागल्भ्यादिति भावः । अपास्तो निरस्तो

मानः कुलाद्यभिमान ईर्ष्याकृतकोपश्च यस्मिंस्तत्। अत्रापि पूर्ववदेव हेतुद्वयं बोध्यम्। विकृतस्वरो विस्वरस्तस्य भावो वैस्वर्यम्। उदयद् वैस्वर्यं गद्गदभाषित्वं यस्मिन् कर्मणि तत्। आविर्भवन् स्वेदो यस्मिन् कर्मणि तत्। निर्भरः पूर्णो गात्रवेपथुरङ्गकम्पो यस्मिन् कर्मणि तत्। मिलन्ती मूर्छा शून्येन्द्रियत्वं यस्मिन् कर्मणि तत्। गलन्बाष्पो यस्मिन् कर्मणि तद्गलद्बाष्पकम्। संजातः प्रलयो नष्टचेष्टता यस्मिन् कर्मणि तत्। इत्येतदष्टकर्मालिङ्गनक्रियाविशेषणम्। एकत्र स्वेदादयः साध्वसदुःखाशयादिजन्या अन्यत्र सात्त्विकभावाः। तद्वक्ष्यति कविरेव वक्ष्यति। 'स्तम्भः प्रलयरोमाञ्चः स्वेदो वैवर्ण्यवेपथू। अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः॥' इति। भीत्या भयेन स्त्रीलिङ्गाक्षिप्तया कयाचित् प्रौढाङ्गनया च। तद्यथा मुग्धामध्यमयोः प्रियकर्मकालिङ्गनासंभवादिति भावः। समालिङ्गिताः सम्यग्युक्ताः। अन्यत्र गाढालिङ्गिताः सन्त इत्यर्थः। शैलगुहासु। अत्रापिशब्दाध्याहारोऽर्थसौकर्याल्लभ्यते। शैलगुहास्वपि विजनं जनरहितं देशं यान्ति। एकत्र प्राणपरित्यागार्थमन्यत्र रन्तुमिति भावः। अत्र प्रस्तुतक्रियाविशेषणसामर्थ्यादप्रस्तुतनायकवृत्तान्तप्रतीतेः समासोक्तिः। अत्र भयानकरसस्य प्रधानत्वादङ्गित्वं तस्य प्रतीयमानः शृङ्गाररसोऽप्रधानत्वादङ्गं भवतीत्याह। अत्रेति। शृङ्गाररसस्य भयरसं प्रत्यङ्गत्वं भयरसाङ्गत्वम्। भयानकरसस्य प्राधान्यमङ्गित्वम्। भयानकरसस्य प्राधान्यं कुत इत्यत्राह। अत्र श्लोके प्रतापरुद्रस्याधिक्यं प्रतिपाद्यं तच्च प्रतिपादनं च शत्रूणां भयप्रतिपादनेनैव न तु शृङ्गाररसेनेत्येवकारार्थः। संभवतीति हेतोः प्राधान्यमिति पूर्वेणान्वयः।

तृतीयमुदाहरति। कराल इति। करालस्तीक्ष्णः काकतीन्द्रस्य करवालः खड्ग एव नवाम्बुदो नवमेघ उग्रमुज्ज्वलं द्विषां प्रतापमेव ज्वलनमग्निं धारा कोटिः सैव जलधारेति श्लिष्टरूपकम्। शमयति नाशयतीत्यर्थः। अत्र जलधारारूपो व्यङ्ग्यार्थः करवालनवाम्बुद इति वाच्यस्य रूपकस्य निर्वाहक इति वाच्यसिद्ध्यङ्गम्। ननु करवालो नवाम्बुद इवेत्युपमितसमासः कथं न भवतीति चेदुच्यते। धारयेत्यत्रोपमितसमासस्य वक्तुमशक्यत्वेनोत्तरपदार्थप्रधानरूपरूपकसमासाश्रयणे जलधारायाः प्राधान्यम्। तथा च तदनुसारेण मेघस्य प्राधान्यसिद्ध्यर्थं तत्रापि रूपकमेवोचितम्। ननु 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' एवोपमितसमासाङ्गीकारेणातः कराल इति समानधर्मस्य सत्त्वात् तस्यैव रूपकनिर्वाहकत्वं

न तु जलधारारूपव्यङ्ग्यार्थस्येति चेत् सत्यम् । मध्यमकाव्यनिरूपणप्रस्तावे व्यङ्ग्यार्थस्य जलधारारूपस्य प्रतिपाद्यमानरूपकनिर्वाहकत्वे कविविवक्षा न तु समानधर्मस्य तन्निर्वाहकत्वे । कविविवक्षानुसारेणैवोदाहरणं द्रष्टव्यमिति शब्दचित्रोदाहरणस्थले दर्शितम् । किं च जयिनः काकतीन्द्रस्येति पाठे समानधर्मानुपादानेन जलधाराया रूपकनिर्वाहकत्वं निर्विवादमित्यलमतिप्रसङ्गेन । वाच्यसिद्ध्यङ्गत्वं लक्ष्ये कथयति । अत्रेति । अत्र जलधारा व्यङ्ग्या प्रतीयमाना । अभिधायाः प्रकरणात् खङ्गधाराया निर्वाहकादिति हेतोर्गुणीभूतव्यङ्ग्यं मध्यमकाव्यम् ।

अस्फुटमुदाहरति । वीरेति । वीररुद्रकृपाणस्यानङ्कुशोऽङ्कुशरहितः स्वतन्त्रो महिमा कोऽप्यनिर्वाच्यः । कुतः । यः कृपाणः द्विषदसृङ्नदं शत्रुरुधिरप्रवाहं पीत्वा कीर्तिरेव गङ्गा तां प्रसूते । जह्नुर्गङ्गां पीत्वा गङ्गामेवाजीजनत् । खङ्गस्तु रक्तनदीं पीत्वा गङ्गां सूत इत्युपमानादुपमेयस्याधिक्यरूपव्यतिरेकः । कवेराविष्करणं विना बुद्ध्यारोहाभावाद्विलम्बेन प्रतीयते । ततोऽस्फुटं मध्यमकाव्यमित्याशयेनाह । अत्रेति । अत्र कृपाणस्य जन्ह्वपेक्षयाधिक्यप्रतिपादनाद्व्यतिरेकोऽलंकारः । परमत्यन्तमस्फुटो विलम्बित इति यावत् प्रतीयते ।

पञ्चममुदाहरति । काकतीति । काकतिक्ष्मापतेरनुरागेण तरङ्गिता संजाततरङ्गा तरङ्गवत् पुनः पुनः प्रेर्यमाणेत्यर्थः । दृष्टिस्तुङ्गे वध्वाः कुचद्वये कह्लारमालेव सौगन्धिकमालेव लग्ना । 'सौगन्धिकस्तु कह्लारम्' इत्यमरः । अत्रालिङ्गनेच्छादिरूपस्य व्यङ्ग्यार्थस्य चमत्कारकारित्वात् प्राधान्यं वोत वाच्यस्य वेति संदेहात् संदिग्धं प्राधान्यमत्रेत्याशयेनाह । अत्रेति । अत्रालिङ्गनेच्छायां वाक्यस्य विश्रान्तिर्विश्रमः पर्यवसानमथवोत स्तनमण्डलस्यावलोकन एव वाक्यविश्रान्तिरित्यन्वयः । इति संदेहः ।

षष्ठमुदाहरति । नृपा इति । हे नृपाः प्रतापरुद्रस्य पदाम्बुजे पादपद्मे निषेवध्वं सेवां कुरुध्वम् । अन्यथा सेवायां तादृग्दयादाक्षिण्यादिगुणवत्तया निरुपमं प्रसन्नं सदा कालुष्यरहितमस्य राज्ञो मनः कलुषायते कलुषीभवति । अत्र प्रतापरुद्रस्य पादसेवा त्यज्यते यदि तदानीं वो नगरेषु वासो वसतिर्दुर्लभ इति यो व्यङ्ग्यार्थस्तस्य वाच्यस्य मनःकालुष्यस्य च समप्राधान्यम् । सर्वत्र कविना व्यञ्जनैकप्रवणेन भवितव्यम् । अत्र तु वाच्यस्य व्यङ्ग्येन सह समप्राधान्यसंपादनाद्गुणीभूतव्यङ्ग्यत्वमिति भावः ।

अगूढमित्यादिकारिकोक्तक्रमो वैवक्षिको न तु पौर्वापर्यकृत इति सूचयितुं सप्तममुल्लङ्घ्याष्टममुदाहरति । एकशिलायामिति । एकशिलायां पुर्यां या महिला वनितास्तासाम् । ‘ वनिता महिला तथा । ’ इत्यमरः । नरेन्द्रसंदर्शनेन य आमोदः संतोषस्तं श्रुत्वा गुरुजनेन संवादिना नियन्त्रिताया निवारिताया वध्वा वदनं श्यामलं मलिनं नृपानवलोकनविषादेनेति भावः । अत्र नरेन्द्रदर्शनं निमित्तं कारणं यस्य तं संतोषमपश्यन्त्या अननुभवन्त्या इति यावत् । वध्वा मुखं श्यामलमिति वाच्यस्यैव चारुत्वम् । गुरुजननियन्त्रिताहं नरेन्द्रं द्रष्टुं न गतवत्यस्मीति व्यङ्ग्यार्थस्य चारुत्वं चमत्कारकारित्वं नास्तीति शेषः ।

अवशिष्टमुदाहरति । यत्र काव्ये काका काकुस्वरेणार्थान्तरमाक्षिप्यते आकृष्यते तदपि गुणीभूतव्यङ्ग्यमेव । उदाहरति । हे प्रियसखि कथय । प्रत्युत्तरमिति शेषः । क्षोणी लक्ष्मीः सरस्वती च मत्तः । अस्मच्छब्दात् पञ्चम्यर्थे तसिल् । अधिकेति । प्रत्येकमन्वयोऽन्यथा बहुवचनप्रसङ्गात् नाधिकेत्यर्थः । अधिका इति वा तथैतास्तिस्र इत्यध्याहारेणान्वयः । गुणविशेषान् जानातीति गुणविशेषज्ञः स नरनाथः यां बहुमनुते अधिकां मनुते अत्रोत्तरं कथयेति पूर्वेणान्वयः । अत्राधिक्यनिषेधस्य वाचकाभावात् केवलवाच्यसामर्थ्यलभ्यत्वेन व्यङ्ग्यत्वं तस्य च काकुस्पर्शात् गूढत्वकृतचारुतातिशयभङ्गेन गुणीभूतत्वमेवेतीदं सर्वं मनसि निधायाह । अत्रेति । अत्र क्षोणी मदधीनेति काकुकल्पनया काकुस्वरावलम्बनेनाधिका न भवतीति व्यज्यते ।

अथ चित्रकाव्यस्य शब्दार्थोभयगतत्वेन पूर्वं त्रैविध्यं प्रदर्श्य संप्रति शब्दार्थालंकारवैचित्र्यादनेकविधत्वमस्तीत्याह । चित्रं त्विति । चित्रं काव्यं तु शब्दालंकारा वृत्त्यनुप्रासादयः । अर्थालंकारा उपमादयः । तैश्चित्रतया बहुविधं शब्दालंकारा यावन्तस्तावद्विधं शब्दचित्रम् । अर्थालंकारा यावन्तस्तावद्विधमर्थचित्रम् उभयचित्रं त्वेकविधम् । तेषां शब्दार्थालंकाराणां वंशो विस्तारोऽलंकारप्रकरणे व्यक्तीभविष्यति ।

एवं काव्यसामान्यं निरूप्य महाकाव्यादिनिरूपणं प्रतिजानीते । अथेति । अथ काव्यसामान्यनिरूपणानन्तरं महाकाव्यमादिर्येषां ते तथोक्ताः प्रबन्धा निरूप्यन्ते । नगरेति । नगरस्यार्णवस्य शैलस्य ऋतोर्वसन्तादेश्चन्द्रार्कयोरुदये वर्णनं वर्णनाद्युक्तिः । उद्याने सलिले च क्रीडा मधुपानं रतोत्सवश्च तेषां द्वन्द्वः ।

विप्रलम्भो वियोगो विवाहः कुमारोदयस्य वर्णनं च मन्त्रः पर्यालोचनं दूतं च प्रयाणमाजि युद्धम् । नायकाभ्युदयः प्रतिनायकोत्कर्षश्च इत्येतान्यष्टादश यत्र काव्ये वर्ण्यन्ते तन्महाकाव्यमुच्यते । अत्र यद्यपि स्थलद्वये वर्णनशब्दप्रयोगात् वर्ण्यन्त इत्यनेन पौनरुक्त्यं प्रसज्येत तथापि कवीनां निरङ्कुशत्वादविवक्षितमिति सोढव्यम् । यद्वा उभयत्रापि वर्णनं यत्रवतीत्यन्वयं विधाय एतानीत्यनेन तदितरसंग्रहं कृत्वा वर्ण्यन्त इत्यन्वयो बोध्यः । एवं पूर्वोक्तानामष्टादशानां मध्ये यैः कैश्चिन्न्यूनं रहितमपि काव्यं महाकाव्यं महाकाव्यमिष्यते । तन्महाकाव्यं गद्यमयं पद्यमयमुभयमयं चेत्येवंप्रकारेण त्रिविधम् ।

गद्यादिलक्षणान्याह । अपाद इति । अपादः पादरहितः पदसंघातः पदसमूहो गद्यम् । पद्यं चत्वारि पदानि पादा यस्य तत् पद्यम् । कादम्बरी आदिर्यस्य तत् गद्यकाव्यम् । पदकाव्यं रामायणादि । असर्गबन्धं सर्गबन्धरहितम् । तदपि तत्तूपकाव्यमुदीर्यते । असर्गबन्धं सूर्यशतकादि । गद्यपद्यमयं गद्यपद्योभयमयं काव्यं चम्पूरित्यभिधीयते । भोजरामायणादि । वक्त्रं वक्त्रनामकं वृत्तम् । अपरवक्त्रं तन्नामकं च वृत्तम् । भेदकं स्वर्गादिवत् परिच्छेदकम् । उच्छ्वास उच्छ्वासादिवद्विच्छेदकस्तेन सहितं सोच्छ्वासं तत्त्वं सोच्छ्वसत्त्वं लक्षणमुच्छ्वास इत्यर्थः । एतानि यत्र काव्ये वर्ण्यन्ते असावाख्यायिका । कारिकां ग्रन्थरूपेण व्याख्याति । अर्थः स्पष्टः । श्रीहर्षचरिताद्याख्यायिका ।

महाकाव्यनिरूपणानन्तरं क्षुद्रकाव्यस्वरूपनिरूपणं प्रतिजानीते । अथेत्यादि । येनेत्याद्येकं प्रकरणम् । ग्रन्थस्य अकृतेऽपि व्याख्याने विस्तराद्बिभ्यता कविनानुदाहृतत्वाच्च स्फुटतरोऽर्थः प्रतीयते । ततोपि स एव यथामत्यर्थो द्रष्टव्यः ।

इति प्रतापरुद्रीयव्याख्याने रत्नशाणाख्याने काव्यस्वरूपनिरूपणं
नाम द्वितीयं प्रकरणम् ॥

NOTES.

NÂYAKA-PRAKARAṆA.

४. पूर्वेभ्यो भामहादिभ्यः—Bhâmaha is one of the old Âlankârikas and is quoted in many works as can be seen in the foot-notes on his work given in one of the Appendices. His name is similarly mentioned first in Râjânakaruyyaka's Alankâra-sarvasva—'इह हि तावद्भामहोद्भटप्रभृतयश्चिरन्तनालंकारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतयालंकारपक्षनिक्षिप्तं मन्यन्ते ।' p. 3.

चिरेण चरितार्थोऽभूत्—It will be seen that the Ratnas'âṇa gives this verse after the next verse रसप्रवानाः शब्दार्थाः &c.

५-६ यद्वेदात् प्रभुसंमितादधिगतम्—वेद is called प्रभुसंमित (like a lord), पुराण, सुहृत्संमित (like a friend) and काव्यश्री, कान्तासंमिता (like a beloved) on account of the anthoritative, friendly and delicate manner in which they advise people to secure good and avoid evil. *cf.* the following from Vidyâdhara's Ekâvalî:—

शब्दप्रधानं वेदाख्यं प्रभुसंमितमुच्यते ।
ईषत्पाठान्यथापाठे प्रत्यवायस्य दर्शनात् ॥ ४ ॥
इतिहासादिकं शास्त्रं मित्रसंमितमुच्यते ।
अस्यार्थवादरूपत्वात् कथ्यतेऽर्थप्रधानता ॥ ५ ॥
ध्वनिप्रधानं काव्यं तु कान्तासम्मितमीरितम् ।
शब्दार्थौ गुणतां नीत्वा व्यञ्जनप्रवणं यतः ॥ ६ ॥

परिवड्डइ विण्णाणं—This is a stanza quoted from सेतुबन्धमहाकाव्य of प्रवरसेन p. 9. It is also quoted by Mallinâtha in the Tarala on the Ekâvalî of Vidyâdhara. *Vide* my edition of the work in the Bombay Sanskrit Series p. 17.

विढप्पंति is the reading in the सेतुबन्ध instead of विसप्पंति. विढप्पंति means अर्ज्यन्ते, i. e. are obtained. 'अर्जेर्विढप्पः' ८।४।२५१, Hemachandra's Prâkṛita Grammar. For अर्ज्यते three forms are given by Hemachandra:—विढप्पइ, विढविज्जइ and अज्जिज्जइ. *cf.*

जेहि विढप्पइ कित्ती विढविज्जइ जेहि उज्जलं नाणं ।
अज्जिज्जइ जेहि सिरी सव्वेहि वि तेहि झायव्वा ॥

That is,

यैः अर्ज्यते कीर्त्तिः अर्ज्यते यैः उज्ज्वलं ज्ञानम् ।
अर्ज्यते यैः श्रीः सर्वैरपि तैः ध्यातव्या ॥

The adjective ध्यातव्या refers to श्रुतदेवी that manifested herself to Kumârapâla. *Vide* कुमारपालचरितम् (B. S. Series) p. 253, Canto VII. verse 88.

११. आदिराजयशोबिम्बम् &c., is from Daṇḍin's Kâvyâdarśa, 1st Parichchheda, 5th verse.

उपश्लोक्यस्य माहात्म्यात् &c. is given as a verse of Bhâmaha. It is not, however, found in the manuscript copy of Bhâmaha with me.

गुणालंकारचारुत्वप्रयुक्तम् &c. is not found in उद्भटालंकारसारसंग्रह with the commentary of प्रतीहारेन्दुराज of which there is a manuscript in the Deccan College collection. It must be in a bigger work composed by him or in his commentary on Bhâmaha.

Udbhaṭa was Sabhâpati of Jayâpîḍa, king of Kâśmîra who was son of Vappiya and who learned grammar from Kshirâbdhi. *cf.* Râjataraṅgiṇî by Kalhaṇa.

' शान्तेऽथ संग्रामापीडे कनीयान् वप्पियात्मजः ।
राजा श्रीमान् जयापीडः प्राप राज्यं ततः क्रमात् ॥ ४ तरङ्ग ४०२ श्लो.
' देशान्तरादागमय्य व्याचक्षाणः क्षमापतिः ।
प्रावर्त्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ॥
क्षीराभिधाच्छब्दविद्योपाध्यायात् संभृतश्रुतः ।
बुधैः सह ययौ वृद्धिं स जयापीडपण्डितः ॥' ४-४८८-४८९.
विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः ।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्तुः सभापतिः ॥' ४-४९५.

Udbhaṭa has composed a commentary on Bhâmaha's work, called Bhâmahavivaraṇa to which reference is made by Pratîhârendurâja in his commentary called Udbhaṭâlaṅkârasârasaṅgrahalaghuvṛitti as under:—

विशेषोक्तिलक्षणे च भामहविवरणे भट्टोद्भटेन एकदेशशब्द एवं व्याख्यातो यथेहास्माभिर्निरूपितः ।

रुद्रभट्टेनापि कथितम्—Rudrabhṭṭa is different from Rudraṭa author of Kâvyâlaṅkâra. Rudrabhaṭṭa is the author of Sṛiṅgâratilaka.

प्रपञ्चितं च साहित्यमीमांसायाम्—साहित्यमीमांसा is a work on Alaṅkâra quoted by Râjânaka Ruyyaka in his Alaṅkâra-sarvasva as under:—

यथा (उत्प्रेक्षा) च समस्तोपमाप्रतिपादकविषयेऽपि हर्षचरितवार्तिके साहित्यमीमांसायां च तेषु तेषु प्रदेशेषूदाहृता । इह तु ग्रन्थविस्तरभयान्न प्रपञ्चिता । p. 61 अलंकारसर्वस्व.

१२. महाकुलनितोज्ज्वलम् &c.—The author enumerates a few of the qualities of the Nâyaka or hero. Different authors give different lists of his qualities.

Daśarûpaka of Dhanañjaya has the following in the 2nd Prakâśa:—

'नेता विनीतो मधुरस्त्यागी दक्षः प्रियंवदः ।
रक्तलोकः शुचिर्वाग्मी रूढवंशः स्थिरो युवा ॥ १ ॥
बुद्ध्युत्साहस्मृतिप्रज्ञाकलामानसमन्वितः ।
शूरो दृढश्च तेजस्वी शास्त्रचक्षुश्च धार्मिकः ।
भेदैश्चतुर्धा ललितशान्तोदात्तोद्धतैरयम् ॥ २ ॥

Bhoja in his Sarasvatîkaṇṭhâbharaṇa enumerates twelve qualities as under—

महाकुलीनतौदार्यं महाभाग्यं कृतज्ञता ।
रूपयौवनवैदग्ध्यशीलसौभाग्यसंपदः ॥
मानितोदारवाक्यत्वमदरिद्रानुरागिता ।
द्वादशेति गुणानाहुर्नायकेष्वाभिगामिकान्' ॥ 5th Pari. ver. 23-24.

Viśvanâtha in his Sâhityadarpaṇa gives eight Sâttvika qualities as under:—

शोभा विलासो माधुर्यं गाम्भीर्यं धैर्यतेजसी ।
ललितौदार्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥ 3rd Pari. ver. 89.

Also

त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही ।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता ॥ 3rd Pari. ver. 64.

Rudraṭa gives the following sixteen qnalities essential to a Nâyaka:—

रत्युपचारे चतुरस्तुङ्गकुलो रूपवानरुङ् मानी ।
अग्राम्योज्ज्वलवेषोऽनुल्वणचेष्टः स्थिरप्रकृतिः ॥
सुभगः कलासु कुशलस्तरुणस्त्यागी प्रियंवदो दक्षः ।
गम्यासु च विस्रम्भी तत्र स्यान्नायकः ख्यातः ॥ काव्या० १२–७–८.

११. श्लाघालङ्घनजाङ्घिकैर्गुणनिधिः श्रीवीररुद्रो नृपः—

The same expression श्लाघालङ्घनजाङ्घिक occurs in the following:-
शाणोत्कीर्णमिवोज्ज्वलद्युति पदं बन्धोऽधनारीश्वर—
श्लाघालङ्घनजाङ्घिको दिवि लतोद्भिन्नैव चार्थोद्गतिः ।

and also in

विश्वोल्लङ्घनजाङ्घिकीं वितनुते कीर्तिं विधत्ते श्रियम् ।

See my edition of Vidyânâtha's Ekâvalî. pp. 18 and 16.

२१ महासत्त्वोऽतिगम्भीरः--

Viśvanâtha's definition runs as under:—

अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः ।
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः ॥ ३।६६

Dhanañjaya's definition is exactly similar :—

महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः ।
स्थिरो निगूढाहंकारो धीरोदात्तो दृढव्रतः ॥ दशरूप २।४

२१ दर्पमात्सर्यभूयिष्ठः—

cf. मायापरः प्रचण्डश्चपलोऽहंकारदर्पभूयिष्ठः ।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः ॥ साहि०द० ३।६७
दर्पमात्सर्यभूयिष्ठो मायाछद्मपरायणः ।
धीरोद्धतस्त्वहंकारी चलश्चण्डो विकत्थनः ॥ दश० २–५

निश्चिन्तो धीरललितः--

निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात् ॥ साहि० ३।६८
निश्चिन्तो धीरललितः कलासक्तः सुखी मृदुः । दश०२–२

२१ धीरः शान्तः—

cf. सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात् । साहि० ३।६९
सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः । दश० २।३

The definitions of the four varieties of the hero of a poetic composition given in the text are, as will be seen, almost similar in language to those of Dhanañjaya in the Daśarûpa.

Bharata states that the धीरोद्धत hero is generally a god, the धीरललित, a king, the धीरादात्त, a commander or a counsellor and the धीरप्रशान्त, a brâhmin or a baniâ:—

देवा धीरोद्धता ज्ञेयाः स्युर्धीरललिता नृपाः ।
सेनापतिरमात्याश्च धीरोदात्ताः प्रकीर्तिताः ॥
ब्राह्मणा वणिजश्चैव प्रोक्ता धीरप्रशान्तकाः ॥ नाट्यशा० २४।४–५

On these verses of Bharata the following gloss of Hemachandra given in his Kâvyânuśâsana and the remarks of Dhanika in his Avaloka on Daśarûpa which seem to have been copied by Hemachandra making slight changes like धीरोद्धतादि for धीरललितादि are worth noting :—

देवा धीरोद्धता इति । अत्र हि 'धीरोदात्तं जयति चरितं रामनाम्नश्च विष्णोः' इत्यादेर्दर्शनाज्जनकप्रभृतीनां रामादीनां च न धीरललितत्वानुचितत्वमिति धीरललितत्वं राज्ञ एव वर्णनीयं नान्यस्य । सेनापत्यमात्ययोर्धीरोदात्तत्वमेव द्विजादीनां धीरप्रशान्तत्वमेवेत्येवंपरं व्याख्येयम् ।' काव्यानुशासन 7 th अध्याय.

'धीरललितादिशब्दाश्च यथोक्तगुणसमारोपितावस्थाभिधायिनो वत्सराजममहोक्षादिवन्न जात्या कश्चिदवस्थितरूपो ललितादिरस्ति । तत्त्वे हि महाकविप्रबन्धेषु विरुद्धानेकरूपाभिधानमसंगतमेव स्याज्जातेरनपायित्वात् । तथा च भवभूतिनैक एव जामदग्न्यः

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये ।
जामदग्न्यश्च वो मित्रमन्यथा दुर्मनायते ॥

इत्यादिना रावणं प्रति धीरोदात्तत्वेन ।

कैलासोद्धारसारत्रिभुवनविजयौजित्यनिष्णातदोष्णः
पौलस्त्यस्यापि हेलोपहतरणमदो दुर्दमः कार्तवीर्यः ।
यस्य क्रोधात् कुठारप्रविघटितमहास्कन्धवन्धस्थवीयो-
दोःशाखादण्डमुण्डस्तरुरिव विहितः कुल्यकन्दः पुराभूत् ॥ महा० । २।१६

इत्यादिभिश्च रामादीन् प्रति प्रथमं धीरोद्धतत्वेन पुनः

पुण्या ब्राह्मणजातिरन्वयगुणः शास्त्रं चरित्रं च मे
येनैकेन हतान्यमूनि हरता चैतन्यमात्रामपि ।
एकः सन्नपि भूरिदोषगहनं सोऽयं त्वया प्रेयसा
वत्स ब्राह्मणवत्सलेन शमितः क्षेमाय दर्पामयः ॥ महा० ४।२२

इत्यादिभिश्च धीरशान्तत्वेनोपवर्णितः । न चावस्थान्तराभिधानमनुचितम् । अङ्गभूतनायकानां नायकान्तरपेक्षया महासत्त्वोदरव्यवस्थितत्वात् । अङ्गिनस्तु रामादेरेकप्रबन्धोपातान् प्रत्येकरूपत्वादारम्भोपात्तावस्थातोऽवस्थान्तरोपादानमन्याय्यम् । यथोदात्तत्वाभिमतस्य रामस्य छद्मना वालिवधादमहासत्त्वतया स्वावस्थापरित्याग इति । वक्ष्यमाणानां च दक्षिणाद्यवस्थानां 'पूर्वा प्रत्यन्यया हृतः' (in 'दक्षिणः शठो धृष्टः पूर्वा प्रत्यन्यया हृतः') इति नित्यसापेक्षत्वेनाविर्भावादुपात्तावस्थातोऽवस्थान्तराभिधानमङ्गाङ्गिनोरप्यविरुद्धम् ॥ अवलोक on दशरूप २।५.

अथ शृङ्गारविषयाः—The four varieties of the hero might represent all the poetic sentiments. When they exhibit the śriṅgâra or the erotic sentiment they are each further divided into four sub-varieties, अनुकूल, दक्षिण, धृष्ट and शठ. The following definitions of these sub-varieties represent their characteristics clearly:—

एवं स चतुर्धा स्यादनुकूलो दक्षिणः शठो धृष्टः ।
तत्र प्रेम्णः स्थैर्यादनुकूलोऽनन्यरमणीकः ॥
खण्डयति न पूर्वस्यां सद्भावं गौरवं भयं प्रेम ।
अभिजातोऽन्यमना अपि नार्यां यो दक्षिणः सोऽयम् ॥
वक्ति प्रियमभ्यधिकं यः कुरुते विप्रियं तथा निभृतम् ।
आचरति निरपराधवदसरलचेष्टः शठः स इति ॥
कृतविप्रियोऽप्यशङ्को य स्यान्निर्भर्त्सितोऽपि न विलक्षः ।
प्रतिपादितेऽपि दोषे वक्ति च मिथ्येत्यसौ धृष्टः ॥
रुद्रट's काव्यालंकार १२।९—१२.

२७. किंचिदूनः पीठमर्दः—The assistance of a hero in securing a mistress are पीठमर्द, विट, चेट and विदूषक. Of these पीठमर्द is a little short of a hero in his qualities. He is the hero of minor incidents in the plot of a drama, a पताकानायक as he is called. Viśvanâtha defines him as under:—

दूरानुवर्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु ।
किंचित्तद्गुणहीनः सहाय एवास्य पीठमर्दाख्यः ॥ साहि० ३।७६

Makaranda in the Mâlatimâdhava and Sugrîva in the Râmâyaṇa are such subordinate heroes.

विट and विदूषक are defined as under:—

संभोगहीनसंपद् विटस्तु धूर्तः कलैकदेशज्ञः ।
वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्याम् ॥

कुसुमवसन्ताद्यभिधः कर्मवपुर्वेषभाषाद्यैः ।
हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञः ॥ साहि० ३।७८–७९

Rudraṭa describes पीठमर्द, विट and विदूषक as three नर्मसचिव's or assistants in amorous sports. Agnipurâṇa also describes them similarly :—

पीठमर्दो विटश्चैव विदूषक इति त्रयः ।
शृङ्गारे नर्मसचिवा नायकस्यानुनायकाः ॥

The sixteen varieties and sub-varieties of a hero are further sub-divided into उत्तम, मध्यम and अधम by Vis'vanâtha. There are thus 48 divisions of a hero according to him :—

एषां च त्रैविध्यात् सर्वेषामुत्तममध्याधमत्वेन ।
उक्ता नायकभेदाश्चत्वारिंशत् तथाष्टौ च ॥ साहि० ३।७५

११ कामशास्त्रप्रसिद्धाः पद्मिनीचित्रिणीप्रभृतयो जातिविशेषाः—
पद्मिनी, चित्रिणी, शङ्खिनी and हस्तिनी are defined as under in रतिमञ्जरीः—

भवति कमलनेत्रा नासिकाक्षुद्ररन्ध्रा
अविरलकुचयुग्मा चारुकेशी कृशाङ्गी ।
मृदुवचनसुशीला गीतवाद्यानुरक्ता
सकलतनुसुवेशा पद्मिनी पद्मगन्धा ॥
भवति रतिरसज्ञा नातिखर्वा न दीर्घा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी ।
घनकठिनकुचाढ्या सुन्दरी बद्धशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा ॥
दीर्घातिदीर्घनयना वरसुन्दरी या
कामोपभोगरसिका गुणशीलयुक्ता ।
रेखात्रयेण च विभूषितकण्ठदेशा
संभोगकेलिरसिका किल शङ्खिनी सा ॥
स्थूलाधरा स्थूलनितम्बबिम्बा
स्थूलाङ्गुलिः स्थूलकुचा सुशीला ।
कामोत्सुका गाढरतिप्रिया च
नितान्तभोक्त्री खलु हस्तिनी स्यात् ॥

उदयद्यौवना मुग्धा—

The following are the definitions explaining fully the characteristics of मुग्धा, मध्या and प्रौढा—

प्रथमावतीर्णयौवनमदनविकारा रतौ वामा ।
कथिता मृदुश्च माने समधिकलज्जावती मुग्धा ॥
मध्या विचित्रसुरता प्ररूढस्मरयौवना ।
ईषत्प्रगल्भवचना मध्यमव्रीडिता मता ॥
स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका ॥ साहि० द० ३-९९-१०१

The following tree represents the sixteen divisions of a नायिका. These sixteen varieties are each sub-divided into eight sub-varieties, according as they are स्वाधीनपतिका, वासकसज्जिता, विरहोत्कण्ठिता, विप्रलब्धा, खण्डिता, कलहान्तरिता, प्रोषितभर्तृका and अभिसारिका. Thus there are eight times sixteen or one hundred and twenty-eight varieties, each of which is again sub-divided into उत्तम, मध्यम and अधम, making up altogether 384 varieties.



The following definitions show the characteristics of मध्या धीरा and other sub-varieties:—

धीरा सोत्प्रासवक्रोक्त्या मध्या साश्रु कृतागसम् ।
खेदयेद्दयितं कोपादधीरा परुषाक्षरम् ॥ द० रू० २ । १६

Thus when the hero is guilty, the middling patient heroine would pain him by her joking and ironical speeches, the middling impatient heroine, by harsh words through anger, while the middling heroine who is at once patient and impatient would pain the hero by her joking and ironical words accompanied by tears.

सावहित्थादरोदास्ते रतौ धीरेतरा क्रुधा ।
सन्तर्ज्य ताडयेन्मध्या मध्याधीरेव तं वदेत् ॥ द० रूप० २।१८.

The same idea is expressed more clearly by the following:—

प्रगल्भा यदि धीरा स्याच्छन्नकोपाकृतिस्तदा ॥
उदास्ते सुरते तत्र दर्शयन्त्यादरान् बहिः ॥
धीराधीरा तु सोल्लुण्ठभाषितैः खेदयेदमुम् ॥
तर्जयेत् ताडयेदन्या——साहि० दर्प० ३।१०४–५

Thus the mature patient heroine disguises her anger, shows outward courtesy and remains indifferent about amorous sport; the mature impatient heroine goes to the length of scolding and beating the hero; while the mature heroine who is at once patient and impatient acts like the middling heroine who is at once patient and impatient and simply pains the hero by her ironical speeches.

३८. एष संग्रहश्लोकः—This refers to the verse गुणालंकाराणां रसमहति काव्ये विलसितम् &c. which summarizes what is mentioned before.

४०. श्रुत्वा रुद्रनरेश्वरस्य महतो भीतः प्रलापाकुलः—Another reading is पलाय्याकुलः which is undoubtedly the better of the two readings. It is not adopted because it was found only in T., the text printed in Telugu characters. It is found in one of the Mss. also, secured after the text was printed.

एवंविधवर्णनमुत्पाद्यनायके न घटते—स्वतःसिद्धोत्पाद्यत्वभेदेन नायकद्वैविध्यमपि संभवति—

A काव्य is divided into उत्पाद्य and अनुत्पाद्य according as it is partly or wholly the poet's own creation or is founded upon a mythological or historical basis.

सन्ति द्विधा प्रबन्धाः काव्यकथाख्यायिकादयः काव्ये ।
उत्पाद्यानुत्पाद्या महल्लघुत्वेन भूयोऽपि ॥
तत्रोत्पाद्या येषां शरीरमुत्पादयेत् कविः सकलम् ।
कल्पितयुक्तोत्पत्तिं नायकमपि कुत्रचित् कुर्यात् ॥
पञ्चरमितिहासादिप्रसिद्धमखिलं तदेकदेशं वा ।
परिपूरयेत् स्ववाचा यत्र कविस्ते त्वनुत्पाद्याः ॥ काव्यालंकार १६।२–४.

Thus when the poet takes up a well-known hero and creates his history by his own imagination as in Mâghakâvya or when he creates the hero also as in Kâdambarî, the poem is उत्पाद्य. But when he takes a mythological story wholly or partly and describes it in his own language, enlarging upon it, as in Kirâtârjunîya, the poem is अनुत्पाद्य.

A hero also is similarly called उत्पाद्य and अनुत्पाद्य or स्वयंसिद्ध according as he is the poet's own creation, or a mythological or historical character.

KÂVYAPRAKARAṆA.

४४-४५ गौणवृत्तिरपि लक्षणाप्रभेद एव--The Mîmâṁsakas look upon गौणी as a separate power of words; while the Naiyâyikas look upon it as a variety of लक्षणा. 'शक्तिलक्षणाभ्यामतिरिक्तैव गौणी वृत्तिरिति मीमांसकाः । सा च तदतिरिक्ता नेति नैयायिका आहुः ।' न्यायसिद्धान्त म० प्र०. अग्निर्माणवकः, which means Mâṇavaka, characterised by yellowness, brilliancy and other qualities of fire, is an instance of गौणी, while गङ्गायां घोषः, which means a shepherd's hut on the bank of the Ganges, is an instance of लक्षणा. Vidyâ. nâtha proves that गौणी is not a separate वृत्ति, but a variety of लक्षणा; for both are based upon संबन्ध or connection of the principal meaning with the secondary or implied meaning and अनुपपत्ति or inapplication of the primary sense. In अग्निर्माणवकः the primary sense of अग्नि is inapplicable; for Mâṇavaka is

not fire. In गङ्गायां घोषः similarly the primary sense of गङ्गा viz., the current of the river, is inapplicable; for there can be no hut on it. Thus in गौणी and लक्षणा both there is अनुपपत्ति or मुख्यार्थबाध. In both there is संबन्ध or मुख्यार्थयोग. In अग्निर्माणवकः अग्नि means अग्निसादृश्यविशिष्ट, characterised by the similarity of fire; similarly in गङ्गायां घोषः गङ्गायां means गङ्गासंबन्धविशिष्टतीरे, or on the bank characterized by the connection of the Ganges. If, on the contrary, we understand गङ्गायां to mean गङ्गासंबन्धोपलक्षिततीरे, that is, on the bank marked (not invariably characterised, but marked now and then as Devadatta's house by a crow), the purity, coolness &c., suggested by implication in the hut, on account of the bank being always characterized by the connection of the Ganges will not be proved and then there would be no difference between गङ्गायां घोषः and गङ्गातीरे घोषः. But a difference there undoubtedly is between the two expressions; for in the first the तीर is identified with the गङ्गाप्रवाह and the idea of purity, coolness &c. of the hut is suggested. While in the second no such idea is suggested. Therefore गङ्गायां घोषः does not mean गङ्गासंबन्धोपलक्षिततीरे घोषः, but गङ्गासंबन्धविशिष्टतीरे घोषः. Thus in गौणी and लक्षणा both, there is संबन्ध or rather विशेषणविशिष्टयसंबन्ध and consequently there is no difference between लक्षणा and गौणी.

काकेन देवदत्तगृहम् is an instance of उपलक्षण. प्रयोगकाले गृहे काकासत्त्वेऽपि यदाकदाचित् काकसमवधानेऽपि पूर्वोपस्थितकाकस्मरणेन देवदत्तगृहं विज्ञायते इति काकस्योपलक्षणत्वमिति बोध्यम् । न्या० को० p. 151. In this sense उपलक्षण is synonymous with तटस्थलक्षण or that property of a thing which is distinct from its nature or by which it is recognized A crow is not always found on the house of Devadatta, and is not thus its distinguishing characteristics, but the house is recognized, because the crow is remembered to have been seen there.

५२-५४. वाहिन्यः काकतीन्द्रस्य—लौकिकवाक्यानाम्–

When in a verse notwithstanding that words have their expressed (वाच्य) sense restricted by context (प्रकरण) and other restricting agents of which a list is given by Hari in

in the verses 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता' &c. another sense is conveyed by them, it is the suggested (व्यङ्ग्य) sense and the verse, an instance of शब्दशक्तिमूलध्वनि. In the verse वाहिन्यः काकतीन्द्रस्य the sense of वाहिनी and कबन्ध is restricted by context to an army and a headless trunk respectively. Another sense, however, namely a river and water comes out. This is due to another power of words called व्यञ्जना ; and as this power in this case depends upon the very words वाहिनी and कबन्ध and would cease to exist with the substitution of synonymous words like नदी and जल, the व्यञ्जना or ध्वनि is शब्दशक्तिमूल. The expressive power of words (अभिधा) stops or ends when the sense bearing on the context is conveyed. It is not compe-tent to convey the sense that has no bearing on the context and this sense *is* intended by the speaker to be conveyed to give a charm to the sentence. What then is the power that conveys this अप्राकरणिक sense? It is not अभिधा , as we have seen; for though it is competent to convey more than one meaning, संयोग, or some other restricting agent limits the word to one particular sense. Nor can this power be called implication (लक्षणा), for there is no मुख्यार्थबाध or inapplication of the primary or expressed sense. The power therefore is व्यञ्जना. Nor can it be objected that because two powers अभिधा and व्यञ्जना are at work in conveying two senses, वाच्य and व्यङ्ग्य, there are two different sentences unconnected with each other; for all human sentences or sentences other than the Vedas which are superhuman (अलौकिक) are dependent upon the desire of the speaker and the desire of the speaker is to convey the suggested sense.

The difference between शब्दशक्तिमूलध्वनि and श्लेष is dealt with in the अलंकारप्रकरण. According to Vidyânâtha श्लेष is either प्रकृत-विषय, or अप्रकृतविषय, or उभयविषय. That is, the two meanings conveyed are either both प्रकृत, or both अप्रकृत, or one of them प्रकृत and the other अप्रकृत. The last variety, viz., when one of the two meanings is प्रकृत and the other अप्रकृत, is not accepted by Mammaṭa, Vidyâdhara and others as a variety of श्लेष.

Vidyâdhara says, 'किं चास्मिन् वाच्यत्वं विशेष्ययोस्तुल्ययोरेव' (*Vide* Ekâvalî p. 259). This is regarded by them as श्लेषोपमा. Ruyyaka accepts this kind of श्लेष and Vidyânâtha follows Ruyyaka. Mallinâtha in his Tarala criticizes Ruyyaka as under:—

'ननु विशेष्ययोः पृथङ्निर्देशे विशेषणमात्रसाम्ये प्रकृताप्रकृतश्लेष इत्यन्यैरुक्तं किं नेष्यते । तत्रोपमादीपकाद्यलंकारान्तरावरोधे श्लेषस्य प्रतिभासमात्रसारत्वात् । ननु गुणक्रियासाम्यवच्छब्द-साम्यमुपमायां प्रयोजकमपि तूपमाप्रतिभोत्पत्तिहेतुः श्लेष एवायम् । अन्यथात्रापि विविक्तविषया-लाभात् सर्वत्रैवास्य बाधः स्यात् ततो निरवकाशत्वात् सर्वालंकारापवादोऽयमित्यलंकारसर्वस्वकार इति चेन्न । पूर्वोक्तभेदद्वयेऽस्यावकाशत्वात् । न च तत्रापि तुल्ययोगिताद्यवकाशः तत्र विशेष्यश्लेषाभावात् । तस्माद् द्विविध एव श्लेष इति सिद्धम् ॥'

Jagannâtha also accepts the third variety of श्लेष, viz. प्रकृताप्रकृतश्लेष. The difference between the third variety of श्लेष and शब्दशक्तिमूलव्यञ्जना is that in the latter the विशेष्य is also श्लिष्ट and there is no expressed उपमा.

Compare

विजितारिपुरो मूर्तौ विलसत्सर्वमङ्गलः ।
राजमौलिः प्रतापाङ्करुद्रो रुद्र इव स्थितः ॥

and

विजितारिपुरो मूर्तौ विलसत्सर्वमङ्गलः ।
राजमौलिरसौ भाति रुद्रदेवो जगत्पतिः

The first verse is an instance of प्रकृताप्रकृतश्लेष and the second is an instance of शब्दशक्तिमूलध्वनि. The first adjective विजितारिपुरः of the second illustrates अर्थशक्तिमूलध्वनि also as shown further on in the text.

५८ अत्यर्थसुकुमारार्थसंदर्भा कैशिकी मता—In regard to Vṛittis and Rîtis the reader is referred to my notes on the Ekâvalî pp. 356-7 and 481-3. Vṛittis are styles of dramatic composition and may be included under Anuprâsas of different sorts and are favourable to the development of different sentiments. They are like movements of the body in acting rendered artificially beautiful or graced by dress, ornaments, decorations &c.—'शोभामाहार्यकीं प्राप्ता वृत्तयो वृत्तयो यथा' as Vidyâdhara states. Their origin is explained as under by Bharata in his Nâṭyas'âstra:—

Once when Vishṇu was asleep in the ocean on the snake, restraining all the worlds within himself by his Mâyâ, the demons Madhu and Kaiṭabha challenged him to fight, reviling him by their speech. Brahman, hearing their speeches of different kinds and their menaces, said, 'Has dramatic acting commenced with speech? Kill him.' Hearing what Brahman said, Vishṇu replied, 'Oh Lord! this speech is created by me with a purpose. Let them go on speaking; this speech will increase and become Bhâratî. I shall kill the demons to-day'. Saying so, Vishṇu fought with the demons, jesticulating his body in various ways. When Hari placed his feet on the ground, the earth felt a great burden (भार) and thus Bhâratî was created there. By his movements brilliant, powerful (सत्त्वाधिकैः) and unconfused, Sâtvatî was created. The various sportive movements by which he tied his hair (केश), gave rise to Kais'ikî and his diverse modes of fighting, abounding in vehemance (संरम्भ) led to the creation of Ârabhaṭî. The movements of Vishṇu were worshipped by Brahman with prayers suitable to them. When Madhu and Kaiṭabha were killed by Vishṇu, Brahman said to him, 'Oh Lord! you have killed the demons by diverse, beautiful and clear movements of your body. Therefore in the discharge of all weapons, this mode of fighting in the world will be known as Nyâya. Because fighting was conducted by movements based on Nyâya, and arising from Nyâya, it will be called Nyâya.' Then Brahman placed the Vṛittis in the Vedas. Again in dramatic representations these were chosen, accompanied by various feelings and were called Vṛittis. Produced from the Nâṭyaveda and accompanied by vocal representations, they were thrown by me (Bharatamuni) in dramas at the command of Brahman for the purpose of the composition of poetry. (*Vide* Nâṭyaśâstra, Ch. XX.)

Vṛittis were thus movements of the body originally and then became movements of speech or styles of dramatic composition which are represented by such movements. The

following verse describes how the Vṛittis arose from the different Vedas:—

ऋग्वेदाद्भारती वृत्तिर्यजुर्वेदात्तु सात्त्विकी ।
कौशिकी सामवेदात्तु शेषा चाथर्वणात्तथा ॥ २०—२४

कौशिकी derives its name from कौशिक, the sentiment of love, or केशिन् Krishṇa; आरभटी from आरभ् which has the sense of संरंभ् or vehement beginning; सात्त्वती from सत्त्व or strength and भारती, from its being dear to भरत or actors. The following definitions from the Nâṭyas'âstra of Bharata explain their characteristics with derivations:—

या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंयुता या बहुनृत्तगीता ।
कामोपभोगप्रभवोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति ॥
प्रस्तावपातप्लुतलङ्घितानि छेद्यानि मायाकृतमिन्द्रजालम् ।
चित्राणि युद्धानि च यत्र नित्यं तां तादृशीमारभटीं वदन्ति ।
आरभटप्रायगुणा तथैव बहुकपटवञ्चनोपेता ।
दम्भानृतवचनवती त्वारभटी नाम विज्ञेया ॥
या सात्त्वतेनेह गुणेन युक्ता न्यायेन वृत्तेन समन्विता च ।
हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत्तु वृत्तिः ॥
या वाक्यप्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतवाक्ययुक्ता ।
स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः ॥

The Vṛittis in the above do not refer to mere dramatic style, but they also refer to dramatic machinery and representation of events on the stage .

६२-६३ वैदर्भ्यादिरीतीनाम्—This shows the difference between Vṛittis and Rîtis. The former reside in sense, while the latter in words. The former go to develop varions sentiments, while the latter residing in words independently of sense, simply bring abont delicacy or arrogance of style. Both refer to styles of composition, but the Vṛittis develop poetic sentiments, while the Ritis reside in Guṇas and simply make the style soft or harsh by their nature; by particular kinds of letters and their arrangement and by particular kinds of constructions of words. Rîtis bring about different kinds of poetic qualities or Guṇas and are thus said to reside in them

६९. ओजः कान्तिगुणोपेता—Kânti is freedom from vulgar expressions used by rustics. It is defined as 'औज्ज्वल्यम् कान्तिः' ३।२।२१ by Vâmana. Mammaṭa explains औज्ज्वल्यम् as ग्राम्यपदाघटितत्वम्.

६७. या पदानां परान्योन्यमैत्री—शय्या is the repose of words in their mutual favourableness like the repose of the body in a bed. The mutual friendship of words, so close that they cannot be replaced by their synonymes, constitutes what is called शय्या. It is thus the unchangeableness of words. In the stanza दातुः काकतिवंशमण्डनमणेः &c. the arrangement of words is such that their change would spoil the beauty of the poem. This therefore is शय्या.

In the Tarala on the Ekâvalî, Mallinâtha thus explains the word:—

पदानां परिवृत्तिवैमुख्यं विनिमयासहिष्णुत्वम् । एतदेव मैत्री शय्येति चाख्यायते । यथास्मदीयश्लोके चन्द्रोदयवर्णने ।

निशाकरकरस्पर्शान्निशाया निर्वृतात्मना ।
अमी स्तम्भादयो भावा व्यज्यन्ते रज्यमानया ॥

अत्र निशादिपदस्थाने क्षपादिपदान्तरप्रक्षेपे पदानां परस्परमैत्रीभङ्गः. ॥ (*Vide* my edition of the Ekâvalî pp. 22 and 23).

Mandâramaranda of S'rîkṛishṇakavi gives the following definition of शय्याः—

सा शय्या कीर्तिता मैत्री या पदानां परस्परम् ।
दाता जेता रणे त्राता भीतानां भाति भूपतिः ॥

In Agnipurâṇa शय्या is taken as syncnymous with मुद्रा which is given as one of the śabdâlaṅkâras.

शब्दालंकारमाहुरतान् काव्यमीमांसका विदः ।
छाया मुद्रा तथोक्तिश्च युक्तिर्गुम्फनया सह ॥
अभिप्रायविशेषेण कविशक्तिं विवृण्वती ।
मुत्प्रदायिनी सा मुद्रा सैव शय्यापि नो मते ॥ अग्निपु० ३४२–१९, २६

The definition is very indefinite. No instance is given to show clearly what is meant.

अतिक्रान्तेन कुत्रापि यदर्थे वर्णयोः क्वचित् ।
वाक्यार्थे वाक्ययोः क्वापि प्रकीर्णानां च दृश्यते ॥ स० कं० २-५४-५५

Bhoja in his Sarasvatîkaṇṭhâbharaṇa defines it as under. He also considers it as S'abdâlankâra.—

शय्येत्याहुः पदार्थानां घटनायां परस्परम् ।
सा प्रक्रान्तेन कस्मिंश्चिदप्रक्रान्तेन कुत्रचित् ॥

Ratnes'vara in his Ratnadarpaṇa explains it as under:—

किंचिदेकं वस्तु बुद्धौ समाधाय तदधिकारप्रबन्धरचनायामधिकस्यान्तरान्तराप्रकृते योजना शय्या ।

Bhoja in his Sarasvatîkaṇṭhâbharaṇa explains मुद्रा clearly, giving almost the same definition as the Agnipurâṇa:–

साभिप्रायस्य वाक्ये यद्वचसो विनिवेशनम् ।
मुद्रां तां मुत्प्रदायित्वात् काव्यमुद्राविदो विदुः ॥ स० कं० २–४०.

Ratnadarpaṇa on this is very good:—

यद्यपि संपूर्णमेव काव्यं वक्त्रभिप्रायप्रतिच्छन्दकमूतं उक्तं च 'वक्त्रभिप्रायं सूचयेयुः' इति तथापि नास्मिन्नितरसाधारणतया वाक्यार्थगोचरमभिप्रायमावेदयत्येव काव्यसनाथीकरणक्षमवक्त्रभिप्रायविशेषप्रतिरूपक एकदेशनिवेशो दृश्यते । अत एवाङ्गुलीयादिमुद्रेव मुद्रेत्युच्यते ।... मुद्रेव पदादिप्रकाश्यध्वनिव्यवहारभूमिरन्येषाम् ।

Thus according to Bhoja शय्या means the mutual arrangement of प्रस्तुत and अप्रस्तुत objects. It is brought about by the arrangement of प्रस्तुत with another प्रस्तुत matter, or of अप्रस्तुत matter with प्रस्तुत matter, or by the formation of what is past by the power of memory, or by the formation of a word from letters, or of a sentence from sentences, or by the formation of matters of a mixed character, not existing in one place or at one time.

The following is given as an instance of प्रकान्तघटनाः—

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीञ्ज्योतिर्मयान् सप्त सस्मार स्मरशासनः ॥

सेयं सप्तर्षीणामागमनस्य प्रक्रान्तस्यैव घटना ।

अप्रक्रान्तघटना is illustrated as under:—

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निषादस्य च संवादमृषेः संवरणस्य च ॥

सेयमप्रक्रान्तस्य निषादसंवरणसंवादस्य घटनादप्रक्रान्तघटना ।

The following is an example of अतिक्रान्तघटनाः—

तस्य चक्षुश्चमत्कारं व्यतीतसमया अपि ।
स्मितार्द्रमुकुलोद्भेदाः कदम्बवनराजयः ॥

इयमतिक्रान्तस्यापि कदम्बवनराजीनामार्द्रमुकुलोद्भेदस्य विरहिमनश्चमत्कारकारिणो रामस्य स्मृतिद्वारेण घटनादतिक्रान्तघटना ।

पदघटना and वाक्यघटना are illustrated as under:—

छिन्नेन पतता वह्नौ यन्मुखेन हठात् कृते ।
स्वेति हेति हरेणोक्ते स्वाहासीत् सैष रावणः ॥

इयं स्वेति हेति वर्णाभ्यां स्वाहेति पदस्य घटितत्वात् पदघटना ।

हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता ।
विभावितैकदेशेन देयं यदभियुज्यते ॥

इयं पूर्वशाखनिबद्धस्योत्तरार्धस्य तदर्थाननुयायिनापि प्रस्तुतार्थाविरुद्धेन पूर्वार्धेनैकवाक्यतयैव घटितत्वाद् वाक्यघटना ।

Finally प्रकीर्णघटना is beautifully illustrated by the following instance:—

एक्किंहिं अच्छिहिं सावणु अण्णहिं भद्दवउ
माहउ महिअलसत्थरि गण्डत्थल सरउ ।
अङ्गहिं गिह्म सुहच्छिइ तिलवण मग्गसिरु
मुद्धिहिं मुहपङ्कअसरि आवासिउ सिसिरु ॥
[एकस्मिन्नक्षिण श्रावणोऽन्यास्मिन् भाद्रपदः
माधवो महीतलस्रस्तरे गण्डस्थले शरत् ।
अङ्गे ग्रीष्मः सुखासिका तिलवने मार्गशीर्षः
मुग्धाया मुखपङ्कजसरसि आवासितः शिशिरः ॥]

अत्र श्रावणादीनामयुगपद्भावित्वेन विप्रकीर्णानां घटनादियं प्रकीर्णघटना ॥

It will be seen that the शय्या as understood by our author Vidyânâtha is less artificial and more charming than that of Bhoja. The last division, प्रकीर्णघटना, is according to later writers on rhetoric a kind of Atis'ayokti (अयोगेऽपि योगवाचका अतिशयोक्ति).

अर्थगम्भीरिमा पाकः—पाक is depth of sense. It is of various sorts and these varieties are brought about by different tastes of different poetic sentiments like varieties of food.

Vidyâdhara describes it as under:—

पाकस्तु रसोचितशब्दार्थनिबन्धनम् । श्रवणसुधास्यन्दिनी पदव्युत्पत्तिः पाक इत्यन्ये । पदानां परिवृत्तिवैमुख्यं पाक इत्यपरे । (*Vide* my edition of the Ekâvalî, p. 22). The last alternative पदानां परिवृत्तिवैमुख्यम् constitutes शय्या according to Vidyânâtha.

Bhoja calls it प्रौढि and enumerates it as a शब्दगुण. He defines it as under:—

उक्तेः प्रौढः परीपाकः प्रोच्यते प्रौढिसंज्ञया । स० कं० १–७७.

नालिकेरीपाक is thus explained by Ratnes'vara in the Ratnadarpaṇa:—

नालिकेरफलं पक्वं त्वचि काठिनं शिरास्वविवृतकोमलप्रायं कपालिकायां कठिनतरं तथा कश्चित् संदर्भो मुखे कठिनस्तदनन्तरं मृदुप्रायस्ततः कठिनतरो नालिकेरपाक इत्युच्यते।

मृद्वीकापाक or द्राक्षापाक is explained as under by the same commentator:—

यथा द्राक्षाफलं त्वच आरभ्य कोमलमन्तरा द्वित्रिचतुरास्थिसंपादितं किंचित्काठिन्यमेव कश्चित् संदर्भ उपक्रमोपसंहारयोः कोमल एव मध्ये कठिन एव। संयोगदीर्घस्वरमात्रकृतमनाक्कठोरभावो मृद्वीकापाक इत्युच्यते ।

These explanations refer to प्रौढि as a शब्दगुण. The पाक in the text is connected with depth of sense. This kind of पाक is described by Bhoja at the end of the fifth Parichchheda as under:—

पाकभक्तिष्वादावस्वाद्वन्ते स्वादु मृद्वीकापाकः । आद्यन्तयोः स्वादु नारिकेलीरीतिपाकः । ५–२५१–२५२.

पाकान्तराणि यथासंभवमूह्यानि—Ratneśvara mentions one such पाक, viz. सहकारपाक and explains it as under:—

यद्वत्र परिणतं सहकारफलमारम्भादेव कोमलमस्थनि तु कठोरप्रायमेवमपरः संदर्भो मुखादारभ्य मृदुरन्तरे कठिनतरः सहकारपाक इत्युच्यते । यथा

कमलिनि कुशलं ते सुप्रभातं रथाङ्गाः
कुमुदिनि पुनरिन्दावुद्गते त्वं रमेथाः ।

सखि रजनि गतासि त्वं ततो जीर्णमुच्चै-
रिति तरलितपक्षाः पक्षिणो व्याहरन्ति ॥

सुप्तिङ्व्युत्पत्तिलक्षणस्तु वार्ताकपाकः कैश्चिदुक्तः स तु सुशब्दतालक्षणगुण एव । कविकल्पलताकारादिभिरुक्तो नीलकपित्थपाको नास्ति ।

Therefore he says, तेऽमी त्रय एव शुद्धपाका व्यतिकरजन्मानस्तु भूयांसः ।

अथ ध्वनेर्लक्षणाभिधामूलत्वेन°—शाब्दगतोभयशक्तिमूलो ध्वनिः—

For the different divisions of ध्वनि and their explanation the reader is referred to my notes on the subject in my edition of the Ekâvalî pp. 413–419 and pp. 452 and 457–58 and pp. 464–5.

Vidyâdhara has divided असंलक्ष्यक्रमव्यङ्ग्यध्वनि into रस, भाव, रसाभास, भावाभास, भावशान्ति, भावोदय, भावसंधि and भावशबलता. Vidyânâtha calls असंलक्ष्यक्रमव्यङ्ग्यध्वनि रसादिध्वनि, that is, रसध्वनि, भावध्वनि and so on and sub-divides each into six varieties according as the ध्वनि is found in प्रबन्ध, वाक्य, पद, पदैकदेश, रचना or वर्ण.

There are, as shown and enumerated in the text, 51 varieties of शुद्धध्वनि. In regard to मिश्रध्वनि, it is said that these 51 divisions should be connected with each other. The first with itself and with each of the following 50 divisions leads to 51 mixed varieties, the second with itself and each of the following leads to 50 mixed varieties, the third to 49 mixed varieties and so on. The first mixed with the second and the second with the first and so on lead to the same mixed varieties. These sub-divisions are therefore disregarded. Thus there are in all 1,326 sub-divisions and each of these sub-varieties being again sub-divided into four classes by संसृष्टि and संकर of three kinds (by संदेह, अनुग्राह्यानुग्राहकत्व and एकव्यञ्जकानुप्रवेश), the total comes 5,304.

Mammaṭa, however, does not consider the sub-varieties omitted by Vidyânâtha (such as the combination of the first of the 51 pure varieties of ध्वनि with the second and the combination of the second with the first and so on) to be worth omitting. He has therefore 51×51×4 or 10,404 varieties of ध्वनि in all. Pradîpa on this is worth reading. It is as under:—

'अत्रावाचीनाः—" गणनेयमयुक्ता । अग्निमाग्रिमभेदस्य योजने एकैकभेदन्हासात् । तथा हि अर्थान्तरसंक्रमितवाच्यस्यात्यन्ततिरस्कृतवाच्येन योजने यो भेदः स एवात्यन्ततिरस्कृतवाच्यस्यार्थान्तरसंक्रमितवाच्येन योजनायाम् । एवमन्यत्रापि । तस्मात्

' एको राशिर्द्विधा स्थाप्य एकमेकाधिकं कुरु ।
समार्धेनासमो गुण्य एतत् संकलितं लघु ॥ '

इत्युक्तदिशा द्विपञ्चाशदर्धेन षड्विंशत्या एकपञ्चाशतं गुणयेत् । तथा च ' रसदस्राग्निभेदिभ्यः' इति त्रयोदशशतानि षड्विंशत्यधिकानि जायन्ते । योगश्चतुःप्रकार इति तेषु चतुर्भिर्गुणितेषु 'वेदाभ्रदहनेषवः ' इति पञ्चसहस्राणि चतुराधिकं शतत्रयं संकीर्णभेदा इत्येव न्यायः " इति वदन्ति ।

अत्र ब्रूमः—अनुभवसिद्धौ तावत् पुण्ड्रकादीक्षुरसेष्विव ध्वनिष्वपि हृद्यत्वातिशयानुशयौ । तथा चार्थान्तरसंक्रमितवाच्यस्य यत्रातिशयस्तत्रात्यन्ततिरस्कृतवाच्येन तद्योजनम् । यत्र तु तद्वैपरीत्यं तत्रात्यन्ततिरस्कृतवाच्यस्येतरेण योजनमिति व्यपदेशः । एवमन्यथाप्यूह्यम् । एतदेव प्राधान्यमादाय गणना सौत्री । नन्वेवं यत्रोभयोस्तुल्यमेव चारुत्वं तत्र भेदान्तरं स्यादिति । मैवम् । अपकर्षाभावस्यातिशयपदेन विवक्षितत्वात् तत्रोभयभेदसंकरस्वीकारात् । एतादृशे चास्थाने पदालम्बनमात्रमेव महत् पौरुषमिति सहृदयभावमास्थायालोचनीयमिति ।

९०. तथाचोक्तं शृङ्गारतिलके—

S'ṛiṅgâratilaka is a work on poetics by Rudrabhaṭa. There is a commentary on it called Rasataraṅgiṇî by Gopâlabhaṭṭa, mentioned in the commentary on p. 93.

९६. नगरार्णवशैलर्तुचन्द्राकोंदयवर्णनम्—

Vidyânâtha in describing a महाकाव्य follows Daṇḍin as will be seen from the following description of it given in the Kâvyâdarsa:—

सर्गबन्धो महाकाव्यमुच्यते तस्य लक्षणम् ।
आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् ॥
इतिहासकथोद्भूतमितरद्वा सदाश्रयम् ।
चतुर्वर्गफलोपेतं चतुरोदात्तनायकम् ॥
नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः ।
उद्यानसलिलक्रीडामधुपानरतोत्सवैः ॥
विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः ।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैरपि ॥
अलंकृतमसंक्षिप्तं रसभावनिरन्तरम् ।
सर्गैरनतिविस्तीर्णैः श्रव्यवृत्तैः सुसंधिभिः ॥

सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ।
काव्यं कल्पान्तरस्थायि जायेत सदलंकृति ॥

काव्या० १-१४-१९.

A comparison of the text with the above quotation will show clearly to what extent Sanskrit authors are open to the fault of plagiarism.

मन्त्रद्यूतप्रयाणाजि,° though not adopted in the text, being found only in one or two Mss. out of the Mss. consulted when the text was settled, is a better reading than the one adopted in the text, as it is the reading in the Kâvyâdarśa. It appears to be the reading intended by the author, since he shews further on that he has enumerated 18 topics of description and this number cannot be made up unless आजि is adopted as the reading.

एतेषामष्टादशानां वर्ण्यानां यैः कैश्चिदूनमपीष्यते—

cf. what is said by Daṇḍin:—

न्यूनमप्यत्र यैः कैश्चिदङ्गैः काव्यं न दुष्यति ।
यद्युपात्तेषु संपत्तिराराधयति तद्विदः ॥ काव्या० १–२०

गद्यपद्यमयं &c.

Champû is an artificial composition in which the same subject is continued through prose and verse. भोजचम्पू or चम्पूरामायण attributed to Bhoja, भारतचम्पू or चम्पूभारत by Anantakavi, नलचम्पू, दमयन्तीचम्पू or दमयन्तीकथा by Trivikramabhaṭṭa are some of the Champûs.

The following are some of the varieties of a काव्य enumerated by Ânandavardhana in his Dhvanyâloka:—

'यतः काव्यस्य प्रभेदा मुक्तकं संस्कृतप्राकृतापभ्रंशानिबद्धं संदानितकविशेषककलापककुलकानि पर्यायबन्धः परिकथा खण्डकथासकलकथे सर्गबन्धोऽभिनेयार्थमाख्यायिकाकथे इत्येवमादयः ।' ध्वन्या० ३-७.

Of these मुक्तक is a single stanza complete in itself. The stanzas of Amarus'ataka are instances of मुक्तक. In Agnipurâṇa it is thus defined:—

'मुक्तकः श्लोक एवैकश्चमत्कारक्षमः सताम् ।' अग्नि० ३३७-३६.

मुक्तक is also one of the four varieties of गद्य thus defined by Vis'vanâtha:—

वृत्तगन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।
भवेदुत्कलिकाप्रायं चूर्णकं च चतुर्विधम् ॥
आद्यं समासरहितं वृत्तभागयुतं परम् ।
अन्यद्दीर्घसमासाढ्यं तुर्यं चाल्पसमासकम् ॥ साहि० द० ६–३३०–३२.

When two stanzas are connected grammatically, they form संदानितक and three, four and five such stanzas form respectively विशेषक, कलापक and कुलक. Other writers call two stanzas forming a grammatical whole युग्म and three such stanzas संदानितक.

द्वाभ्यां तु युग्मकं संदानितकं त्रिभिरिष्यते ।
कलापकं चतुर्भिश्च पञ्चभिः कुलकं मतम् ॥

कुलक is the name given to five or more stanzas forming grammatical wholes. Some writers, however, use different words as under:—

एकः श्लोको मुक्तकं स्याद् द्वाभ्यां युगलकं स्मृतम् ।
त्रिभिर्गुणवती प्रोक्ता चतुर्भिस्तु प्रभद्रकम् ॥
बाणावली पञ्चभिः स्यात् षड्भिस्तु करहाटकः ॥

(*Vide* commentary on Kâvyâdars'a by Premachandratarkavâgîs'a, which is a good commentary.

Stanzas on one topic form पर्यायबन्धन—'अवान्तरक्रियासमाप्तावपि वसन्तवर्णनाद्येकवर्णनीयोद्देशेन प्रवृत्तः पर्यायबन्धः' लोचन on ध्वन्यालोक.

परिकथा–A continued description in various ways regarding one of the four ends of existence—'एकं च धर्मादिपुरुषार्थमुद्दिश्य प्रकारवैचित्र्येणानन्तवृत्तान्तवर्णनप्रकारा परिकथा' लोचन on ध्वन्या०

पर्यायेण बहूनां यत्र प्रतियोगिनां कथाः कुशलैः ।
श्रूयन्ते शूद्रकवज्जिगीषुभिः परिकथा सा तु ॥

This is परिकथा according to Hemachandra. *Vide* काव्यानुशासन 8th Adhyâya at the end in his gloss.

खण्डकथा is a short tale forming a portion of the entire description as a खण्डकाव्य is a short poem; while सकलकथा is a com-

plete tale—एकदेशवर्णना खण्डकथा । समस्तफलान्तेतिवृत्तवर्णना सकलकथा । द्वयोरपि प्राकृतप्रसिद्धत्वाद् द्वन्द्वेन निर्देशः । लोचन on ध्वन्या०.

Hemachandra defines it as under:—

ग्रन्थान्तरप्रसिद्धं यस्यामितिवृत्तमुच्यते विबुधैः ।
मध्यादुपान्ततो वा सा खण्डकथा यथेन्दुमती ॥ *Vide* 8th Adhyâya, gloss at the end.

Vâmana divides गद्य into वृत्तगन्धि, चूर्ण and उत्कलिकाप्राय. 'पातालतालुतलवासिषु दानवेषु' is given as an instance of वृत्तगन्धि, because a part of वसन्ततिलका metre is recognized in it. चूर्ण is defined as अनाविद्धललितपदम् which means having delicate words and no big compounds. 'अभ्यासो हि कर्मणां कौशलमावहति । न हि सकृन्निपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधाति.' उत्कलिकाप्राय is the reverse of चूर्ण. कुलिशशिखरखरनखरप्रचयप्रचण्डचपेटापाटितमत्तमातङ्गकुम्भस्थलगलन्मदच्छटाच्छुरितचारुकेसरभारभासुरमुखे केसरिणि' is given as an instance of it. See काव्या० सू० of वामन. १।३।२२-२५.

आख्यायिका and कथा are explained in different ways by different writers:—आख्यायिका उच्छ्वासादिना वक्त्रापरवक्त्रादिना च युक्ता । कथा तद्विरहिता । उभयोरपि गद्यबन्धस्वरूपतया द्वन्द्वेन निर्देशः । लोचन on ध्वन्या०

कथायां सरसं वस्तु गद्यैरेव विनिर्मितम् ।
क्वचिदत्र भवेदार्या क्वचिद्वक्त्रापवक्त्रके ।
आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्तनम् ॥

यथा कादम्बर्यादिः ।

आख्यायिका कथावत् स्यात् कवेर्वंशानुकीर्तनम् ।
अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित् क्वचित् ॥
कथांशानां व्यवच्छेदः आश्वास इति बध्यते ।
आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ।

यथा हर्षचरितादिः । साहि० द० ६-३३२-३६.

In Agnipurâṇa the following is the description of आख्यायिका and कथाः—

कर्तृवंशप्रशंसा स्याद् यत्र गद्येन विस्तरात् ।
कन्याहरणसंग्रामविप्रलम्भविपत्तयः ॥
भवन्ति यत्र दीप्ताश्च रीतिवृत्तिप्रवृत्तयः ।
उच्छ्वासैश्च परिच्छेदो यत्र या चूर्णकोत्तरा ।
वक्त्रं चापरवक्त्रं वा यत्र आख्यायिका स्मृता ॥

श्लोकैः स्ववंशं संक्षेपात् कविर्यत्र प्रशंसति ।
मुख्यस्यार्थावताराय भवेद् यत्र कथान्तरम् ॥
परिच्छेदो न यत्र स्याद् भवेद्वा लम्बकैः क्वचित् ।
सा कथा नाम तद्गर्भे निबध्नीयाच्चतुष्पदीम् ॥ ३३७–१३–१६.

Daṇḍin criticises writers who make divergent distinctions between आख्यायिका and कथा and is of opinion that they both belong to the same class of prose compositions.

अपादः पदसन्तानो गद्यमाख्यायिका कथा ।
इति तस्य प्रभेदौ द्वौ तयोराख्यायिका किल ॥
नायकेनैव वाच्यान्या नायकेनेतरेण वा ।
स्वगुणाविष्क्रिया दोषो नात्र भूतार्थशंसिनः ॥
अपि त्वनियमो दृष्टस्तत्राप्यन्यैरुदीरणात् ।
अन्यो वक्ता स्वयं वेति कीदृग्वा भेदलक्षणम् ॥
वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकम् ।
चिह्नमाख्यायिकायाश्चेत् प्रसङ्गेन कथास्वपि ॥
आर्यादिवत् प्रवेशः किं न वक्त्रापरवक्त्रयोः ।
भेदश्च दृष्टो लम्भादिरुच्छ्वासो वास्तु किं ततः ॥
तत् कथाख्यायिकेत्येका जातिः संज्ञाद्वयाङ्किता ।
अत्रैवान्तर्भविष्यन्ति शेषाश्चाख्यानजातयः ॥ काव्या० १–२३–२८.

Thus according to Daṇḍin कथा and आख्यायिका are synonymous and varieties such as खण्डकथा, परिकथा, कथानिका ('भयानकं सुखपरं गर्भे च करुणो रसः । अद्भुतोऽन्ते सुक्लृप्तार्थो नोदात्ता सा कथानिका ॥' अग्निपु० ३३७–२०) and such other divisions are to be disregarded.

Daṇḍin seems to be criticizing Bhâmaha as will seem from the following from Bhâmaha's work:—

प्रकृतानाकुलश्रव्यशब्दार्थपदवृत्तिना ।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता ॥
वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम् ।
वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च ॥
कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता ।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता ॥
न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि ।
संस्कृतं संस्कृता चेष्टा कथापभ्रंशभाक् तदा ॥

अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते ।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः ॥

९७ येन केनापि तालेन—Udâharaṇa is a sort of panegyric, part in prose and part in verse, beginning with the word जयति, composed in the Mâlini and other metres and abounding in alliteration. It opens with a charming verse in Mâlini and other metres. Then follow eight sentences in all the cases including the vocative, abounding in Anuprâsas and with a proper beat of time and winding up with an account of the poet's production.

The word is used by Kâlidâsa in his Vikramorvaśîya—' चारणेभ्यस्त्वदीयं जयोदाहरणं श्रुत्वा ' and in the Raghuvaṁśa—जयोदाहरणं बाह्वोर्गापयामास किन्नरान् '.

९८ भोगावली—The word is used by Mâgha in his Śiśupâlavadha 5-57 as under:—

स्पष्टं बहिःस्थितवतेऽपि निवेदयन्त-
श्चेष्टाविशेषमनुजीविजनाय राज्ञाम् ।
वैतालिकाः स्फुटपदप्रकटार्थमुच्चै-
र्भोगावलीःकलगिरोऽवसरेषु पेठुः ॥

कम्पमानाङ्कविरुदवर्णनप्रचुरोज्ज्वला—

Darpaṇakâra defines विरुद as गद्यपद्यमयी राजस्तुतिर्विरुदमुच्यते । साहि० द० ६-३३०.

९९ ताराणां संख्यया पद्यैर्युक्ता—

Mandâramaranda of Krishṇa has the same definitions of उदाहरण, चक्रवालक, भोगावली, विरुदावली and तारावली as are found in the text. Further, it mentions विश्वावली, रत्नावली and पञ्चाननावली and describes them as under:—

विश्वेषां संख्यया पद्यैर्युक्तो विश्वोदयो मतः ।
रत्नानां संख्यया पद्यैर्युक्ता रत्नावली मता ।
पद्यैश्च पञ्चभिर्युक्ता प्रोक्ता पञ्चाननावली ॥ 11th शे० बि० of म० म०.

The same work has the following remarks as regards the style to be adopted in these varieties of prose works:—

आख्यायिकायां शृङ्गारेऽप्युद्धता रचना मता ।
कथायां नाटकादौ च न रौद्रेऽप्यधिकोद्धताः ।
अन्येषु च प्रबन्धेषु रचना स्यात्ययोचितम् ॥

१०० चतुर्विधैरभिनयैः—Nâṭya is the imitation of the conditions of heroes, (Dhirodâtta &c.) and others by four kinds of représentations, gestural (आङ्गिक), vocal (वाचिक), extraneous (आहार्य i. e., by dress, ornaments and decoration) and internal (सात्त्विक, i. e., by the manifestation of the eight feelings called सात्त्विकभाव's described in the verse स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः) and is full of poetic sentiment. It is full of वाक्यार्थाभिनय or representation of the meanings of sentences; for poetic sentiments are found in sentences and not words. It abounds in सात्त्विक अभिनय. Nṛitya is full of feelings known as भाव and of पदार्थाभिनय, because feelings can be represented by words. It abounds in आङ्गिक अभिनय. Nṛitta is simple dancing without any representation, attended by ताल and लय, time in music. ताल is beating time in music. लय is either द्रुत (quick), or मध्य (middling), or विलम्बित (slow).

Dhanañjaya thus distinguishes between नाट्य, नृत्य and नृत्त:—

अवस्थानुकृतिर्नाट्यं रूपं दृश्यतयोच्यते ।
रूपकं तत्समारोपाद् दशधैव रसाश्रयम् ॥
अन्यद् भावाश्रयं नृत्यं नृत्तं ताललयाश्रयम् ।
आद्यं पदार्थाभिनयो मार्गो देशी तथा परम् ॥ दश० १–७, ९.

Dhanika's Avaloka on it is worth reading—काव्योपनिबद्धधीरोदात्ताद्यवस्थानुकारश्चतुर्विधाभिनयेन तादात्म्यापत्तिर्नाट्यम् । तदेव नाट्यं दृश्यमानतया रूपमित्युच्यते नीलादिरूपवत् । नटे रामाद्यवस्थारोपेण वर्तमानत्वाद्रूपकं मुखचन्द्रादिवदित्येकस्मिन्नर्थे प्रवर्तमानस्य शब्दत्रयस्य इन्द्रः पुरन्दरः शक्र इतिवत् प्रवृत्तिनिमित्तभेदो दर्शितः । रसानाश्रित्य वर्तमानं दशप्रकारकम् । .... । रसाश्रयान्नाट्याद् भावाश्रयं नृत्यमन्यदेव । तत्र भावाश्रयमिति विषयभेदान् नृत्यमिति नृतेर्गात्रविक्षेपार्थत्वेनाङ्गिकबाहुल्यात् तत्कारिषु च नर्तकव्यपदेशाल्लोकेऽपि चात्र प्रेक्षणीयकमिति व्यवहारान्नाटकादेरन्यन्नृत्यम् । ......नाटकादि च रसविषयम् । रसस्य पदार्थीभूतविभावादिकसंसर्गात्मकवाक्यार्थहेतुकत्वाद् वाक्यार्थाभिनयात्मकत्वं रसाश्रयमित्यनेन दर्शितम् । नाट्यमिति च नट अवस्यन्दन इति नटेः किंचिच्चलनार्थत्वात् सात्त्विकबाहुल्यम् । अत एव तत्कारिषु नटव्यपदेशः । यथा च गात्रविक्षेपार्थत्वे समानेऽप्यनुकारात्मकत्वेन नृत्तादन्यन्नृत्यं तथा वाक्यार्थाभिनयात्मकान्नाट्यात् पदार्थाभिनयात्मकमन्यदेव नृत्यमिति । तालश्चच्चत्पुटादिः । लयो द्रुतादिः । तन्मात्रापेक्षोऽङ्गविक्षेपोऽभिनयशून्यो नृत्तमिति । नृत्यं पदार्थाभिनयात्मकं मार्ग इति प्रसिद्धम् । नृत्तं च देशीति ॥

अभिनय is thus explained by Bharata:—

अभिपूर्वस्तु णीञ्धातुः पुरा मुख्यार्थनिर्णये ।
यस्मात् प्रयोगं नयति तस्मादभिनयः स्मृतः ॥
विभावयति यस्माच्च नानार्थान् हि प्रयोगतः ।
शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयः स्मृतः ॥ नाट्य०—८—६—७.

Jestural representation (अङ्गिकाभिनय) is called शाखा. It is subdivided into शारीर, मुखज and चेष्टाकृत. The six अङ्ग's and the six उपाङ्ग's are enumerated in the following stanza:—

तस्य शिरोहस्तोरःपार्श्वकटीपादतः षडङ्गानि ।
नेत्रभ्रूनासाधरकपोलचिबुकान्युपाङ्गानि ॥

सात्त्विक भाव's are perspiration, and others, enumerated above. They are so called because they are produced in a sympathetic heart by the complete oneness of the mind of the action with that of the character represented. Bharata thus explains it.—

किमन्ये भावाः सत्त्वेन नाभिनीयन्ते येनैते सात्त्विका उच्यन्ते । अत्रोच्यते—इह हि सत्त्वं नाम मनःप्रभवम् । तच्च समाहितमनस्त्वादुत्पद्यते । मनःसमाधानाच्च सत्त्वो निर्वृतिरिति । तस्य योऽसौ स्वभावो रोमाञ्चाश्र्वादिकृतः स न शक्यतेऽन्यमनसा कर्तुमिति । लोकस्वभावानुकरणाच्च नाट्यस्य सत्त्वमीप्सितम् । को दृष्टान्तः । इह हि नाट्यधर्मप्रवृत्ताः सुखदुःखकृतो भावास्तथा सत्त्वविशुद्धाः कार्या यथा सरूपा भवन्ति । दुःखं नाम रोदनात्मकं तत्कथमदुःखितेन सुखं च प्रहर्षात्मकं तत् कथं दुःखितेनाभिनेयम् । एतदेवास्य सत्त्वं यद्दुःखितेन सुखितेन चाश्रुरोमाञ्चौ दर्शयितव्याविति कृत्वा सात्त्विका भावा इत्यभिव्याख्या ।

It is similarly explained by Dhanika also. See my notes on the ' Ekâvalî ' pp. 422–23. The Ratnâpaṇa also explains it in the same way. The word is similarly explained in the text itself. p. 223.

१०४ संधिर्नामैकेन प्रयोजनेनान्वितानाम्—

The plot of a drama is divided into five parts called sandhis, so named because they are like the joints of the dramatic body. It is defined as the connection of parts of the dramatic story joined together by their tending towards the same end, with an intermediate end. There are five leading sources of the accomplishment of the grand object in a drama. They are called अर्थप्रकृति's, origins of the accomplishment of the grand object in a drama. There are five such sources, namely

बीज, बिन्दु, पताका, प्रकरी and कार्य. बीज is the source of the principal object in a drama ; it is a means for the accomplishment of the final aim, put forth a little, but developing in various ways; like a seed developing into a tree, while बिन्दु is the source of an intermediate object. It is the sudden development of a secondary incident and supplies important elements in the development of the plot. When the main object of the drama seems cut off as it were by intermediate objects, बिन्दु is the cause of its continuity. It spreads through the whole plot like a drop of oil in water. पताका and प्रकरि are episodical incidents inserted in a drama to explain what follows. They form प्रासङ्गिक वस्तु or subsidiary and occasional plot; of these पताका is a long and continuous episode such as the history of सुग्रिव in the Râmâyaṇa, while प्रकरि is a small episode that has no continuity, as the story of S'ravaṇa in the Râmâyaṇa.

प्रासङ्गिकं परार्थस्य स्वार्थो यस्य प्रसङ्गतः ।
सानुबन्धं पताकाख्यं प्रकरी च प्रदेशभाक् ॥ दश० १–१३.
यद्वृत्तं हि परार्थे स्यात् प्रधानस्योपकारकम् ।
प्रधानवच्च कल्प्येत सा पताकेति कीर्तिता ॥
फलं प्रकल्प्यते यस्याः परार्थे केवलं बुधैः ।
अनुबन्धविहीनं स्यात् प्रकरीमिति निर्दिशेत् ॥ नाट्य० १९–२३,२४.

कार्य is the denouement of a drama.

These five origins of the grand object are joined respectively with five conditions, viz., those of commencement, effort, hopefulness, certainty of success and the accomplishment of the end and thus arise five *Sandhis*, मुख, प्रतिमुख, गर्भ, विमर्श and निर्वहण. In the मुख sandhi the seed of the dramatic action is laid ; it grows and the growth leads to manifold objects and the representation of poetic sentiments. In the Ratnâvalî, for instance, the union of Vatsarâj'a with Sâgarikâ is the grand object of the drama and its seed is the love of Vatsarâja and Sâgarikâ. In the first act we have मुख sandhi ; for the seed is laid and developed. In the प्रतिमुख sandhi the seed manifests itself in such a way that it is partly seen and partly not seen. We have the representation of प्रतिमुख sandhi, for instance, in the

second Act of the Ratnâvalî. The seed of dramatic action, viz., the love between Vatsarâja and Sâgarikâ, put forth in the 1st Act, is partly seen, having been known to Susaṅgatâ and Vidûshaka and partly unseen, being inferred by Vâsavadattâ by the incident of the picture-tablet. The seed which has thus manifested itself and is lost has to be searched often and often. It is at one time secured though under great obstacles, it is then lost, again obtained and again lost. Thus it has to be searched frequently. There is no certainty of securing it, though there is every hope for it. This constitutes what is known as गर्भसन्धि. It may or may not contain पताका or episodical incident. But it must show hopefulness of securing the end. It is so called; because it contains the fruit as it were within itself (फलस्य गर्भीकरणाद् गर्भः). As in the Ratnâvalî a hope of meeting Sâgarikâ is engendered in the king's heart, It is, cut off, however, by the appearance of Vâsavadattâ. There is again hope and again disappointment. She was sought often and often, and though there is no certainty of getting her, still there is every hope for it. In the fourth or विमर्श Sandhi there is a determination to secure the end somehow or other; the means of accomplishing the grand object are more developed than in the गर्भ Sandhi. There are however obstacles like the curse of a sage as in the S'âkuntala or the fear of some one as the fear of Vâsavadattâ in the Ratnâvalî; but there is a determination to secure the end and a deliberation as to how to do it. For instance, in the 4th Act of S'âkuntala the curse of Durvâsas is an obstacle in the way of the accomplishment of the great aim of the play, and the whole account from the curse to her recognition by the king constitutes विमर्श or अवमर्श Sandhi. In the Ratnâvalî Vatsarâja shews his determination of having Sâgarikâ at any risk even by falling into the flames to save her. In the last or निर्वहण Sandhi the seeds scattered here and there are focussed together and lead to the accomplishment of the great object of the drama. It is the final denouement, the last stage in which the action of the play is brought to a head.

The follwing are the notes of Dhanika on अर्थप्रकृति's and अवस्था's:—

अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः । स्तोकोद्दिष्टः कार्यसाधकः पुरस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवद्बीजम् ।

यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुरनुकूलदैवो यौगन्धरायणव्यापारो विष्कम्भके न्यस्तः । यौगन्धरायणः । 'कः संदेहः । द्वीपादन्यस्मादिति पठति' इत्यादिना 'प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ' इत्यन्तेन । वेणीसंहारे द्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितयुधिष्ठिरोत्साहो बीजमिति । तच्च महाकार्यावान्तरकार्यहेतुभेदादनेकप्रकारमिति ।

अवान्तरबीजस्य संज्ञान्तरमाह 'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्' ।

यथा रत्नावल्यामवान्तरप्रयोजनानङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सत्यनन्तरकार्यहेतुः 'उदयनस्येन्दोरिवोद्वीक्षते ।

सागरिका । (श्रुत्वा) कहं एसो सो उदयणणरिन्दो जस्स अहं तादेण दिण्णा' इत्यादि । बिन्दुर्जले तैलबिन्दुवत् प्रसारित्वात् ।

दूरं यदनुवर्तते प्रासङ्गिकं सा पताका सुग्रीवादिवृत्तान्तवत् । पताकेवासाधारणनायकचिह्नवत् तदुपकारित्वात् । यदल्पं सा प्रकरी श्रवणादिवृत्तान्तवत् ।

तदेतत्त्रिवृत्तस्य किं फलमित्याह—'कार्यं त्रिवर्गस्तत् शुद्धमेकानेकानुबन्धि च' । धर्मार्थकामाः फलम् । तच्च शुद्धमेकैकमेकानुबन्धं द्व्यनुबन्धं वा ।

अवस्थापञ्चकमाह ॥ ('अवस्थाः पञ्च' इत्यादिना). इदमहं संपादयामीत्यध्यवसायमात्रमारम्भ इत्युच्यते ।

यथा रत्नावल्यां

> 'प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ
> दैवे चेत्थं दत्तहस्तावलम्बे ।'

इत्यादिना सचिवायत्तसिद्धेर्वत्सराजस्य कार्यारम्भो यौगन्धरायणमुखेन दर्शितः ।

तस्य फलस्याप्राप्तावुपाययोजनादिरूपश्चेष्टाविशेषः प्रयत्नः ।

यथा रत्नावल्यामालेख्याभिलेखनादिर्वत्सराजसमागमोपायः 'तहावि णत्थि अण्णो दंसणुवाओत्ति जहा तहा आलिहिअ जधा समीहिअं करिस्सं' इत्यादिना प्रतिपादितः ।

उपायस्यापायशङ्कायाश्च भावादनिर्धारितैकान्ता फलप्राप्तिः प्राप्त्याशा ।

यथा रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्ताभिसरणादौ समागमोपाये सति वासवदत्तालक्षणापायशङ्कया 'एवं जादि अआलवादाली विअ आअच्छिअ अण्णदो ण णइस्सदि वासवदत्ता' इत्यादिना दर्शितत्वादनिर्धारितैकान्ता समागमफलप्राप्तिरुक्ता ।

अपायाभावादवधारितैकान्ता फलप्राप्तिर्नियताप्तिरिति ।

यथा रत्नावल्यां विदूषकः—'सागरिआ दुक्करं जीविस्सदि' इत्युपक्रम्य 'किं ण उवाअं चिन्तेसि ।' इत्यनन्तरं राजा—'वयस्य देवीप्रसादनं मुक्त्वा नान्योपायं पश्यामि' इत्यनन्तराङ्कार्थबिन्दुनानेन देवीलक्षणापायस्य प्रसादनेन निवारणान्नियता फलप्राप्तिः सूचिता ।

second Act of the Ratnâvalî. The seed of dramatic action, viz., the love between Vatsarâja and Sâgarikâ, put forth in the 1st Act, is partly seen, having been known to Susaṅgatâ and Vidûshaka and partly unseen, being inferred by Vâsavadattâ by the incident of the picture-tablet. The seed which has thus manifested itself and is lost has to be searched often and often. It is at one time secured though under great obstacles, it is then lost, again obtained and again lost. Thus it has to be searched frequently. There is no certainty of securing it, though there is every hope for it. This constitutes what is known as गर्भसन्धि. It may or may not contain पताका or episodical incident. But it must show hopefulness of securing the end. It is so called; because it contains the fruit as it were within itself (फलस्य गर्भीकरणाद् गर्भः). As in the Ratnâvalî a hope of meeting Sâgarikâ is engendered in the king's heart, It is, cut off, however, by the appearance of Vâsavadattâ. There is again hope and again disappointment. She was sought often and often, and though there is no certainty of getting her, still there is every hope for it. In the fourth or विमर्श Sandhi there is a determination to secure the end somehow or other; the means of accomplishing the grand object are more developed than in the गर्भ Sandhi. There are however obstacles like the curse of a sage as in the S'âkuntala or the fear of some one as the fear of Vâsavadattâ in the Ratnâvalî; but there is a determination to secure the end and a deliberation as to how to do it. For instance, in the 4th Act of S'âkuntala the curse of Durvâsas is an obstacle in the way of the accomplishment of the great aim of the play, and the whole account from the curse to her recognition by the king constitutes विमर्श or अवमर्श Sandhi. In the Ratnâvalî Vatsarâja shews his determination of having Sâgarikâ at any risk even by falling into the flames to save her. In the last or निर्वहण Sandhi the seeds scattered here and there are focussed together and lead to the accomplishment of the great object of the drama. It is the final denouement, the last stage in which the action of the play is brought to a head.

The follwing are the notes of Dhanika on अर्थप्रकृति's and अवस्था's:—

अर्थप्रकृतयः प्रयोजनसिद्धिहेतवः । स्तोकोद्दिष्टः कार्यसाधकः पुरस्तादनेकप्रकारं विस्तारी हेतुविशेषो बीजवद्बीजम् ।

यथा रत्नावल्यां वत्सराजस्य रत्नावलीप्राप्तिहेतुरनुकूलदैवो यौगन्धरायणव्यापारो विष्कम्भके न्यस्तः । यौगन्धरायणः । 'कः संदेहः । द्वीपादन्यस्मादिति पठति' इत्यादिना 'प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ' इत्यन्तेन । वेणीसंहारे द्रौपदीकेशसंयमनहेतुर्भीमक्रोधोपचितयुधिष्ठिरोत्साहो बीजमिति । तच्च महाकार्यावान्तरकार्यहेतुभेदादनेकप्रकारमिति ।

अवान्तरबीजस्य संज्ञान्तरमाह 'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्' ।

यथा रत्नावल्यामवान्तरप्रयोजनानङ्गपूजापरिसमाप्तौ कथार्थविच्छेदे सत्यनन्तरकार्यहेतुः 'उदयनस्येन्दोरिवोद्वीक्षते ।

सागरिका । (श्रुत्वा) कहं एसो सो उदयणणरिन्दो जस्स अहं तादेण दिण्णा' इत्यादि । बिन्दुर्जले तैलबिन्दुवत् प्रसारित्वात् ।

दूरं यदनुवर्तते प्रासङ्गिकं सा पताका सुग्रीवादिवृत्तान्तवत् । पताकेवासाधारणनायकचिह्नवत् तदुपकारित्वात् । यदल्पं सा प्रकरी श्रवणादिवृत्तान्तवत् ।

तस्येतिवृत्तस्य किं फलमित्याह—'कार्यं त्रिवर्गस्तत् शुद्धमेकानेकानुबन्धि च' । धर्मार्थकामाः फलम् । तच्च शुद्धमेकैकमेकानुबन्धं द्वित्र्यनुबन्धं वा ।

अवस्थापञ्चकमाह ॥ ('अवस्थाः पञ्च' इत्यादिना). इदमहं संपादयामीत्यध्यवसायमात्रमारम्भ इत्युच्यते ।

यथा रत्नावल्यां

'प्रारम्भेऽस्मिन् स्वामिनो वृद्धिहेतौ
दैवे चेत्थं दत्तहस्तावलम्बे ।'

इत्यादिना सचिवायत्तसिद्धेर्वत्सराजस्य कार्यारम्भो यौगन्धारायणमुखेन दर्शितः ।

तस्य फलस्याप्राप्तावुपाययोजनादिरूपश्चेष्टाविशेषः प्रयत्नः ।

यथा रत्नावल्यामालेख्याभिलेखनादिर्वत्सराजसमागमोपायः 'तहावि णत्थि अण्णो दंसणुवाओत्ति जहा तहा आलिहिअ जधा समीहिअं करिस्सं' इत्यादिना प्रतिपादितः ।

उपायस्यापायशङ्कायाश्च भावादनिर्धारितैकान्ता फलप्राप्तिः प्राप्त्याशा ।

यथा रत्नावल्यां तृतीयेऽङ्के वेषपरिवर्ताभिसरणादौ समागमोपाये सति वासवदत्तालक्षणापायशङ्काया 'एवं जादि अआलवादाली विअ आअच्छिअ अण्णदो ण णइस्सदि वासवदत्ता' इत्यादिना दर्शितत्वादनिर्धारितैकान्ता समागमफलप्राप्तिरुक्ता ।

अपायाभावादवधारितैकान्ता फलप्राप्तिर्नियताप्तिरिति ।

यथा रत्नावल्यां विदूषकः—'सागरिआ दुक्करं जीविस्सदि' इत्युपक्रम्य 'किं ण उवाअं चिन्तेसि ।' इत्यनन्तरं राजा—'वयस्य देवीप्रसादनं मुक्त्वा नान्योपायं पश्यामि' इत्यनन्तरमङ्कार्थबिन्दुनानेन देवीलक्षणापायस्य प्रसादनेन निवारणान्नियता फलप्राप्तिः सूचिता ।

फलयोगमाह—'समग्रफलसंततिः फलयोगो यथोदितः।'
यथा रत्नावल्यां रत्नावलीलाभचक्रवर्तित्वावाप्तिरिति॥

१०८ मुखं बीजसमुत्पत्तिः—The definition of मुख Sandhi is exactly the same as in Das'raúpa, 1st Parichcheda, 23rd Kârikâ.

११० गर्भस्तु दृष्टनष्टस्य &c.—Dhanika explains this very clearly in the following.

प्रतिमुखसन्धौ लक्ष्यालक्ष्यरूपतया स्तोकोद्भिन्नस्य बीजस्य सविशेषोद्भेदपूर्वकः सान्तरायो लाभः पुनर्विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनश्च तस्यैवान्वेषणं वारंवारं सोऽनिर्धारितैकान्तफलप्राप्त्याशात्मको गर्भसन्धिरिति।

यथा रत्नावल्यां तृतीयेऽङ्के वत्सराजस्य वासवदत्तालक्षणापायेन तद्वेषपरिग्रहसागरिकाभिसरणोपायेन च विदूषकवचसा सागरिकाप्राप्त्याशा प्रथमं पुनर्वासवदत्तया विच्छेदः पुनः प्राप्तिः पुनर्विच्छेदः पुनरपायनिवारणोपायान्वेषणं 'नास्ति देवीप्रसादनं मुक्त्वान्य उपायः' इत्यनेन दर्शितमिति॥

११२ बीजवन्तो मुखाद्यर्थाः—The definition of निर्वहण Sandhi given in the text is exactly the same as in the Das'arúpa.

११५ वृत्तवर्तिष्यमाणानाम्—The definitions of विष्कम्भ and चूलिका in the text are exactly in the wording of those in the Das'arúpa.

११६ अङ्कान्तपात्रैरङ्कास्यम् &c.—अङ्कास्य or अङ्कमुख is where characters at the end of a preceding Act suggest the events that are to come in the succeeding Act. Vidyânâtha follows Dhanañjaya in explaining अङ्कास्य. 'अङ्कान्तपात्रैरङ्कास्यं छिन्नाङ्कस्यार्थसूचनात्'. दश० १-५५. That is, characters at the end of the act cut short the story and suggest the introduction of another Act. Just as in the Vîracharita at the end of Act II. Sumantra cuts off the story of S'atânanda and Janaka and introduces the story of the next Act.

Vis'vanâtha explains it differently. He takes it to mean that part of an Act which intimates the subject-matter of all the Acts. It describes the germ as well as the end.

यत्र स्यादङ्क एकस्मिन्नङ्कानां सूचनाखिला।
तदङ्कमुखमित्याहुर्बीजार्थख्यापकं च तत्॥ सा० द० ६-५९-६०

As in the Mâlatîmâdhava in the beginning of the 1st Act Kâmandakî and Avalokitâ suggest what part Bhúrivasu and other characters are to play and the arrangement of the plot of the play.

यत्र स्यादुत्तराङ्कार्थः—Where the incidents described in two Acts are not interrupted by Vishkambhaka or such other cause, but where they are connected together and where the entrance of characters is not suggested, that is, where the same actors are found in both the Acts, there we have अङ्कावतार. Vis'vanâtha defines it as under:—

अङ्कान्ते सूचितः पात्रैस्तदङ्कस्याविभागतः ।
यत्राङ्कोऽवतरत्येपोऽङ्कावतार इति स्मृतः ॥

That is, the next Act has its incidents suggested by characters at the end of the preceding Act and it comes down as it were as a special component part of the preceding Act. The instance given there is the sixth Act of S'âkuntala which is suggested by actors at the end of the Fifth Act and which therefore comes down as it were as a special component of the Fifth Act.

Dhanañjaya calls the preceding Act as अङ्कावतार or leading to the following:—

अङ्कावतारस्त्वङ्कान्ते पातोऽङ्कस्याविभागतः । दश० १–५६.

That is, where the succeeding Act falls into the end of the last Act without any break.

The instance given there is the end of the 1st Act of the Mâlavikâgnimitra of Kâlidâsa. There the examination of the musical teachers, Haradatta and Gáṇadâsa, suggested at the close of the 1st Act, is carried on in the 2nd Act; thus the thread of events is unbroken and the 2nd Act falls as it were as a part of the 1st Act.

Kâṭayavema, a commentator on the Mâlavikâgnimitra, thus comments upon it:—अत्र नृत्यदर्शननिश्चयान्ते प्रथमाङ्कार्थे समाप्तेऽपि तमसमाप्यैवोत्तराङ्कादौ विष्कम्भादौ प्रतिपाद्यायाः संगीतरचनाया अत्रैव निपातनादङ्कावतरणं नामार्थोपक्षेपकमुक्तं भवति । तथा चोक्तम्—'अङ्कावतारस्त्वङ्कान्ते पात्रेणाङ्कस्य सूचनात्' इति ।

In his commentary on the Mâlatîmâdhava Jagaddhara quotes a similar definition of अङ्कावतारः—

अङ्कावसाने यत्रैव भाविनोऽङ्कस्य सूच्यते ।
वस्तुबीजमुपोद्घातैः सोऽङ्कावतार इष्यते ॥

Vide Act I. तदत्र भगवती कामन्दकी नः शरणम् ।

११९ स्वेतिवृत्तसमं वाक्यमर्थं वा—The प्रस्तावना or Introduction in an Act is according to Vidyânâtha who follows Dhanañjaya, of three kinds, कथोद्घात, प्रवर्तक and प्रयोगातिशय. In the first an actor takes up either the very words of the Sûtradhâra or their sense agreeing with the story of his life and enters the stage. In the second, called प्रवृत्तक in the Das'arûpa, the entrance of an actor is suggested by the description of the qualities of the season of the year then prevalent. In the third an actor's entrance is suggested by the words of the Sûtradhâra, such as 'एषोऽयम्' (Here this one). The Sûtradhâra goes out, hinting the entrance of a character and thus performing a part of an actor at the same time that he is performing his own.

The definitions of कथोद्घात and प्रयोगातिशय are the same as those in the Das'arûpa.

The notes of Dhanika on this are as under :—

कथोद्घातः—वाक्यं यथा रत्नावल्याम्—यौगन्धरायणः—' द्वीपादन्यस्मादपि—' इति। वाक्यार्थं यथा वेणीसंहारे

भीमः—निर्वाणवैरिदहनाः प्रशमादरीणाम् '—इत्यादि । ततोऽर्थेनाह भीमः—' लाक्षागृहानलविषान्नसभाप्रवेशैः ' इत्यादि ।

प्रवृत्तकालसमानगुणवर्णनया सूचितपात्रप्रवेशः प्रवृत्तकम् । यथा

आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकान्तः ।
उत्खाय गाढतमसं घनकालमुग्रं
रामो दशास्यमिव संभृतबन्धुजीवः ॥

ततः प्रविशति यथानिर्दिष्टो रामः ।

अथ प्रयोगातिशयः । ' एषोऽयमित्युपक्षेपात् ' इत्यादि ।
यथा ' एष राजेव दुष्यन्त ' इति ।

१२० गूढार्थपदपर्यायमालारूपेण—प्रकृतकार्यसिद्धिश्च—

उद्घात्य or उद्घात्यक is of two kinds. In the first there is a dialogue which contains a series of words of which the sense is concealed and then their synonyms. In the second there is a series of questions and answers. Das'arûpa has the same definition:—

गूढार्थपदपर्यायमाला प्रश्नोत्तरस्य वा ।
यत्रान्योन्यं समालापो द्वेधोद्धात्यं तदुच्यते ॥

Dhanika explains it as under:—

गूढार्थं पदं तत्पर्यायश्चेत्येवं माला । प्रश्नोत्तरं चेत्येवं वा माला । द्वयोरुक्तिप्रत्युक्ती तद् द्विविधमुद्धात्यकम् । तत्राद्यं विक्रमोर्वश्यां यथा—

विदूषकः—भो वअस्स को एसो कामो जेण तुमं पि दूमिज्जसे । सो किं पुरिसो आदु इत्थिअत्ति ।

राजा—मनोजातिरनाधीना सुखेष्वेव प्रवर्तते ।
स्नेहस्य ललितो मार्गः काम इत्यभिधीयते ॥

विदूषकः—एवं पि ण जाणे ।

राजा—वयस्य इच्छाप्रभवः सः ।

विदूषकः—किं जो जं इच्छदि सो तं कामेदित्ति ।

राजा—अथ किम् ।

विदूषकः—ता जाणिदं जह अहं सूअआरसालाए भोअणं इच्छामि ।

द्वितीयं यथा पाण्डवानन्दे—

का श्लाघ्या गुणिनां क्षमा परिभवः को यः स्वकुल्यैः कृतः
किं दुःखं परसंश्रयो जगति कः श्लाघ्यो य आश्रीयते ।
को मृत्युर्व्यसनं शुचं जहाति के यैर्निर्जिताः शत्रवः
कैर्विज्ञातमिदं विराटनगरे छन्नस्थितैः पाण्डवैः ॥

उद्धात्यक is considered as one of the varieties of प्रस्तावना by Vis'vanâtha. It is also given as one of the parts of वीथी. His definition, which is the same as Bharata's, is—

पदानि त्वगतार्थानि तदर्थगतये नराः ।
योजयन्ति पदैरन्यैः स उद्धात्यक उच्यते ॥

The instance given there is the following passage from the Mudrârâkshasa in which Sûtradhâra's speech is construed differently by Châṇakya as he shews by the speech with which he enters the stage.

क्रूरग्रहः स केतुश्चन्द्रमसंपूर्णमण्डलमिदानीम् ।
अभिभवितुमिच्छति बलात्—

is the Sûtradhâra's speech on hearing which Châṇakya utters the following behind the curtain and enters the stage—

आः क एष मयि जीवति चन्द्रगुप्तमभिभवितुमिच्छति ।

अवलगित is also of two sorts:—I. Doing one thing under the pretext of another as in the Uttararâmacharita when Sîtâ is sent to a forest under the pretext of satisfying her desire in pregnancy, Râma's real object being to free himself from public slander. II. Accomplishment of the object aimed at while doing another thing. Dhanika gives the following instance for the second sort:—

द्वितीयं यथा छलितरामे--

रामः—लक्ष्मण तातवियुक्तामयोध्यां विमानस्थो नाहं प्रवेष्टुं शक्नोमि । तदवतीर्य गच्छामि ।

कोऽपि सिंहासनास्याधः स्थितः पादुकयोः पुरः ।
जटावानक्षमाली च चामरी च विराजते ॥

इति भरतदर्शनकार्यसिद्धिः ।

Vis'vanâtha considers अवलगित also as one of the varieties of प्रस्तावना besides considering it as a part of वीथी. His definition which is the same as Bharata's is:—

यत्रैकत्र समावेशात् कार्यमन्यत् प्रसाध्यते ।
प्रयोगे खलु तज्ज्ञेयं नाम्नावलगितं बुधैः ॥

His instance is

यथा शाकुन्तले—सूत्रधारो नटीं प्रति 'तवास्मि गीतरागेण' इत्यादि । ततो राज्ञः प्रवेशः ।

प्रपञ्च—The definition found in Sâhityadarpaṇa is 'मिथोवाक्यमसद्भूतं प्रपञ्चो हास्यकृन्मतः'. The instance given there is the dialogue between विदूषक and चेटी in the Vikramorvas'îya Act. II.

त्रिगतम्—Vis'vanâtha gives the following instance from the Vikramorvas'îya:—

राजाः—

सर्वक्षितिभृतां नाथ दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ॥

(नेपथ्ये तथैव प्रतिशब्दः) राजा—कथं दृष्टेत्याह.

Here the question is construed as an answer.

छलम्—The following from the Veṇisaṁhâra is the instance given in the Das'arûpa and the Sâhityadarpaṇa:—

कर्ता द्यूतच्छलानां जतुमयशरणोद्दीपनः सोऽभिमानी
राजा दुःशासनादेर्गुरुरनुजशतस्याङ्गराजस्य मित्रम् ।

कृष्णाकेशोत्तरीयव्यपनयनपटुः पाण्डवा यस्य दासाः
क्वास्ते दुर्योधनोऽसौ कथयत पुरुषा द्रष्टुमभ्यागतौ स्वः ॥

वाक्केलिः—Sport in words is of two kinds, when a sentence is left incomplete as in Vâsanti's speech in the Uttararâmacharita the sentence त्वं जीवितं त्वमसि मे हृदयं द्वितीयम् &c. इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां तामेव is left incomplete by the words शान्तमथवा किमिहोत्तरेण and when in a dialogue there are two or three speeches in which there is a pun upon words as in the following dialogue between Vidûshaka and Madanikâ:—

विदूषकः—भोदि मअणिए, एदं चच्चरिअं मं पि शिक्खावेध ।
मदनिका (विहस्य)—हदास ण होदि एसा चच्चरी ।
विदूषकः—ता किं क्खु एदं ।
मदनिका—हदास दुवदीखंडं क्खु एदं ।
विदूषकः (सहर्षम्)—किं एदिणा खंडेण मोअआ करीअन्ति लड्डुआ वा ।
मदनिका (विहस्य)—हदास ण हि ण हि पठीअदि क्खु एदं ॥

Vis'vanâtha explains it somewhat differently. According to him when in a dialogue there are two or three replies such as would cause laughter, it is an instance of वाककेली. The following is the instance given by him:—

भिक्षो मांसनिषेवणं प्रकुरुषे किं तेन मद्यं विना
मद्यं चापि तव प्रियं प्रियमहो वाराङ्गनाभिः सह ।
वेश्याप्यर्थरुचिः कुतस्तव धनं द्यूतेन चौर्येण वा
चौर्यद्यूतपरिग्रहोऽपि भवतो नष्टस्य कान्या गतिः ॥

He gives other acceptations also of वाक्केलि—केचित् ' प्रक्रान्तवाक्यस्य साकाङ्क्षस्यैव निवृत्तिर्वाक्केलिः' इत्याहुः । अन्ये च 'अनेकस्य प्रश्नस्यैकमुत्तरम्' ।

अधिवलम्—Das'arûpa gives the following instance:—

यथा वेणीसंहारे

अर्जुनः—

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः ।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डुपुत्रः ॥

इत्युपक्रमे

राजा—अरे नाहं भवानिव विकत्थनाप्रगल्भः । किं तु

द्रक्ष्यन्ति न चिरात् सुप्तं बान्धवास्त्वां रणाङ्गणे ।
मद्गदाभिन्नवक्षोऽस्थिवेणिकाभङ्गभीषणम् ॥

इत्यन्तेन भीमदुर्योधनयोरन्योन्यवाक्यस्याधिक्योक्तिरधिबलम् ।

गण्ड—It is an unexpected combination of words in which the following speech is syntactically connected with the preceding and gives an opposite sense. The following are the instances:—

रामः—इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः—
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥

प्रतीहारी (प्रविश्य)—देव उअत्थिदो ।

रामः—अयि कः ।

प्रती०—देवस्स आसण्णपरिचारओ दुम्मुहो ।

or in the Mudrârâkshasa:—

राक्षसः—तदपि नाम दुरात्मा चाणक्यबटुः ।

दौवारिकः—(उपसृत्य) जेदु ।

राक्षसः—अतिसंधातुं शक्यः स्यात् ।

दौवा०—अमच्चो ।

or in the Veṇisaṁhâra

राजा—

अध्यासितुं तव चिराज्जघनस्थलस्य
पर्याप्तमेव करभोरु ममोरुयुग्मम् ॥

कञ्चुकी (प्रविश्य पटाक्षेपेण संभ्रान्तः)—देव भग्नं भग्नम्—
(सर्वे सातङ्कं पश्यन्ति)

राजा—केन ।

कञ्चुकी—भीमेन ।

राजा—आः किं प्रलपसि ।

कञ्चुकी (सभयम्)—देव कथयामि सर्वम् ।
भग्नं भीमेन भवतो मरुता रथकेतनम् ।

अवस्पन्दितम्—Explaining in another way what is said under the influence of sentiments. Das'arûpa defines it as under:—

रसोक्तस्यान्यथा व्याख्या यत्रावस्पन्दितं हि तत् । Dhanika's notes are:—

यथा छलितरामे

सीता—जाद कल्लं क्खु तुम्हेहिं अणुज्झाए गन्तव्वं। तहिं सो राआ विणएण णमिदव्वो।

लवः—अम्ब किमावाभ्यां राजोपजीविभ्यां भवितव्यम्।

सीता—जाद सो क्खु तुम्हाणं पिदा।

लवः—किमावयो रघुपतिः पिता।

सीता (साशङ्कम्)—जाद ण क्खु परं तुम्हाणं सअलाए ज्जेव पुहवीए इति।

नालिका—Nâlikâ is Prahelikâ, in which the sense is concealed with a fun or jocular air about it. It is a sort of enigma or a conundrum. Das'arûpa defines and illustrates it as under:—

सोपहासा निगूढार्था नालिकेव प्रहेलिका। यथा मुद्राराक्षसे।

चरः—हं हो बह्मण मा कुप्प किं पि तुह उअज्झाओ जाणादि किं पि अम्हारिसा जणा जाणन्ति।

शिष्यः—किमस्मदुपाध्यायस्य सर्वज्ञत्वमपहर्तुमिच्छसि।

चरः—यदि दे उवज्झाओ सव्वं जाणादि ता जाणादु दाव कस्स चन्दो अणभिप्पेदोत्ति।

शिष्यः—किमनेन ज्ञातेन भवति

इत्युपक्रमे

चाणक्यः—चन्द्रगुप्तादपरक्तान् पुरुषान् जानामि

इत्युक्तं भवति।

Vis'vanâtha defines it in the same way:—

प्रहेलिकैव हास्येन युक्ता भवति नालिका।

प्रहेलिका is a riddle, an enigmatic answer to a question, संवरणकार्युत्तरम् as Vis'vanâtha puts it. 'प्रहेलिका तु सा ज्ञेया वचः संवृतिकारि यत्—अभिप्रेतार्थसंवरणकारिवचनविन्यासः प्रहेलिकेति सामान्यलक्षणम्। Prahelikâ is thus enigma used with the object of exciting pleasure and laughter or that which conceals what the speaker wishes to conceal. The following is the instance given in the Sâhitya-Darpaṇa:—

यथा रत्नावल्याम्—

सुसंगता—सहि जस्स किदे तुमं आअदा सो इध ज्जेव चिट्ठदि।

सागरिका—कस्स किदे अहं आअदा।

सुसंगता—णं क्खु चित्तफलअस्स।

अत्र त्वं राज्ञः कृते आगतेत्यर्थः संवृतः

Vidagdhamukhamaṇḍana of Dharmadâsa mentions two kinds of Prahelikâ.—Ârthî and S'âbdî. The former, also called Bahirlâpikâ, is illustrated as under:—

तरुण्यालिङ्गितः कण्ठे नितम्बस्थलमाश्रितः ।
गुरुणा संनिधानेऽपि कः कूजति मुहुर्मुहुः ॥

The answer is ईषदूनजलपूर्णकुम्भः

S'âbdî Prahelikâ or Antarlâpikâ is thus illustrated:—

सदारिमध्यापि न वैरियुक्ता
नितान्तरक्ताप्यसितैव नित्यम् ।
यथोक्तवादिन्यपि नैव दूती
का नाम कान्तेति निवेदयाशु ॥

The answer is सारिका.

Daṇḍin mentions sixteen kinds of corrrect Prahelikâ and states that as the Doshâs are innumerable he has not thought it proper to give fourteen kinds of दुष्ट प्रहेलिका. The Prahelikâs are used in assemblies of learned men with the object of sport or creating pleasure or showing cleverness, or with the object of concealing what is intended to be concealed:—

क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे ।
परव्यामोहने चापि सोपयोगाः प्रहेलिकाः ॥

Mandâramaranda explains नालिका as under:—

सोपहासनिगूढार्थमालिका नालिका मता ।
अन्तर्लोपा बहिर्लोपा चेतीयं द्विविधा मता ॥
प्रवह्लिकां च तां केचित् केचिदूचुः प्रहेलिकाम् ॥

Bhoja divides प्रहेलिका into six kinds such as च्युताक्षरा, दत्ताक्षरा, च्युतदत्ताक्षरा and so on. *Vide* Sarasvatîkaṇṭhâbharaṇa, 2 nd Parichchheda.

The word प्रहेलिका is derived from हिल् to suggest some thing. प्रहिलति अभिप्रायं सूचयतीति प्रहेलिका.

असत्प्रलाप—It consists mostly of irrelevant or incoherent speech caused by childhood, dream, madness and sentimentalism. Das'arûpa defines it as under:—

असंबद्धकथाप्रायोऽसत्प्रलापो यथोत्तरः ।

Dhanika comments upon it as under:—

ननु चासंबद्धार्थत्वेऽसंगतिर्नाम वाक्यदोष उक्तः । तत्र । उत्स्वमायितमदोन्मादशैशवादीनामसंबद्धप्रलापितैव विभावः । यथा

अर्चिष्मन्ति विदार्य वक्त्रकुहराण्यासृक्कतो वासुके-
रङ्गुल्या विषकर्बुरान् गणयतः संस्पृश्य दन्ताङ्कुरान् ।
एकं त्रीणि नवाष्ट सप्त षडिति प्रध्वस्तसंख्याक्रमा
वाचः क्रौञ्चरिपोः शिशुत्वविकलाः श्रेयांसि पुष्णन्तु वः ॥

यथा च

हंस प्रयच्छ मे कान्तां............इत्यादि ।

यथा वा

भुक्ता हि मया गिरवः स्नातोऽहं वह्निना पिवामि वियत् ।
हरिहरहिरण्यगर्भा मत्पुत्रास्तेन नृत्यामि ॥

Beneficial speech uttered before a thoughtless person who does not accept it is also असत्प्रलाप according to Vis'vanâtha—

अगृह्णतोऽपि मूर्खस्य पुरो यच्च हितं वचः ।

यथा वेण्यां दुर्योधनं प्रति गान्धारीवाक्यम् ।

व्याहार—It is humorous and enticing speech for the sake of another. Dhanañjaya thus defines it—अन्यार्थमेव व्याहारो हास्यलोभकरं वचः । Dhanika's comment on it is as under:—

यथा मालविकाग्निमित्रे (लास्यप्रयोगावसाने मालविका निर्गन्तुमिच्छति) विदूषकः—मा दाव उवएससुद्धा गमिस्ससि (इत्युपक्रमे) गणदासः—(विदूषकं प्रति) आर्य उच्यतां यस्त्वया क्रमभेदो लक्षितः । विदूषकः—पढमं पच्चूसे वम्हणस्स पूआ भोदि सा तए लङ्घिदा । (मालविका स्मयते) इत्यादिना नायकस्य विश्रब्धनायिकादर्शनप्रयुक्तेन हास्यलोभकारिणा वचनेन व्याहारः ।

मृदव—Representing merits as demerits and demerits as merits.

Dhanañjaya's definition of it is as under:—

दोषा गुणा गुणा दोषा यत्र स्युर्मृदवं हि तत् ।

The following are the instances given by Dhanika:—

मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः-इत्यादौ मृगयादोषस्य गुणीकारः ।

यथा च ।

सततमनिर्वृतमानसमायाससहस्रसंकुलक्लिष्टम् ।
गतनिद्रमविश्वासं जीवति राजा जिगीषुरयम् ॥

इति शब्दगुणस्य दोषीभावः ।

उभयं वा

सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा ।
अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः ॥

१७४ यथा हि तन्तवो वेमतुर्यादिक्रिययान्विताः ।
पटात्मना परिणता पटवाच्या भवन्ति ते ॥
तथैव स्थायिनो भावा विभावादिभिरन्विताः ।
रसात्मना परिणता रसवाच्या भवन्ति ते ॥ p. 293.
१७५ यदह्ना कुरुते कर्म प्रजा धर्मेण पालयन् ।
दशवर्षसहस्राणि तस्य भुङ्क्ते महत् फलम् ॥ p. 161.
१७६ यदायमुपमानांशो लोकतः सिद्धिमृच्छति ।
तदोपमैव येनेवशब्दः साधर्म्यसूचकः ॥
यदा पुनरयं लोकादसिद्धेः कविकल्पितः ।
तदोत्प्रेक्षैव येनेवशब्दः संभावनापरः ॥ p. 387.
१७७ यद्गतागतविश्रान्तिवैचित्र्येण विवर्तनम् ।
तारकायाः कलाभिज्ञास्तं कटाक्षं प्रचक्षते ॥ p. 69.
१७८ यद्दर्शने विरक्तोऽपि क्षुभ्यते तत् सन्मन्मथम् । p. 68.
१७९ यद्यपि रसभावादिरर्थो ध्वन्यमान एव भवति न वाच्यः कदाचिदपि तथापि न सर्वो-ऽसंलक्ष्यक्रमस्य विषयः । p. 56.
१८० यद्यपि स्वभक्षणानां व्यादानात् पूर्वकालता तथापि तद्व्यादानानन्तरभाविस्वभक्रियापेक्षं व्यादानस्य पूर्वकालत्वमस्ति । p. 315.
१८१ यद्यप्यङ्गानि भूयांसि पूर्वरङ्गस्य नाटके ।
तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये ॥ p. 123.
१८२ यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये ।
कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स कीर्तितः ॥ p. 34, p. 123.

---

१७२ भा०प्र०. १७३ आप० प्र०. १७६ अलं० सर्व० संजी० by वि० चक्र० (°दृतिवृ:). १७७ संगी० रत्ना०. १७९ लोच० pp. 102-03 (सर्वोऽलक्ष्यक्रमस्य &c.). १८१ By भाट्ट०. १८२ वसन्तराजीय quoted by MallinAtha on माघ २।८.

१८३ यमकेषु निरर्थकं न दोषः । p. 299.

१८४ यमर्थमाद्दतश्चिन्तयन् स्वपिति सैव चिन्तासन्ततिः प्रत्यक्षाकारा संजायते । p. 254.

१८५ यस्तुष्टो तुष्टिमाप्नोति शोके शोकमुपैति च ।
क्रोधे क्रुद्धो भये भीतः स श्रेष्ठः प्रेक्षकः स्मृतः ॥ p. 286.

१८६ यस्त्वलक्ष्यक्रमव्यङ्ग्यो ध्वनिर्वर्णपदादिषु ।
वाक्ये संघटनायां च स प्रबन्धेऽपि दीप्यते ॥ p. 47.

१८७ यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ॥ p. 81.

१८८ यावदित्यव्ययं चास्ति तद्धितान्तश्च विद्यते ।
अतो नित्यसमासेऽपि तद्धितान्तेन विग्रहः ॥ p. 330.

१८९ या स्थायिभावरतिरेव निमित्तभेदा-
च्छृङ्गारमुख्यनवनाट्यरसीभवन्ती ।
सामाजिकान् सहृदयान्नटनायकादी-
नानन्दयेत् सहजपूर्णरसोऽस्मि सोऽहम् ॥ p. 295.

१९० युक्तियुक्तं वचो ग्राह्यं न तु पूरुषगौरवात् । p. 78.

१९१ युगपदधिकरणवचने द्वन्द्वः । p. 304.

१९२ युधिष्ठिरं द्वैतवने वनेचरः । p. 342.

१९३ युष्मदि गुरावेकेषाम् । p. 86.

१९४ योगविभागास्वीकारे तस्य नित्यत्वात् समानजातीयशब्दप्रयोगो न स्यात् । अस्ति च प्रयोगः । तस्मात् सपक्षादिशब्देषु सहशार्थस्य सहशब्दस्य पक्षादिभिरस्वपदविग्रहे बहुव्रीहौ सहशब्दस्य ‘ वोपसर्जनस्य ’ इति समासः । भाष्यवार्तिकयोश्च योगविभागो नोपन्यस्तः । p. 327.

१९५ रणत्क्वणः । p. 167.

१९६ रतेरेवावस्थाविशेषा प्रेमादयः । p. 279.

१९७ रसतेः स्वादनार्थत्वाद्रस्यन्त इति ते रसाः । p. 219.

१९८ रसस्तु स एव यो यत्र मुख्यतया विभावानुभावव्यभिचारिसंयोजनोचितस्थायिप्रतिपत्तिकस्य प्रतिपत्तुः स्थाय्यंशे चर्वणप्रयुक्त एवास्वादप्रकर्षः । p. 227.

१९९ रसभावतदाभासभावशान्त्यादिरक्रमः ।
ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः ॥ p. 467.

---

१८३ का० शा० of हेम० p. 136 (यमकादौ निरर्थकत्वं न दोष इति केचित्). १८४ प्रशा० प० वा०. १८५ भा० प्र०. १८६ ध्व० लो० ३।२. १८७ का० प्र० २. १८८ By हरदत्त. १८९ स्वा० यो० प्र० of अम० यो०. १९१ By वार्तिककार. १९२ किरा० १।१. १९३ By जया०. १९४ हर०. १९५ अम० ३।२।८ (रणः क्वणे). १९६ रसा०. १९७ भाव० प्र०. १९८ लोच० p. 67 (रसध्वनिस्तु, योऽत्र, °संयोजनोदित° स्थाय्यंशचर्वणाप्रयुक्त). १९९ ध्व० लो० २।३ (तत्प्रशान्त्यादि°).

४०० रसभावादिविषयविवक्षाविरहे सति ।
अलंकारनिबन्धो यः स चित्रविषयो मतः ॥ p. 78.
४०१ रसस्य स्यादविरोधाय वृत्त्यनौचित्यमेव च । p. 47.
४०२ रसाः कार्यवशात् सर्वे मिलन्त्येव परस्परम् ।
प्रथमं यो रसः ख्यातः स प्रधानो भविष्यति ॥ p. 285.
४०३ रसाद्यनुगुणत्वेन व्यवहारोऽर्थशब्दयोः ।
औचित्यवान् यस्ता एव वृत्तयो द्विविधाः स्थिताः ॥ p. 46.
४०४ रसानामङ्गभूतानामङ्गिनो वा रसस्य च ।
न चातिरसतो दूरं वस्तु विच्छिन्नतां नयेत् ॥
रसं वा न तिरोदध्याद् वस्त्वलंकारलक्षणैः ॥ p. 117.
४०५ रागोऽनुवृत्तो विच्छिन्नमनुराग उदाहृतः । p. 279.
४०६ राजा कालस्य कारणम् । p. 205.
४०७ राज्ञः पुरजनस्यापि मङ्गलाचारशंसिनः ।
मान्यैर्मागधिकागीतैर्मागधा इत्युदीरिताः ॥ p. 176.
४०८ राज्ञो नवाङ्गुलायामो मध्येऽष्टाङ्गुलविस्तृतः ।
चतुरङ्गुलविस्तारपार्श्वः स्वर्णमयः शुभः ॥
पट्टः पञ्चशिखो राज्यप्रजासौख्यसमृद्धये ॥ p. 207.
४०९ रामाद्याश्रितदुःखादेरनुभूतस्तदात्मनः ।
सामाजिकस्य मनसो भावस्तद्भावभावनम् ॥ p. 223.
४१० रुचिरेण सुवर्णेन निर्मितं रत्नरञ्जितम् ।
अष्टभिः स्फाटिकैः सिंहैर्मूर्ध्नि तत् सुविराजितम् ॥
अधः काञ्चनविन्यस्तरत्नवेदित्रयान्वितम् ।
आस्थानमण्डपे राज्ञां सिंहासनमिदं परम् ॥ p. 210.
४११ रूपकं पूर्वसंसिद्धं श्लेषमुत्थापयेद्यदि ।
तदा रूपकमेव स्यादन्यथा श्लेष इष्यते ॥ p. 54.
४१२ रूपयौवनशालिन्यो गायन्यो गातृवन्मताः ।
माधुर्यधुर्यध्वनयश्चतुराश्चतुरप्रियाः ॥ p. 137.
४१३ रेखाभ्यां चतुरश्राणि चतुष्कोष्ठानि कल्पयेत् ।
रेखाद्वयान्तराले स्याद्यथा कोष्ठे गृहाष्टकम् ॥

* * * * * *

विदिक्स्थले कुण्डलितं स्वमङ्गं
स्वेन निरावेष्ट्य विभङ्गिभङ्गम् ।

---

४०० ध्व० लो० (called काव्यालोक by the commentator) p. 221. ४०१ ध्व० लो० ३।१९. ४०२ भा० प्र०. ४०३ ध्व० लो० ३।३३ (यस्ता एता and विविधा). ४१० मान०. ४११ अलं० सर्व० संजी० of विद्याचक्रवर्तिन्. ४१३ By शार्ङ्ग०.

क्षिप्त्वा गले पुच्छमहेः स्थितस्य
  पाठ्यः फणातः फणिबन्ध एषः ॥ p. 350.

४१४ लक्षणा तु समन्वयशक्तिसमर्पितान्वयविधुरीकरणधुरीणत्वादन्वयशक्त्यनन्तरभाविन्येव ।
p. 52.

४१५ लग्नमर्धं तृतीयांशो नवांशो द्वादशांशकः ।
  त्रिंशांशश्चेति षड्वर्गः क्रूरसौम्यवशाद् द्विधा ॥ p. 201.

४१६ लाटजनोपलालितोऽनुप्रासो लाटानुप्रासः । न तु लाटदेशजन्यः कश्चनोपकारः काव्यस्य ।
p. 344.

४१७ लास्यं तु सुकुमाराङ्गं मकरध्वजवर्धकम् । p. 137.

४१८ लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य । p. 76.

४१९ वक्ति सोल्लासवक्रोक्त्या धीरमध्या कृतागसम् । p. 30.

४२० वक्त्रस्यन्दिस्वेदबिन्दुप्रबन्धै-
  र्दृष्ट्वा भिन्नं कुङ्कुमं कापि कण्ठे ।
पुंस्त्वं तन्व्या व्यञ्जयन्ती वयस्या
  स्मित्वा पाणौ खड्गलेखां लिलेख ॥ p. 466.

४२१ वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् । p. 97.

४२२ वक्षोऽथ कक्षौ नखनासिकास्यं
  कृकाटिका चेति षडुन्नतानि ॥
हनुलोचनबाहुनासिकं स्तनयोरन्तरमत्र पञ्चमम् ।
अतिदीर्घमिदं तु पञ्चकं न भवत्येव नृणाममूभृताम् ॥ p. 176.

४२३ वन्द्यभूभृद्गुणोत्कर्षश्रावकाः वन्दिनः स्मृताः p. 202.

४२४ वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः p. 64, p. 387, p. 476.

४२५ वस्तुनेतृरसादीनामानुगुण्येन योजयेत् ।
  विवक्षितोऽत्र नाङ्गानां क्रम इत्येव निर्णयः ॥ p. 118.

४२६ वस्तु यत् स्यात् प्रबन्धस्य शरीरं कविकल्पितम् ।
  इतिवृत्तं तदेवाहुर्नाट्याभिनयकोविदाः ॥ p. 102.

४२७ वस्तुस्वभावकपटः क्रूरसत्त्वादिसंभवः ।
  दैविकः कपटो वह्निवर्षवातादिसंभवः ।
  शत्रुजः कपटस्तत्र संग्रामादिसमुद्भवः ॥ p. 129.

४२८ वाक्कायमनसां प्रायः प्रलयो नष्टचेष्टता । p. 240.

४२९ वागङ्गसत्त्वाभिनयैर्मुखरागोपशोभितैः ।
  भावयन्नान्तरं भावं व्यापारो भाव इष्यते ॥ p. 35.

४३० बाधा शरीरस्पर्शनमुपालम्भः । p. 282.

---

४१४ लोच०. ४१६ By गोपा०. ४१८ भाष्य. ४२१ वृ० रत्ना०. ४२२ ध० सं०. ४२४ Quoted by भट्टोजिदीक्षित in his सि० कौ०. ४२६ भा० प्र०. ४२७ भा० प्र०. ४३० वृत्तिका०.

४११ वाच्यसामर्थ्याक्षिप्त इति भेदत्रयव्यापकं सामान्यलक्षणम् । p. 56.
४१२ वा सव्यामामि हलाहल । p. 86.
४१३ वा समासे । p. 73.
४१४ वासोऽङ्गरागाभरणमाल्यशय्यासनादिषु ।
यत्र यत्र स्पृहा तत्तद्देशकालानुकूल्यतः ॥
अत्यादरेण सत्कार उपचार इतीरितः ॥ p. 15.
४१५ वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये । p. 368.
४१६ विअवेअ अवधारणे । p. 274.
४१७ विकटत्वं च बन्धस्य कथयन्ति ह्युदारताम् ।
वैचित्र्यं न प्रपद्यन्ते यया शून्याः पदक्रमाः ॥
पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुनः ॥ p. 326.
४१८ विकृतस्वरसत्त्वादेर्भयभावो भयानकः ।
स्वराङ्गक्षेपपुलकस्वेदशोषवैवर्ण्यलक्षणः ॥
दैन्यसंभ्रमसंमोहत्रासादिस्तत्सहोदरः ॥ p. 234.
४१९ विकृताकृतिवाग्वेषैरात्मनो वा परस्य वा ।
हासः स्यात् परिपोषेऽस्य हास्यस्त्रिप्रकृतिः स्मृतः ॥ p. 280.
४४० विच्छित्तिशोभिनैकेन भूषणेनेव भामिनी ।
पदद्योत्येन सुकवेर्ध्वनिना भाति भारती ॥ p. 75.
४४१ विजयेतां रामलक्ष्मणौ कुम्भकर्णमेघनादौ । p. 314.
४४२ विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते ॥ p. 453.
४४३ विभावादिरत्र न ज्ञापको नापि कारकः । अपि तु चर्वणोपयोगी । p. 293.
४४४ विभावादिसंभवो हि रसं प्रति प्रयोजको न विभावादिज्ञानं ततश्च तिरश्चामस्त्येव रसः । p. 281.
४४५ विभावोऽप्यनुभावः स्यादनुभावोऽपि भाववत् ।
तौ पुनश्चारिणौ स्यातां ते च तौ स्युः परस्परम् ॥ p. 226.
४४६ विरुद्धैरविरुद्धैर्वा भावैर्विच्छिद्यते न यः ।
आत्मभावं नयत्यन्यान् स्थायीव लवणाकरः ॥ p. 220.
४४७ विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम् ।
बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला ॥ p. 284.
४४८ विशेषरूपं वाक्यार्थमपदार्थमपीच्छता ।
व्यक्तिरिष्टाभिधातोऽन्याभिहितान्वयवादिना ॥ p. 57.
४४९ विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः । p. 225.
४५० विषय्याकारमारोप्य विषयस्थगनं यदा ।

४११ लोच०. ४३५ विश्व०. ४४० ध्व० लो० p. 130. ४४१ अ० रा० ४. ४४३ लोच०. ४४४ पका० p. 106. ४४५ मा० प्र०. ४४६ द० रू० ४।३९ (च स्थायी). ४४७ ध्वन्या०. ४४९ द० रू० ४।६. ४५० अलं० सर्व० संजी० by वि० चक्र० (भजेत्).

रूपकत्वं तदा तत्र रञ्जनेन समन्वयः ॥
यदा तु विषयो रूपात् स्वस्मादप्रच्युतो भवेत् ।
उपयुङ्क्ते पराकारं परिणामस्तदा मतः ॥ p. 377.

४५१ विलम्बे परमां काष्ठामारूढे दर्शनादिभिः ।
येनान्तरङ्गं द्रवति स स्नेह इति कथ्यते ॥ p. 68.

४५२ विहगाः कदम्बसुरभाविह गाः । p. 343.

४५३ विंशत्याद्याः सदैकत्वे संख्याः (सर्वाः p. 30.) संख्येयसंख्ययोः । p. 20, p. 30.

४५४ वीररौद्रप्रधानो धीरोद्धतः । p. 233.

४५५ वीरस्य चैव यत् कर्म सोऽद्भुतः परिकीर्तितः । p. 227.

४५६ वृत्तजङ्घो भवेद्रूपो वृत्तलिङ्गो भवेद्धनी । p. 176.

४५७ वृन्दारका दैवतानि पुंसि वा देवताः । p. 298.

४५८ वैराग्यपरमेश्वरानुग्रहप्राचीनकुशलपरिपाकसत्पुरुषसेवावेदान्तविचारादयो विभावाः ॥
यमनियमादयोऽनुभावाः । राज्यधुरोद्वहनादयोऽपि शान्तस्य जनकादेरनुभावाः ।
p. 237.

४५९ वैराग्याद्युवतिगर्हासिद्धस्तृतीयो बीभत्सः । p. 325.

४६० व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात् ।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका ॥ p. 122.

४६१ व्यञ्जनौषधिसंयोगो यथान्नं स्वादुतां नयेत् ।
एवं नयन्ति रसतामितरे स्थायिनं श्रिताः ॥ p. 219.

४६२ व्यत्यस्तपाणिना कार्यमुपसंग्रहणं गुरोः ।
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ॥ p. 159.

४६३ व्यभिचारिरसस्थायिभावानां शब्दवाच्यता । p. 321.

४६४ व्याघ्रशब्दो यदा शौर्यात् पुरुषार्थेऽवतिष्ठते ।
तदाधिकरणाभेदात् समासस्यास्ति संभवः ॥
शूरशब्दप्रयोगे तु व्याघ्रशब्दो मृगे स्थितः ।
भिन्नेऽधिकरणे वृत्तेस्तत्र नैवास्ति संभवः ॥ p. 363.

४६५ व्यादानस्य पूर्वकालत्वाभावात् क्त्वाप्रत्ययानुपपत्तिरिति चोदयित्वानन्तरभाविस्वभापेक्षया
पूर्वकालत्वसंभवान्नानुपपत्तिः । p. 315.

४६६ व्याधैः सह्योषितं विन्ध्ये हन्त वल्कलधारिभिः । p. 312.

४६७ व्यापारेण च काव्यस्य तदीयाभिनयेन च ।
रसात्मत्वं नीयमानः स्थायी स्वाद्यत्वमेष्यति ॥

---

४५२ शिशु० व० ४।२६. ४५३ अम० २।९।८३. ४५५ By भरत. ४५७ अम० १।१।९. ४५८ This is the substance of what is found in लोच० p. 177 (तस्य च भवितव्यमेव प्राक्तनकुशलपरिपाकपरमेश्वरानुग्रहादध्यात्मरहस्यशास्त्रवीतरागपरिशीलनादिभिर्विभावैरितीयतैव व्यभिचारिसद्भावः स्थायी च दर्शितः ।). ४६० वि० मु० मं. ४६२ मनु० २।७२ (च for तु). ४६३ का० प्र० ७. ४६४ By भर्तृ०. ४६५ भाष्य. ४६७ By शार० त०.

सामाजिकादिरेवास्य रसस्याश्रय उच्यते ।
रसस्य वर्तमानत्वात् नानुकार्यस्य संभवः ॥
अनुकार्यस्य रामादेः कालातिक्रमदर्शनात् ।
नातिक्रान्तानुकार्यस्य रसोद्भावनया कविः ॥
बध्नाति काव्यं यत् तस्माद्रसः सामाजिकाश्रयः ॥ p. 294.

४६८ व्रजेदब्धिरिवाक्षोभ्यो निगिरन्नरिवाहिनीः ।
शूराणां सिंहनादैश्च हेषारावैश्च वाजिनाम् ।
महारथमहाध्वानैर्मातङ्गघनगर्जितैः ॥ p. 171.

४६९ शकुनस्तु शुभाशंसिनिमित्ते शकुनः खगः । p. 171.

४७० शत्रुदेशावमर्दाय सद्यः सुभटघोटकैः ।
विजिगीषोः प्रवृत्तिर्या सा धाटीति निगद्यते ॥ p. 181, p. 381.

४७१ शब्दतत्त्वाश्रयाः काश्चिदर्थतत्त्वाश्रयाः पराः । p. 63.

४७२ शब्दधर्मत्वं चैषामन्याश्रितत्वेऽपि शरीराश्रितत्वमिव शौर्यादीनाम् । p. 63.

४७३ शब्दशक्तिमूले तु अभिधाया नियन्त्रणेनानभिधेयस्यार्थान्तरस्य तेन सहोपमादेरलंकारस्य च निर्विवादं व्यङ्ग्यत्वम् । p. 54.

४७४ शब्दोपहितरूपांस्तान् बुद्धेर्विषयतां गतान् ।
प्रत्यक्षानिव कंसादीन् साधनत्वेन मन्यते ॥ p. 287.

४७५ शशी दिवसधूसरो गलितयौवना कामिनी । p. 459.

४७६ शषौ च रेफसंयोगष्टवर्गश्चापि भूयसा ।
विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युताः ॥ p. 64.

४७७ शस्येत् । p. 241.

४७८ शान्तवत्सलसहिता दश । p. 221.

४७९ शान्तवर्जमष्टौ रसाः । p. 221.

४८० शास्त्रत्यागः साहसम् । p. 22.

४८१ शिवंकरशब्दश्छन्दस्येव न भाषायाम् । p. 202.

४८२ शुक्लमाल्याम्बरभृतः प्राङ्मुखस्य महीपतेः ।
पट्टं शिरसि बध्नीयात् सिंहासनगतस्य च ॥ p. 207.

४८३ शोभा विलासो माधुर्यं गाम्भीर्यं स्थैर्यतेजसी ।
ललितौदार्यमित्यष्टौ सात्त्विकाः पौरुषा गुणाः ॥ p. 18.

४८४ शृङ्गार एक एव रसः । p. 221

---

४६८ मान०. ४६९ विष०. ४७१ ध्व० लो० ३।१३ (अर्थतत्त्वयुजोऽपराः). ४७२ ध्व० लो०. ४७३ का० प्र० ५. ४७४ By भर्तृ०. ४७५ By भर्तृ०. ४७६ ध्व० लो० ३।३ (शषौ सरेफसंयोगौ ढकारश्चापि भूयसा । and रसच्युतः). ४७९ By धनिक. ४८० By हर०. ४८१ By हर०. ४८२ By वसि०. ४८३ द० रू० २।९ (धैर्यतेजसी and सत्त्वजाः). ४८४ By शृं० प्र० कार.

४८५ शृङ्गाररसभूयिष्ठैर्भूरिभावतरङ्गितैः ।
अङ्गैरनङ्गसर्वस्वैः शोभातिशयशालिभिः ॥
अन्वितो नृत्तभेदो यस्तल्लास्यमिति कथ्यते ॥ p. 35.
४८६ शृङ्गारहास्यविधुरे रसैर्दीप्तैर्निरन्तरः । p. 127.
४८७ शृङ्गाराद्यनुभवयोग्यतया यदात्मनः सत्त्वं स भावः । p. 220.
४८८ श्रुतिसाम्यादनेकार्थयोजनं त्रिगतं त्विह ।
नटादित्रितयालापः पूर्वरङ्गे तदिष्यते ॥ p. 121.
४८९ श्रेयःसाधनता यत्र द्रव्यादौ विधितो भवेत् ।
तस्यैव धर्मता ज्ञेया धर्मस्तत्साधनं यतः ॥ p. 9.
४९० श्रेयःसाधनता ह्येषां नित्यं वेदात् प्रतीयते ।
ताद्रूप्येण च धर्मत्वं तस्मान्नेन्द्रियगोचरः ॥ p. 408.
४९१ श्रौता आर्थाश्च ते यस्मिन्नेकदेशविवर्त्ति तत् । p. 372.
४९२ श्लक्ष्णं षडङ्गुलोत्सेधं षोडशाङ्गुलविस्तृतम् ।
द्वात्रिंशदङ्गुलायामं क्षीरदारुसमुद्भवम् ॥
पद्माङ्कितं भवेद् भद्रपीठं स्नपनकर्मणि ॥ p. 199.
४९३ षड्वर्गो भवति सदा शुभखचरसमुद्भवः शुभदः ।
पापसमुत्थस्त्वशुभस्तस्माद्ग्राह्यस्तु सौम्यषड्वर्गः ॥ p. 201.
४९४ ष्यञः षित्करणादीकारो बहुलम् । p. 60. p. 133.
४९५ संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य संनिधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः ॥ p. 53, p. 437.
४९६ संहितैकपदे नित्या नित्या धातूपसर्गयोः ।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥ p. 305.
४९७ सकलकलं पुरमेतज्जातं संप्रति सुधांशुबिम्बमिव । p. 353.
४९८ सकृत्कृतधर्मो न धार्मिकः । p. 16.
४९९ संगीतशैर्बुधैः सार्धं नायके प्रेक्षके स्थिते ।
प्रविश्य रङ्गभूमिं ते तिष्ठन्तः साम्प्रदायिकाः ॥ p. 124.
५०० संग्रामेष्वनिवर्तित्वं प्रजानां चैव पालनम् ।
शुश्रूषा ब्राह्मणानां च राज्ञां श्रेयस्करं परम् ॥ p. 208.
५०१ स च न व्यतिरिक्तमाधारमपेक्षते किं त्वनुकार्याभिन्नाभिमते नर्त्तके आस्वादयिता सामाजिकः तेन नाट्य एव रसा नानुकार्यादिषु ॥ p. 294.

---

४८५ In सं० चूडा०. ४८८ द० रू० p. 117. ४९० By आचार्य. ४९१ का० प्र० १०. ४९२ By वा० शा०. ४९३ वृद्ध च० सं०. ४९४ वाम० ५।२।५६. ४९५ By भर्तृ० in वा० प०. ४९८ By वृत्तिकार. ४९९ संगीतरत्नाकर. ५०० मनु ७।८८. ५०१ लोच०.

५०२ सच्छायाम्भोजवदनाः सच्छायवदनाम्बुजाः ।
वाप्योऽङ्गना इवाभान्ति यत्र वाप्य इवाङ्गनाः ॥ p. 370.
५०३ सतां हि संदेहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ॥ p. 150.
५०४ स तु शब्दस्य विस्तरः । p. 87, p. 330.
५०५ सत्यत्यागार्जवरतिरुपकुर्वन् प्रियं वदन् ।
भजते यः स्वयं प्रीतः प्रियः स भवति स्त्रियाः ॥ p. 31.
५०६ सत्यं प्रियं च वचनं यत् तत् सूनृतमुच्यते । p. 151.
५०७ सदसत्त्वनिवृत्तिश्चेन्निवृत्त्यान्यस्य वर्ण्यते ।
तदा द्विधा विनोक्तिः स्याद्विधिरत्र फलं भवेत् ॥ p. 402.
५०८ सदा स्नात्वा निशीथिन्यां सकलं वासरं बुधः ।
नानाविधानि शास्त्राणि व्याचष्टे च शृणोति च ॥ p. 320.
५०९ सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः । p. 370.
५१० सद्रूपोद्भावना माया स्वत एवासतः पुरा ।
अथवान्यपदार्थानामन्यथा कृतिरेव वा ॥
अदेशकालपारोक्ष्यं परोक्षस्यैव वस्तुनः ।
मन्त्रौषधादिभिः सोऽयमिन्द्रजाल इतीरितः ॥ p. 128.
५११ सपत्नीनखदन्तानि चिह्नं यत्र न दृश्यते ।
विस्मार्यमाणमानेर्ष्यः सुभगः सोऽभिधीयते ॥ p. 280, p. 276.
५१२ सपीतिः स्त्री तुल्यपानम् । p. 326.
५१३ सप्तम्युपमानपूर्वपदस्य बहुव्रीहिर्वाच्य उत्तरपदलोपश्च । p. 365.
५१४ स प्रेमा तन्मिथो यूनोर्निरूढं भावबन्धनम् । p. 279.
५१५ संपन्नैश्वर्यसुखयोरशेषगुणयुक्तयोः ।
नवयौवनयोः श्लाघ्यप्रकृत्योः श्रेष्ठरूपयोः ॥
नारीपुरुषयोस्तुल्या परस्परविभाविका ।
स्पृहाह्वया चित्तवृत्ती रतिरित्यभिधीयते ॥ p, 229.
५१६ संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ । p. 252.
५१७ संभूतान्यपि रसान्तराणि स्वविभावादिसामग्र्या स्वावस्थायां यद्यपि लब्धपरिपोषाणि चमत्कारगोचरतां प्रतिपद्यन्ते तथापि स चमत्कारस्तावत्येव परितुष्यन् न विश्राम्यति किं तु चमत्कारान्तरमनुधावति । p 285.
५१८ संमोहानन्दसंभेदो मदो मद्योपयोगजः ।
अमुना चोत्तमः शेते मध्यो हसति गायति ॥
अधमप्रकृतिश्चापि परुषं वक्ति रोदिति ॥ p. 245.
५१९ सरितः पुलिनं वेला कान्तारारामभूधराः ।
लतागृहाणि चित्राणि शय्या किसलयाञ्चिता ॥
दिवा विहारदेशाः स्युः ॥ p. 157.

---

५०३ अभि० शा० of कालि०. ५०४ अम० ३।२।२२ (स च). ५११ भा० प्र०. ५१२ अम० २।९।५५. ५१३ By कात्या०. ५१६ By वाम० ५।१।१९. ५१७ लोच०. ५१८ साहि० द०. ५१९ भा० प्र०.

५२० सर्वत्रैकैवानन्दव्यक्तिर्लौकिकं सुखमिति व्यवह्रियते । अलौकिकविभावाद्यभिव्यक्त्या कविसमयप्रसिद्ध्यनुसारादलौकिको रस इति कथ्यते। नानाविधविमलकर्मनिर्मलान्तःकरणेषु शमदमादिसाधनसंपन्नेषु श्रवणमनननिदिध्यासनपरेषु परमयोगिषु निर्विकल्पकसमाध्यभिव्यक्त्या ब्रह्मेति परमात्मेतीश्वर इति शब्द्यते ॥ p. 295.

५२१ सर्वप्रकारैः संपूर्णकामः संतुष्टमानसः ।
प्राप्नोति मुक्तिं चरमे शान्तेनैव रसेन सः ॥ p. 237.

५२२ सर्वमप्यार्द्रितं द्रव्यं प्रच्छादनमपेक्षते । p. 90.

५२३ सर्वश्राव्यं प्रकाशं स्यादश्राव्यं स्वगतं मतम् ॥
त्रिपताककरेणान्यानपवार्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते जनान्तिकम् ॥
रहस्यं कथ्यतेऽन्यस्य परावृत्त्यापवारितम् ॥ p. 114.

५२४ सर्वाण्युदकपूर्णानि दानानि । p. 215.

५२५ सर्वासामन्तरा वस्तुरसादिवशकल्पिता ।
अन्तरा सा ध्रुवा ज्ञेया नाट्याभिनयरञ्जिनी ॥ p. 143.

५२६ सर्वास्वप्यवस्थास्वनुल्बणत्वं माधुर्यम् । p. 263.

५२७ सर्वो द्वन्द्वो विभाषयैकवद्भवति । p. 76.

५२८ सव्रीडालोकनेनैव स्वानुकूल्यप्रकाशनम् । p. 68.

५२९ सहकारित्वमेवाधातुं संघटानायामित्यादौ सप्तमीनिर्देशः । p. 47.

५३० सह शाखया प्रस्तरं प्रहरति । p. 16.

५३१ साक्षिगतः साकलिकोऽयमद्वैतवादः । p. 461.

५३२ सादृश्यमात्रं सामान्यं द्विष्ठं कैश्चित् प्रतीयते ।
गुणभेदोऽप्यभेदेन द्विवृत्तिर्वा विवक्षितः ॥ p. 45.

५३३ साधनं निर्वृतौ मदे सैन्ये सिद्धौषधे गतौ । p. 301.

५३४ साधूनामुपकर्तुं लक्ष्मीं द्रष्टुं विहायसा गन्तुम् ।
न कुतूहली कस्य मनश्चरितं च महात्मनां श्रोतुम् ॥ p. 431.

५३५ सामान्यगुणयुक्तस्तु धीरशान्तो द्विजादिकः । p. 23.

५३६ सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः । p. 134

५३७ सुकुमाराङ्गविन्यासो ललितं परिकीर्त्यते । p. 36.

५३८ सुखदुःखादिभिर्भावैर्भावस्तद्भावभावनम् । p. 220.

५३९ सुगन्धपुष्पाक्षतपूर्णकुम्भः शक्रध्वजच्छत्रमहीपतीनाम् ।
उद्यद्दिनेशेन्दुसुहृत्सुराणां सितद्विजादर्शसुवासिनीनाम् ॥
सुवर्णधान्याब्जफलप्रदीपा भक्ष्यान्नरत्नाम्बरवाहनानाम् ।
संदर्शनं श्रेष्ठमुशन्ति सन्तः स्वप्ने मृतानां च सुचेष्टितानाम् ॥ p. 151.

---

५२० By नर० सू०. ५२१ भा० प्र०. ५२२ A न्याय. ५२३ द० रू० १।५८।५९. (त्रिपताका & स्याज्जनान्ते तज्जना°). ५२४ आप०. ५२६ द० रू०. ५२९ लोच० p. 131. ५३२ वा० प०. ५३३ विश्व०. ५३६ अम० ३।५९. ५३९ By देव० यज्ञ०.

५४० सुखायितेत्येवमादयो वर्तमाने द्रष्टव्याः । p. 157.
५४१ सुब्रह्मण्यों सुब्रह्मण्यों सुब्रह्मण्योमिति स्त्रियमिव विराह । p. 150.
५४२ सुरपूजोत्सवसेवा नैवेद्यं नृत्तगीतवाद्यं च । p. 152.
५४३ सुवर्णकुसुमैर्दिव्यैर्मणिविद्रुमविस्तृतैः ।
राजते रत्नसंभूतैरथवा चित्रवल्कैः ॥
येऽर्चयन्ति हरं भक्त्या नरास्ते स्युर्महेश्वराः ॥ p. 152.
५४४ सूत्रधारो नटश्चैव तथा वै पारिपार्श्विकः ॥
सल्लापं यत्र कुर्वन्ति तदेव त्रिगतं स्मृतम् ॥ p. 121.
५४५ सोत्सुकं तद्यदालोक्य भूयो भूयोऽवलोकनम् ।
कल्लोल इव यः कान्तिविच्छेदस्तत् तरङ्गितम् ॥ p. 68
५४६ स्तनादीनां द्वित्वविशिष्टता जातिः प्रायेण । p. 324.
५४७ स्त्रियां शस उदोतौ । p. 427.
५४८ स्त्रीणामीर्ष्याकृतः कोपो मानोऽन्यासङ्गिनि प्रिये ।
श्रुते वानुमिते दृष्टे ईर्ष्याकोपः स उच्यते ॥ p. 278, p. 279.
५४९ स्त्रीणां ललितकोपो मामः । p. 254.
५५० स्त्रीणां वारस्तु वासकः । p. 28.
५५१ स्त्री स्यात् काचिन्मृणाल्यादिर्विवक्षापचये यदि । p. 49, p. 107.
५५२ स्थायी वा सात्त्विको वापि संचारी वा क्वचित् क्वचित् ।
भावो वाक्यार्थतामेति तत्तद्भावविशेषतः ॥ p. 293.
५५३ स्मरार्त्ताभिसरेत् कान्तं सारयेद्वाभिसारिका । p. 82.
५५४ स्मितमिह विकसन्नयनं किंचिल्लक्ष्यद्विजं हसितम् ।
मधुरस्वनं विहसितं साङ्गशिरःकम्पमुपहसितम् ॥
अपहसितं सास्राक्षं विक्षिप्ताङ्गं भवत्यतिहसितम् ।
द्वे द्वे हसिते चैषां ज्येष्ठे मध्येऽधमे क्रमशः ॥ p. 230.
५५५ स्यात् क्रिया करपादादेर्विलासेनाश्रुटद्रसा ।
करणं नृत्तकरणं भांमवद्भीमसेनवत् ॥ p. 138.
५५६ स्युरुत्तरपदे त्वमी ।
निमसंकाशनीकाशप्रतीकाशोपमादयः ॥ p. 358.
५५७ स्युर्वदान्यः स्थूललक्षदानशौण्डा बहुप्रदे । p. 394.
५५८ स्वप्नस्तु प्रथमे यामे वत्सरेण विपच्यते ।
द्वितीये चाष्टभिर्मासैस्त्रिभिर्मासैस्तृतीयके ॥

---

५४० By वृत्तिका०. ५४१ षड्विं० ब्रा०. ५४२ देव० वह्नि०. ५४३ पु० सा० सुधा०. ५४४ मा० प्र०. ५४६ वाम० ५।२।१७ (द्वित्वाविष्टा). ५४८ द० रू०. ५४९ भोज०. ५५१ अम०. ५५४ द० रू० ४–७०–७१ (विकासि नयनं, द्विजं तु हसितं स्यात्, मधुरस्वरं, सशिरःकम्पमिदमुपहसितम्). ५५५ संगी० रत्ना०. ५५६ अम० ३।१०।१. ५५७ अम० ३।१।६. ५५८ बृह०.

अरुणोदयवेलायां वृषाद्येन फलं भवेत् ।
गोविसर्जनवेलायां सद्यः स्वप्नफलं भवेत् ॥ p. 151.

५५९ स्वभावोक्तिर्बुधोत्रेयवस्तुस्वाभाव्यवर्णनम् । p. 319.

५६० स्वरूपार्थाविशेषेऽपि पुनरुक्तिः फलान्तरात् ।
शब्दानां प्रकृतीनां वा लाटानुप्रास इष्यते ॥ p. 345.

५६१ स्वान्या साधारणा चैव मुग्धा मध्या प्रगल्भिका ।
आद्यैकधा त्रिधान्ये द्वे धीराधीरोभयात्मना ।
ज्येष्ठाकनिष्ठाभेदेन ते एव द्विविधे पुनः ।
अन्या परा परोढा च वेश्या त्वेकेति षोडश ।
* * * * * *
चतुःपञ्चाशदधिकत्रिशत्यासां तदा भवेत् ॥ p. 37.

५६२ स्वामिभृत्याधमर्णानां व्यवस्थापरिकल्पने ।
अन्यो यः क्रियते शिष्टः प्रतिभूः स निगद्यते ॥ p. 238.

५६३ स्वार्थत्यागे समानेऽपि सह तेनान्यलक्षणा ।
यत्रेयमजहत्स्वार्था जहत्स्वार्था तु तं विना ॥ p.50.

५६४ स्वेदे द्वारमले शुभाशुभकरं गन्धं सुधीर्लक्षयेत्
सेव्यो भूरुहलाजपाटलघृतप्रख्यः प्रशस्ताह्वयः ।
एतस्मादपरः शुभोऽयमुदितः सत्त्वेन रूपेण यो
युक्तः सोऽपि मतङ्गजः समुचितः कल्याण इत्युच्यते ॥ p. 166.

५६५ स्वो ज्ञातावात्मनि स्वं निष्वात्मीये स्वोऽस्त्रियां धने । p. 33.

५६६ हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति । p. 192.

५६७ हस्ताग्राग्रहस्तादयो गुणगुणिनोर्भेदाभेदात् । p. 412.

५६८ हारादिवदलंकारास्तेऽनुप्रासोपमादयः ।
श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः ॥ p. 335.

५६९ हास्यो जुगुप्सा शृङ्गारहास्यौ शोकभयानकौ ।
भयानको रौद्रवीरौ तथा शृङ्गारविस्मयौ ।
बीभत्सकरुणौ रौद्रशृङ्गारौ च यथाक्रमम् ।
शृङ्गारादीनाप्रविश्य रसामासान् वितन्वते ॥ p. 227.

५७० हीनसंबोधने तु रे । p. 22.

५७१ हुलं द्विफलपत्राग्रम् । p. 168.

५७२ हेषते ह्रेषतेऽश्वानां बृंहतीति च । p. 170.

---

५५९ अलं० सर्व० संजी० by वि० चक्र०. ५६० By रुद्र०. ५६२ By सोमे०. ५६३ तर० on एकाव० p. 68 and सिद्धा० on त० वा by मल्लि०. ५६५ अम० ३।२१०. ५६६ अम० १।७।१५. ५६८ का० प्र०. ५७० अम०. ५७१ वैज०. ५७२ By म० म०.

र० च०=रुचक.
लोच०=लोचन.
व० मि०=वराहमिहिराचार्य.
व० सं=वराहसंहिता or बृहत्संहिता of वराहमिहिर.
वस० नाट्य०=वसन्तराजीयनाट्यशास्त्र (वसन्तराज being king of कुमारगिरि and patron of काटयवेम quoted by मल्लिनाथ on माघ 2–8).
वसि०=वसिष्ठ.
वा० प०=वाक्यपदीय.
वाम०=वामन.
वा० शा०=वास्तुशास्त्र.
वि० मु० मं०=विदग्धमुखमण्डन, enigmatology by the Buddhist धर्मदास.
वि० चक्र०=विद्याचक्रवर्तिन्.
विश्व०=विश्वकोष of महेश्वर.
वि० पु०=विष्णुपुराण.
वृ० रत्ना०=वृत्तरत्नाकर.
वृत्तिका०=वृत्तिकार
वृ० वसि०=वृद्धवसिष्ठ.
वैज०=वैजयन्ती by यादवभट्ट.
व्या०=व्यास.
शा० प०=शान्तिपर्वन्.
शार० त०=शारदातनय.
शारि० ना०=शारिकानाथ.
शार्ङ्ग०=शार्ङ्गदेव.
शिशु० व०=शिशुपालवध.
शृ० ति०=शृङ्गारतिलक by रुद्रभट्ट.
शृ० प्र =शृङ्गारप्रकाश.
श्रीक० ली०=श्रीकण्ठलीला.
षटसह०=षट्सहस्री quoted by Dhanika in his अवलोक on Dhanañjaya's दशरूप.
षड्विं० ब्रा०=षड्विंशब्राह्मण.
संगी० चूडा०=संगीतचूडामणि.
संगी० रत्ना०=संगीतरत्नाकर by शार्ङ्गदेव.
साहि० द०=साहित्यदर्पण.
साहि० मी०=साहित्यमीमांसा by रुचक.
सिद्धा०=सिद्धाञ्जन.
सू० सि०=सूर्यसिद्धान्त by भास्कराचार्य.
सोम०=सोमेश्वर.
से० ब०=सेतुबन्ध.
स्क० पु०=स्कन्दपुराण.
स्मृ० रत्ना०=स्मृतिरत्नावली.
स्वा० यो० प्र०=स्वात्मयोगप्रदीप, a commentary on स्वात्मयोग by अमरानन्दयोगीन्द्र.
हर०=हरदत्त.
हला०=हलायुधकोष.
हेम०=हेमचन्द्र, pupil of देवचन्द्रसूरि, teacher of कुमारपाल, author of काव्यानुशासन and many other works. (A. D. 1092–1173).

Appendix VIII.

Containing Bhâmaha's work on poetics, based npon two Mss., one deposited in the Mahârâjâ's Sanskrit Library, Trivandrum, and the other which seems a transcript of the Ms. at Trivandrum is deposited in the Government Oriental Mss. Library, Madras. The former is designated T. It is written on palm leaves and is abont five hundred years old. The ends of the palm-leaves are in many cases worn ont. The latter is designated M. T. begins thns:—हरिः । श्रीगणपतये नमः । अविघ्नमस्तु । श्रीमद्दाशरथिपादेभ्यो नमः ॥ M. has अविघ्नमस्तु in the beginning.

श्रीः । भामहालंकारः ॥

प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः ।
काव्यालंकार इत्येष यथाबुद्धि विधास्यते ॥ १ ॥
[1]धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम् ॥ २ ॥
अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम् ।
अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम् ॥ ३ ॥
[2]विनयेन विना का श्रीः का निशा शशिना विना ।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता ॥ ४ ॥
गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम् ।
काव्यं तु जायते जातु कस्यचित् प्रतिभावतः ॥ ५ ॥
[3]उपेयुषामपि दिवं सन्निबन्धविधायिनाम् ।
आस्त एव निरातङ्कं कान्तं काव्यमयं वपुः ॥ ६ ॥
रुणद्धि रोदसी चास्य यावत् कीर्तिरनश्वरी ।
तावत् किलायमध्यास्ते सुकृती वैबुधं पदम् ॥ ७ ॥
अतोऽभिवाञ्छता कीर्तिं स्थेयसीमा भुवः स्थितेः ।
यत्नो विदितवेद्येन विधेयः काव्यलक्षणः ॥ ८ ॥

---

[1] This verse is found in ध्वन्यालोकलोचन, quoted without the author's name on p. 12. The reading there is साधुकाव्यनिषेवणम्. °निबन्धनम् is also noticed in the foot-note as found in क. and ख.

[2] Found, quoted without the author's name, in चित्रमीमांसा p. 83.

[3] Found, quoted without the author's namo in लोचन p. 12.

१शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः ।
लोको युक्तिः कलाश्चेति मन्तव्या काव्ययैर्ह्यमी? (मन्तव्याः काव्ययैर्ह्यमी?) ॥ ९ ॥
शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम् ।
विलोक्यान्यनिबन्धांश्च कार्यः काव्यक्रियादरः ॥ १० ॥
सर्वथा पदमप्येकं न निगाद्यमवद्यवत् ।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते ॥ ११ ॥
अकवित्वमधर्माय व्याधये दण्डनाय वा ।
कुकवित्वं पुनः साक्षान्मृतिमाहुर्मनीषिणः ॥ १२ ॥
२रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः ।
न कान्तमपि निर्भूषं विभाति वनितामुखम् ॥ १३ ॥
रूपकादिमलंकारं बाह्यमाचक्षते परे ।
३सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलंकृतिम् ॥ १४ ॥
तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी ।
शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु नः ॥ १५ ॥
शब्दार्थौ सहितौ काव्यं गद्यं पद्यं च तद् द्विधा ।
४कयुतं ? (संस्कृतं ?) प्राकृतं चान्यदपभ्रंश इति त्रिधा ॥ १६ ॥
५वृत्तदेवादिचरितशंसि चोत्पाद्यवस्तु च ।
कलाशास्त्राश्रयं चेति चतुर्धा भिद्यते पुनः ॥ १७ ॥
सर्गबन्धोऽभिनेयार्थं तथैवाख्यायिकाकथे ।
अनिबद्धं च काव्यादि तत् पुनः पञ्चधोच्यते ॥ १८ ॥
सर्गबन्धो महाकाव्यं महतां च महच्च यत् ।
अग्राम्यशब्दमर्थ्यं च सालंकारं सदाश्रयम् ॥ १९ ॥
६मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत् ।
पञ्चभिः संधिभिर्युक्तं नातिव्याख्येयमृद्धिमत् ॥ २० ॥

---

१ Quoted with Bhâmaha's name in लोचन p. 10. The different readings are शब्दश्छन्दोभिधानार्थः and शब्दश्छन्दोभिधानार्थं. Only the 1st Pâda is quoted.

२ Verses 13, 14 and 15 are quoted without the author's name in the 6th Ullâsa of the Kâvyaprakâs'a. (V. l. there वनिताननम्).

३ This half and the first half of verse 15 are quoted by S'rî Premachandra Tarkavâgis'a on Kâvyâdars'a. *Vide* p. 11 of his edition.

४ cf. प्राकृतं संस्कृतं चैतदपभ्रंश इति त्रिधा । quoted without name by नमिसाधु on काव्यालंकार of रुद्रट २–११.

५ Quoted with the name of Bhâmaha in the commentary on उद्भटालंकारसारसंग्रह by प्रतीहारेन्दुराज.

६ M. has मन्त्रि.

चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत् ।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् ॥ २१ ॥
नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः ।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया ॥ २२ ॥
यदि काव्यशरीरस्य न स व्यापितयेष्यते ।
न चाभ्युदयभाक् तस्य मुधादौ ग्रहणं स्तवे ॥ २३ ॥
नाटकं द्विपदीशम्याराशकस्कन्धकादि यत् ।
उक्तं तदभिनेयार्थमुक्तोऽन्यैस्तस्य विस्तरः ॥ २४ ॥
[१]प्रकृतानाकुलश्रव्यशब्दार्थपदवृत्तिना ।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता ॥ २५ ॥
वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम् ।
वक्त्रं चापरवक्त्रं च काले भाव्यर्थशंसि च ॥ २६ ॥
कवेरभिप्रायकृतैः कथ (ध?) नैः कैश्चिदङ्किता ।
कन्याहरणसंग्रामविप्रलम्भोदयान्विता ॥ २७ ॥
न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि ।
संस्कृतं संस्कृता चेष्टा कथापभ्रंशभाक् [२]तथा ॥ २८ ॥
[३]अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते ।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः ॥ २९ ॥
अनिबन्धं पुनर्गाथाश्लोकमात्रादि तत् पुनः ।
युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते ॥ ३० ॥
वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे ।
तदेव च किल ज्यायः सदर्थमपि नापरम् ॥ ३१ ॥
गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक् ।
गतानुगतिकन्यायान्नानाख्येयममेधसाम् ॥ ३२ ॥
ननु चाश्मकवंशादि वैदर्भमिति कथ्यते ।
कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते ॥ ३३ ॥
अपुष्टार्थमवक्रोक्ति प्रसन्नमृजु कोमलम् ।
भिन्नं गेयमिवेदं तु केवलं श्रुतिपेशलम् ॥ ३४ ॥
अलंकारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम् ।
गौडीयमपि साधीयो वैदर्भमिति नान्यथा ॥ ३५ ॥

---

१ T. notices प्रसृता also.

२ M. has तदा.

३ This distinction between आख्यायिका and कथा given by भामह is criticized by दण्डिन् in his काव्यादर्श १-२३-२८. *Vide* my notes on the Kávya-prakarana pp. २५-२६.

स नितान्तादिमात्रेण जायते चारुता गिराम् ।
¹वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृतिः ॥ ३६ ॥
नेयार्थं क्लिष्टमन्यार्थमवाचकमयुक्तिमत् ।
गूढशब्दाभिधानं च कवयो न प्रयुञ्जते ॥ ३७ ॥
नेयार्थं नीयते युक्तो यस्यार्थः कृतिभिर्बलात् ।
शब्दन्यायानुपारूढः कथंचित् स्वाभिसंबन्धिना ॥ ३८ ॥
मायेव भद्रेति यथा सा चासाध्वी प्रकल्पना ।
वेणुदाकेरिति च तान् नयन्ति वचनाद्विना ॥ ३९ ॥
क्लिष्टं व्यवहितं विद्यादन्यार्थविगमे यथा (दन्यार्थे विगमे यथा ?)
विजह्रुस्तस्य ताः शोकं क्रीडायां विकृतं च तत् ॥ ४० ॥
²हिमापहामित्रधरैर्व्याप्तं व्योमेत्यवाचकम् ।
साक्षादरूढं वाच्येऽर्थे नाभिधानं प्रतीयते ॥ ४१ ॥
अयुक्तिमद्यथा दूता ³जलभृन्मात्रकेऽङ्क च ? (मारुतेन्दवः ?) ।
तथा भ्रमरहारीतचक्रवाकशुकादयः ॥ ४२ ॥
अवाचो व्यक्तवाचश्च दूरदेशविचारिणः ।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते ॥ ४३ ॥
यदि चोत्कण्ठया यत्तदुन्मत्त इव भाषते ।
तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते ॥ ४४ ॥
गूढशब्दाभिधानं च न प्रयोज्यं कथंचन ।
सुधियामपि नैवेदमुपकाराय कल्पते ॥ ४५ ॥
⁴असिततर्तितुगद्रिच्छित्स्वःक्षितांपतिरद्धिदृक् ।
अमिद्भिः शुभ्रदन्दृष्टैर्द्विषो जञ्चीयिषीष्ट वः ॥ ४६ ॥

---

१ Found, quoted in अभिनवगुप्त's लोचन on ध्वन्यालोक p. 208.

२ हिमापहामित्रधरैर्व्याप्तं व्योम is found in Daṇḍin's Kâvyâdars'a 3–120. (latter half).

३ M. has जलभृन्मात्र (हा) तेषु च ।

४ Given as an instance of a कठोर composition by भोज in his सरस्वती-कण्ठाभरण. १–२२— सौकुमार्यविपर्यासात् कठोर उपजायते । यथा असिततर्ति &c. । अत्रा-तिकठोरत्वादसौकुमार्यं सुप्रतीतमेव ।

Ratnes'vara's commentary on the verse is as under:—

असिततर्तीति । 'ऋ गतौ" इति धात्वनुसारादनिर्वर्त्म । असिता कृष्णा ऋतिर्वर्त्म यस्य कृष्णवर्त्मा वह्निस्तस्य तुगपत्यम् । अद्रिच्छिदिति क्रौञ्चदारणत्वात् । स्वर्गे क्षियन्ति निवसन्ति ये देवास्तेषां पतिः सेनानीत्वात् । अद्विदृग्द्वादशलोचनत्वात् । स एवंभूतो भगवान् कुमारोऽ-मिद्भिरक्लिग्धै रूक्षैः शुभ्रदन्दृष्टैर्धवलाक्षिविलोकितैः सकोपनिभालने तारकाभागस्योर्ध्वतया नयना-त्तथाभावो जातिर्वो युष्माकं द्विषः शत्रूञ्जञ्चीयिषीष्ट । अत्यर्थं पुनःपुनर्वा वध्यादित्यर्थः । हन्तेर्यङि भीमाते आशीर्लिङि रूपम् । स्वतन्त्रस्य पदस्य श्रुतिकटुता पददोषः । इह तु पदानामनया-माने तिर्द्रिच्छि इत्यादीनां वर्णानां परस्परसंनिधाने घटनैव कठोरेत्याह । अत्रातिकठोरत्वादिति ।

श्रुतिदुष्टार्थदुष्टे च कल्पनादुष्टमित्यपि ।
श्रुतिकष्टं तथैवाहुर्वाचां दोषं चतुर्विधम् ॥ ४७ ॥
विड्वर्चोविष्ठिताक्लिन्न१च्छिन्नवान्तप्रवृत्तयः ।
प्रचारधर्षितोद्गारविसर्गादयं वृताः? (यन्त्रिताः?) ॥ ४८ ॥
हिरण्यरेताः संबाधः पेलोपोपस्थिताण्डजाः ।
वाक्काटवादयश्चेति श्रुतिदुष्टा मता गिरः ॥ ४९ ॥
अर्थदुष्टं पुनर्ज्ञेयं यत्रोक्ते जायते मतिः ।
असभ्यवस्तुविषया शब्दैस्तद्वाचिभिर्यथा ॥ ५० ॥
हन्तुमेव प्रवृत्तस्य स्तम्भस्य (स्तब्धस्य ?) विवरैषिणः ।
पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः ॥ ५१ ॥
पदद्वयस्य सन्धाने यदनिष्टं २प्रकल्पते ।
तदाहुः कल्पनादुष्टं सचौर्याभरणो यथा ॥ ५२ ॥
यथाजिह्लदवित्यादि श्रुतिकष्टं च तद्विदुः ।
न तदिच्छन्ति कृतिनो गण्डमप्यपरे किल ॥ ५३ ॥
संनिवेशविशेषात्तु दुरुक्तमपि शोभते ।
नीलं पलाशमाबद्धमन्तराले स्रजामिव ॥ ५४ ॥
किंचिदाश्रयसौन्दर्याद्धत्ते शोभामसाध्वपि ।
कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम् ॥ ५५ ॥
आपाण्डुगण्डमेतत्ते वदनं वनजेक्षणे ।
संगमात् पाण्डुशब्दस्य गण्डः साधु यथोदितम् ॥ ५६ ॥
अनयान्यदपि ज्ञेयं दिशा युक्तमसाध्वपि ।
यथा विक्लिन्नगण्डानां करिणामुदवारिभिः ॥ ५७ ॥
मदक्लिन्नकपोलानां द्विरदानां चतुःशती ।
यथा तद्वदसाधीयः साधीयश्च प्रयोजयेत् ॥ ५८ ॥
एतद्ग्राह्यं सुरभिकुसुमं ग्राम्यमेतन्निधेयं
धत्ते शोभां विरचितमिदं स्थानमस्यैतदस्य ।
मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येष्ववहितधिया तद्वदेवाभिधानम् ॥ ५९ ॥

इति भामहालंकारे प्रथमः परिच्छेदः ॥

अथ द्वितीयः परिच्छेदः ॥

माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः ।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते ॥ १ ॥
केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि ।
यथा मन्दारकुसुमरेणुपिञ्जरितालका ॥ २ ॥

---

१ °च्छिन्नक्लिन्न° M.
२ प्रगल्भते M.

१श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते ।
आविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत् ॥ ३ ॥
अनुप्रासः सयमको रूपकं दीपकोपमे ।
इति वाचामलंकाराः पञ्चैवान्यैरुदाहृताः ॥ ४ ॥
२सरूपवर्णविन्यासमनुप्रासं प्रचक्षते ।
किं तया चिन्तया कान्ते नितान्तेति यथोदितम् ॥ ५ ॥
ग्राम्यानुप्रासमन्यत्तु मन्यन्ते सुधियोऽपरे ।
स लोलमालानीलालिकुलाकुलगलो बलः ॥ ६ ॥
नानार्थवन्तोऽनुप्रासा न चाप्यसदृशाक्षराः ।
युक्त्यानया मध्यमया जायन्ते चारवो गिरः ॥ ७ ॥
लाटीयमप्यनुप्रासमिहेच्छन्त्यपरे यथा ।
दृष्टिं दृष्टिसुखां धेहि चन्द्रश्चन्द्रमुखोदितः ॥ ८ ॥
आदिमध्यान्तयमकं पादाभ्यासं तथावली ।
समस्तपादयमकमित्येतत् पञ्चधोच्यते ॥ ९ ॥
संदष्टकसमुद्गादेरत्रैवान्तर्गतिर्मता ॥
आदौ मध्यान्तयोर्वा स्यामि (दि ?) ति पञ्चैत्र तद्यथा ॥ १० ॥
साधुनासाधुना तेन राजताराजता भृता ।
सहितं सहितं कर्तुं सङ्गतं सङ्गतं जनम् ॥ ११ ॥
साधुस्त्वंसाराद्विभ्यदस्मादसारात्
कृत्वा क्लेशान्तं याति वर्त्म प्रशान्तम् ।
आर्ति व्याधीनां दुर्दयानामधीनां
वाञ्छन्त्या यस्त्वं छिन्धि युक्तान्यस्त्वम् ॥ १२ ॥
न ते धीर्धीर भोगेषु रमणीयेषु संगता ।
मुनीनपि हरन्त्येते रमणीयेषु सङ्गता ॥ १३ ॥
सितासिताक्षीं सुपयोधराधरां
सुसम्मदां व्यक्तमदां ललामदाम् ।
घनाघना नीलघनाघनालकां
प्रियामिमामुत्सुकयन्ति यन्ति च ॥ १४ ॥

---

१ Found in the Sarvapathīna, Mallinātha's commentary on Bhaṭṭi-kâvya C. XI. I. The reading there is श्राव्यं for श्रव्यं. It is also found in Jayamaṅgalâ on the same verse. The readings there are श्राव्यं and काव्ये. Found quoted with Bhâmaha's name in his Ṭikâ on the Kâvyânuśâsana p. 201 'तेन "श्रव्यं नातिसमस्तार्थशब्दं मधुरमिष्यते' इति माधुर्यलक्षणत्वेन श्रव्यत्वं यद्भामहेनोक्तं तन्न युक्तमित्यर्थः ।'.

२ The first half of the verse is found quoted in the Jayamaṅgalâ on Bhaṭṭi X. I.

अमी नृपा दत्तसमग्रशासनाः
कदाचिदप्यप्रतिबद्धशासनाः ।
कृतागसां मार्गभिदां च शासनाः
पितृक्रमाध्यासिततादृशासनाः ॥ १५ ॥
अनन्तरैकान्तरयोरेवं पादान्तयोरपि ।
कृत्स्नं च सर्वपादेषु दुष्कृतं साधु तादृशम् ॥ १६ ॥
१तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम् ।
वर्णानां यः पुनर्वादो यमकं तन्निगद्यते ॥ १७ ॥
प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च ।
प्रसादि स्वभिधानं च यमकं कृतिनां मतम् ॥ १८ ॥
नानाधात्वर्थगम्भीरा यमकव्यपदेशिनी ।
प्रहेलिका सा ह्युदिता रामशर्माच्युतोत्तरे ॥ १९ ॥
२काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत् ।
उत्सवः सुधियामेव हन्त दुर्मेधसो हताः ॥ २० ॥
३उपमानेन यत्तत्त्वमुपमेयस्य रूप्यते ।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः ॥ २१ ॥
समस्तवस्तुविषयमेकदेशविवर्ति च ।
द्विधा रूपकमुद्दिष्टमेतत्तच्चोच्यते यथा ॥ २२ ॥
४सीकराम्भोमदसृजस्तुङ्गा जलददन्तिनः ।
निर्यान्तो मदयन्तीमे शक्रकार्मुकवारणम् ॥ २३ ॥
तडिद्वलयकक्ष्याणां बलाकामालभारिणाम् ।
पयोमुचां ध्वनिर्धीरो दुनोति मम तां प्रियाम् ॥
५आदिमध्यान्तविषयं त्रिधा दीपकमिष्यते ।
एकस्यैव त्र्यवस्थत्वादिति तद्भिद्यते त्रिधा ॥ २५ ॥
अमूनि कुर्वतेऽन्वर्थामस्याख्यामर्थदीपनात् ।
त्रिभिर्निदर्शनैश्चेदं त्रिधा निर्दिश्यते यथा ॥ २६ ॥

---

१ Found, quoted in the Jayamangalâ on the Bhatti-kâvya X. 1 without the author's name. The reading there is यमकं तन्निरूप्यते.

२ cf. व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् । हता दुर्मेधसश्चास्मिन् विद्वत्प्रियतया मया ॥ भट्टि २२-३४.

३ Found in the Jayamangalâ on the Bhatti-kâvya X. 25 and also in the Agnipurâṇa without the author's name. The reading there is तुल्यत्वं for यत्तत्त्वं.

४ M. शीकरा°.

५ Found in the Lochana p. 38 without the author's name.

१मदो जनयति प्रीतिं २सानङ्गं मानभङ्गुरम् ।
स प्रियासंगमोत्कण्ठां सासह्यां मनसः शुचम् ॥ २७ ॥
मालिनीरंशुकभृतः स्त्रियोऽलंकुरुते मधुः ।
हारीतशुकवाचश्च भूधराणामुपत्यकाः ॥ २८ ॥
३चीरीमतीररण्यानीः सरितः शुष्यदम्भसः ।
प्रवासिनां च चेतांसि शुचिरन्तं मिनीपति ॥ २९ ॥
४विरुद्धेनोपमानेन देशकालक्रियादिभिः ।
उपमेयस्य यत् साम्यं गुणलेशेन सोपमा ॥ ३० ॥
यथेवशब्दौ सादृश्यमाहतुर्व्यतिरेकिणोः ।
दूर्वाकाण्डमिव श्यामं तन्वी ५श्यामलता यथा ॥ ३१ ॥
विना यथेवशब्दाभ्यां समासाभिहितापरा ।
यथा कमलपत्राक्षी शशाङ्कवदनेति च ॥ ३२ ॥
वतिनापि क्रियासाम्यं तद्वदेवाभिधीयते ।
द्विजातिवदधीतेऽसौ गुरुवच्चानुशास्ति नः ॥ ३३ ॥
समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते ।
यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः ॥ ३४ ॥
साधुसाधारणत्वादिर्गुणोऽत्र व्यतिरिच्यते ।
स साम्यमापादयति विरोधेऽपि तयोर्यथा ॥ ३५ ॥
कियन्तः सन्ति गुणिनः साधुसाधारणश्रियः ।
स्वादुपाकफला नम्राः कियन्तो वाध्वशाखिनः ॥ ३६ ॥
यदुक्तं त्रिप्रकारत्वं तस्याः कैश्चिन्महात्मभिः ।
निन्दाप्रशंसाचिख्यासाभेदादत्राभिधीयते ॥ ३७ ॥
सामान्यगुणनिर्देशात् त्रयमप्युदितं ननु ।
मालोपमादिः सर्वोऽपि न ज्यायान् विस्तरो मुधा ॥ ३८ ॥
हीनतासंभवो लिङ्गवचोभेदो विपर्ययः ।
उपमानाधिकत्वं च तेनासदृशतापि च ॥ ३९ ॥

---

१ Found in the Lochana p. 40, quoted without the author's name. Found in the Jayamaṅgalâ with the name of the author, Bhaṭṭi, C. X. 21. The readings there are प्रीतिमानन्दं & यत्प्रियासङ्गमोत्कण्ठामसह्या. Vâmana also quotes a portion of it, though wrongly as मातङ्गं मानभङ्गुरम्. *Vide* the वृत्ति on ५।२।२८.

२ सानलां M.

३ चरीमती M.

४ Found quoted with the author's name in the Jayamaṅgalâ on Bhaṭṭi X. 30. (V. l. गुणमात्रेण).

५ श्यामा M.

त एत उपमादोषाः सप्त [1]मेधाविनोदिताः।
सोदाहरणलक्ष्माणो वर्ण्यन्तेऽत्र च ते पृथक् ॥ ४० ॥
[2]स मारुताकम्पितपीतवासा
बिभ्रत् सलीलं शशिभासमब्जम्।
यदुप्रवीरः प्रगृहीतशार्ङ्ग-
स्सेन्द्रायुधो मेघ इवाबभासे ॥ ४१ ॥
शक्रचापग्रहादत्र दर्शितं किल कार्मुकम्।
वासःशङ्खानुपादानाद्धीनमित्यभिधीयते ॥ ४२ ॥
सर्वं सर्वेण सारूप्यं नास्ति भावस्य कस्यचित्।
यथोपपत्तिकृतिभिरुपमा सुप्रयुज्यते ॥ ४३ ॥
अखण्डमण्डलः क्वेन्दुः क्व कान्ताननमद्युति।
यत्किञ्चित्कान्तिसामान्याच्छशिनैवोपमीयते ॥ ४४ ॥
किं च काव्यानि नेयानि लक्षणेन महात्मनाम्।
दृष्टं वा सर्वसारूप्यं राजामित्रे यथोदितम् ॥ ४५ ॥
[3]सूर्यांशुसंमीलितलोचनेषु
दीनेषु पद्मानिलनिर्मदेषु।
साध्व्यः स्वगेहेष्विव भर्तृहीनाः
केका [4]विनेशुः शिखिनां मुखेषु ॥ ४६ ॥
[5]निष्पेतुरास्यादिव तस्य दीप्ताः
शरा धनुर्मण्डलमध्यभाजः।
जाज्वल्यमाना इव वारिधारा
दिनार्धभाजः परिवेषिणोऽर्कात् ॥ ४७ ॥

शाखवर्धनस्य

---

१ मेधाविन् or मेधाविरुद्र is named and quoted by नमिसाधु in his commentary on रुद्रट's काव्यालंकार I. 1 and XI. 24. Medhâvin gives seven defects of Upamâ:—'लिङ्गवचनभेदौ हीनताधिक्यसंभवो विपर्ययोऽसादृश्यमिति सप्तोपमादोषाः'।

२ Found, quoted by नमिसाधु on काव्यालंकार XI. 24. शशिभासि शङ्खम् is the reading there and is correct as appears from वासःशङ्खानुपादानाद्धीनमित्यभिधीयते। ४२.

३ Found, quoted, without the author's name in the वृत्ति on वामन's काव्यालंकारसूत्र ४. २. १०. (V. l. °निर्मलेषु and नर्मदेषु for °निर्मदेषु). अत्र बहुत्वमुपमेयधर्माणामुपमानात् न विशिष्टानामेव मुखानामुपमेयत्वात्। तादृशेष्वेव केकाविनाशस्य संभवात्।

४ विनेदुः M.

५ Found, quoted in the काव्यप्रकाश X. (V. l. निपेतुः)–'अत्रापि ज्वलन्त्योऽम्बुधाराः सूर्यमण्डलान्निष्पतन्त्यो न संभवन्तीत्युपनिबध्यमानोऽर्थोऽनौचित्यमेव पुष्णाति।'

कथं पातोऽम्बुधाराणां ज्वलन्तीनां विवस्वतः ।
असंभवादयं युक्त्या तेनासंभव उच्यते ॥ ४८ ॥
तत्रासंभविनार्थेन कः कुर्यादुपमां कृती ।
को नाम वह्निनौपम्यं कुर्वीत शशलक्ष्मणः ॥ ४९ ॥
यस्यातिशयवानर्थः कथं सोऽसंभवो मतः ।
इष्टं चातिशयार्थत्वमुपमोत्प्रेक्षयोर्यथा ॥ ५० ॥
पुञ्जीभूतमिव ध्वान्तमेष भाति मतङ्गजः ।
सरः शरत्प्रसन्नाम्भो नभःखण्डमिवोज्झितम् ॥ ५१ ॥
अथ लिङ्गवचोभेदादुच्येते सविपर्ययौ ।
हीनाधिकत्वात् स द्वेधा त्रयमप्युच्यते यथा ॥ ५२ ॥
अविगाह्योऽसि नारीणामनन्यमनसामपि ।
विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः ॥ ५३ ॥
१क्वचिदग्रे प्रसरता क्वचिदापत्य निघ्नता ।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषां बलम् ॥ ५४ ॥
२अयं पद्मासनासीनश्चक्रवाको विराजते ।
युगादौ भगवान् ब्रह्मा विनिर्मित्सुरिव प्रजाः ॥ ५५ ॥
ननूपमीयते पाणिः कमलेन विकासिना ॥
अधरो विद्रुमच्छेदभासा बिम्बफलेन च ॥ ५६ ॥
उच्यते काममस्तीदं किं तु स्त्रीपुंसयोरयम् ।
विधिर्नाभिमतोऽन्यैस्तु त्रयाणामपि नेष्यते ॥ ५७ ॥
३स पीतवासा प्रगृहीतशार्ङ्गो
मनोज्ञभीमं वपुराप कृष्णः ।
शतह्रदेन्द्रायुधवान् निशायां
संसृज्यमानः शशिनेव मेघः ॥ ५८ ॥

रामशर्मणः ।

शशिनो ग्रहणादेतदाधिक्यं किल न ह्ययम् ।
निर्दिष्ट उपमेयेऽर्थे वाच्यो वा जलदोऽत्र तु ॥ ५९ ॥
न सर्वसारूप्यमिति विस्तरेणोदितो विधिः ।
अभिप्रायात् कवेर्नात्र विधेया जलजे मतिः ॥ ६० ॥
आधिक्यमुपमानानां न्याय्यं नाधिकता भवेत् ।
गोक्षीरकुन्दहलिनां विशुद्धया सदृशं यशः ॥ ६० ॥

---

१ Found quoted in केशवमिश्र's अलंकारशेखर (V. l. क्वचिदापद्य) *Vide* p. 18 of अलंकारशेखर.

२ Found quoted in the काव्यप्रकाश X. (V. l. वेधाः for ब्रह्मा).

३ Found, quoted in the काव्यप्रकाश X.—'अत्रोपमेयस्य शङ्खादेरनिर्देशे शशिनो ग्रहणमतिरिच्यते—इत्यधिकपदत्वम् ।'.

एतेनैवोपमानेन ननु सादृश्यमुच्यते ।
उक्तार्थस्य प्रयोगो हि गुरुमर्थं न पुष्यति ॥ ६२ ॥
१वनेऽथ तस्मिन् वनितानुयायिनः
प्रवृत्तदानार्द्रकटा मतङ्गजाः ।
विचित्रबर्हाभरणाश्च बर्हिणो
बभुर्दिवीवामलविग्रहा ग्रहाः ॥ ६३ ॥
ग्रहैरपि गजादीनां यदि सादृश्यमुच्यते ।
तथापि तेषां तैरस्ति कान्तिर्वाऽपुग्रतापि वा ॥ ६४ ॥
इत्युक्त उपमाभेदो वक्ष्यते चापरः पुनः ।
उपमादेरलंकाराद्विशेषोऽन्योऽभिधीयते ॥ ६५ ॥
आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना ।
समासातिशयोक्ती च षडलंकृतयोऽपराः ॥ ६६ ॥
वक्ष्यमाणोक्तविषयस्तत्राक्षेपो द्विधा मतः ।
एकरूपतया शेषा निर्देक्ष्यन्ते यथाक्रमम् ॥ ६७ ॥
२प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया ।
आक्षेप इति तं सन्तः शंसन्ति द्विविधं यथा ॥ ६८ ॥
३अहं त्वा यदि नेक्षेय क्षणमप्युत्सुका ततः ।
इयदेवास्त्वतोऽन्येन किमुक्तेनाप्रियेण तु ॥ ६९ ॥
स्वविक्रमाक्रान्तभुवश्चित्रं यन्न तवोद्धतिः ।
को वा सेतुरलं सिन्धोर्विकारकरणं प्रति ॥ ७० ॥
४उपन्यसनमन्यस्य यदर्थस्योदितादृते ।
ज्ञेयः सोऽर्थान्तरन्यासः पूर्वार्थानुगतो यथा ॥ ७१ ॥

---

१ Found, quoted by नमिसाधु on रुद्रट's काव्यालंकार XI. 24. (V. l. वनिताविहारिणः, प्रभिन्नदानार्द्रकटा). ' यत्रोपमानोपमेययोः साम्यं नास्ति तदसादृश्यम्—यथा ' वनेऽथ &c. । अत्र न किंचिद्दन्तिनां मयूराणां च ग्रहैः सारूप्यमस्तीति ।'.

२ Found, quoted, without the author's name in लोचन p. 36 (प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः ॥). It is also found, quoted, with the name of the author in the Jayamaṅgalâ on Bhaṭṭi X. 37 (V. l. द्विविधं यथा).

३ Found, quoted in अभिनवगुप्त's लोचन on ध्वन्यालोक p. 36 (V. l. किमुक्तेनाप्रियेण ते). Also quoted by Hemachandra in his Kâvyânus'âsana, p. 268 (°नाप्रियेण ते).

४ Found, quoted, with the name of भामह in जयमङ्गला on भट्टि X. 36 (V. l. उपन्यसनमर्थस्य प्रक्रान्तादपरस्य यत् ।). नमिसाधु on रुद्रट's काव्यालंकार VIII. 84. says 'भामहादिमतेन त्वर्थान्तरन्यास एव । ' अर्थद्वयस्य न्यासः सोऽर्थान्तरन्यासः ' इति तदीयलक्षणात् ।

परानीकानि भीमानि विविक्षोर्न तव व्यथा ।
साधु वासाधु वागामि पुंसामात्मैव शंसति ॥ ७२ ॥
हिशब्देनापि हेत्वर्थप्रथनादुक्तसिद्धये ।
अयमर्थान्तरन्यासः सुतरां व्यज्यते यथा ॥ ७३ ॥
वहन्ति गिरयो मेघानभ्युपेतान् गुरूनपि ।
गरीयानेव हि गुरून् बिभर्त्ति प्रणयागतान् ॥ ७४ ॥
[१]उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम् ।
व्यतिरेकं तमिच्छन्ति विशेषापादनाद्यथा ॥ ७५ ॥
सितासिते पक्ष्मवती नेत्रे ते ताम्रराजिनी ।
एकान्तशुभ्रश्यामे तु पुण्डरीकासितोत्पले ॥ ७६ ॥
[२]क्रियायाः प्रतिषेधे या तत्फलस्य विभावना ।
ज्ञेया विभावनैवासौ समाधौ सुलभे सति ॥ ७७ ॥
अपीतमत्ताः शिखिनो दिशोऽनुत्कण्ठिताकुलाः ।
नीपोऽविलिप्तसुरभिरभ्रष्टकलुषं जलम् ॥ ७८ ॥
[३]यत्रोक्ते गम्यतेऽन्योऽर्थस्तत्समानविशेषणः ।
सा समासोक्तिरुद्दिष्टा [४]संक्षिप्तार्थतया यथा ॥ ७९ ॥
स्कन्धवानृजुरव्यालः स्थिरोऽनेकमहाफलः ।
जातस्तरुरयं चोच्चैः पातितश्च नभस्वता ॥ ८० ॥
[५]निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम् ।
मन्यन्तेऽतिशयोक्तिं तामलंकारतया यथा ॥ ८१ ॥
स्वपुष्पच्छविहारिण्या चन्द्रभासा तिरोहिताः ।
अन्वमीयन्त भृङ्गालिवाचा सप्तच्छदद्रुमाः ॥ ८२ ॥
अपां यदि त्वक् शिथिला च्युता स्यात् फणिनामिव ।
तदा शुक्लांशुकानि स्युरङ्गेष्वम्भसि योषिताम् ॥ ८३ ॥

---

१ Found, quoted, with the name of भामह in जयमङ्गला on भट्टि X. 39 (V. l. विशेषोत्पादनाद्यथा).

२ Found, quoted, with the name of भामह, in जयमङ्गला on भट्टि X. 40 (V. l. प्रतिषेधेन तत्फलस्य विभावनात् & सान्वयं कथ्यते यथा for समाधौ सुलभे सति). उद्भट's definition of विभावना is exactly the same as भामह's.

३ Found, quoted with the name of भामह, in जयमङ्गला on भट्टि X. 41 (V. l, यत्रोक्तेर्गम्यते and °रुदिता for °रुद्दिष्टा). अग्निपुराण has the same definition as is given in जयमङ्गला but has बुधैः for यथा. Also quoted without the name of भामह in ध्वन्यालोकलोचन p. 35 (तत्समानैर्विशेषणैः V. l.).

४ संक्षिप्तार्था यथा तथा M.

५ Found, quoted without the name of भामह in जयमङ्गला on भट्टि X. 42. (V. l. यत्र वचो) उद्भट has यत्तु वचो and बुधाः for यथा.

इत्येवमादिरुदिता गुणातिशययोगतः ।
सर्वैवातिशयोक्तिस्तु तर्कयेत् तां यथागमम् ॥ ८४ ॥

१सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना ॥ ८५ ॥

२हेतुश्च सूक्ष्मो लेशोऽथ नालंकारतया मतः ।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः ॥ ८६ ॥

३गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः ।
इत्येवमादि किं काव्यं वार्त्तामेनां प्रचक्षते ॥ ८७ ॥

यथासंख्यमथोत्प्रेक्षामलंकारद्वयं विदुः ।
संख्यानमिति मेधाविनोत्प्रेक्षाभिहिता क्वचित् ॥ ८८ ॥

४भूयसामुपदिष्टानामर्थानामसधर्मणाम् ।
क्रमशो योऽनुनिर्देशो यथासङ्ख्यं तदुच्यते ॥ ८९ ॥

पद्मेन्दुभृङ्गमातङ्गपुंस्कोकिलकलापिनः ।
वक्त्रकान्तीक्षणगतिवाणीवालैस्त्वया जिताः ॥ ९० ॥

५अविवक्षितसामान्या किंचिच्चोपमया सह ।
अतद्गुणक्रियायोगादुत्प्रेक्षातिशयान्विता ॥ ९१ ॥

---

१ Found, quoted with the name of भामह in ध्वन्यालोक pp. 207-8 (V. l. सर्वत्र for सर्वैव. सर्वैव however seems to be the reading of अभिनवगुप्त. *Vide* लोचन). Found, quoted also in the काव्यप्रकाश X. (V. l. सर्वत्र). Also quoted by प्रेमचन्द्रतर्कवागीश on काव्यादर्श २।२२० (V. l. सैव सर्वत्र). Also found, quoted by Hemachandra in his ṭikâ on the Kâvyânus'âsana, p. 267 (सैषा सर्वैव).

२ Found, quoted, with भामह's name on काव्यादर्श २।२३५ by प्रेमचन्द्रतर्कवागीश (V. l. सूक्ष्मलेशौ च, मताः समुदायाभिधेयस्य).

३ Found, quoted, in हेमचन्द्र's काव्यानुशासन p. 17. Found also quoted without भामह's name in जयमङ्गला on भट्टि X. 45 (V. l. °मादिकं, °मेतां). Also see काव्यादर्श २।२४४ where the first half is found. Also given by मम्मट in the काव्यप्रकाश 7 th उल्लास to indicate varieties of the व्यङ्ग्य according to the nature of the वक्तृ and the बोद्धृ.

४ Quoted without the author's (भामह's) name in the जयमङ्गला on भट्टि X. 43. (V. l. °मुपदिष्टानां क्रियाणामथ कर्मणाम्). उद्भट has the same definition as भामह.

५ Quoted, without भामह's name in the जयमङ्गला on भट्टि X. 44. (V. l. °सामान्यात, °क्रियारोपादुत्प्रेक्षा).

१किंशुकव्यपदेशेन तरुमारुह्य सर्वतः ।
दग्धादग्धमरण्यान्याः पश्यतीव विभावसुः ॥ ९२ ॥
२स्वभावोक्तिरलंकार इति केचित् प्रचक्षते ।
अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा ॥ ९३ ॥
आक्रोशन्नाह्वयन्नन्यानाधावन् मण्डले रुदन् ।
गा वारयति दण्डेन डिम्भः सस्यावतारणीः ॥ ९४ ॥
समासेनोदितमिदं धीखेदायैव विस्तरः ।
असंगृहीतमप्यन्यदभ्यूह्यमनया दिशा ॥ ९५ ॥
स्वयंकृतैरेव निदर्शनैरयं
मया प्रक्लृप्ता खलु वागलंकृतिः ।
अतः परं चारुरनेकधापरो
गिरामलंकारविधिर्विधास्यते ॥ ९६ ॥
इति भामहालंकारे द्वितीयः परिच्छेदः ।

अथ तृतीयः परिच्छेदः ।

प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम् ।
द्विप्रकारमुदात्तं च भेदैः श्लिष्टमपि त्रिभिः ॥ १ ॥
अपह्नुतिं विशेषोक्तिं विशेषं तुल्ययोगिताम् ।
अप्रस्तुतप्रशंसां च व्याजस्तुतिनिदर्शने ॥ २ ॥
उपमारूपकं चान्यदुपमेयोपमामपि ।
सहोक्तिपरिवृत्ती च ससन्देहमनन्वयम् ॥ ३ ॥
उत्प्रेक्षावयवं चान्ये संसृष्टमपि चापरे ।
भाविकत्वं च निजगुरलंकारं सुमेधसः ॥ ४ ॥
प्रेयो गृहागतं कृष्णमवादीद्विदुरो यथा ।
३अद्य या मम गोविन्द जाता त्वयि गृहागते ॥
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः ॥ ५ ॥
४रसवद्दर्शितस्पष्टशृङ्गारादिरसं यथा ।
देवी समागमद्धर्ममस्करिण्यतिरोहिता ॥ ६ ॥

---

१ Found, quoted with भामह's name, by वल्लभ in सुभाषितावली (No. 1546 °मरण्यान्यां). Also found in Bhoja's Sarasvatîkaṇṭhâbharaṇa in the Utprekshâprakaraṇa as an instance of Utprekshopamâ.

२ Found, quoted, without भामह's name in the जयमङ्गला on भट्टि X. 45 (V. l. अर्थस्य तादवस्थ्ये च).

३ Found in the Kâvyâdars'a of Daṇḍin 2–276. Also quoted in the चित्रमीमांसा of अप्पय्यदीक्षित without the author's name p. 42.

४ Quoted, without भामह's name in the जयमङ्गला on भट्टि X. 47. (V. l. दर्शितं). Udbhaṭâlaṅkârasârasaṅgraha has रसवद्दर्शितस्पष्टशृङ्गारादिरसोदयम् । स्वशब्दस्थायिसंचारिविभावाभिनयास्पदम् ॥

ऊर्जस्वि कर्णेन यथा पार्थाय पुनरागतः ।
द्विः संदधाति किं कर्णः शल्येत्यहिरपाकृतः ॥ ७ ॥
१पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।
